Console, *v. t.* आ-समा-श्वस् c., सां(शां)त्व् 10, विनुद् c., अभ्युपपद् 4 A, (रतिमभ्युपपत्तुमातुरां K. iv. 25). 2 शोकमपहृ 1 P, सुस्थ-प्रकृतिस्थ-*a.* कृ 8 U. **–ation,** *s.* आश्वासः-सनं, सांत्वनं, विनोदनं, समाश्वासनं. **–atory,** *a.* सांत्वनशील, आश्वासिन्, शोकापहारक, शांतिद, सुखावह. **–er,** *s.* आश्वासकः, विनोदकः.

Consolidate, *v. t.* संहन् 2 P, एकीकृ 8 U, घनीकृ, संस्था c. (स्थापयति). **–v. i.** घनीभू, स्थिरीभू, संहन् pass **–ion,** *s.* घनीकरणं-

भवनं, संहति *f.*, संस्थापनं, समाहरणं, एकीकरणं.

Consonant, *s.* व्यंजनं ; 'conjunct c.' संयोगः, योगः. —*a.* अविरुद्ध, अनुसारिन्, अनुरूप, योग्य, अनुगुण. —ly, *adv.* अनुसारेण, अनुरूपं. —Consonance, *s.* अविरोधः, अनुसारः, अनुरोधः, आनुरूप्यं.

Consonous, *a.* एकताल, एकस्वर.

Consort, *s.* Husband or wife, q. v. 2 सहवासिन् *m.*, संगिन् *m.* —*v. i.* सह वस् or चर् 1 P; संगम् 1 A, संयुज् pass.; 'well c. ed' सुसंगत. —ion, *s.* साहित्यं, साहचर्यं, संसर्गः.

Conspectus, *s.* सारपत्रं; संक्षिप्तलेखः.

Conspicuous, *a.* व्यक्त, सुप्रकाश, सुस्पष्ट, पुरःस्फुरत् (ती-न्ती *f.*), प्रत्यक्ष. 2 उत्कृष्ट, निरतिशय, प्रमुख, विशिष्ट. —ly, *adv.* स्पष्टं, व्यक्तं; विशिष्टतया. —ness, *s.* व्यक्तता, स्पष्टता, विशिष्टता, उत्कृष्टता.

Conspire, *v. i.* उपजप् 1 P, कूटं रच् 10, कुसाहित्यं कृ 8 U, कूटार्थं संशप् 1 U. 2 संमिल् 6 P, अनुकूल *a.* भू; "all things c.-ed to make him happy' सर्वं तस्य सुखायाकल्पत-अभवत्. —acy, *s.* उपजापः, कपटप्रबंधः, कुसाहित्यं, कुमंत्रणा; 'c. against the king' राजद्रोहः, द्रोहः. —ator, *s.* उपजापकः, कुसंसर्गिन् *m.*: संशप्तकः, शपथबद्धः. 2 राजद्रोहिन् *m.* 3 विश्वासघातकः.

Constable, *s.* दंड-यष्टि-धरः; राजपुरुषः.

Constant, *a.* स्थिर, दृढ, अचल, निश्चल. 2 शाश्वत (ती *f.*), सतत, प्रसक्त, अविरत, अनवरत, नित्य, सनातन (नी *f.*), निरंतर; 'c. wife' सती, पतिव्रता. —ly, *adv.* सततं, अनवरतं, अविरतं, अभीक्ष्णं, नित्यं, अनिशं, अजस्रं, सर्वदा, सर्वकालं. —Constancy, *s.* स्थैर्यं, स्थिरता, निश्चलता, दृढता. 2 अभिनिवेशः, निर्बंधः. 3 सातत्यं, अविरामः, नैरंतर्यं 4 दृढा भक्तिः, दृढसौहृदं.

Constellation, *s.* राशिः, राशिनक्षत्रं; तारासमूहः, भगणः.

Consternation, *s.* संत्रासः, भीति *f.*, व्याकुलत्वं, साध्वसं, उद्वेगः, संभ्रमः.

Constipate, *v. t.* अवरुध् 7 U, अवष्टंभ् 9 P, बंध् 9 P, पिनह् 4 P. 2 निबिडीकृ 8 U. —ion, *s.* मलावरोधः, मलावष्टंभः, विड्ग्रहः, शुद्ग्रहः, बद्धकोष्ठः.

Constitute, *v. t.* रच् 10, निर्मा 3 A, विधा 3 U; gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp., or by भू 1 P, अस् 2 P; 'we c. thy army' तव सैन्यं वयं स्मः; 'what c. s greatness' महिमा केन जायते; *See* Compose. 2 संस्था c. (स्थापयति), प्रतिष्ठा c.; नियुज् 7 A. 10, समादिश् 6 P. —ion, *s.* रचना, घटना, निर्माणं. 2 अवस्था, दशा, रूपं, वृत्ति *f.*; भावः. 3 व्यवस्था; विधियंत्रणं, नियमः. 4 राजनीति *f.*, राज्यव्यवस्था. 5 प्रकृति *f.*, स्वभावः, शरीरावस्था; जन्मप्रकृति-स्वभावः; 'of a sickly c.' जन्मरोगिन्, अशक्त, प्रकृतिदुर्बल. —ional, *a.* विध्यनुसारिन्, व्यवस्थानुरूप. 2 प्रकृति in comp. —ionally, *adv.* विध्यनुसारेण, व्यवस्थानुपूर्वं. —Constituent, *a.* घटक, रचक; 'c. parts' घटकावयवाः, घटकाः, अंगानि. 2 वास्तव (वी *f.*), सारभूत; 'c. members of a state' राज्यांगानि. —*s.* Ex. by *a.* 2 नियोजकः.

Constrain, *v. t.* बलात्कृ c., प्रवृत् c., प्रेर् c.; gen. ex. by causal of verbs; *See* Compel. 2 नि-अव-रुध् 7 U, नियंत्र् 10, नि-सं-यम् 1 P; 'c. ed silence' बलाद्धृतं मौनं; 'c. ed to be silent' नियंत्रितवाक्, यंत्रितकथ. —Constraint, *s.* बलं, बलात्कारः; 'by c.' बलात्, बलेन, अनिच्छत् *a.*, प्रसह्य. 2 आवश्यकता. 3 यंत्रणा, निरोधः, अवरोधः; 'c. of modesty' ह्रीयंत्रणा.

Constrict, *v. t.* संकुच् 1 P, आकुंच् c., संहृ 1 P. —ion, *s.* संकोचः, आकुंचनं, संहरणं.

Constringe, *v. t.* *See* Constrict.

Construct, *v. t.* निर्मा 3 A, 2 P, or c. (मापयति), रच् 10, विधा 3 U, घट् c. (घटयति), प्रक्लृप् c., कृ 8 U. —ion, *s.* रचना, निर्माणं, विधानं, &c. 2 अन्वयः, संबंधः, पदयोजना-नं. 3 अर्थः, आशयः; 'do not put a bad c. upon his words' तस्य वचसि दुराशयं मा कल्पय-आरोपय. —ive, *a.* निर्मातृ, प्रकल्पक, निर्माण or विधान in comp.; निर्माणचातुर्यं 'c. skill' &c.

Construe, *v. t.* अन्वयं कथ् 10, अर्थं व्याख्या 2 P, युज् 10; तत्परतयैव वेदांतवाक्यानि योजयंति (S. B. 91) 'c. as referring to it'; 'to be c. ed' संबंध् pass., (इदं पदमेवं न संबध्यते).

Constupration, *s.* कन्यादूषणं, धर्षणं, बलात्काराभिगमः.

Consubstantial, *a.* एकशरीर, एकमूर्ति.

Consult, *v.* संमंत्र् 10 A, संवद् 1 P or c., संभाष् 1 A. 2 विमृश् 6 P, चिंत् 10, विचर् c.; 'you must c. public good also' जनहितमपि तावत् त्वया मनसि कार्यमेव-अवेक्षणीयं; 'do not c. your private good' स्वहितपरायणो मा भूः; 'let astrologers be c. ed' सांवत्सरिकैः संवाद्यताम्; 'you have given this order, having c. ed (with) my very heart' मम हृदयेन सह संमंत्र्यादिष्टवानसि (Mu. 1); 'c. with oneself' मनसा विचर् c., आत्मगतं चिंत्. 3 निरूप् 10, समीक्ष् 1 A, आ-परि-लोच् 10; 'in c.

ing a horoscope' जन्मपत्रिकां विमृशन्, पत्रिकावलोकनेन शुभाशुभं पर्यालोचयन्. -ation, s. मंत्रणा-णं, विचारणं; विमर्शः, विचारः; आलोचनं, संवादः; 'private c.' गूढमंत्रणं. -ative, a. संमंत्र्य; मंत्रणयोग्य.

Consume, v. t. क्षै c. (क्षपयति), विनश् c. 'c. by fire' निर्दह् 1 P. 2 उपयुज् 7 A; 10, उपयुज्य-उपभुज्य-निरवशेषीकृ 8 U. -v. i. क्षि pass., नश् 4 P, अवसद् 1 P, परिहा pass. -er, s. नाशकः; विनियोजकः. -**Consumption**, s. क्षयः, शोषः, यक्ष्मन् m. 2 नाशः, क्षयः, अवसादः. 3 उपयोगः, उपभोगः, व्ययः, विनियोगः. -**Consumptive**, a. क्षयिन्-क्षयरोगिन्.

Consummate, v. t. समाप् c.: *See* **Complete**. -a. संपूर्ण, निखिल, अन्यून. 2 परम, उत्कृष्ट, अग्रणीः; 'a c. rogue' शठाग्रणीः. -ion, s. समापनं, निष्पत्ति f., सिद्धि f. 2 उत्कर्षः, परमा गतिः.

Contact, s. सं-,स्पर्शः, संपर्कः, संसर्गः, संयोगः, आसंगः, व्यतिकरः, परामर्शः; 'in close bodily c.' अंगांगि *ind*.

Contagion, s. स्पर्शः, स्पर्शसंचारः. -**Contagious**, a. स्पर्शजन्य, स्पर्शसंचारिन्, संस्पर्शज, संपर्कीय; 'a c. disease' मारी.

Contain, v. t. धृ 1 P, 10. आदा 3 A, परिग्रह् 9 P, धा 3 U, भृ 3 U.; 'c. ing' ex. by धर-धारिन्-भृत् in comp.; 'c. ing water' तोयभृत्; oft. ex. by गर्भ, पूर्ण, आत्मक in comp.; अंबुगर्भः मेघः, शुकगर्भं कोटरं; अमृतपूर्णं पात्रं, &c. 2 निवार् 10, संयम् 1 P, निग्रह् 9 P; 'he could not c. his great joy' गुरुः प्रहर्षः प्रबभूव नात्मनि (R. III. 17). -ed, a. धृत, अंतर्गत, अंतर्भूत, अंतर्गणित; वर्तिन्, स्थ in comp. -er, s. आधारः, धारिन्-भृत् in comp.; 'the relation between c. and contained' आधाराधेयभावः.

Contaminate, v. t. दुष् c. (दूषयति), लिप् 6 P, कलंकयति-मलिनयति (D.). -ed, a. भ्रष्ट, दूषित, कलंकित, अपवित्र. -ion, s. दूषणं, कलंकः; अशौचं, भ्रष्टता, भ्रंशकारणं.

Contemn, v. t. अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10 A. तिरस्कृ 8 U, अवगण् 10. न आदृ 6 A. उपेक्ष् 1 A. लघूकृ, तृणाय मन्, परिभू 1 P. -er, s. अवमंतृ m., तिरस्कर्तृ m. -**Contempt**, s. अवज्ञा, अवमानः-मानना, अवधीरणा, तिरस्कारः, अवगणना, अनादरः, परिभवः, उपेक्षा, अवहेलनं-ना. -ible, a. अवमंतव्य, तिरस्कार्य. 2 क्षुद्र, निकृष्ट, नीच; 'to make oneself c.' आत्मानं तिरस्कारास्पदं कृ, अवज्ञाभाजनं भू. -uous, a. अवमानिन्, उपेक्षक, परिभाविन्, परिभावुक (की f.); सावज्ञ, सावमान. -uously, *adv*. सावज्ञं, सावमानं, उपेक्षया, सतिरस्कारं.

Contemplate, v. चिंत् 10; ध्यै 1 P; मनसा विचर् c., विमृश् 6 P. 2 निरूप् 10, निर्वर्ण् 10. अवेक्ष् 1 A, संदृश् 1 A. आलोच् 10, आलोक् 1 A, 10. 3 संकल्प् c., भू c. -ion, s. ध्यानं, चिंता, भावना, आलोचनं, विचारणा, विमर्शः; 'to be or have in c.' अभिप्र-इ 2 P, उद्दिश् 6 P. -ive, a. ध्यानपर, चिंताशील, & sim. comp.; भावितात्मन्, चिंताविष्ट, समाधिस्थ. -or, s. ध्यातृ m.

Contemporary, a. or s. समकालीन, एककालीन, समानकालः.

Contend, v. i. संयत् 1 A, विग्रह् 9 P. कलहायते (D.), विरुध् 7 U, प्रतिकृ 8 U, विवद् 1 A, युध् 4 A. स्पर्ध् 1 A. 2 वाग्युद्धं कृ, प्रत्यवस्था 1 A, (अत्रापरे प्रत्यवतिष्ठंते S. B. 57). 3 यत्-चेष्ट् 1 A. -er, s. विपक्षः, प्रतियोद्धृ m., विवादिन् m., प्रतियोगिन् m., प्रतिपक्षः. -ing, a. विरोधिन्, विवदमान, कलहशील. -**Contention**, s. विवादः, विग्रहः, कलहः, कलिः. विप्रतिपत्ति f., वाग्युद्ध; विप्रलापः; 'point (bone) of c.' विवादविषयः-वस्तु n. 2 संघर्षः, स्पर्धा. -**Contentious**, a. कलहप्रिय, विवादिन्, विरोधिन्, कलह-विवादशील.

Content, a. सं-,परि-,तुष्ट, तृप्त, निःस्पृह, वितृष्ण, प्रीत, प्रशांत, हृष्ट; 'to be c.' तुष् 4 P, तृप् 4 P, संपरि-°; 'is c. with even little' स्वल्पकेनापि तुष्यति; 'poor and c. is rich and rich enough' संतोष एव पुरुषस्य परं निधानं. -v. t. तुष् c., तृप् c., सं-परि-°, नंद् c., प्री 9 P; 'c. s the eyes' कृतार्थयति चक्षुः. -s., -ment, s. सं-,परि-,तोषः, तृप्ति f., प्रीति f., अस्पृहा, वितृष्णा, धृति f., कामनिवृत्ति f.; 'water to the heart's c.' प्रकामजलं. 2 (c. s) घनफलं (गोलस्य); पूरकं, अंतर्गतं; 'c. s of a letter' लेखार्थः; 'if so, I shall know its c. s' तेन ह्यस्य गृहीतार्था भवामि (V. 2): 'table of c. s' सूचीपत्रं, अनुक्रमणिका. -ed, a. तुष्ट, तृप्त, प्रीत, &c.; 'keep c.' अनुरंज् c., प्री 9 P. -edly, *adv*. प्रीत्या, संतोषेण, तुष्ट्या.

Conterminous, a. सीमावासिन्, समीप-निकट-वर्तिन्, पर्यंतस्थ.

Conterraneous, a. एकदेशज, सदेशज.

Contest, v. i. युध् 4 A, विवद् 1 A. -v. t. प्रतिकूलयति (D.), प्रति-वि-रुध् 7 U: *See* **Contend**. -s. कलहः, कलिः, विवादः. वाग्युद्धं, विप्रलापः, विप्रतिपत्ति f., 'subject of c.' वादबीजं, विवादास्पदं, वादविषयः. -ed, a. वादग्रस्त, वादविषयीभूत; 'un-c. possession' अपरवोज्झिता भोगः (V. M. 11).

Context, s. अन्वयः, संदर्भः, संबंधः, प्रकरणं (S. B.); प्राज्ञस्यादि प्रकरणं वर्तते &c. -a

साश्लिष्ट, संधित, संयुक्त. -ure, s. संस्थिति, f., विन्यासः.

Contiguity, s. संनिकर्षः, सन्निधिः, सन्निधानं, समीपता, नैकट्यं. -**Contiguous**, a. सन्निकृष्ट, समीप. सन्निहित, संलग्न, आसन्न, समीपस्थ, समीप-निकट-वर्तिन्; 'c. ground' पर्यंतभूमि f., परिसरः. -ly, adv. समीपं-पे, संनिकृष्टं, परिसरे.

Continent, a. जितेंद्रिय, संयत, संयमिन्, यतमैथुन, ऊर्ध्वरेतस्, निवृत्तकाम, वशिन्, दांत. 2 परिमित. -s. वर्षः-र्षं ; 'c. of India' भरतवर्षः ; महाद्वीपः-पं. -al, a. महाद्वीपीय, वर्षीय. -**Continence**, s. संयमः, इंद्रियनिग्रहः, दमः, जितेंद्रियत्वं, वशित्वं.

Contingency, s. दैवयोगः-घटनं, दैवं, यदृच्छा, 2 अतर्कितोपनतः वृत्तांतः ; oft. ex. by words for 'doubtful' q. v. -**Contingent**, a. अनिश्चित, संदिग्ध, दैवायत्त, दैववश, आगंतुक-आपातिक (की f.); अतर्कितोपनत, असमर्थितोपनत. -s. भागः, अंशः. 2 सैन्यदलं. -ly, adv. दैवात्, दैववशात्, यदृच्छया, अतर्कितं.

Continue, v. t. प्रवृत् c., प्रसंज् c., प्रस्तु 2 U or c., निर्वह् c. 2 प्रतन् 8 U, दीर्घीकृ 8 U. -v. i. प्रवृत् 1 A; gen. ex. by आस् 2 A, स्था 1 P, with present part. or not 'cease' q. v.; 'he c. ed to quarrel' कलहं कुर्वन्नास्त, कलहं कुर्वन्न व्यरमत्. -al, -ous, a. प्रसक्त, निरंतर, अविरत, अविच्छिन्न, संतत, सतत, नित्य, सनातन, अश्रांत; 'a c. story' कथाप्रबंधः. -ally, -ously, adv. नित्यं, सर्वदा, सततं, अनवरतं, अविश्रांतं, &c. -ance, -ation, -ity, s. प्रबंधः, प्रसक्ति f., अविरामः, अविच्छेदः, सातत्यं, संतानं, अनुबंधः ; 'c. of sorrow' शोकानुबंधः; 'c. in life' स्थिति f., अवस्थानं, जीवितं ; 'continuation (of a story)' शेषः, उत्तरभागः-खंडः, परिशेषः ; श्रेणी, अनुक्रमः. -ator, s. प्रवर्तकः, निर्वाहकः, उत्तरसाधकः.

Contort, v. t. आकुंच् c., वक्रीकृ 8 U, कुटिलीकृ ; 'having the features c. ed' विकृताकारः. -ion, s. आकुंचनं, वक्रता, वैरूप्यं, विकृति f.

Contour, s. आकारः, रूपं. 2 परि(री)णाहः, परिधिः ; 'covering the c. s of the breasts' स्तनयुगपरिणाहाच्छादिन् (S I).

Contraband, a. नि-प्रति-षिद्ध ; धर्मविरुद्ध.

Contract, v. t. संकुच् 1 P. संकोचनी 1 P, आकुंच् c.; संहृ 1 P, समाकृष् 1 P, संक्षिप् 6 P, संपीड् 10, ह्रस् ; 'the body being c. ed through fear' भयसंपिंडितांगत्वात् (Ka. 34); 'c. ing the eye' अक्षिसंकोचेन. 2 अधिगम् 1 P, उपगम्; 'I c. ed friendship with him' तेन सह मित्रत्वं उपगतः, सख्यमबध्नां; 'c. acquaintance' परिचयं कृ; 'c. debt' ऋणं कृ, ऋणग्रस्त a. भू; 'c. a disease' व्याधिना अभिभू pass.; 'c. marriage' विवाहं कृ, दारान्परिग्रह् 9 P. -v. i. आ-सं-कुच् pass., संकोचं, या-इ-गम्, संहृ-संपीड्-संक्षिप् pass. 2 समयं कृ 8 U, पणं-संविदं कृ, प्रतिपद् 4 A, संविद् 2 P. -s. समय, संविद् f., नियमः, पणः, अभ्युपगमः; 'written c.' नियमपत्रं; 'a sale c.' क्रयपत्रं; 'marriage c.' वाग्दानं, वाङ्निश्चयः. -ed, a. आकुंचित, संक्षिप्त, संहृत, संपिंडित. 2 संकट, निरायत, संबाध. -ion, s. संकोचः-चनं, आकुंचनं, समाकर्षः, संपीडनं, संवृत्ति f. 2 संक्षेपः-पणं. -or, s. कृतसंविद् m., नियमकृत् m., पणकर्तृ m.

Contradict, v. t. विरुध् 7 U. प्रति-नि-षिध्, 1 P, प्रत्याख्या 2 P, पराहन् 2 P, प्रतीपायते (D.); 'c. oneself' विप्रवद् 1 U, विसंवद् 1 P. -ion, s. विरोधः, प्रतिषेधः, प्रत्याख्यानं, विपक्षता, प्रतिबंधः, प्रतिकूलता. 2 प्रतिवादः, वचनविरोधः. 3 विप्रलापः. विरोधोक्ति f. 4 असंगति f., विसंवादः, विरुद्धता. -ory, a. विरुद्ध, विरोधिन्, विपरीत, विरुद्धार्थ, प्रतीप, विसंवादिन्; परस्परविरुद्ध-विरोधिन्. 2 परस्परपराहत, संकुल, क्लिष्ट.

Contradistinguish, v. t. विरुद्धगुणैः विशिष् 7 P, or c. -**Contradistinction**, s. विपरीतता, व्यतिरेकः, विपक्षता.

Contraposition, s. संमुखस्थिति f.; प्रतिष्ठापनं.

Contrary, a. (in direction) संमुखागत, प्रतीप; gen. ex. by प्रति pr.; 'c. wind' प्रतिवातः, प्रतीपपवनः. 2 प्रतिकूलं, विरोधिन्, प्रति-वि-लोम, प्रतीप, विपरीत, विरुद्ध, विपक्ष, वैरिन् ; oft. by इतर in comp.; 'the c. of true' सत्येतर. -s. विपर्ययः, विपरीतं, विपर्यासः, व्यतिक्रमः. 2 प्रतिपक्षः, 'c.-wise,' 'on the c.' प्रत्युत, पुनः, परंतु; 'to the c.' विपरीततया. -adv. -ly, -adv. विपरीतं, विरुद्धं, प्रतिकूलं; 'c. to usage' आचारविरुद्धं, &c. -**Contrariety**, s. वैपरीत्यं, विरोधः, विपर्ययः, प्रतिकूलता, विपक्षता, व्यत्ययः, व्यतिक्रमः.

Contrast, v. t. अंतरं-भेदं-दृश् c. or वर्ण् 10, परस्परविपर्ययेण उपमा 3 A. -v. i. विपर्यस् 4 P; विरुध् pass., विरुद्ध a. भू 1 P. -s. अंतरं, भेदः, विशेषः; oft. by क्व-क्व; क्व कंदमूलफलाशी शांतो मुनिजनः क्वायं रागप्रायः प्रपंचः (Ka. 151). 2 विरोधः, प्रतिपक्षता, व्यतिरेकः, व्यत्ययः, वैलक्षण्यं.

Contravallation, s. परिखा, प्रतिकूपः.

Contravene, v. t. प्रति-वि-रुध् 7 U, व्याहन् 2 P, निषिध् 1 P; *See* Oppose. -**Contravention**, s. व्याघातः, निषेधः, वि-प्रतिरोधः, प्रतिबंधः.

Contretemps, s. उपप्लवः, व्यसनं, अंतरायः, प्रत्यूहः.

Contribute, *v. t.* स्वं स्वं अंशं दा 3 U. 2 (to) उपकृ 8 U, प्रवृत् c., कॢप् 1 A, (with dat.); *See* Conduce. **-ary,** *a.* एक-राजाधीन. 2 प्रवर्धकः, पोषकः. **-ion,** *s.* अंश-भाग-दानं. 2 अंशः, भागः, दत्तांशः, उद्धारः. **-or,** *s.* अंशदातृ *m.* 2 साहाय्यकारिन् *m.*, उपकर्तृ *m.*, प्रवर्धकः.

Contrite, *a.* अनुशोकार्त, अनुशयपीडित, जातानुताप. **-ion,** *s.* पश्चात्तापः, अनुशयः, अनुतापः. **-ly,** *adv.* सानुशयं.

Contrive, *v. t.* चिंत् 10, निश्चि 5 U, निर्णी 1 P, उन्नू c., कॢप् c., युज् 7 U, 10, निरूप् 10, घट् c. (घटयति), संप्रधृ 10, विधा 3 U. **-v. i.** उपायं चिंत्, उपायं युज्. **-ance,** *s.* उपायः, प्रयुक्ति *f.*, साधनं, कल्पना, योजना, अप-व्यप-देशः, उपायचिंतनं, क्लृप्ति *f.* **-er,** *s.* उपायज्ञः, उपायचिंतकः.

Control, *v. t.* यम् 1 P, सं-नि-°, दम् c. (दमयति), वशं नी 1 P, जि 1 P, आवृ 5 U, वशीकृ 8 U, नि-विनि-ग्रह् 9 P, (passions &c.); निरुध् 7 U. 2 शास् 2 P. ईश् 2 A, (gen.); कथंचिदीशा मनसां बभूवुः (K. III. 34); 'could hardly c. their mind'; नियंत्र् 10; 'un-c. ed speech' अनियंत्रिता वाणी; 'un-c. ed weeping' निरर्गलाः प्रलापाः; 'with passions c. ed' जितेंद्रियः, संयमी, वशी. **-s.** संयमः, निग्रहः, निरोधः, नियंत्रणा, दमनं, 'self-c.' आत्मसंयमः, निग्रहः, इंद्रियजयः, वशित्वं. 2 अधिकारः, वशः, प्रभुत्वं; 'under the king's c.' राजाधीन, नृपायत्त; 'mental c.' अंतर्यमनं, मनोदंडः. **-ler,** *s.* शास्तृ *m.*, अध्यक्षः, अधिकारिन् *m.*, अधिष्ठातृ *m.*, ईशः, प्रभुः.

Controversy, *s.* वादः, विचारः, विवादः, वादानुवादः, विप्रतिपत्ति *f.*, वितर्कः, वादयुद्धं, हेतुवादः. **-al,** *a.* विवादसंबंधिन्, वितर्किन्, (*s.*) in comp. **-alist,** *s.* वादिन् *m.*, तार्किन् *m.*, तार्किकः.

Controvert, *v. t.* प्रत्याख्या 2 P, अधरीकृ 8 U, निरस् 4 U, निराकृ, खंड् 10. 2 विवद् 1 A, विवद् c. **-ed,** *a.* वादग्रस्त, विवादविषयीभूत. **-ist,** *s.* वादिन् *m.*, नैयायिकः, विवादकृत् *m.*, तार्किकः.

Contumacious, *a.* धृष्ट, दुर्विनीत; दृप्त, सगर्व. 2 प्रतीप, प्रतिकूल, दुःशील. **-ly,** *adv.* सदर्पं, धृष्टतया. **-Contumacy,** *s.* धृष्टता, दुर्विनीतता; प्रतीपता, दुःशीलता.

Contumely, *s.* अवज्ञा, निष्ठुर-परुष-वचनं, निष्ठुरता, निंदा, तिरस्कारः, अवमानना. **-ous,** *a.* परुष, निष्ठुर, निंदक, अवमानिन्. 2 सावज्ञ.

Contuse, *v. t.* मृद् 9 P, क्षुद् 7 U, पिष् 7 P, क्षण् 8 P, चूर्ण् 10. **-ion,** *s.* मर्दनं, निष्पेषः, क्षतं.

Conundrum, *s.* प्रहेलिका, प्रवह्लिका.

Convalescence, *s.* स्वास्थ्यं, निरामयः, रोगोपशमः, प्रकृतिलाभः. **-Convalescent,** *a.* निरामय, वीतरोग, प्रकृतिस्थ, नीरुज.

Convene, *v. t.* समाह्वे 1 P, साह्वानं एकत्र कृ 8 U, समानी 1 P; *See* Assemble. **-v. i.** संमिल् 6 P, सं-इ 2 P, एकत्र भू.

Convenience, *s.* सुखं, सोपकारत्वं, सुस्थता. 2 योग्यता, पात्रता; उचितसाधनं. 3 अवसरः, अवकाशः; 'in c. ed by the shutting of the lotus' अंभोजविनिमीलनदुःस्थितः (Rat. 2); 'when it suits your c.' यथावसरं, अवसरं प्राप्य, कार्यांतरांतरायमंतरेण. **-Convenient,** *a.* सुखकारक; उचित, अनुकूल, उपयुक्त; 'c. building' उचितसाधनयुक्तं भवनं; उपपन्न, यथाकाम, यथारुचि, यथोचित. **-ly,** *adv.* युक्तं, यथासुखं, यथावकाशं, यथावसरं; 'when may I c. ly see you' अन्यकार्यनिपातमंतरेण-कार्यांतराविरोधेन-भवान् कदा मया द्रष्टव्यः.

Convent, *s.* मठः, विहारः.

Conventicle, *s.* सभा, समाजः, मंडलकः. 2 गूढसभा.

Convention, *s.* समयः, संविद् *f.*, नियमः, संकेतः. 2 सभा, संसद् *f.* 3 रूढि *f.*, लोकसंमति *f.*, आचारः. **-al,** *a.* लौकिक (की *f.*), लोकसंमत, निरूढ, रूढ, सांकेतिक (की *f.*); 'c. usage' जनरूढिः, लोकाचारः. **-alism,** *s.* रूढि *f.*, आचारविधि, *m.*

Converge, *n. v.* संनि-नि-पत् 1 P, एकस्थानं-एककेंद्रं-प्रतियात 2 P, (with loc.), पंथानः सिद्धिहेतवस्त्वय्येव निपतंति (R. x. 26); 'c. to thee alone.' **-ence,** *s.* समवायः, संनिपातः **-ent,** *a.* एककेंद्राभिमुख (खी *f.*), संनिपातिन्.

Converse, *v. i.* सं-आ-लप् 1 P, संभाष् 1 A, संवद् 1 P, संवच् 2 P. 2 संसर्गं कृ 8 U, संवस् 1 P. संगम् 1 A, संव्यवहृ 1 P. **-s.** संलापः, संकथा, संभाषणं, संवादः. 2 संसर्गः, व्यवहारः, संगमः. 3 विपर्ययः, विपरीतं, व्यत्यासः, व्यतिक्रमः. **-ant,** *a.* निपुण, चतुर, कुशल, विचक्षण, अभिज्ञ; कोविद, ज्ञ, विद् in comp.; पटु, विशारद; 'c. with law' स्मृतिज्ञः; 'not c. with love matters' अनभ्यंतरे आवां मदनगतस्य वृत्तांतस्य, (S. 3). **-ance, -ancy,** *s.* नैपुण्यं, पाटवं, चातुर्यं, विदग्धता, &c. **-ation,** *s.* आ-सं-लापः; संभाषणं, संकथा, संवादः; कथायोगः, विश्रंभालापः. 2 आचारः, व्यवहारः, वृत्ति *f.* **-ly,** *adv.* विपर्ययेण, व्यतिक्रमेण, व्यत्ययेन, प्रतीपं.

Convert, *v. t.* विकृ 8 U, अन्यथा कृ, परिवृत् c.; oft. ex. by सात्; 'c. to ashes' भस्मसात्कृ; *See* Reduce. 2 स्वधर्मं-पक्षं-मतं त्यज् c. 'to be c. ed' परधर्म-

पक्षं-मतं-ग्रह् 9 P, स्वधर्मं &c. त्यज् 1 P. 3 प्र-उप-विनि-युज् 7 A, 10. 4 पापाद् विरम् c. (रमयति) or निवृत् c., कुमार्गं त्यज् c. —v. i. अन्यथा भू 1 P, भावांतरं या 2 P or प्राप् 5 P. 2 स्वधर्म-पक्षं-मतं-त्यज् 1 P, परधर्मं &c. ग्रह् 9 P, or आश्रि 1 U or अवलंब् 1 A or स्वीकृ. 3 पापाद्विरम् 1 P or निवृत् 1 A —s. परधर्माश्रितः, परपक्ष-मत-अवलंबिन् m., स्वधर्म-पक्ष-मत-त्यागिन् m. —**Conversion**, s. विकारः, विक्रिया, विकृति f., परिवर्तः, विपर्ययः, भावांतरप्रापणं; 'c. to ashes' भस्मसात्करणं, भस्मीभवनं. 2 परधर्माश्रयः, परधर्म-पक्ष-मत-अवलंबनं, स्वधर्म- &c. त्यागः. 3 पापनिवृत्ति f., कुमार्गत्यागः.

Convex, a. न्युब्ज, कूर्मपृष्ठाकार, आभोगवत्. —**ity**, s. न्युब्जता, आभोगः.

Convey, v. t. वह्-नी-हृ- 1 P, गम् c. (गमयति), प्राप् c. संचर् c. 2 ऋ c. (अर्पयति), दा 3 U. 3 (sense) गम् c., प्रतिपद् c., द्युत् c. —**ance**, s. यानं, प्रवहणं, वाहनं, रथः. 2 नयनं, प्रापणं, समर्पणं; 'deed of c.' समर्पणपत्रं, क्रयलेख्यं. —**er**, s. वाहकः, वाहिन् in comp.

Convict, v. t. अपराधं निर्णी 1 P, अपराधिन् a. स्था c. (स्थापयति), आधृष् c. —s., —c., —**ed**, a. निर्णीतापराधः, निश्चितदोषः, आधर्षितः, दृष्टदोषः. —**ion**, s. अपराधस्थापनं, अपराधनिर्णयः, दोषनिश्चयः, आधर्षणं.

Convince, v. t. प्रति-इ c., प्रतीतिं कृ 8 U, उरीकर्तुं आनी 1 P, अभिज्ञा c. (ज्ञापयति); 'he was c.ed of his mistake' स्वभ्रममुद्दिश्य तस्य प्रतीतिः समजनि or अयं भ्रम एवासीदिति तस्य निश्चयो जातः; ताः स्वचारित्र्यमुद्दिश्य प्रत्याययत् मैथिली (R. xv. 73) 'c. them of her purity' 2 संदेहं निराकृ or निरस् 4 U or अपनुद् 6 P. —**ed**, a. जातनिश्चय-प्रत्यय, छिन्न-संशय; 'I am c. that' &c. इति मे निश्चयः, इत्यसंदेहपदं. —**ing**, a. निर्णायक, प्रत्ययजनक, संशयच्छेदिन्, निश्चायक. —**Conviction**, s. विश्वासः, प्रत्ययः, निश्चयः निर्णयः. दृढप्रत्ययः, दृढं मतं.

Convivial, a. उत्सवसंबंधिन्, औत्सविक (की f.); 'a c. party' तुल्यभोजनं, स(सं)प्रीति f.

Convoke, v. t. समाह्वे 1 P, समाहृ 1 P, आह्वानेन एकत्र कृ 8 U. —**Convocation**, s. समाह्वानं, समाह्वानविधिः. 2 सभा, समाजः, संसद् f.

Convolve, v. t. आ-समा-वृत् c.

Convoy, v. t. रक्षणार्थं अनुव्रज्, अनुगम् 1 P. अनु-परि सं-सह-चर् 1 P. —s. पथि रक्षकः, सहचरः, परि-अनु-चरः

Convulse, v. t. सं-वि-क्षुभ् c., कंप् c. 2 आकृष् 1 P, आकुंच् c., अप-तन् c., वि-आक्षिप् 6 P. —**ion**, s. सं-वि-क्षोभः, कंपः. 2 आक्षेपः, अपतानकः, आकर्षः. —**ive**, a. आकर्षक, आक्षेपकर (री f.), विक्षेपिन्; 'c. speech' गद्गदवाच् f., गद्गदः 'in a c. fit' आक्षेपाभिभूत.

Cony, s. शशः, शशकः.

Coo, v. i. कूज् 1 P, कु 2 P. 1 A. पि, रु 2 P.

Cook, v. t. पच् 1 P, श्रा 2 P, or c. (श्रपयति), श्री 9 P; 'c. food' अन्नं संस्कृ 8 U, सिध् c (साधयति), सिद्ध a. कृ; 'c.ing pot' पाकपात्रं, स्थाली; 'c.ed food' ओदनः-नं, सिद्धोदनः, सिद्धमन्नं. —s. पाचकः, सूपकारः, बल्लवः, सूदः. —**ed**, a. पक्व, सिद्ध, शृत, श्राण. —**ery**, पाककला-विद्या; पाकसिद्धि-निष्पत्ति f. 2 पचनं, पाकः. —**room**, s. पाकशाला, महानसः-सं.

Cool, a. शीतल, शीत, शिशिर, शीतस्पर्श, आर्द्र (fig.) सुख, मृदु, सुखस्पर्श, कोमल; अनुष्ण, अतिग्म, (rays). 2 प्रशांत, अनुद्विग्न, धीर, अव्यग्र, असंभ्रांत, अव्याकुल. 3 वीतराग; *See* Cold. —s. शीतं, शीतलता; 'in the c. of evening' प्रशांते-अनुष्णे संध्यासमये. —v. t. शीतलीकृ 8 U, आर्द्रयति (D.), निर्वा c. (वापयति), आर्द्रीकृ, तापं हृ 1 P, अन्यादृश एव तत्र निर्वापयति शरीरस्पर्शः (Mal. 6); शरीरनिर्वापणाय (S. 3). 2 (down) प्र-उप-शम् c. (शमयति), शिथिल् c. 3 शिथिलीकृ, शिथिलयति (D.). —v. i. शीतलीभू 1 P, शीतीभू, शीतलायते (D.); 2 शिथिलीभू, शिथिलायते (D.). 'she will not let her love for you c. down' न सेतोगतमनुरागं शिथिलयति (V. 2). 3 प्र-उप-शम् 4 P, विरम् 1 P. —**ing**, a. तापहर, निर्वापक, शांतिद, शीतल, सुखद. —**ly**, *adv.* असंभ्रमं, शांतचेतसा, अव्यग्रं, शांतं, निरुद्वेगं. 2 प्रकोपनं विना, बुद्धिपुरःसरं. —**ness**, s. शीतलता, आर्द्रता; 'c. of affection' विरागः, विरक्ति f., अनुरागशिथिलता.

Coop, s. भाजनं, काष्ठभांडं. 2 पीतंसः, पंजरः-रं. —v. t. (up) (पंजरे) निरुध् 7 U, बंध् 9 P, संयम् 1 P, नियंत्र् 10.

Co-operate, v. i. संभूय कृ 8 U, साहाय्यं दा 3 U, अन्येन सार्धं प्रयत् 1 A or व्यवसो 4 P, or चेष्ट् 1 A —**ion**, s. सहकारिता, सहोद्योगः, साहाय्यं, संभूय व्यवसायः. —**ive**, a. सहकारिन्, सहोद्योगिन्. —**or**, s. सहकारिन् m., संभूयकारिन् m., सहोद्योगिन् m.

Co-ordinate, v. i. संवद् 1 P. —v. t. क्रमशः संनिधा 3 U, —a. सजातीय.

Coparcener, s. समांशिन् m., संसृष्टः-ष्टिन् m., अंशहरः, रिक्थाधिकारिन् m., दायादः

-Coparcenary, *s.* संसृष्टि *f.*, संसृष्टिता, समांशिता.

Copartner, *s.* समांशिन् *m.* अंशभाज् *m.*, संभूयकारिन् *m.* **-ship**, *s.* समांशिता; संभूय समुत्थानं.

Cope, *v. i.* (with) युध् 4 A, विग्रह् 9 P, विरुध् 7 U, अभिपत् 1 P (with acc.); यंता गजस्याभ्यपतद्गजस्थं (R. vii. 37). 2 स्पर्ध् 1 A, संघृष् 1 P, अभिभू 1 P; *See* **Compete.** -*s.* शिरस्त्राणं, मस्तकाच्छादनं.

Coping, *s.* प्राकारशीर्ष-शृंगं.

Copious, *a.* प्रचुर, भूयिष्ठ, बहु, विपुल, प्रभूत, पुष्कल, भूरि, बहुल. **-ly**, *adv.* बहु, भूरि, बहुशः, प्रचुरं, अति-सु-pr. **-ness**, *s.* बाहुल्यं, प्राचुर्यं, विपुलता, &c.

Copper, *s.* ताम्रं, ताम्रकं, शुल्बं, द्व्यष्टं, वरिष्टं, उदुंबरं; ' c. coin ' पणः ; ' c. plate ' ताम्रपत्रं-पट्टं-पटः; ' c. smith ' ताम्रकारः, ताम्रिकः, ताम्रकुट्टकः, शौल्बिकः. **-y**, *a.* ताम्र (म्री *f.*), ताम्रमय (यी *f.*).

Copperas, *s.* तुत्थं, मलीमसं.

Coppice, Copse, *s.* गुल्मावृतं स्थानं, जंगलं, तरुगहनं.

Copulate, *v. i.* मैथुनं-संगं-कृ 8 U, अभिगम् 1 P, संगम् 1 A. -*v. t.* संयुज् 7 P, 10, संधा 3 U. **-ion**, *s.* मैथुनं, सुरतं, संभोगः, व्यवायः, रतिक्रिया. 2 संसर्गः, संपर्कः, संयोगः. **-ive**, *a.* संयोग-संसर्ग-कारिन्. 2 उभयान्वयिन्.

Copy, *s.* प्रतिलेखः, प्रतिलिपि *f.*, हस्तलेखः, लिपि *f.* 2 मूलं. 3 एकग्रंथः, एकपुस्तकं. 4 अनुकरणं; ' c. right ' मुद्रणस्वामित्वं-स्वत्वं, मुद्रणाधिकारः. -*v. t.* प्रतिलिपिं कृ 8 U, लिख् 6 P. 2 अनुकृ (with gen.). **-er, -ist**, *s.* लिपिक(का)रः, लेखकः, अक्षरचणः, अक्षरचंचुः. 2 अनुकारिन् *m.* 3 शब्दचोरः.

Coquet, *v. i.* विलस् 1 P, विभ्रम् 1, 4 P, हावं-विलासं-कृ 8 U, ललिताभिनयं कृ. **-ry**, *s.* विलासः, विभ्रमः, हावः, लीला, ललिताभिनयः. **-Coquette**, *s.* विलासिनी, विलासवती, कामिनी, लीलावती.

Coral, *s.* विद्रुमः, प्रवालः.

Corban, *s.* ईश्वरार्पणं, उत्सर्गः.

Cord, *s.* रज्जु *f.*, दामन् *n.*, पाशः, शुल्बं, गुणः, सूत्रं, वटी. -*v. t.* रज्ज्वा बंध् 9 P, or यंत्र् 10. **-age**, *s.* रज्ज्वादिसामग्री. **-ed**, *a.* पाशरज्जु-बद्ध.

Cordial, *a.* दीपक, अग्निवर्द्धक; धातुपोषक. 2 दृढसौहृद, गाढपरिचय, सुशील (of persons) दृढ, गाढ, घन. -*s.* अग्निवर्धनं; रुचकं, दीपकं. **-ity**, *s.* सौहार्द, सुशीलता, सौजन्यं, मित्रभावः, मैत्र्यं, सख्यं. **-ly**, *adv.* सौहार्देन, सुशीलवत्.

Cordon, *s.* आगमनिर्गमप्रतिबंधः.

Core, *s.* अंतरं, गर्भः, अंतर्भागः, हृदयं.

Coriander, *s.* धानी, धानेयः. 2 (seed) छत्रा, धान्यकं, वितुन्नकं, कुस्तुंबरु *n.*

Cork, *s.* पिधानं, कूपीछिद्रपिधानं.

Cormorant, *s.* घस्मरः, औदरिकः, कुक्षिंभरिः, गृध्नुः.

Corn, *s.* धान्यं; ' growing c. ' शस्यं. 2 किणः, कदरः. 3 अन्नं, आहारः, जीवनसाधनं; ' c. mill ' धान्यपेषणी. **-y**, *a.* शृंगवत्.

Cornea, *s.* शुक्लमंडलं.

Corner, *s.* कोणः; अस्रः; ' c. of the eye ' अपांगः-गं, नयनोपांतः; ' c. of the mouth ' सृक्कन् *n.* 2 विविक्तस्थानं, निर्जनदेशः; ' c. stone ' प्रधान-कोण-प्रस्तरः; ' c. wise ' कोणाकोणि, अस्रास्रि.

Cornet, *s.* आश्विकनायकः. 2 आवेष्टनं, कोशः-षः.

Cornice, *s.* प्राकारशीर्ष-शृंगं.

Cornuted, *a.* (man) बंधकीभार्यः.

Corollary, *s.* अनुमानं; अपवादः, उपसिद्धांतः, उपलक्ष्यः.

Corona, *s.* रविप्रभितः-तेजोमंडलं-मुकुटाकारं.

Coronal, *s.* मुकुटं, किरीटः.

Coronation, *s.* अभिषेकः, राज्याभिषेकः.

Coroner, *s.* अपमृत्युकारणनिरूपकः.

Coronet, *s.* मुकुटं, किरीटः.

Corporal, *a.* कायिक-शारीरिक-दैहिक (की *f.*), शारीर (री *f.*); ' c. punishment ' देह-शरीर-दंडः. -*s.* सेनाधिकृतः पुरुषः. **-ity**, *s.* देहवत्त्वं, शरीरवत्ता. **-ly**, *adv.* शरीरेण, देहतः.

Corporate, *a.* कृतसंसर्ग, संभूयकारिन्, संघातवत्, संसृष्ट. **-ion**, *s.* ' a c. body ' श्रेणि-णी *f.*, समाजः.

Corporeal, *a.* देहिन्, शरीरिन्, वपुष्मत्, सदेह, सशरीर.

Corps, *s.* अनीकं, सैन्यदलं-गुल्मः, वृंदः.

Corpse, *s.* शवः-वं, कुणपः, प्रेतं, मृतशरीरं.

Corpulent, *a.* स्थूल, स्थूलकाय, पीन, पीवर, मेदस्विन्, मांसल; ' having a c. belly ' तुंदिन्, तुंदवत्, तुंदिल, बृहत्कुक्षि, पिचंडिल. **-Corpulence**, *s.* पीनता, स्थूलता, मेदस्विता, पृथूदरता.

Corpuscle, *s.* अणुः, कणः, लवः, लेशः.

Correct, *v. t.* वि-परि-सं-शुध् c.; निर्दोषं *a.* कृ 8 U, प्रतिसमा-समा-धा 3 U; ' instantly c. ing himself ' सपदि स्ववशः समादधत् ; प्रमृज् 2 P; ' c. one's bad conduct ' पापाद्विवृत् 1 A, कुमार्गं त्यज् 1 P. 2 अनुशास् 2 P, दंड् 10. 3 प्रतिकृ, अपा-निरा-कृ. -*a.* शुद्ध, निर्दोष, अभ्रांत. 2 सत्य, तथ्य, यथार्थ, अवितथ, यथातथ; ' c. in conduct ' साधुवृत्त, निर्दोषाचरण. **-ion**, *s.* शोधनं, शुद्धि *f.*; समाधानं. 2 शासनं, दंडः-डनं, निग्रहः. **-ive**, *a.* शोधक. 2 प्रतिक- कृ, अपह-हर-in comp. -*s.* प्रतिकारः, समा[illegible]. **-ly**, *adv.*

शुद्धं, निर्दोषं. 2 सत्यं, यथातथं, यथार्थं, साधु. -ness, s. शुद्धि f., शुद्धत्वं-ता, निर्दोषता; सत्यता, तथ्यता, यथार्थता. -or, s. शोधकः, प्रतिकर्तृ m. 2 शास्तृ-शासितृ m.; दंडप्रणेतृ m. -**Corrigible**, a. शोधनीय; दंडनीय; समाधेय.

Correlation, s. परस्परसंबंधः, अन्योन्यान्वयः, व्यतिकरः. -**Correlative**, a. परस्परसंबद्ध, इतरेतरसंबंधिन्.

Correspond, v. i. (with) पत्रेण संवादं कृ 8 U, पत्रलेखनेन संवद् 1 P or व्यवहृ 1 P. 2 (to) संवद् 1 P, अनुरूप- सदृश (शी f.) a. भू 1 P; युज्-उपपद्-pass.: *See* **Resemble**; ' his face c. s to that of Sita ' अस्य मुखं सीताया मुखेन संवदति (U. 4). -ence, s. पत्रसंवादः, पत्रविनिमयः. 2 संवादः, अनुरूपता, सादृश्यं. 3 संबंधः, संसर्गः, संपर्कः. -ent, a. अनुरूप, युक्त, सदृश, तुल्य, संगत, संवादिन्. -s. पत्रेण संवादिन् m. 2 नियोगिन् m., प्रतिपुरुषः. -ing, a. अनुरूप, युक्त, सदृश.

Corridor, s. गूढ-छन्न-पथः.

Corrigendum, s. शुद्धिपत्रं.

Corrival, s. प्रतिपक्षः, प्रतिस्पर्धिन् m., प्रतियोगिन् m. -ry, s. प्रतिस्पर्धा, संघर्षः, प्रतियोगिता.

Corroborate, v. t. दृढीकृ 8 U, समर्थ् 10, प्रत्ययति (D.), प्रमाणीकृ, प्रमाणं दा 3 U, उपोद्बल् 10. -ion, s. दृढीकरणं, प्रमाणीकरणं, समर्थनं, उपोद्बलनं, प्रमाणं.

Corrode, v. t. क्षि 5 P or c., क्रमशः-लवशः-खाद् 1 P or नश् c. or विली c. -ent, a. नाशक, क्षयकर (री f.). -**Corrosion**, s. क्रमशो विलयनं or नाशनं, क्षयः. -**Corrosive**, a. विलयन, नाशक. 2 तीव्र, तिग्म, प्रखर, अरुंतुद, मर्मस्पृश्.

Corrugate, v. t. (त्वचं-चर्म) संकुच् 1 P; आकुंच् c., संहृ 1 P -ion, s. त्वगाकुंचनं, चर्मसंकोचः; संकोचनं.

Corrupt, v. t. दुष् c. (दूषयति), भ्रंश् c., नश् c., विकृ 8 U or c., मलिनयति (D.), कलुषयति (D.), अवपत् c.; ' the mind is c. ed in youth ' यौवनारंभे कालुष्यमुपयाति बुद्धिः (Ka. 103); ' c. a woman ' दुष् c., चारित्र्यं नश् c., सतीत्वाद् भ्रंश् c., धृष् 10. 2 पूतीकृ. 3 उत्कोचं दा 3 U, उत्कोचदानेन वशी-अनुकूली-कृ. -v. i. दुष् 4 P, पूतीभू 1 P. -a. दूषित, कलुष, पतित, दुष्ट, भ्रष्ट, कलुषित. 2 दुष्टमति, दुराचार, पापचेतस्, अंतर्दुष्ट, दुरात्मन्, दुराशय, पापबुद्धि. 3 पूति, पूतिगंधि, दुर्गंध. -ion, s. दूषणं, पातनं, शीलभ्रंशनं. 2 उत्कोचग्राहित्वं, धनभेद्यत्वं. 3 दुष्टता, दौरात्म्यं, भ्रष्टता, अंतर्दुष्टता, दौर्जन्यं. 4 अपभ्रंशः, अपशब्दः, अपभ्रष्टशब्दः. 5 पूति f., पूतता, दुर्गंधः. -er, -ive, a दूषक नाशक. -ly, adv. दुष्टं, दुष्टतया; सदोषं.

Corsair, s. समुद्रपथदस्युः.

Corse, s. *See* **Corpse**.

Corset, s. चोलः-ली, कूर्पासकः, कंचुकः

Corslet, s. वक्षस्त्राणं, कवचः-चं.

Cortege, s. परिवारः.

Cortical, a. त्वङ्मय (यी f.), त्वाच (ची f.).

Coruscate, v. i. स्फुर् 6 P, द्युत् 1 A; *See* **Shine**. -ion, s. स्फुरणं, स्फुरितं. -**Coruscant**, a. उज्ज्वल, भासुर.

Cosine, s. ज्या.

Cosmetic, a. कांतिवर्धक, शोभाजनन (नी f.), शोभाप्रद. -s. अंगरागः.

Cosmical, a. जगत्संबंधिन्.

Cosmogony, s. विश्वोत्पत्ति f., जगत्सृष्टि f.

Cosmography, s. जगद्विवरणं-वर्णनं.

Cosmopolite,-politan, s. विश्वस्थायिन् m., सर्वत्रवासिन् m., जगन्मित्रं.

Cosmos, s. जगत् n., विश्वं.

Cost, s. मूल्यं, अर्घः, अर्हा. 2 व्ययः; ' even at the c. of one s life ' प्राणव्ययेनापि; ' high c. ' बहुमूल्यं; oft. by instr. of noun, (आत्मानं सततं रक्षेद्दारैरपि धनैरपि). 3 धनव्ययः. -v. t. मूल्येन ग्रह् 9 U or क्री 9 U: ' what does it c. ' कियता मूल्येन विक्रीयते तत्; ' the house c. me 1000 Rs. ' सहस्ररूप्यकेण मया गृहं क्रीतं; ' the marriage ceremony c. me much ' बहुधनव्ययेन निष्पादितो विवाहविधिः; ' his obstinacy c. him dear ' दुराग्रहात्तस्य अत्यहितमभवत्; व्ययेन साध् 10; ' will c. the lives of ' प्राणनाशं-व्ययं-आवहेत्. -ly, a. महार्घ, महार्ह, बहुमूल्य.

Costermonger, s. फलविक्रेतृ m.

Costive, a. आनद्ध, बद्धकोष्ठ, अवरुद्धमलविड्ग्रहिन्. -ness, s. मलावरोधः, मलावष्टंभः, आनाहः, विड्-गुद-ग्रहः.

Costume, s. वेशः, नेपथ्यं; *See* **Dress**.

Cosufferer, s. समदुःखः, समदुःखभाज् m.

Cosy, a. सुखावह, हितकर, सुस्थित.

Cot, s. खट्वा, मंचः, पर्यंकः. 2 दोला, प्रेंखा. 3 **Cottage**, q. v.

Cote, s. व्रजः, शाला.

Coterie, s. एकविषयजनसंसर्गः-गणः.

Cotquean, s. स्त्रीकर्मव्यापृतः.

Cottage, s. उटजः-जं, पर्णकुटि-टी f., पर्णशाला, कायमानं, कुटीरः; ' c. girl ' उटजनिवासिनी बालिका. -er, **Cotter**, **Cottier**, s. कुटीरस्थः, उटजवासिन् m.; ग्रामीणः.

Cotton, s. कार्पासः, तूलः, पिचुः, पिचुलः, ' made of c. ' कार्पास a.; ' c. cloth ' तलांबरं, फालं, कार्पासं, बादरं; ' c. plant

कार्पासी. -y, *a.* तूलसंबंधिन्, कार्पासिक (की *f.*), (*s.*) in comp.

Couch, *s.* शयनं, शय्या, पर्यंकः, खट्वा, मंचः ; *See* **Bed.** -*v. i.* शी 2 A, संविश् 6 P. 2 अधःपत् 1 P, नि-पत्. -*v. t.* शी c., सं-नि-विश् c. 2 परिग्रह् 9 P, समाविश् c. 3 आच्छद् 10, ग्रंथ् 9 P: ‘c. ed in sweet words’ मधुरवाग्ग्रथितः (लेखः); ‘c. fellow’ सहशायिन्. -ant, *a.* शय, शायिन्.

Cough, *s.* कासः, काशः, उत्कासः, क्षवथुः ; ‘suffering from c.’ कासिन्. -*v. i.* कास् 1 A, क्षु 2 P. -er, *s.* उत्कासि(शि)न् *m.*

Coulter, *s.* फालदंतः, कुंतशं.

Council, *s.* सभा, संसद् *f.*, सदस् *f.*, *n.*; ‘c. room’ (chamber of c.) मंत्रणसभा, मंत्रगृहं. -lor, *s.* सभासद् *m.*, सदस्यः, &c.

Counsel, *s.* मंत्रणा, विचारः-रणा, विवेचनं, विमर्शः, चिंतनं. 2 उपदेशः, मंत्रः, मंत्रितं, अनुशासनं. 3 उपायः. 4 **Barrister**, q. v. -*v. t* उपदिश् 6 P, मंत्र् 10, अनुशास् 2 P. -lor, *s.* मंत्रिन् *m.*, सचिवः, अमात्यः, धीसचिवः. 2 उपदेशकः, उपदेष्टृ *m.*, बुद्धिसहायः, -lorship, *s.* साचिव्यं, मंत्रिपदं.

Count, *v. t.* गण् 10 (lit. and fig.); संकल् 10, संख्या 2 P. 2 मन् 4 A. -*v. i.* मन्-गण्-pass.; ‘c. on, upon’ अवलंब् 1 A, आश्रि 1 U, विश्वस् 2 P, प्रति-इ 2 P; ‘I do c. upon your help’ त्वं साहाय्यं करिष्यसीति गणयाम्येव; ‘c. ing upon your promise’ तव वचनमवलंब्य, त्वद्वचनप्रत्ययात्. -*s.* गणनं, गणना, संख्या-ख्यानं. 2 अभियोगविषयः, आपापादः. -less, *a.* असंख्य, अगण्य, संख्यातीत, अनंत, गणनातीत.

Countenance, *s.* मुखं, आननं, वदनं, आस्यं, वक्त्रं. 2 आकारः, आकृति *f.*, रूपं. 3 आश्रयः, अनुग्रहः, साहाय्यं, उपकारः. 4 आनुकूल्यं, अनुमोदनं. -*v. t.* अनुग्रह् 9 P, उपकृ 8 U, साहाय्यं दा 3 U, आनुकूल्यं दृश् c.: अनुमन् 4 A, अनुमुद् 1 A; *See* **Encourage** also. -er, *s.* उपकारकः, सहायः, अनुग्रहीतृ *m.*, अनुमोदकः.

Counter, *s.* गणनाफलकः. 2 (गणनार्थं) मुद्रा, काकिणी, कपर्दः-र्दिका. -*adv.* प्रतिकूलं, विरुद्धं, विपरीतं, प्रतिलोमं; gen. by प्रति pr.; ‘c. design’ प्रत्युपायः; ‘c. poison’ प्रतिविषं.

Counteract, *v. t.* मोघी-निष्फली-कृ 8 U, निवारि 10, प्रतिकृ, प्रतिहन् 2 P, प्रति-वि-रुध् 7 U. -ion, *s.* प्रतिक्रिया, प्रति(ती)कारः, प्रतियोगः, प्रति-व्या-घातः.

Counterbalance, *v. t.* तुलया धृ 1 P, तुल्यभार *a.* कृ 8 U, समीकृ, प्रतितुल् 10.

Counterblast, *s.* विरोधः, प्रतिरोधः.

Counterbuff, *v. t.* प्रति-अभि-हन् 2 P. -*s.* प्रतिघातः-

Counterchange, *v. t.* परस्परं परिवृत् c., विनि-मे 1 A. -*s.* परिवर्तः, विनिमयः, व्यतिकरः.

Countercheck, *s.* प्रतिबंधः, प्रतिरोधः.

Countercurrent, *s.* प्रतिप्रवाहः-स्रोतस् *n.*

Counterevidence, *s.* विरुद्धसाक्ष्यं; प्रतिकूलप्रमाणं.

Counterfeit, *a.* कृत्रिम, कृतक, कापटिक, छाद्मिक (की *f.*); gen. ex. by कपट, छद्म, कूट in comp.; ‘c. seal’ कपटमुद्रा; कूटशासनं, छद्मवेशः, &c. -*v. t.* छद्म-कपट-कृ 8 U, अनुकृ; कृ with कपट-कूट in comp.; ‘c. a seal’ कपटमुद्रां कृ; ‘c. a document’ कूटलेखं कृ; ‘c. ing sleep’ प्रसुप्तलक्षणः, लक्षसुप्तः, मिथ्यासुप्तः ; *See* **Feign.** 2 विप्रलभ् 1 A; *See* **Cheat.** -*s.* कूटं, कपटं, छद्मन् *n.*, व्याजः. 2 कूटलेखः. -er, *s.* कूटकृत् *m.*, कूटलेख्यकारः. 2 वंचकः, प्रतारकः. -ly, *adv.* सकपटं, सकूटं, मिथ्या, छद्मना.

Countermand, *v. t.* प्रत्यादिश् 6 P, विपरीताज्ञां दा 3 U. -*s.* प्रत्यादेशः, विपरीताज्ञा.

Countermarch, *v. i.* प्रतिया 2 P, प्रतीपं या. -*s.* प्रतियानं, प्रतीपयात्रा.

Countermark, *s.* प्रतिलक्षणं, प्रतिचिह्नं.

Countermine, *s.* प्रतिसुरंगा. -*v. t.* प्रतिसुरंगां कृ 8 U.

Counterpane, *s.* शयनास्तरणं, शय्याप्रच्छदः.

Counterpart, *s.* प्रतिरूपं, प्रतिमा, प्रतिबिंबं, प्रतिमूर्ति *f.*; (अहो चेष्टाप्रतिरूपिका कामिनो मनोवृत्तिः S. 1).

Counterplea, *s.* प्रत्युत्तरं ; प्रत्यभियोगः.

Counterpoise, Countervail, *v. t.* *See* **Counterbalance.** -*s.* तुल्यभारता, समतोलनं.

Country, *s.* प्र-, देशः, विषयः, राष्ट्रं; दिश् *f.*, आशा. 2 ग्रामः, जनपदः, (opposed to नगरं, पुरं); ‘c. folk’ जानपदाः, ग्राम्याः; ‘c. life’ जानपदवृत्तिः, ग्रामवसतिः; ‘native c.’ जन्मभूमि *f.*, स्वदेशः ; ‘c. man’ स्वदेशीयः, एकदेशस्थः, देशबंधुः; जानपदः, ग्राम्यजनः, ग्रामीणः ; ‘c. parson’ जानपदाचार्यः, ग्रामगुरुः.

County, *s.* देशभागः, मंडलं, चक्रं.

Couple, *s.* युग्मं, युगलं, यमकं, युगं, द्वयं, द्वितयं ; “c. of animals’ मिथुनं, द्वंद्वं ; ‘a married c.’ वधूवरौ, दंपती, जायापती. -*v. t.* संयुज् 7 U, 10, संश्लिष् c., संगम् c. (गमयति) योक्त्रयति, (D.). -*v. i.* मैथुनं कृ 8 U, स्त्रीपुरुषवत् संगम् 1 A or संमिल् 6 P.

Couplet, *s.* श्लोकः ; पंक्तिद्वयं; ‘a c. formed by two verses’ युग्मकं

Courage, *s.* धैर्यं, शौर्यं, विक्रमः, पराक्रमः, वीर्यं, उत्साहः, पौरुषं, तेजस् *n.*, धामन् *n.*, प्रतापः. 2 निर्भीकता, धृष्टता, साहसं;

'lose c.' धैर्यहीन *a.* भू 1 P, सत्त्वात्परिभ्रंश् 1 A, 4 P; 'do not lose c.' धैर्यं निधेहि हृदये (Mal. 5); 'take c.' आ-समा-श्वस् 2 P; 'summon c.' धैर्यं आस्था 1 A, धैर्यं अवलंब् 1 A or अवष्टंभ् 9 P, धैर्यावष्टंभं कृ 8 U; 'inspire c.' आ-समा-श्वस् c. **-ous,** *a.* शूर, वीर, विक्रांत, धीर. 2 अभीत, धृष्ट, साहसिक (की *f.*). **-ously,** *adv.* सवीर्यं, सविक्रमं, वीर-शूर-वत्. **-ousness,** *See* (*s.*).

Courier, *s.* वार्ताहरः; दूतः, वैवधिकः.

Course, *s.* गति *f.*, प्रसरः, प्र-, क्रमः. 2 रयः, प्रवाहः (of water &c.). 3 मार्गः, पथिन् *m.*, पद्धति (ती) *f.* 4 व्यवहारः, वृत्ति *f.*, आचरणं, चरित्रं. 5 क्रमः, अनुक्रमः, आनुपूर्व्यं, परंपरा. 6 रजस् *n.*, पुष्पं, आर्तवं (of women). 7 विधिः, प्रकारः, रीति *f.*; 'the law must have its c.' यथाशास्त्रमस्य निर्णयेन भवितव्यमेव; 'in c. of conversation' कथाप्रसंगेन, कथायोगेन; 'in c of time' कालक्रमेण, गच्छता कालेन. दिनेषु गच्छत्सु, गच्छति काले; 'a woman in c.' रजस्वला, ऋतुमती, मलिनी, पुष्पवती; 'of c.' अवश्यमेव, नियतं, नूनं, खलु, नाम with एव; 'c. of an arrow' बाणगोचरः, शरपथः; 'c. of study' अध्ययनक्रमः-मार्गः; 'mathemat cal c.' गणिताध्ययनक्रमः; 'c. of acting' क्रियाविधिः, अनुष्ठानं; 'proper c. of conduct' सुमार्गः; 'there being no other c.' गत्यंतराभावात्; 'having no other c. open,' अनन्यगतिक *a.*; 'race c.' चर्याभूमिः; 'in the c. of' मध्ये, अंतरे; 'a house in the c. of erection' निर्मीयमाण भवनं; 'the c. of nature' सृष्टिक्रमः. **-er,** *s.* जवनः, जविन् *m.*, वारकीरः.

Court, *s.* चत्वरः-रं, अंगनं-णं, प्रांगणं, अजिरं. 2 राजकुलं, राजसभा, आस्थानी-नं (assembly room); राजगृहं-मंदिरं. 3 अनुनयः, अनुवृत्ति *f.*, आराधनं; भजनं, दाक्षिण्यं. 4 (Judge) अधिकरणिकः, अक्षदर्शकः, धर्माधिकारिन् *m.*; (Judges) धर्माध्यक्षाः, प्राड्विवाकाः (pl.); 'c. of justice' अधिकरणं, व्यवहारमंडपः, न्याय-धर्म-सभा. 5 राजपरिजनः-परिबर्हः-परिवारः; 'c. favour' राजप्रसादः, राजानुग्रहः; 'c. minion' राजवल्लभः-प्रियः; 'c -yard' अंगनं, चत्वरं, अजिरं, प्रकोष्ठः, प्रांगण, गृहांगणं. **-v.** *t.* आराध् 10 अनुनी 1 P, अनुरंज् c., भज् 1 A. 2 याच् 1 A, प्र-अभि-अर्थ् 10 A. 3 विवाहार्थं प्रार्थ् or सेव् 1 A. **-eous,** *a.* दक्षिण, विनीत, सविनय, सुजन, सप्रश्रय, सानुनय, सभ्य, प्रियंवद; 'c. words' सूनृता वाणी. **-eously,** *adv.* सप्रश्रयं, दक्षिणतया, सानुनयं, विनयेन. **-esy,** *s.* दाक्षिण्यं, विनयः, प्रश्रयः, सौजन्यं, अनुरोधः, अनुवर्तनं; 'a title of c.' उपचारपदं. 2 प्रणामः, आमंत्रणं, आपृच्छनं. **-ier,** *s.* राजभृत्यः, राजवल्लभः, राजसभासद् *m.*, सभिकः, सभ्यः. **-like,** *a.* शिष्ट, शिष्टाचार, सभ्य. **-ly,** *a.* सुजन, शिष्ट, सभ्य, दक्षिण, सुशील. **-ship,** *s.* आराधनं, अनुरंजनं, अनुनयः, प्रसादनं. 2 स्त्र्युपासना, विवाहार्थं प्रार्थना.

Courtezan, *s.* गणिका, वेश्या, पण्यस्त्री, पण्यांगना, वारस्त्री-योषित्; बंधकी, पुंश्चली.

Cousin, *s.* पितृव्यपुत्रः (त्री *f.*), मातुलपुत्रः (त्री *f.*), पितृष्वस्रेयः (यी *f.*), मातृष्वस्रेयः (यी *f.*), according to different relations. 2 ज्ञातिः, बांधवः.

Cove, *s.* वंकः, खातं.

Covenant, *s.* समयः, नियमः, संविद् *f.*, पणः. **-v.** *i.* *See* **Contract.** **-er,** *s.* नियमबद्धः, सामयिकः.

Cover, *v. t.* प्र-समा-आ-च्छद् 10, प्रा-सं-आ-वृ 5 U, स्थग् 10, पिधा 3 U, निगुह् 1 U, व्यवधा 3 U, अवगुंठ् 10. 2 आ-,स्तृ 5 U, स्तॄ 9 U, व्याप् 5 P, आवेष्ट् 1 A or c., नि-आ-चि 5 U; 'a c. ed path' छन्न-गूढ-पथः. **-s.** आवरणं, आच्छादनं, पुटं, व्यवधानं, वेष्टनं, अवगुंठनं, पिधानं. 2 कोशः-षः, वेष्टनं. 3 प्रावारः, प्रच्छदपटः, आच्छादनवस्त्रं. 4 अप-व्यपदेशः, छद्मन् *n.*, व्याजः, छलं, माया, कपटं; 'c. of a well' वि(वी)नाहः; 'c. of a carriage,' रथगोपनं-आवरणं. **-ing,** *s.* आच्छादनं, आवरणं, &c. 2 तिरस्करिणी, व्यवधानं. 3 परिधानं, प्रावारः, वासस् *n.*, आच्छादनवस्त्रं. 4 अंतर्धा, व्यवधा, अंतर्धिः, अपवारणं, तिरोधानं. **-let,** *s.* उत्तरच्छदः, शय्याप्रच्छदपटः.

Covert, *a.* गूढ, प्रच्छन्न, गुप्त; 'a c. expression' व्यंग्योक्ति *f.* 2 निर्वात. **-s.** गहनं, गह्वरं. 2 संश्रयः, आश्रयस्थानं.

Covet, *v. t.* लुभ् 4 U, गृध् 4 P, स्पृह् 10 (with dat.); कम् 10 A, अभिलष् 1, 4 P, अतिमात्रं इष् 6 P. **-ous,** *a.* लुब्ध, लोलुप, गृध्नु, अभिलाषिन्, ईप्सु, अतृप्त, सतृष्ण. 2 (Of wealth) धनलुब्ध, धनार्थिन्, अर्थपर, धनपरायण. **-ously,** *adv.* सलोभं, लोभेन. **-ousness,** *s.* लोभः, लिप्सा, तृष्णा, लालसा, स्पृहा, अभिलाषः, अतिस्पृहा, लौल्यं. 2 धनलोभः, अर्थतृष्णा.

Covey, *s.* पक्षिगणः; शावकसमूहः.

Covin, *s.* कूटदंभमयः-संविद् *f.*

Cow, *s.* गो *f.*, धेनु *f.*; माहेयी, सौरभेयी, उस्रा; शृंगिणी, अर्जुनी, रोहिणी; एकहायनी, द्विहायनी, त्रिहायणी, चतुर्हायणी 'a c. one year old, 2 years old, and so on'; 'barren c.' वशा, वंध्या; 'mild one' अचंडी, सुकरा; 'bringing forth many

calves ' बहुसूतिः; परेष्टुका ; ' producing calves every year ' समांसमीना ; ' an excellent c. ' गोमतल्लिका, गोतल्लजः ; ' c. dung ' गोमयः-यं, शकृत् *n.*; ' c. herd ' गोपः, आभीरः, गोपालः ; ' c. house or pen ' व्रजः, गोष्ठं, गोशाला. —*v. t.* भी c., त्रस् c.

Coward, *s.* कापुरुषः, भीरुः, अशूरः, कातरः, क्लीबः, भीतः, शौर्यहीनः ; ' a boasting c. ' गेहेशूरः, गेहेनर्दिन् *m.* **—ice,** *s.* भीरुता, कातर्यं, अपौरुषं, कापुरुषत्वं, अवीर्यं, अविक्रमः क्लीबता. **—ly,** *a.* भीरु, निर्वीर्य, कातर; *See* (*s.*). —*adv.* सकातर्यं, भीरुवत्, कापुरुषवत्.

Cower, *v. i.* अवनतकाय-प्रणतशरीर *-a.* भू 1 P, मह्नीभू , निभृतं-अलक्षितं या 2 P or गम् 1 P, कायमवनमय्य गम्.

Cowl, *s.* फणाकृति शिरोवेष्टनं.

Cowrie, *s.* काकिनी-णी, कपर्दिका, वराटकः.

Coxcomb, *s.* दंभिन् *m.*, दांभिकः, आत्माभिमानिन् *m.*, आत्मविकत्थनः, दृप्तः. 2 चूडा, शिखा. **—ry,** *s.* दंभः, आत्माभिमानः, दर्पः; गर्वः.

Coy, *a.* अप्रगल्भ, सलज्ज, लज्जावत्, विनीत, सव्रीड, शालीन. 2 अल्पभाषिन्, मितवाच्. —*v. i.* लज्ज् 6 A, त्रप् 1 A, ह्री 3 P. **—ly,** *adv.* लज्जया, सव्रीडं, सत्रपं, सलज्जं. **—ness,** *s.* लज्जा, व्रीडा, त्रपा; अप्रागल्भ्यं.

Cozen, *v. t.* वंच् 10; *See* **Cheat. —age,** *s.* प्रतारणा, वंचनं ; माया, भ्रमः, मोहः. **—er,** *s.* वंचकः, कितवः, मायिन् *m.*

Crab, *s.* कुलीरः, कर्कटः-टकः.

Crabbed, *a.* कर्कश, परुष, निष्ठुर. 2 वामशील, प्रतीप, दुःशील. 3 विषम, दुर्ज्ञेय, गूढ, निगूढार्थ. **—ness,** *s.* निष्ठुरता, प्रतीपता, वैषम्यं, दुःशीलं.

Crack, *v. t.* भंज् 7 P, खंड् 10, विदॄ 9 P, 10, स्फुट् c., भिद् 7 P; ' c. a joke ' परिहासं कृ. 2 (अकस्मात्) ध्वन् c., आस्फल् 10, स्वन् c. —*v. i.* स्फुट् 6 P, विदल् 1 P, भंज्-भिद्-दॄ pass ; ' a c. ed sound ' अपस्वरः, विस्वरः. 2 विकत्थ् 1 A. 3 महारवेण स्वन्-क्वण्-ध्वन् 1 P, सहसा महारवं कृ 8 U. —*s.* छिद्रं, रंध्रं, संधिः, भंगः. 2 स्फोटनं, भेदनं. 3 विरावः, ध्वनिः, क्वणितं; ' c. brained ' वातुल, उन्मत्त, भ्रांतचित्त.

Crackle, *v. i.* स्वन्-रट् 1 P, पटपटायते (D.). —*s.* स्वनितं, रटितं, पटपटशब्दः.

Cradle, *s.* दोला. प्रेंखा, प्रेंखोलनं ; (शिशु) खट्वा ; ' from the c. ' आशैशवात् ; ' a child in the c. ' स्तनंधयः, शिशुः. 2 (fig.) निवासभूमि *f.*, आवासः. —*v. t.* दोलायां शी c., दोलामारोप्य चल् c.

Craft, *s.* कला, शिल्पं; कौशलं. 2 व्यापारः, वृत्ति *f.*, व्यवसायः. 3 चातुर्यं, कौशलं, वैदग्ध्यं ; हस्तकौशलं, नैपुण्यं. 4 शाठ्यता, धूर्तता, कौटिल्यं, कपटं. 5 नौः, तरीः ; ' c. s man ' शिल्पिन् *m.*, कारुः, कर्मकारः. **—y,** *a.* धूर्त, शठ, कुटिल, विजिह्म, कितव, कपटिन्. 2 चतुर, विदग्ध. **—ily,** *adv.* छलेन, सकैतवं, धूर्ततया ; चतुरं, विदग्धतया.

Crag, *s.* शृंगं, कूटः-टं, शिखरः-रं. **—ged, —gy,** *a.* विषम, अत्यसम, शृंगिन्.

Cram, *v. t.* प्रक्षिप् 6 P, बलात् निविश् c. 2 अतिभोजनेन तृप् c. or संतुष् c. 3 अतिभृशं पॄ c. or पूर् 10; स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा (M. 4) ' having c. ed the belly ' &c.; 'c. ed with food ' अतितृप्तः. 4 आकॄ 6 P, निरुध् 7 U, संबाध् 1 A; ' c.-ed with people ' जनाकीर्ण, जनसंकुल-संबाध. 5 (fig.) अर्थहीनं पठ् 1 P.

Cramp, *v. t.* संकुच् 1 P, स्तंभ् 9 P or c, नि-प्रति-रुध् 7 U, संबाध् 1 A. 2 (अंगं) आकृष् 1 P, उद्वेष्ट् c., उपहन् 2 P. 3 कील् 10 : ' we are much c. ed in this place ' अतीव दुःस्थिता वयमत्र. —*s.* स्तंभः, संकोचः-चनं, निरोधः, संक्षेपः. 2 उद्वेष्टनं, व्यासः, आक्षेपः, गात्रोपघातः ; ' a c. in the calf of the leg ' पिंडिकोद्वेष्टनं. 3 कीलः, लोहग्रहणी, बंधनकीलः (c. iron).

Crane, *s.* बकः, कङ्कः, सारसः ; बलाका, बिसकंठिका (female c.). 2 भारोत्तोलनयंत्रं.

Cranium, *See* **Skull.**

Crank *s.* वक्रमार्गः. 2 वक्रोक्ति *f.*, वक्रभाषितं.

Cranny, *s.* छिद्रं, रंध्रं, संधिः.

Crash, *s.* महाशब्दः, महानिनादः, कोलाहलः, महारवः. —*v. t.* भंज् 7 P, भिद् 7 P, मृद् 9 P, पिष् 7 P. —*v. i.* (परुषरवेण) ध्वन्-स्वन् 1 P, परुषं रु 2 P.

Crass, *a.* स्थूल, घन, असूक्ष्म.

Cratch, *s.* गवादनी, द्रोणि-णी *f.*

Crater, *s.* आग्नेयगिरिमुखं.

Craunch, *v. t.* चर्व् 1 P, संदंश् 1 P.

Cravat, *s.* ग्रैवेयकं, ग्रीवावेष्टनं.

Crave, *v. t.* (सविनयं) याच् 1 A, प्र-अभि-अर्थ् 10 A; ' c. favour ' प्रसद् c., अनुनी. 2 वांछ् 1 P, इष् 6 P, अभिलष् 1, 4 P, लभ् desid. (लिप्सते); *See* **Wish. —ing,** *s.* लालसा, स्पृहा, अभिलाषः, अतिकांक्षा, औत्सुक्यं, उत्कंठा, तृष्णा; ' c. for food ' बुभुक्षा; ' c. for drink ' पिपासा, तृष्णा.

Craven, *s.* (c. hearted) कापुरुषः, भीरुः; *See* **Coward.**

Craw, *s.* पक्षिजठरः, पक्वाशयः.

Crawl, *v. i.* सृप् 1 P, वि-प्र-सं°, उरसा गम् 1 P, मंदगत्या चल् 1 P. —*s.* सृप्ति *f.*; पोतोदरं.

Crayon, *s.* वर्तिका, तूलिका.

Craze, *v. t.* भंज् 7 P, खंड् 10; *See* **Break.** 2 चूर्ण् 10, निष्पिष् 7 P. 3 ज्ञानं हन् 2 P,

वातुलीकृ 8 U, मुह् c., संभ्रम c. (भ्रमयति). **-ed, -Crazy,** *a.* वातुल, बुद्धिविकल, हतज्ञान, उन्मत्त, भ्रांतचित्त. 2 जीर्ण, जर्जर, जर्जरीभूत. **-edness,** *s.* बुद्धिवैकल्यं, वातुलता, उन्मादः, चित्तभ्रमः. 2 जीर्णता.

Creak, *v. i.* कर्कशशब्दं कृ 8 U, परुषं विरु 2 P or स्वन् 1 P. *-s.* कर्कशशब्दः-ध्वनिः.

Cream, *s.* शरः, क्षीरजं, शार्करः-रकः, क्षीरमंडं. 2 उत्तमांशः, सारः-रं, सारांशः. *-v. i.* शरं बंध् 9 P, फेनायते (D.). *-v. t.* शरं अपनी 1 P. **-y,** *a.* शरमय (यी *f.*), शरोपम.

Crease, *s.* वलि *f.*, वस्त्रभंगः पुटचिह्नं.

Create, *v. t.* सृज् 6 P, निर्मा 3 A, जन् c., (जनयति), उत्पद् c., कृ 8 U, विधा 3 U, प्र-सं-क्लृप् c. 2 पदे-अधिकारे-नियुज् 7 A, 10 or अभिषिच् 6 P; ' a thing c. ed ' भूतं. **-ion,** *s.* सर्गः, जननं, सृष्टि *f.*, निर्माणं, विधानं, प्रकल्पनं, भावना; ' a c. of the mind ' मानसी सृष्टिः, मनःकल्पितं. 2 उत्पन्नं, भूतं. 3 विश्वं, निखिलजगत् *n.*, सृष्टि *f.*, सर्वभूतानि. **-ive,** *a.* जनक, कल्पक, उत्पादक, निर्माणरचना in comp. ; ' c. genius ' निर्माणशक्तिः. **-or,** *s.* स्रष्टृ *m.*, निर्मातृ *m.*, उत्पादकः, जनकः. 2 ब्रह्मन् *m.*, आत्मभूः. परमेष्ठिन् *m.*, पितामहः, विधातृ *m.*, विश्वसृज्, *m* , धातृ *m.*, प्रजापति *m.*, जगत्कर्तृ *m.*, स्रष्टृ *m.*, विधि *m.*, वेधस् *m.*, स्वयंभूः, चतुराननः, विरिंचि *m.*, कमलयोनि *m.*, अब्जभूः. **-ure,** *s.* भूतं, जंतुः, जीविन्-प्राणिन् *m.*, देहिन् *m.* 2 प्रियः, वत्सः, जातः. 3 आश्रितः, उपजीविन् *m.*, लब्धोदयः; ' he is your c. ' स त्वत्तो लब्धोदयः, त्वदुपजीवी.

Credence, *s.* विश्वासः, प्रत्ययः, प्रमाणं; ' worthy of c. ' विश्वास्य, प्रमाणं; ' to give c. ' विश्वस्-प्रती 2 P.

Credentials, *s.* विश्वासपत्रं, प्रत्ययपत्रं.

Credible, *a.* विश्वसनीय, श्रद्धेय, विश्वास्य, प्रामाणिक (की *f.*). **-Credibility,** *s.* विश्वास्यता, विश्वासपात्रता, प्रामाण्यं. **-Credibly,** *adv.* सप्रमाणं, श्रद्धेयतया, विश्वसनीयतया.

Credit, *s.* विश्वासः, प्रत्ययः, विश्रंभः; ' worthy of c.' विश्रंभभाजनं, विश्वासपात्रं. 2 प्रशंसा, श्लाघा, कीर्ति-ख्याति *f.*, प्रतिष्ठा, यशस् *n.*, स्तुति *f* , स्तवः. 3 (in commerce) विश्वासः; कालिका; ' buying on c. ' उद्धारः. 4 प्रामाण्यं, विश्वास्यता. *-v. t* विश्वस्-प्रती 2 P, सत्य *a.* मन् 4 A. 2 प्रमाणीकृ 8 U. **-able,** *a.* श्लाघ्य, प्रशस्य, कीर्ति-गौरवकर (री *f.*), स्तुत्य. **-ably,** *adv.* श्लाघ्यप्रकारेण, स्तुत्यर्हं; सगौरवं. **-or,** *s.* उत्तमर्णः, ऋणदातृ *m.*, धनिकः.

Credulous, *a.* श्रद्धालु, विश्वासशील, विश्वासिन्, विश्रंभप्रवण, अशंकिन्. **-ness, -Credulity,** *s.* विश्वासशीलता; अशंका, श्रद्धालुता.

Creed, *s.* धर्मः. 2 स्वीकृतमतं-पक्षः.

Creek, *s.* वंकः, वक्रं, खातं. **-y,** *a.* वंकवत्, वक्र.

Creep, *v. i.* सृप् 1 P, वि-सं प्र°, मंदगत्या चल्-मंदं प्रसृ 1 P. 2 अलक्षितं प्रविश् 6 P. 3 शनैः प्रवृत् 1 A. **-er,** *s.* लता, वल्ली, वल्लरी, प्रततिती *f.*; ' a branching c. ' वीरुध् *f.*, गुल्मिनी, उलपः, प्रतानिनी. 2 सर्पिन्-उरोगामिन् *m.* **-ing,** *s.* विसर्पः-र्पणं, विसरः. **-ingly,** *adv.* सर्पवत्, मंदगत्या; शनैःशनैः.

Cremate, *v. t. See* **Burn. -tion,** *s.* दाहः, दहनं.

Crepitate, *See* **Crack.**

Crepuscle, -scular, *See* **Evening.**

Crescent, *s.* अर्धचंद्रः, अर्धेंदुः, चंद्रार्धं. *-a.* ' c.-shaped ' अर्धचंद्राकार. 2 वर्धमान, वर्धिन्.

Cresset, *s.* आकाशदीपः.

Crest, *s.* चूडा, शिखा, शेखरः, मौलिः; मुकुटं, किरीटः. 2 (Of a cock) चूडा, शिखा. 3 शिखरः-रं, मूर्धन् *m.* (of mountains); ' c. fallen ' भग्न, भग्नदर्प, आत्तमान, विषण्ण; ' c. jewel ' चूडामणिः, शिरोरत्नं-मणिः, शिखामणिः. **-ed,** *a.* शिखिन्, चूडावत्. 2 अवतंसित, किरीटिन्.

Cretaceous, *a.* कठिनीसंसृष्ट, कठिनीधर्मन्.

Crevice, *s.* रंध्रं, छिद्रं, विवरं, बिलं, संधिः, गर्तः-र्ता.

Crew, *s.* नाविकाः, पोतवाहाः (pl.), नाविकगणः. 2 गणः, संघः, जनसमूहः.

Crib, *s.* गवादनी, द्रोणि-णी *f.* 2 गोष्ठं, व्रजः. 3 शिशुदोला. *-v. t.* **Confine,** q. v.

Cribble, *s.* चालनी, शोधनी, तितउ *m.*

Crick, *s.* कर्कशशब्दः. 2 मन्यास्तंभः.

Cricket, *s.* झिल्लिका, भृंगारी, झीरुका, चीरी. 2 गुलिकाक्रीडा.

Crime, *s.* अपराधः, पापं, दोषः, पातकं, पापकर्मन् *n.*, दुरितं; ' a heinous c. ' घोर-महापातकं. **-Criminal,** *a.* or *s.* अपराधिन्, पापिन्, सपाप, पातकिन्, कृतापराध, पापकर्मन्, *n.* सदोष, दुष्कृतिन्; दंड्य, दोषग्रस्त; ' c. act ' पापक्रिया; ' c. law ' दंडविधिः-शासनं. **-ly,** *adv.* सापराधं, सदोषं. 2 दंडविधिन्यायेन, दंडविधिवत्. **-ity,** *s.* सपापता, अपराधिता, सदोषत्वं. **-Criminate,** *v. t.* दोषीकृ 8 U, सापराध-सदोष *a.* कृ, दोषेण लिप् 6 P. 2 अभिशंस् 1 P, अभियुज् 7 A, 10. **-ion,** *s.* अभियोगः, दोषीकरणं, दोषारोपणं, अभिशंसनं. **-ory,** *a.* अभिशंसक; सदोष.

Crimp, *a.* भंगुर, भिदुर. 2 असंगत, विरुद्ध, अयुक्त. *-v. t.* **-Crimple,** संकुच् 1 P, पुटीकृ 8 U, चूर्ण् 10.

Crimson, *a.* शोण, रक्त, अरुण, लोहित. -*s.* शोणः, रक्तिमन् *m.*, रक्तवर्णः, अरुणिमन् *m.*, लोहितः ; 'covered with c.' अरुणित, पाटलित. -*v. t.* अरुणीकृ 8 U, अरुणयति-शोणयति-लोहितयति (D.).

Crincum, *s.* वलि *f.*, पुटः ; संकोचः.

Cringe, *v.i.* अंजलिं बंध् 9P; साष्टांगपातं प्रणम् 1 P or अनुनी 1 P: 'c. at the feet' अधश्चरणावपातं कृ 8 U (Bh. I. 31). -*s.*, -**ing,** *s.* अंजलिकर्मन् *n.*, अष्टांगपातः ; श्ववृत्ति *f.* -*v. t. See* **Contract.**

Crinigerous, *a.* रोमवत्, रोमोपम.

Crinkle, *s.* वलि *f.*, पुटः, भंगः. -*v. i.* पुटीभू 1 P, व्यावृत् 1 A. -*v. t.* पुटीकृ 8 U, व्यावृत् c.

Cripple, *a.* or *s.* पंगु (गू *f.*), विकल, विकलांग (गी *f.*): पादविकल; गतिहीन; श्रोण. -*v. t.* विकलयति (D.), विकलीकृ 8 U, व्यंगीकृ. 2 (fig.) दुर्बलीकृ. -**ness,** *s.* पंगुता, अंगवैकल्यं.

Crisis, *s.* संकटं, संकटवेला, संदेहसमयः ; शुभाशुभलग्नं. 2 व्याधिसीमा. -**Critical,** *a.* संदिग्ध, 'c. time' कार्यसंकटं, संकटसमयः, कार्यनिर्वहणकालः ; 'at c. times' उपस्थितेषु दुर्गेषु.

Crisp, *a.* आकुंचित, बंधुर, भंगवत्. 2 भंगुर, भिदुर, भिदेलिम. -*v.t.* (केशान्) रच् 10, भंगुरीकृ 8 U, आकुंच् c.; 'c. ing-iron, -pin' केशयमनकीलः ; 'c. ed tresses' चूर्णकुंतलाः, वलीभूतः अलकाः. -**ation,** -**ature,** *s.* आकुंचनं (केशानां).

Criterion, *s.* लक्षणं, चिह्नं, लिंगं, संज्ञा. 2 निकषः.

Critic, *s.* गुणदोषविचारकः-निरूपकः, गुणागुणज्ञः ; विज्ञः, गुणग्राहिन् *m.*, गुणदोषविवेचकः. 2 (cavilling c.) दोषैकदृश्-छिद्रान्वेषिन् *m.* -**al,** *a.* गुणदोषविचारयुक्त, गुणागुणज्ञ; गुणदोषग्राहिन्, गुणदोषविवेचक. 2 दोषदर्शिन्, छिद्रान्वेषिन्. -**ally,** *adv.* सूक्ष्मं, सूक्ष्मतया, निपुणं. 2 गुणदोषपरीक्षया. 3 संकटसमये. -**ise,** *v. t.* गुणदोषविचारं-विवेचनं कृ 8 U, गुणदोषान् निरूप् 10 or परीक्ष् 1 A or वि-विच् 3, 7 U. 2 छिद्राणि अन्विष् 4 P, or दृश् 1 P. -**ism, Critique,** *s.* गुणागुणपरीक्षा, गुणदोषविवेचनं-परीक्षणं-निरूपणं. 2 छिद्रान्वेषणं.

Croak, *v. i.* आरट् 1 P, विरु 2 P. 2 (As a crow) कै 1 P, ध्वांक्ष् 1 P. -*s.* आरटनं; भेकरवः; काकरवः.

Croceous, *a.* कुंकुमाक्त, गौर (री *f.*).

Crock, *s.* किट्टं, कज्जलं. 2 भांडं. 3 जरन्मेषी. 4 जरदश्वः. -*v. t.* कृष्णीकृ 8 U, कज्जलेन लिप् 6 P. -**ery,** *s.* मृद्भांडानि (pl.); कौलालकं; मार्तिकं.

Dog, *s.* श्वन् *m.* कुक्कुरः, सारमेयः, शुनकः; कौलेयकः, भषकः, मृगदंशकः; 'd. -cheap' अतिस्वल्पमूल्य; 'd. days' अत्युष्णकालः; 'mad d.' अलर्कः; 'go to the d.s' विनश् 4 P, परिक्षि pass.; 'hunting d.' विश्वकद्रुः. **-v. t.** (कुक्कुरवत्) अनुसृ 1 P पश्चात् धाव् 1 P, अन्विष् 4 P, अनुसृत्य पीड् 10. **-gish,** *a.* श्वशील, श्ववृत्ति, श्वभाव.

Dogged, *a.* कठिन, निष्ठुर, वक्रभाव. 2 प्रतिनिविष्ट, साग्रह. निर्बंधपर.

Doggerel, *a.* विषम; 'd. verses' कुकाव्यं

Dogma, *s* मतं, तत्त्वं, नियमः, व्यवस्था, विधिः, आदेशः. **-tic, -tical,** *a.* स्वमताभिमानिन्, निदेशक; वैधिक (की *f.*). **-ally,** *adv.* दृढनिश्चयपूर्वं, सधर्षं, साहसेन, सामर्षं

-tism, s. स्वमताभिमानः, सदर्पं, स्वमतायलंबनं, दृढोक्ति *f.* -tize, *v. t.* सदर्प-सगर्व-स्वमतं संस्था c. (स्थापयति) or वद् 1 P.

Dole, *s.* अंशः, भागः, विभागः, छेदः, उद्धारः. 2 पारितोषिकं. -*v. t.* विभज् 1 U, विभागशः दा 3 U, वितॄ 1 P, उत्-सृज् 6 P. **-ful, -some,** *a.* सशोक, दुःखपूर्ण, सकरुण, शोकाकुल, उद्विग्न, विधुर, आकुल, विह्वल, आर्त. **-fully,** *adv.* सशोकं, सदुःखं, सविषादं. **-fulness,** *s.* शोकः, दुःखं, विषादः, खेदः, उद्वेगः, परिदेवनं.

Doll, *s.* शालभंजिका, पांचालिका, पांचाली, कुरुंटी, पुत्रिका ; ' ivory d. ' दंतपांचालिका.

Dolour, *s.* शोकः, क्लेशः, खेदः, आर्ति *f.* **-ous,** *a.* सशोक, शोकार्त, उद्विग्न, आकुल, विधुर. **-ific,** *a.* पीडा-व्यथा-कर (री *f.*)

Dolphin, *s.* स्थूलमीनः, मत्स्यभेदः.

Dolt, *s.* स्थूल-मंद-बुद्धिः, मूढः, मूर्खः, जडः. **-ish,** *a.* मूढ, स्थूल मति-धी. **-ishly,** *adv.* मूढवत्, स्थूलवत्.

Domain, *s.* राष्ट्रं, विषयः, प्रदेशः. 2 राज्यं, स्वामित्वं. 3 रिक्थं, स्वभूमि *f.*

Dome, *s.* अर्धगोलाकृति शृंग-शिखरं.

Domestic, *a.* ग्राम्य, ग्राम-गृह in comp. ; ग्रामसिंहः ' d. lion ' ; ' d. pigeon ' गृहकपोतः. 2 गृहज, गृह्य, गृहजात, गृह in comp.; ' d. quarrels , गृहकलहाः, गृहच्छिद्राणि; ' d. duties ' कुलाचारः; 'd. dissension ' अंतर्भेदः. 3 गृहप्रिय, गृहवासासक्त. 4 देशीय, देश in comp. -*s.* गृहदासः, किंकरः, प्रेष्यः, भृत्यः, सेवकः, परिचरः. 2 गृहवासिन् *m.* **-ate,** *v. t.* विनी 1 P, दम् c. (दमयति), गृहे पुष् c. or संवृध् c. **-ated,** *a.* गृहपुष्ट, दांत, ग्राम्य.

Domicile, *s.* गृहं, आ-नि-वासः, आलयः, वसति *f.* **-ed,** *a.* कृतावास, कृताधिष्ठान.

Dominant, *a.* प्रबल, प्रधान, प्रकृष्ट, श्रेष्ठ, प्रभविष्णु, सातिशय, वरीयस्.

Dominate, *v. i.* शास् 2 P; प्रभू 1 P, ईश् 2 A (with gen.), अधिष्ठा 1 P, अध्यास् 2 A. 2 अतिरिच् pass. ; प्रकृष्ट *a.* भू. **-ion,** शासनं, प्रभुत्वं, आधिपत्यं, राज्यं, अधिकारः.

Domineer, *v. t.* सगर्वं शास् 2 P, or ईश् 2 A (with gen.), कदर्थ् 10, पीड् 10, उपप्लु 1 A. **-ing** 2 *a.* उद्धत, अवलिप्त, अतिदृप्त, उत्सिक्त, मदोद्धत.

Dominical, *a.*, *s.* भट्टारकवासरः.

Dominie, *s.* *See* **Tutor.**

Dominion, *s.* अधिकारः, ऐश्वर्यं, प्रभुत्वं, शासनं, आधिपत्यं 2 राज्यं, विषयः, देशः, राष्ट्रं.

Domino, *s.* दीर्घप्रावारः. 2 शलाका.

Don, *s.* सुजनः, आर्यः, शिष्टजनः.

Donary, *s.* धर्मार्थं दत्तं-दानं.

Donation, *s.* दानं, उपायनं, वितरणं, उपहारः, त्यागः, विश्राणनं ; *See* **Gift.**

Donor, *s.* दातृ *m.*, दायिन् *m.* ; त्यागशीलः. **-Donee,** *s.* प्रतिग्रहितृ *m.*

Donkey, *s.* खरः, रासभः, गर्दभः, चक्रीवत् *m.*, वालेयः.

Doodle, *s.* अल्पबुद्धिः, जडः, दुर्मतिः, मंदः.

Doom, *v. t.* दंड् 10, दंडाज्ञां कृ 8 U. 2 निक्षिप् 6 P, सम्-ऋ c. (अर्पयति). 3 निर्दिश् 6 P, सं-प्र-कॢप् c. ; ' how he was d. ed to die ' कथं तस्यांतो भविष्यति. 4 निर्णी 1 P, निश्चि 5 U, निश्चइ c. ; ' he is d. ed to death ' अस्य वधो निश्चितः, वधदंडः आज्ञप्तः ; ' his fate is d. ed ' अपरिहार्योऽस्य नाशः. -*s.* दंडाज्ञा, दंडनं, दंडः. 2 निर्णयः, निश्चयः, विचारः-रणा. 3 नियति *f.*, भवितव्यता, दिष्टं, विधिः *m.*; *See* **Fate.** 4 अंतः, नाशः, क्षयः, लयः. **-Doomsday,** *s.* विचारदिवसः.

Door, *s.* द्वारं (fig. also); द्वार् *f.*, प्रति(ती)हारः ; ' leaf of a d. ' कपाटः-टं-टी, अररः-रं-री. 2 मुखं, प्रवेशः ; ' from d. to d. ' गृहाद् गृहं; ' in d. s ' गृहे, गृहस्थित *a.* ; ' out of d. s ' गृहाद्बहिः, स्थानांतरगत *a.* ; ' principal d. ' महा-सिंह-द्वारं; 'next d.' अनंतर *a.*, प्रातिवेशिक *a.*, निकटस्थ, कल्प in comp., ईषदून; ' private d. ' प्रच्छन्नद्वारं; अंतर्द्वारं, ' d. keeper ' द्वाःस्थः, द्वारपालः, द्वाररक्षकः, प्रतीहारः, दौवारिकः ; ' d. sill ' द्वारपिंडी, देहलि-ली *f.*, गृहावग्रहणी.

Dope, *v. t.* उन्मद् c., उद्दीप् 10. -*s.* उन्मादकं द्रव्यं. **-y,** *a.* उन्मादित, उद्दीपित.

Dormant, *a.* निद्रित, शयित, सुप्त. 2 अलक्षित, प्रच्छन्न, गुप्त, निलीन, गूढ.

Dormitory, *s.* शय्या-शयन-गृहं, निद्राशाला, शयनागारं.

Dorsal, *a.* पृष्ठसंबंधिन्.

Dose, *s.* मात्रा; ' in one d. ' एकयैव मात्रया.

Dot, *s.* बिंदुः, शून्यं, खं. -*v. t.* बिंदुना अंक् 10 or चिह्न 10.

Dote, (upon), *v. i.* अत्यंतं अभिलष् 1, 4 P, भृशं स्निह् 4 P (with loc.). 2 वृद्धत्वाद् मुह् 4 P, बालिशबुद्धि *a.* भू 1 P. **-age,** *s.* अत्यंतानुरागः, अतिप्रेमन् *m.*, *n.* 2 बुद्धिवैकल्यं, बुद्धिलोपः-भ्रंशः, बालिशता, मतिक्षीणता, जरावैक्लव्यं. 3 जरा, जरावस्था. **-ard,** *s.* क्षीणबुद्धिः, हतज्ञानः, अतिवृद्धः, बालिशः. **-ing,** *a.* अत्यनुरक्त. **-ingly,** *adv.* सातिस्नेहं, अनुरागातिरेकेण.

Double, *a.* द्विगुण, द्वैध (धी *f.*), द्विप्रकार ; द्वि in comp., उभय (*pron.a.*). 2 **Deceitful,** q. v.; 'having a d. meaning' द्व्यर्थ (वाक्यं); ' d. meaning ' द्व्यर्थता; ' d. dealing ' द्वैधीभावः, शाठ्यं, कपटं, छलं-माया; ' d.-tongued ' द्विजिह्व, अनृतवाच्-

वादिन्. -*s.* द्विगुणं, द्विकं. 2 छलं, कपटं, माया. 3 विपरिवर्तनं. -*v. t.* द्विगुणीकृ 8 U, गुणीकृ, द्विगुणयति (D.). 2 पुटीकृ, पुटयति (D.); 'd. the fist' मुष्टिं बंध् 9 P. -*v. i.* द्विगुणीभू 1 P. 2 विपरि-वृत् 1 A. 3 मायां-छलं-कृ. -**ness**, *s.* द्वैगुण्यं, द्वित्वं, उभयत्वं. -**Doubly**, *adv.* द्विः, द्विगुणं, द्विधा, द्विविधं, उभयतः-था.

Doublet, *s.* उरोवस्त्रं, उरःपरिधानं.

Doubt, *v. i.* आ-वि-शंक् 1 A, विक्लृप् 1 A, संदिह् 2 U, संशी 2 A, विचर् c., मनसा दोलायते (D.). -*v. t.* न विश्वस् or न प्रति-इ 2 P, आशंक्. -*s.* संशयः, संशीति *f*, संदेहः, शंका, वितर्कः, आशंका, विकल्पः; 'my mind is still in d.' मनस्तु मे संशयमेव गाहते; 'without any d.', 'undoubtedly' असंदेहं, असंशयं, निराशंकं, निःसंशयं, संदेहं विना; अत्र कः संदेहः (in replies). 2 अस्थैर्यं, अनिर्णयः, आंदोलनं, चित्तविभ्रमः. 3 शंका, अविश्वासः, अप्रत्ययः. 4 कृच्छ्रं, विषमं, बाधा, शल्यं, विषमपदं; 'case of d.' संदेहपदं; 'in d.' सशंक-संदेहान्वित-दोलायमान- *a.* -**ful**, *a.* संदिग्ध, शंकनीय, साशंक, शंकान्वित, संशयापन्न, ससंशय; संशयित, संदेहाकुल, संशयावृत, विकल्प्य; संदेहपदं, शंकास्थानं. 2 संदिग्धार्थ, अस्पष्ट; 'to make d.' संदिह् c. -**fully**, -**ingly**, *adv.* ससंदेहं, साशंकं, सविकल्पं. -**less**, *a.* निराशंक, निःसंदेह, असंशय. -*adv.*, -**lessly**, निःसंशयं, असंशयं, विना संदेहेन, निःशंकं.

Douceur, *s.* पारितोषिकं, उपायनं, उत्कोचः. 2 सौजन्यं, सुशीलता, सद्भावः.

Dough, *s.* शुंडिका, जलसंसृष्टाः सक्तवः.

Doughty, *a.* शूर, वीर; *See* **Brave.**

Dour, *a.* दुर्दम, प्रतीप, कठिन.

Douse, *v. t.* जले निमस्ज् c. (मज्जयति). 2 निर्वा c. (वापयति).

Dove, *s.* कपोतः, पारावतः, कलरवः; 'female d.' कपोतिका; 'd.-cot or house' कपोतपालिका, विटंकः-कं; 'd. tail' काष्ठसंधिः, दारुसीवनं.

Dowager, *s.* विधवा, गतभर्तृका.

Dowdy, *s.* विरूपिणी; दुर्वसना.

Dower, Dowry, *s.* शुल्कं, यौतकं, युतकं, वाहनिकं; स्त्रीधनं. -**ed**, *a.* यौतकवती, शुल्किनी. -**less**, *a.* यौतक-शुल्क-हीन.

Dowlas, *s.* स्थूलवस्त्रं, स्थूलपट्टं.

Down, *s.* कोमलरोमन् *n.* 2 तूलं, कोमलपक्षः; 'd. of goose' हंसतूलं; तृणलोमन् *n.* (of plants). 3 निर्वनपर्वतः. 4 निम्नं, निम्नप्रदेशः; the road having ups and d. s' नतोन्नतभूमिभागो मार्गः; 'ups and d. s' पातोत्पाताः; 'there are ups and d. s in our condition (in life) as in the course of the wheel' नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण (Mc. 112). -*prep.* अधः, अधस्तात् (with gen.); gen. ex. by अनु in comp.; 'd. the current' अनुरयं; 'd to' यावत् (with acc.), पर्यंतं in comp.; 'd. to the present day' अद्य यावत्. -*adv.* अधः, अधस्तात्, नीचैः, नीचैः; gen. ex. by अव-नि-अधः pr. to roots; 'bent d' अवनत, नीचैः प्रणत; 'to come d.' अव-नि-पत् 1 P; 'd. with the tyrant' निपात्यतां-उच्छेद्यतां-असौ प्रजापीडकः; 'd. cast' अधोमुख (खी *f.*), अवनतदृष्टि, विषण्ण, अधोदृष्टि, दीनवदन, म्लान, खिन्न; 'd.-fall' वि-नि-अप-पातः, विनाशः, क्षयः, उच्छेदः, विध्वंसः, लयः; 'd.-hearted' खिन्न-दीन-चेतस्, म्लान, विषण्ण; 'd.-hill' प्रवणभूमि *f.*, उपत्यका; 'd. lying' प्रासप्रसवकाला; (*s.*) शयनसमयः; 'd.-right' अवक्र, अकुटिल, स्पष्ट, सुव्यक्त, असंदिग्ध, प्रत्यक्ष; (*adv.*) अवक्रं, अकुटिलं, सरलं, अधोधः. व्यक्तं, प्रत्यक्षं, सुस्पष्ट, भिन्नार्थं, सर्वतः, साकल्येन, सु-अति pr. -**ward**, *a.* प्रवण, पतनशील, अधस्तन (नी *f.*), अधोगामिन्, पतयालु, पातुक. -*adv* (downwards) अव pr., अधः, अवाक्, अधस्तात्. -**y**, *a.* मृदुलोमवत्. 2 मृदु, कोमल, सुकुमार, सुखस्पर्श.

Dowse, *s.* चपेटिका, तलप्रहारः, चपेटाघातः. -*v. t.* **Dip**, q. v.

Doxology, *s.* ईश-स्तुति *f.*-स्तवनं.

Doyne, *s.* गुरुजनः, ज्येष्ठः, श्रेष्ठः, नेतृ *m.*, धुरीणः.

Doze, *v. i.* निद्रा 2 P, स्वप् 2 P. -**ing**, -**y**, *a.* निद्रालस, निद्राशील.

Dozen, *a.*, *s.* द्वादशन्, द्वादशसंख्याक.

Drab, *a.* कपिश, कपिल. -*s.* कपिशवस्त्रं. 2 कुलटा, बंधकी, व्यभिचारिणी, पुंश्चली.

Drabble, *v. t.* पंकेन लिप् 6 P or दिह् 2 U.

Draff, *s.* उच्छिष्टं, शेषं, भुक्तावशेषं, मलं, किट्टं. -**ish**, -**y**, *a.* मलिन, असार, फल्गु.

Draft, *v. t.* लिख् 6 P. -*s.* *See* **Draught** 2, 3, 4.

Drag, *v. t.* आकृष् 1 P, हृ 1 P: 'd. away, off' अप-अव-कृष्; 'd. out' निष्कृष्, निर्हृ, उत्पट् 10; 'd. s on his life' कथमपि-कृच्छ्रेण-प्राणधारणां करोति, जीवितमतिवाहयति. -*v. i.* कृष् pass. 2 विलंब् 1 A, चिर(रा)यति (D.). -*s.* रथः, चक्रयानं, कोलिरथः. 2 आकर्षणी; 'd.-net' आकर्षकजालं-पाशः.

Draggle, *v. i.* पंके लुठ् c. pass. लोठ्यमानत्वाद् मलिनीभू 1 P. -*v. t.* पंकेन दुष् (दूषयति); 'd. tail' (*a.*) मलिनवसन, अपरिष्कृत.

Dragon, *s.* नागः, व्यालः, पन्नगः, सपक्षो नागः.

Dragoon, *s.* अश्वारोहः, सादिन् *m.*

Drain, *s.* निर्गमः, रेचनं; (for water) जलनिर्गमः, परी(रि)वाहः, प्रणालः-ली, प्रणालिका, जलोच्छ्वासः. *-v. t.* (क्रमशः) निर्गम् c. (गमयति), अपवह् c., निःसृ c., स्रु c. 2 शुष् c., आ-गा 1 P, क्षै c. (क्षपयति), रिच् c., रिक्तीकृ 8 U.

Drake, *s.* हंसः, कादंबः, कलहंसः.

Dram, *s.* अल्पभागः, मात्रा. 2 सुरा, वारुणी, मदिरा.

Drama, *s.* नाटकं; 'science of d.' नाट्यं **-Dramatic,-al,** *a.* नाटकीय, नाटकविषय **-ally,** *adv.* नाटकरूपेण, प्रयोगतः. **-Dramatist,** *s.* नाटकानां प्रणेतृ *m.*, नाटककारः.

Drap, *s.* वस्त्रं, वसनं, चेलः-लं; *See* **Cloth.** **-er,** *s.* वस्त्र-पट-विक्रयिन् *m.* **-ery,** *s.* वस्त्रव्यवहारः. 2 वस्त्रं, पटः, वासस् *n.* 3 प्रच्छदपटः, परिच्छदः.

Drastic, *a.* अमोघ, बलवत्, प्रभविष्णु, अनतिक्रमणीय.

Draught, *s.* पानं; 'a d. of water' गंडूषमात्रं जलं. 2 संग्रहः, सारः. 3 आलेखनं, चित्रारंभः, पांडुलेख्यं. 4 चित्रं, आलेख्यं, प्रतिमा-मानं. 5 परि(री)वाहः, जलनिर्गमः, जलोच्छ्वासः, प्रणालः-ली. 6 आकर्षणं; 'a d. horse' रथ्यः, शाकटः, शाकटीनः; 'd. board' अष्टापदं, शारिफलं; अष्टापदक्रीडा, शारिक्रीडा; 'a piece at d.' शा(सा)रिः, नयः, शा(सा)रः; जतुपुत्रकः; 'moving a piece at d.' परि(री)णायः. **-Draughtsman,** *s.* लेखकः, चित्रकरः.

Draw, *v. t.* कृष् 1 P, आ-सना-कृष्, वह् 1 P, नी 1 P; 'a carriage d. n by horses' अश्वोढः रथः. 2 निष्कृष्, संहृ 1 P, (प्रजाभ्यो धनं संहरति), निर्दुह् 2 U. 3 आ-अभिलिख् 6 P, वर्ण् 10. 4 (Water) उद्-अंच् 1 U, पर्युदंच्. 5 स्रु c., मोक्ष् 10. 6 समाकृष्, लुभ् c., 'd. n by merits' गुणलुब्ध. 7 अनुनी 1 P, आराध् c. 8 लभ् 1 A, ग्रह् 9 P, आदा 3 A; 'the day is fast d. ing to a close' परिणतप्रायमहः; 'd. curtains' जवनिकां संवृ 5 U; 'd. a sword' खड्गं कोषाद् निःसृ c. or आकृष्; 'd. in air' प्राण् 2 P, श्वस् 2 P; 'd. the breast' नि-पा 1 P, धे 1 P. *-v. i.* कृष्-आकृष्-pass. संकोचं-इ-या 2 P. 3 पूयं-पाकं जन् c. (जनयति) or उत्पद् c. **-away,** अपकृष्, अपनी, अपहृ. **-back,** प्रत्याहृ, प्रतिसंहृ, प्रत्यानी. 2 (*v. i.*) अपक्रम् 1 U, 4 P, अपसृ 1 P, अपया 2 P, परा-नि-वृत् 1 A, पलाय् 1 A. **-down,** उत्पद् c., जन् c., आवह् 1 P; 'you have d. n down ruin upon yourself with your own hands' त्वया स्वहस्तेनांगाराः कर्षिताः (P. 1. 3). **-in,** संहृ, विकृष्, प्रत्याहृ; 'd. in the reins' प्रगृह्णीतां रश्मयः. **-near,** प्रत्यासद् 1 P; उपसृप् 1 P, उपागम् 1 P, उपस्था 1 U; *See* **Approach;** (प्रत्यासीददिति स्नानसमयः Ka. 47). **-off,** अप-वि-कृष्, अपहृ, अपनी; 'd. off the cloud' निवार्यतां जलदः (Mr. 5.). 2 स्रु c., स्रुच् 6 P or c. (as liquids). 3 (*v. i.*) अपसृ 1 P; *See* **Drawback.** **-on,** आनी, आकृष्. 2 उत्पद् c., आवह् 1 P. 3 (*v. i.*) उपस्था, उपागम्, प्रत्यासद्. **-out,** निष्कृष्, निर्हृ, सं-हृ, निर्दुह्. 2 तन् 8 U, विस्तॄ c., दीर्घीकृ 8 U. विततीकृ. 3 निर्गम् c. (गमयति), उद्-भू c. 4 (Army) व्यूहेन रच् 10; सैन्यं व्यूह् 1 U. **-together,** समाकृष्, संग्रह्, समानी. **-up,** उत्कृष्, उद्-हृ-धृ 1 P, उत्तुल् 10. 2 लिख् 6 P, विरच् 10, निबंध् 9 P. 3 उन्नम् c. (नमयति); 'the goat drew himself up' अज उत्तस्थौ, शनैर्वपुरुदनमयत्. **-Drawback,** *s.* प्रत्यूहः, अंतरायः. 2 हानि *f.*, अपचयः, अपायः. 3 उद्धारः; 'd.-bridge' जंगम-चल-सेतुः. **-er,** *s.* कर्षकः. 2 चलसमुद्गकः, संपुटः, निष्कर्षणी; 'd. s' जंघावारः. **-ing,** *s.* आकर्षः-र्षणं. 2 चित्रं, आलेख्यं, प्रतिरूपं; चित्रफलकः, प्रतिमानं. 3 चित्रकर्मन् *n.*, चित्रविद्या; 'd. room' दर्शनगृहं, सभाजनकोष्ठः.

Drawl, *v. i.* चिरेण-मंदं मंदं-वाक्यानि उच्चर् c. or उदाहृ 1 P. **-ing,** *s.* मंदोच्चारणं.

Dray, -man, *See* **Cart,-man.**

Dread, *s.* भीति *f.*, त्रासः, भय, साध्वसं. *-v. t.* भी 3 P, त्रस् 1, 4 P, उद्विज् 6 A, (with abl.). **-ed,** *a.* भयहेतुः, त्रासस्थानं. **-a.,-ful,** *a.* दारुण, भयप्रद, भीम, भयंकर (री *f.*), त्रासावह, भीषण, भयानक, घोर, उग्र, भैरव (वी *f.*), रौद्र (द्री *f.*). **-fully,** *adv.* दारुणं, उग्रं, भीमं. **-less,** *a.* निर्भय, त्रासहीन. **-naught,** *s.* युद्धनौका.

Dream, *s.* स्वप्नः, स्वापः, स्वप्नदर्शनं. 2 स्वप्नसृष्टि *f.*, मिथ्यावासना, असंभवकल्पना, आभासः, वृथावासना; 'bad d.' दुःस्वप्नः; 'speak in a d.' उत्स्वप्नायते (D.). *-v. t.* स्वप्ने दृश् 1 P. *-v. i.* स्वप्नं दृश्, स्वप्नायते (D.). 2 चिंत् 10, भू c., मनसा क्लृप् c., चित्ते आकल् 10 (कलयति). 3 वृथावासनां कृ 8 U, असंभवकल्पनां कृ. **-er,** *s.* स्वप्नदर्शिन् *m.* 2 दुर्वासनाकृत् *m.*, असंभवकल्पनाकृत् *m.* 3 उन्मत्तः. **-y,** *a.* स्वप्नोपम, स्वप्नवत् *ind.*; असार.

Dreary, *a.* घोर, निर्जन, शून्य, जीर्ण. 2 निरानंद, दुरालोक, दुर्दर्शन, निष्प्रभ. **-ness,** *s.* निर्जनत्वं, घोरता, शून्यत्वं.

Dredge, *v. t.* आकृष् 1 P. *-s.* आकर्षणी.

Dregs, *s.* खलं, मलः-लं, उच्छिष्टं, शेषं, किट्टं, अवकरः, संकरः, असारः; 'he belongs to the d. of society' नीच-अधम-तमोर्थ पुरुषः. **-Dreggist,** *a.* मलिन, समलं.

Drench, *v. t.* क्लिद् c., मोक्ष् 1 P, सिच् 6 P, जलेन प्लु c. or स्ना c. (स्ना-स्न-पयति); 'd. ed with sweat' स्वेदसलिलस्नात. -*s.* पानं, पेयं.

Dress, *s.* वेशः-षः, नेपथ्यं, वस्त्रं, परिच्छदः, वासस् *n.*, वसनं, परिधानं. 2 आकल्पः, परिकर्मन् *n.*, आभरणं, प्रसाधनं, भूषणं, अलंकारः, संस्कारः, परिष्कारः, मंडनविधिः. -*v. t.* प्रसाध् c., अलंकृ 8 U, परिष्कृ, मंड् 10, भूष् 10; प्रा-वृ 5 U, वस्त्रेण आच्छद् 10 or परिवेष्ट् c., संव्ये 1 P, वस्त्रं परिधा c. (धापयति). 2 (Oneself) वस् 2 A, वस्त्रं परिधा 3 U. 3 उपक्लृप् c., संस्कृ, विधा 3 U, सज्जीकृ; 'd. food' (अन्नं) पच् 1 P, श्रा c. (श्रपयति), संस्कृ., श्री 9 U, सिद्धीकृ; 'd. hair' केशान् रच् 10 or विन्यस् 4 P; 'd. leather' चर्म परिष्कृ; 'd. wounds' क्षतं निर्णिज् 3 U or प्रक्षल् 10. -*ed,* *a.* परिच्छन्न, वस्त्रवेष्टित, सवेश, संवीत, प्रावृत, प्रसाधित, मंडित, भूषित, अलंकृत, सवासस्, वस्त्रान्वित, कृतनेपथ्य, कृतपरिकर्मन्, रचितवेष-आकल्प; 'well d.' सुवेश, 'd. as' ex. by वेश-वासस् in comp.; 'd. as a sage' मुनिवेशः, मुनिवेषधारी; 'd. in black' नीलांबर. 2 पक्व, सिद्ध, संस्कृत, श्राण, श्रपित, शृत; 'half d.' आपक्व. 3 निर्णिक्त. -*er,* *s.* प्रसाधकः, आच्छादकः, आकल्पकः. 2 अक्षफलकः. -*ing,* *s.* वस्त्रपरिधानं, नेपथ्यविधानं-अंगसंस्कारः, परिकर्मन् *n.* 2 पाकनिष्पत्ति *f.*, अन्नसंस्कारः, पाकसिद्धि *f.* 3 विलेपः-पनं, उपनाहः; 'd. room' नेपथ्यं, प्रसाधनागारं, वस्त्रपरिधानस्थानं.

Drib, *v. t.* अवच्छिद् 7 P, उद्धृ 1 P, अन्यायेन स्वायत्तीकृ or आत्मसात्कृ 8 U.

Dribble, *v. i.* कणशः स्यंद् 1 A, बिंदुक्रमेण पत् 1 P, शनैः क्षर् 1 P or स्रु 1 P or गल् 1 P. -*v. t.* कणशः स्रु c. or गल् c. -**Dribblet,** *s.* कणः, लवः, लेशः, कणिका, अल्पभागः, 'in d. s' बिंदुक्रमेण, कणशः, अल्पाल्पं.

Drift, *s.* भावः, तात्पर्यं, आशयः, अभिप्रायः, उद्देशः, प्रवृत्ति *f.*, आकांक्षा. 2 वेगः, रयः. 3 राशिः, संचयः, पुंजः, निकरः; 'd. of snow' हिमसंहति *f.*, हिमानी. 4 संपातः, वर्षः. -*v. i.* प्रवह् 1 P, जलस्रोतसा नी-वह् pass. 2 विप्लु 1 A, (विप्लवेतेह नौरिव H. 3). 3 वायुवेगेन पुंजीभू 1 P. -*v. t.* प्रवह् c., प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c. 2 संपत् c., राशीकृ 8 U, संहन् 2 P, पुंजीकृ.

Drill, *s.* वेधनी-निका, आस्फोटनी. 2 व्यायामः, अस्त्रशिक्षा, शस्त्राभ्यासः. -*v. t.* व्यध् 4 P, छिद्र् 10, समुत्कृ 6 P. 2 युद्धविद्यां शिक्ष् c.; शस्त्राभ्यासं कृ c.; रणशिक्षां दा 3 U.

Drink, *v. t.* पा 1 P; 'd. up' आचम् 1 P आपा, शुष् c. -*s.* पानं, पानीयं, पयस् *n.*, पेयं. 2 सुरा, मद्यं. -*v. i.* जलं पा or सेव् 1 A; 'd. together' सं-पा, सपीतिं कृ 8 U; 'd. (to) the health of' स्वास्थ्याय or शुभं भूयादिति प्रार्थनापूर्वकं पा. -*er,* *s.* पातृ *m.*, पायिन् *m.*, पानरतः, पानासक्तः. -*ing,* *s.* पानं, आचमनं, पीति *f.*; 'd. vessel' पानपात्रं-भाजनं, चषकः, सरकः; 'd. together' सपीति *f.*, तुल्यपानं. -**Drunk, Drunken,** *a.* मत्त, क्षीव, समद, मदोन्मत्त, उपोढमद, मदोद्धत; 'to be d.' मद् 4 P; 'to make d.' मद् c. 2 सिक्त, क्लिन्न. -*ard,* *s.* पानरतः, पानासक्तः, पानशौंडः, मधुपः, मद्यपः. -*enness,* *s.* मदः, मत्तता, क्षीवता, उन्मादः.

Drip, *v. i.* कणशः-बिंदुक्रमेण-क्षर्-गल्-स्रु 1 P or स्यंद् 1 A; 'd. ing garment' जलनिस्यंदि वस्त्रं. -*v. t.* कणशः स्रु c. or गल् c. -*s.* पटलप्रांतः-तं, वलीकः-कं, नीध्रं. -*ping,* *s.* क्षरणं, स्रवणं, गलनं, स्यंदनं, निस्यंदः. 2 मांसवसा, मांसस्नेहः-रसः; 'd. pan' रसधारिणी.

Drive, *v. t.* चर्-ल् c., नुद् 6 P or c., प्रणुद्; प्रेर् c.; (fig.) प्रवृत् c., प्रोत्सह् c., उत्तेज् c., उद्युज् 10. 2 वह् c., कृष् 1 P, नी 1 P, प्र-चुद् 10 (fig. also); 'd. n to do this rash act' चापलाय प्रचोदितः (R. 1. 9); 'd. a nail' कीलं प्रविश् c. -*v. i.* रथेन गम्-चल्-चर् 1 P. 2 सं-अप-वह् pass., चल् c. pass., नुद्-कृष्-नी pass.; 'a sharp d. ing shower' अविरलवारिधारासंपातः (U. 6). पटुधारासारः (V. 4). 3 आपत् 1 P, अभिद्रु 1 P, संघट्ट् 1 A. -*s.* रथेन संचरणं or विहारः. -*at,* उद्दिश् 6 P, अभि-प्र-इ 2 P; अधिकृत्य-उद्दिश्य-वद् 1 P; 'what are you d. ing at' किमुद्दिश्य भवान्भाषते. -*away,* -*off,* निर्-अप्-अस् 4 U, अपवह् c., निर्-अप-सृ c., निरा-अपा-कृ 8 U, अपानुद् निर्धू 5, 9 U; हृ 1 P, अप-परि-हृ, अप-ऊह् 1 U. -*out,* निर्वस् c., निष्कस् c., बहिष्कृ, निर्गम् c., विवस् c., नि-अप-सृ c. -*er,* *s.* प्रेरकः, वाहकः. 2 यंतृ *m.*, रथवाहकः, प्राजितृ *m.*, सूतः, नियंतृ *m.*, क्षत्तृ *m.*, सारथिः, सव्येष्ठृ *m.*, दाक्षिणस्थः. -*ing,* *s.* प्रेरणं, प्रचोदनं, निराकरणं &c. -**Drove,** *s.* कदंबकं, यूथं, गणः, कुलं, संघः. 2 पशुसमूहः.

Drivel, *s.* लाला, सृणि(णी)का, स्यंदिनी, द्राविका. -*v. i.* लालां पत् c. or निःसृ c. or स्रु c. 2 बुद्धिविकल *a.* भू 1 P, जडीभू, हतज्ञान *a.* भू. -*ler,* *s.* लालास्रावकः. 2 मूर्खः, बालिशः, जडः, मूढः, हतज्ञानः.

Drizzle, *v. i.* मंदं मंदं वृष् 1 P, शीकरायते (D.). -*v. t.* शीकरं वृष्. -*ing,* *s.* शीकर-

वर्षः-पातः (a d. shower).-**Drizzly**, *a.* शीकरयुक्त, तुषारविशिष्ट.

Droll, *s.* भंडः, वैहासिकः, विदूषकः. -*a.* हास्यकर (री *f.*), उपहास्य, विनोदिन्, असंबद्ध. -*v. i.* परिहासं उत्पद् c. -**ery**, *s.* परिहासः, हास्यं, विहासः, विनोदः, नर्मालापः.

Dromedary, *s.* क्रमेलः-लकः, एकककुद् *m.*

Drone, *s.* (dronish) अलसः, निरुद्योगः; आलस्यशीलः, तंद्रालुः, निरुत्साहः.

Droop, *v. t.* अवनम् c. (नमयति); नम्रीकृ 8 U; *See* **Bend**. -*v. i.* अव-वि-सद् 1 P, म्लै 1 P, ग्लै 1 P, स्रंस् 1 A, गल् 1 P, क्लम् 1, 4 P; ध्वंस् 1 A, क्षि-मुच्-pass., शिथिलीभू 1 P, अव-आ-नम् 1 P. 'let not your spirits d. (flag)' मा भवानंगानि मुंचतु (V. 2); 'I slept with d. ing limbs' मुक्तैरवयवैरशायिषि (D. K. ii. 2); 'the vine is d. ing with its load' फलभारानमिता द्राक्षालता; 'the whole frame d. s down' स्रंसते देहबंधः (U. 3). -**ing**, *a.* अवसन्न, म्लान, क्लांत, स्रस्त, शिथिल, स्रंसिन्. 2 आ-अव-नत, आवर्जित, नम्रीभूत, नमित.

Drop, *s.* बिंदु *m.*, पृषत् *n.* लवः, विप्रुष् *f.*, पृषतः, कणिका, कणः, शीकरः; 'd. by d.' बिंदुक्रमेण, कणशः; 'small d. s make a pool' जलबिंदुनिपातेन क्रमशः पूर्यते घटः. (H. 2). 2 कर्णावतंसः; लोलकः, कुंडलं. -*v. t.* कणशः स्रु c. or पत् c. or स्यंद् c.; 'd. ing rut' मदं क्षरंतः, मदनिस्यंदिनः (गजाः) 'd ing. nectar' अमृतस्रुत्, सुधास्यंदिन्. 2 अव-, नि पत् c., स्रंस् c., भ्रंश् c., च्यु c., मुच् 6 P, विसृज् 6 P, निविश् c. 3 सं-हृ 1 P, अपास् 4 P, त्यज् 1 P, निवृत् 1 A, (with abl.); 'I shall d. congratulatory lines regarding you in my letters' मदीयेषु लेखेषु त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि (M. 5); 'let this matter (story) be d. ed' संह्रियतामियं कथा (Ka. 169). -*v. i.* स्रु 1 P, च्युत्-श्च्युत् 1 P, क्षर् 1 P, गल् 1 P, स्यंद् 1 A. 2 स्रंस्-च्यु 1 A, भ्रंश् 1 A, 4 P; नि-,पत्, 'd. ing on his knees' जानुभ्यामवनौ गत्वा,क्षितितलनिहितजानुः. 3 नि-,अव-, पत् 1 P, अवसद् 1 P, मूर्छ् 1 P, *See* **Droop**; 'I feel ready to d.' अवसन्नप्रायाणि मे गात्राणि, सीदंति मे अंगानि. 4 (in) सहसा-अतर्कितं गम् 1 P or आगम्.

Dropsy, *s.* (generally) शोफ, शोथः. 2 जलोदरं, जठरामयः, उदरी; dropsied honour ' केवलं स्थूलः-महाप्रमाणः-मानः.

Dross, *s.* मंडूरं, सिंहाणं (नं), लोहमलं, सिंघाणं. 2 मलं, खलं, किट्टं; *See* **Dregs**. -**y**, *a.* समल.

Drought, *s.* अवग्र(ग्रा)हः, अनावृष्टि *f.*, अवर्षणं, जलशोषः, वृष्टिविघातः, वर्षनिरोधः. -**y**, *a.* जलशून्य, शुष्क, निरुदक, निर्वृष्टि.

Drove, *s. See* under **Drive**.

Drown, *v. t.* प्लु c.; आ सं-परि प्लु c. 2 जले निमस्ज् c., (मज्जयति) or प्रविश् c. 3 जलमज्जनेन व्यापद् c. or मृ c. 4 तिरोधा 3 U, तिरयति (D.) 'd. s my voice with his cries' केकाभिस्तिरयति मे वचनं (Mal. 9) -*v. i.*, 'to be d. ed' नि-मस्ज् 6 P, निमज्जनेन मृ 6 A, or नश् 4 P or व्यापद् 4 A; 'd. ed in the sea' पयोराशौ निमग्न; 'd. ed in reflection' चिंतामग्न. -**ing**, *s.* मज्जनं, आप्लावः, प्लावनं.

Drowse, *v. i.* नि-द्रा 2 P, स्वप् 2 P, स्वप् desid. (सुषुप्सति). -**Drowsy**, *a.* निद्रालु, तंद्रिल, निद्रालस, निद्राशील, अलस. -**ness**, *s.* तंद्रा, निद्रालुत्वं, आलस्यं, निद्रा, निद्राशीलत्वं, शयालुता.

Drub, *v. t.* वेत्रेण तड् 10 or प्र-हृ 1 P.

Drudge, *v. i.* अविरतं-अतिक्लेशेन-आयस् 1, 4 P or परिश्रमं कृ 8 U, शरीरायासेन व्रातं कृ. -*s.* व्रातीनः, अविरतायासिन् *m.*, अतिक्लेशेन निकृष्टकर्मकारिन् *m.*, हीनवृत्ति *m.* -**ry**, *s.* अविरतायासः, शरीरक्लेशः, नित्यश्रमः, नित्यक्लेशः, निकृष्टकर्माभियोगः, व्रातं.

Drug, *s.* औषधं, भेषजं, अगदः, भैषज्यं, जायु *m.* -*v. t.* औषधादिना मिश्र् 10 or संसृज् 6 P. -**Druggist**, *s.* औषधविक्रयिन् *m.*, भेषजकारः.

Drugget, *s.* स्थूलपटः, स्थूलशाटकः, वराशि *m.*

Drum, *s.* पटहः *m.*, दुंदुभि *m.* डिंडिमः, भेरी, आनकः. 2 कर्णोदरं, कर्णदुंदुभि *m.* -*v. i.* पटहं तड् 10. 2 स्पंद् 1 A. -**mer**, *s.* पटहताडकः. -**Drumstick**, *s.* कोणः, शारिका.

Dry, (up) *v. i.* शुष् 4 P, शोषं या 2 P or गम् 1 P, आश्यै 1 A, नीरसीभू 1 P, शुष्कीभू. -*v. t.* शुष् c., शोषं नी 1 P, आश्यै c., रसं अपनी or हृ 1 P, शुष्कीकृ 8 U; 'she dried rice in the sun' तंडुलान्सूर्यातपे दत्तवती. 2 (up) आचम् 1 P, (आचामति स्वेदलवान् मुखे ते R. xiii. 20); उच्छुष् c., आ-नि-पा 1 P. -*a.* शुष्क, निर्जल, नीरस, अक्लिन्न, वान. 2 असार, निःसार, निःसत्व, अरस, नीरस, फल्गु, विरस, तुच्छ. 3 उदकार्थिन्, तृषित, तृषार्त; 'd. soil' मरु *m.*, मरुस्थलं-ली; 'd. ground' स्थलं; 'd.-eyed' निरश्रुनयन; 'd. nurse' शिशुपालिका, अंकपाली; 'd. shod' शुष्कचरण *a.* -**er**, *s.* शोषकः-णः. -**ing**, *s.* शोषः, शोषणं, शुष्कीकरणं. -**ly**, *adv.* शुष्कं, नीरसं, अरसिकतया. -**ness**, *s.* शोषः, शुष्कता, निर्जलत्वं, अरसिकत्वं.

Dryad, *s.* वनदेवता.

Dual, *a.* द्विसंख्य, द्विवाचक, द्विक; 'the d. number' द्विवचनं. **-ity,** *s.* द्वैतं, द्वित्वं, द्वैधं.

Dub, *v. t.* नवपदे नियुज् 7 A, 10, नवपदवीं दा 3 U or आरुह् c. (रोपयति).

Dubious, *a.* अस्पष्ट, अव्यक्त, संदिग्धार्थ. 2 संदिग्ध, अनिश्चित; *See* **Doubtful.** **-ly,** *adv.* ससंशयं, साशंकं, अस्पष्टं, अव्यक्तं.

Duck, *s.* कलहंसः, कादंबः, चक्रवाकः, हंसः, प्लवः, वरटः. 2 तिर्यक्क्षिप्तः प्रस्तरः 3 दयितः-ता, प्रियः-या, वत्स -त्सा. **-***v. i.* मस्ज् 6 P, अवगाह् 1 A; मस्तकं नम् c. **-***v. t.* जले अवगाह् c. or आप्लु c. or मस्ज् c. (मज्जयति). **-er,** *s.* आप्लावकः, मंक्त *m.* **-ing,** *s.* मज्जनं, अवगाहः, आप्लावनं. **-ling,** *s.* हंस-शावकः-शिशुः.

Duct, *s.* प्रणालः-ली, मार्गः, संक्रमः, कुल्या. 2 शिरा, नाडि-डी *f.*, धमनी.

Ductile, *a.* विनेय, विधेय, वश्य. 2 आनम्य, मृदु, कोमल, उद्वर्तनयोग्य. **-Ductility,** *s.* वश्यता; आनम्यता; सुखोद्वर्तनीयता.

Dude, *s. See* **Fop.**

Dudgeon, *s.* अमर्षः, कोपः; *See* **Anger.** 2 आसिपुत्रिका, कृपाणिका.

Due, *a.* देय, दातव्य, परिशोध्य; ex. by pot. pass. part., or अर्ह् 1 P; 'respect is d. to our elders' पूज्या हि गुरवः; 'the debt d.' परिशोध्यं ऋणं. 2 अनुरूप, युक्त, उचित, योग्य, यथार्ह, यथा in comp.; 'in d. time' समये, यथासमयं; यथावधि, &c. 3 (Owing to) ex. by कारणं, हेतुः; 'your failure is d. to your carelessness alone' प्रमाद एव तवासिद्धेः कारणं-हेतुः, प्रमादात् तवासिद्धिः प्राभूत् **-***s.* देयं, परिशोध्यं, ऋणं. 2 प्राप्यं, ग्राह्यं, प्राप्तव्यं, योग्यांशः. 3 कर्तव्यं, अवश्यं कार्यं. 4 करः, शुल्कः-ल्कं, राजग्राह्यो भागः, राजस्वं. 5 अधिकारः. **-Duly,** *adv.* यथातथं, यथोचितं, यथार्हं, उचितं, सम्यक्. 2 यथासमयं, समये, यथावसरं.

Duel, *s.* द्वंद्वं, द्वंद्वयुद्धं, मल्लयुद्धं, नियुद्धं, बाहुयुद्धं. **-***v. i.* द्वंद्वयुद्धं कृ 8 U, द्वंद्वं कृ. **-ler, -list,** *s.* द्वंद्व-मल्ल-योद्धृ *m.*, द्वंद्वकृत् *m.*

Duffer, *See* **Dunce.** 2 *See* **Pedlar.**

Dug, *s.* स्तनः, पयोधरः.

Dulcet, *a.* सुरस, स्वादु, मधुर, मिष्ट; 'd. to the ear' सुखश्रव, सुस्वर, श्रुतिमनोहर. **-Dulcify,** *v. t.* मधुरीकृ 8 U, स्वादूकृ.

Dulcimer, *s.* वल्लकी, विपंचिका.

Dull, *a.* मंद, मूढ, जड, मंद-स्थूल बुद्धि-मति; 'd.-witted' दुर्मति. जडमति, मंदधी 2 निष्प्रभ, विषण्ण, निस्तेजस्, निरुत्साह, क्लांत, म्लान, मंदच्छाय, मलिन, मंदद्युति. 3 अतीक्ष्ण, धाराहीन, अतेजस्, कुंठ. 4 अलस, मंथर, जड, मंदगति, मंद अनुष्ण, शीतक, तुंदपरिमृज. 5 स्थूल, घनं. 6 अरस, अरसिक. 7 कष्टकर (री *f.*), विषम, निरानंद; 'd. of bearing' विकलकर्ण; 'a d. day' दुर्दिनं, तमोवृतं नभः. **-***v. t.* जडीकृ 8 U, मुह् c., कुंठ् 10, अतीक्ष्णीकृ, घनीकृ, निष्प्रभीकृ, तेजो हृ 1 P; वि-षद् c., म्लानीकृ, उत्साहं भंज् 7 P. **-ness,** *s* मांद्यं, जाड्यं, मूढता; अतीक्ष्णता. आलस्यं, तेजोमांद्यं, निष्प्रभता, अतेजस् *n.*, &c.

Dumb, *a.* मूक, जड, जडवाच्, वाग्रहित, वाक्शक्तिहीन, अनालाप, अवाच्. **-ly,** *adv.* मूकवत्, निःशब्दं; तूष्णीं, वाग्व्यतिरेकेण. **-ness,** *s.* मूकता, वाक्स्तंभः, जाड्यं, वाग्राहित्यं.

Dumpish, *a* विषण्ण, दीन, उद्विग्न.

Dumps, *s.* विषादः, उद्वेगः, म्लानि *f.*

Dumpy, *a.* ह्रस्वस्थूल.

Dun, *a.* कपिश, श्याव-म, पिंगल, कृष्ण. **-***s.* सनिर्बंधं ऋणप्रार्थना.

Dunce, *s.* स्थूलबुद्धिः, दुर्मेधस् *m.*, अज्ञः, अनभिज्ञः, मूढः, मूढमतिः, जडः, जडधीः.

Dune, *s.* सैकतवप्रः, वालुकानिचयः.

Dung, *s.* पुरीषं, विष्ठा, शकृत् *n.*, शमलं, विष् *f.*, अप(व)स्करः, गूथं, वर्चस्कः-स्कं, उच्चारः, 'd. hill' शकृन्निचयः, अवकरनिकरः, (*a.*) हीनजाति, अधम, नीच. **-***v. t.* पुरीषेण लिप् 6 P or अंज् 7 P.

Dungeon, *s.* कारा; कारागृहं-वेश्मन् *n.*, बंधनागारं, अंधकूपः.

Dupe, *v. t.* वंच् 10; प्रतॄ c.: *See* **Cheat.** **-***s.* सुखप्रतार्यः, सुखेन वंचनीयः.

Duplex, *a.* द्विगुण.

Duplicate, *a.* द्विगुण; 'a d. copy' प्रतिलिपि *f.*; प्रतिरूपं. **-***v. t.* द्विगुणीकृ 8 U, पुटीकृ, पुटयति (U). **-ion,** *s.* द्विगुणीकरणं, पुटीकरणं. **-ure,** *s.* पुटः-टं, भंगः; व्यावर्तनं.

Duplicity, *s.* कपटं, छलं, माया; द्वैधीभावः; *See* **Fraud.**

Durable, *a.* स्थायिन्, चिरस्थायिन्, दीर्घकाल, अविनाशिन्, स्थिर, ध्रुव, अक्षय, अनपाय. **-Durably,** *adv.* स्थिरं, ध्रुवं, अनपायेन. **-Durability,** *s.* स्थिरता, अक्षयता, चिरस्थायित्वं.

Durance, *s.* आसेधः, निरोधः, बंधनं, कारानिरोधः.

Duration, *s.* स्थायित्वं, अवस्थिति *f.*, स्थिति *f.* 2 ध्रुवता, स्थिरता, अविरामः, अविच्छेदः, सातत्यं. 3 परिमाणं; 'of long d.' दीर्घस्थायिन्, स्थायिन्; 'of short d.' अस्थायिन्, क्षणभंगुर, क्षणिक.

During, *prep.* यावत्, मध्ये, अंतरे in comp.; ex. by loc., or loc. abs.; 'd. youth' यौवनदशायां; 'd. Das'aratha's reign' दशरथे महीं शासति; 'd. life' यावज्जीवं-वन; oft. by आ with abl.

Dusk, *s.* संध्या, प्रदोषः, संध्याकालः-समयः; ‘time of d.’ सायंतनः समयः, संध्याकालः, सायंकालः. -*a.*, -**y,** -**ish,** *a.* ईषत्तामस (सीf.), ईषत्तिमिरावृत, ईषत्कृष्ण, सतमस्कल्प, आकृष्ण, आनील. -**ily,** *adv.* अस्पष्टं, ईषत्तमसा. -**iness,** *s.* ईषदंधकारः, ईषत्तिमिरं.

Dust, *s.* धूलि-ली *f.*, रजस् *n.*, रेणु *m.*, *f.*, पांशुः *m.*-सुः *m.*, क्षोदः, चूर्णं. 2 संकरः, अवकरः-स्करः, उच्छिष्टं; ‘d. of flowers’ परागः; ‘fragrant d.’ पिष्टातः, पटवासः; ‘d. of gold’ कांचनभूः; ‘d. coloured’ धूलिधूसर. -*v. t.* रेणुं अपमृज् 2 P, नीरजीकृ 8 U, निर्धूलीकृ; ‘d. hole-bin’ संकरनिचयस्थानं; ‘d.-man’ खलपूः, धूलिमार्जकः, रजोवाहकः. -**ed,** *a.* नीरजीकृत, हृतपांशु, संमृष्ट. -**er,** *s.* मार्जनपटः, नक्तकः, रेणुसंमार्जकः. -**y,** *a.* पांशुल, धूलिधूसर, रेणुदूषित-रूक्ष.

Duty, *s.* धर्मः, कर्तव्यं. 2 कर्मन् *n.*, कृत्यं, कार्यं, नियमः, व्रतं. 3 नियोगः, अधिकारः, पदं, आस्पदं; ‘one who has done his d.’ कृतकृत्यः, कृतिन् *m.*; ‘morning duties’ प्रातःकृत्यानि; ‘having heavy d.’ धुर्यः, धूर्वहः, धुरीणः. 4 करः, शुल्कः-ल्कं; तार्यं, तारिकं (for boats). 5 आदरः, भक्ति *f.*, मानः. -**Duteous,** -**Dutiful,** *a.* भक्त, आज्ञाधारक, अनुविधायिन्, आज्ञापालक, आदृत, धर्मज्ञ, भक्तिमत्, वश्य, ज्ञातधर्मन्; *See* **Obedient.** -**ly,** *adv.* भक्तवत्, भक्त्या. -**ness,** *s.* भक्ति *f.*, आज्ञानुवर्तनं, वश्यता, सेवा, शुश्रूषा, अनुरोधः.

Dux, *s.* अग्रणी *m.*, छात्रोत्तमः.

Dwarf, *s.* वामनः, खर्वः, ह्रस्वः, ह्रस्वकायः. -*v. t.* ह्रस् c., खर्वीकृ 8 U. -**ish,** *a.* खर्व, वामन, ह्रस्व, अतुंग, खर्वाकार, वामनमूर्ति.

Dwell, *v. i.* वस् 1 P, नि-प्रति-वस्, आ-अधि-वस् (with acc.), वृत् 1 A, स्था 1 P. 2 अध्यास् 2 A., आश्रि 1 U, निषेव् 1 A; ‘d. upon’ विस्तरेण वर्ण् 10; प्रपंचयति (D.), सविस्तरं निरूप् 10; ‘d. abroad’ प्रवस्; ‘d. together’ एकत्र-सं-वस्. -**er,** *s.* निवासिन्-वासिन्-वासकृत् *m.*, स्थ-वर्तिन् in comp. -**ing,** *s.* नि-आ-वासः, वसति *f.*, निलयः, आलयः, वसतिस्थानं, गृहं, आयतनं, आगारं, भवनं, आवसथः, ओकस् *n.*; *See* **House**; ‘d. house or place’ वासगृहं-स्थानं.

Dwindle, *v. i.* *See* **Decrease;** ‘the number of members d ed down to four’ सभासदां संख्या तथा क्षीणाभूद् यथा चत्वार एव अवशिष्टाः.

Dye, *s.* रंगः, वर्णः, रागः; ‘red d.’ लाक्षा. -*v. t.* रंज् 10, वर्ण् 10, कुंकुमादिना अञ्ज् 7 P. -**ed,** *a.* रक्त, रंजित, सराग, कषायित, रागित; ‘d. red’ अरुणित. -**er,** *s.* रंजकः, वस्त्ररागकृत् *m.*

Dyke, *See* **Dike.**

Dynasty, *s.* वंशः, कुलं, अन्वयः, आवलि-ली *f.*, श्रेणि; ‘of solar d.’ सूर्यवंश्यः.

Dysentery, *s.* प्रवाहिका, अतिसारः, प्रस्कंदिका, आमातिसारः, संग्रहणी.

Dyspepsia, *s.* अजीर्ण-र्णि *f.*, मंदाग्निः, अन्नविकारः, अपाकः.

Dyspnœa, *s.* श्वासावरोधः, श्वासस्तंभः.

E.

Each, *a.* सर्व, सकल; gen. ex. by प्रति-अनु. in comp., or by repetition of word; दिने दिने, प्रतिदिनं, &c.: ‘all went away, e. to his own house’ एकैकः स्वं स्वं गृहं निर्जगाम; ‘e. one’ एकैक *a.*, एकैकशः, पृथक् पृथक्; ‘e. other’ अन्योन्यं, इतरेतरं, परस्परं.

Eager, *a.* (Of persons) उत्सुक, लालस, लोलुप, अत्याकांक्षिन्, व्यग्र, सोत्कंठ, आसक्त, रत, सोत्साह. 2 गाढ, प्रबल, उत्कट, प्रचंड, सातिशय; तीव्र, तीक्ष्ण; oft. ex. by उत्तम् 4 P, (उत्ताम्यति मे हृदयं तद्दर्शनाय Ka.349). -**ly,** *adv.* सस्पृहं, सतृष्णं; सोत्कंठं, कुतूहलात्, अतिवांछया, उत्कटं. -**ness,** *s.* लालसा; औत्सुक्यं, उत्साहः, अतिस्पृहा-वांछा, उत्कटता, व्यग्रता, कुतूहलं, कौतुकं.

Eagle, *s.* गरुत्मत् *m.*, उत्क्रोशः; *See* **Garuda**; ‘e. eyed’ सूक्ष्मदृष्टि.

Ear, *s.* कर्णः, श्रोत्रं, श्रुति *f.*, श्रवणं; श्रवः, शब्दग्रहः, ‘outer e.’ श्रुतिमंडलं-वेष्टनं; ‘lobe of e.’ कर्णपालि *f.*; ‘root of e.’ कर्णमूलं, कर्णजाहं; ‘tip of e.’ श्रवणपालि-ली *f.*; ‘having the e.s pricked’ स्तब्धकर्ण; ‘give e.’ **attend to** q. v.; ‘he has his lord's e.’ स भर्तुर्विश्रंभस्थानं-विश्वासभूमिः; ‘e.-ache’ कर्णशूलः-लं; ‘e.-drop’ कर्णपूरः; ‘e.-lap’ कर्णपालिः, कर्णशष्कुली; ‘e. pick’ कर्णकंडूयनकः; ‘e.-ring’ कर्णावतंसः, कुंडलं; कर्णभूषणं, कर्णिका, उत्तंसः; ‘e.-shot’ कर्ण-श्रवण-गोचरः-विषयः; ‘be within e.-shot’ श्रवणगोचरे तिष्ठ; ‘e.-wax’ कर्णमलं, पिंजूषः; ‘e.-witness’ श्रुतसाक्षिन् *m.*; ‘e.-wig’ कर्णकीटः-जलूका. 2 शीर्षकं; कणिशं, मंजरी.

Early, *a.* आद्य, प्रथम, पूर्व. 2 आचिर, सद्यस्क, प्रत्यग्र, अभिनव, नूतन. 3 अकाल, अपूर्णकाल, आकालिक (की *f.*), अनवसर-परिणत or पक्व. 4 प्रातःकालीन, पूर्वाह्णतन-प्रगेतन (नी *f.*), वि-प्र-भातीय, उषस्य, औषस (सी

f.), प्रभात-प्रात: in comp. -*adv*. प्रातर्, प्रत्युषसि, प्रत्यूषे; विभाते, प्रातःकाले, प्रभाते, व्युष्टे, अग्रे; 'e. in the morning' महति प्रत्यूषे; 'getting up e.' लघुलघूत्थित. 2 सद्यः, शीघ्रं, सत्वरं, आशु, सपदि. 3 पूर्वं, अग्रे, प्राक्. **-ness,** *s*. पूर्वत्वं, अग्रत्वं. 2 प्रत्यग्रता, अचिरत्वं. 3 अकालता, अकालपरिणति *f*. 4 सुप्रभातं. 5 क्षिप्रता, आविलंबः, शीघ्रता.

Earn, *v. t*. अर्ज् 10, उपार्ज्, उपादा 3 A, आप् 5 P; लभ् 1 A, निर्विश् 6 P; *See* Get. 2 अर्ह् 1 P; 'e. livelihood' वृत्तिं कॢप् c. or सं-पद् c. **-ings,** *s*. उपार्जितं, वेतनं, लभ्यांशः.

Earnest, *a*. उद्युक्त, कृतोद्यम; *See* Eager; 'e. desire' गाढाभिलाषः, अतिस्पृहा, कुतूहलं. 2 निविष्ट, एकाग्र, समाहित, आसक्त, एकतान, एकायन, एकसर्ग, एकाग्र्य, अनन्यासक्त, एकाग्रचित्त, अभिनिविष्ट, अनन्यविषय, उद्योगिन्; आसक्तचित्त, अनन्यवृत्ति, निविष्टमनस् (of persons). 3 अपरिहासशील. -*s*. अपरिहासः, अलाघवं; 'I am in e.' न परिहसामि, नायं परिहासस्य समयः; 'take in e.' परमार्थेन ग्रह् 9 P, (परिहासविजल्पितं वचः परमार्थेन न गृह्यतां S. 2). 2 सत्यंकारः; सत्याकृति *f*., सत्यापनं-ना. 3 पूर्वभुक्ति *f*. 4 उपन्यासः, निक्षेपः, आधिः. **-ly,** 'in e.' *adv*. समाहित-निविष्ट-चेतसा, यत्नतः, सोद्योगं, एकाग्रमनसा, अभिनिवेशेन, उत्सुकं, सोत्साहं; 'e. desirous' अत्यभिलषिन्, गाढाभिलाष. 2 अपरिहासेन, परमार्थतः, अलाघवं. **-ness,** *s*. एकाग्रता, उत्कटता, औत्सुक्यं, अभिनिवेशः, चित्तासक्ति *f*., उत्साहः, अभियोगः, उद्योगः.

Earth, *s*. मही, पृथिवी, पृथ्वी, वसुधा, उर्वी, वसुंधरा, धरा, धरित्री, मेदिनी, वसुमती, धरणी, अवनि *f*.-नी, भूः, भूमि *f*., क्षो(क्षौ)णि *f*.-णी, क्षिति *f*., अचला, अनंता, रसा, विश्वंभरा, स्थिरा, काश्यपी, सर्वंसहा, कु *f*., इला, ज्या, गोत्रा, क्ष्मा, क्षमा, भूतधात्री, रत्नगर्भा, जगती. 2 मृद् *f*., मृत्तिका. -*v. i*. भूमौ बिलं कृत्वा निवस् 1 P. -*v. t*. भूमौ निविश् c. or निधा 3 U or निक्षिप् 6 P; 'e.-born' भूमिज, महीज; 'e. ling' भूजंतु *m*., मर्त्यः, पामरः; 'e.-quake' कंपः-चलन in comp. with (*s*.): क्ष्मायितं, भूकंपः, &c.; 'e. worm' भूजंतु *m*., नीचजनः, अधमः. **-en,** *a*. मृण्मय (यी *f*.), मार्तिक (की *f*.); 'e. ware' मृद्भांडं, कौलालकं, मार्तिकं. **-ly,** *a*. पार्थिव (वी *f*.), सांसारिक (की *f*.), ऐहिक (की *f*.), मर्त्य; नश्वर; विनाशधर्मन्; 'e.-minded' संसारासक्तचित्त; विषयोपभोगरत. **-y,** *a*. पार्थिव, भौम (मी *f*.), मार्तिक.

Ease, *s*. सुखं, सौख्यं, विश्रामः, निर्वृति *f*., निरुद्वेगता, स्वास्थ्यं, स्वस्थता; 'I am at e.' लब्धं स्वास्थ्यं मया; अहं निर्वृतः, वीतचिंतः; 'this my soul is completely at e.' जातो ममायं विशदः प्रकामं अंतरात्मा (S. 4); 'at one's e.' यथाकामं, पर्याप्तं, यथेच्छं, प्रकामं, सुखेन, सुख in comp., अकुतोभयं, निर्वृत्या; 'sleeping at e.' सुखसुप्त. 2 सौकर्यं, अनायासः, सुकरत्वं, सुखं, लीला. -*v. t*. लघयति (D.), लघूकृ 8 U, प्र-उप-शम् c. (शमयति), सां(शां)त्व् 10: हृ 1 P, अपनी 1 P; 'e. from griefs, burden &c. &c.' दुःखात् &c. मुच् c., दुःखं-भारं-अपनी, उद्धृ, &c. **-Easy,** *a*. सुकर, अयत्नसाध्य, अनायास, सुखसाध्य. 2 सुबोध, सुगम, अविषम; अगहन; gen. ex. by सुख or सु in comp., अज्ञः सुखमाराध्यः; बालानां सुखबोधाय, &c.; 'e. of utterance' सुखोच्चार्य; 'e. style' सुगमा भाषासरणिः; 'e. to get' सुलभ, सुखलभ्य, &c.; 'e. in going' सुखचार; 'e. case' निःशल्योर्थः. 3 निर्वृत, सुस्थ, निश्चिंत, स्वस्थ, सुखिन्, निरुद्वेग, शांत, वीतचिंत, निर्वृतिमत्, विशद; 'e. circumstances' सुस्थिति *f*., द्रव्यानुकूल्यं; 'heart, be not un-e.' हृदय मा उत्ताम्य (S. 1). 4 अनुकूल, अनुरोधिन्. अनुविधायिन्. **-ly,** *adv*. अनायासेन, सुखं, सुखेन, अयत्नेन, लीलया, अश्रमेण, सुकरं, अक्लेशं, सौकर्येण; सु or सुख in comp. 2 निरुद्वेगं, निश्चिंतं, स्वास्थ्येन. 3 सावकाशं, यथावसरं. **-ness,** *s*. सौकर्यं, अनायासः, सुखसाध्यता. 2 सुगमत्वं, अवैषम्यं. 3 शांति *f*., स्वास्थ्यं, अक्लेशः, सुखं. 4 अनुरोधः, आनुकूल्यं, अनुवर्तनशीलता.

Easel, *s*. चित्राधारः, चित्रफलकं.

Easement, *s*. मलविसर्गः. 2 परभूमावधिकारः.

East, *s*. पूर्वदिश् *f*., पूर्वा, प्राची, पूर्वाशा, ऐंद्री. 2 पूर्वदेशः, पौरस्त्यजनपदः. -*a*., **-erly, -ern,** *a*. पूर्व, प्राच् (ची *f*.), पौरस्त्य, प्राच्य, प्राचीन, पूर्वदेशीय, पूर्वदिक्स्थ; प्राङ्मुख; 'the mountain is e. of the sea' समुद्राद् गिरिः पूर्वः; 'the e. mountain' उदयः, उदय-गिरिः-शैलः-अचलः, पूर्वाचलः. **-erly, -ward,** *adv*. पूर्वेण, पूर्वस्यां दिशि, पुरः, पूर्वं, प्राक्, पुरस्तात्, पूर्वदेशे.

Eat, *v. t*. अद् 2 P, जक्ष् 2 P, ग्रस् 1 A, खाद् 1 P, अश् 9 P, भक्ष् 10, भुज् 7 A, घस् 1 P, प्सा 2 P, आस्वाद् 1 A, गॄ 6 P, चर्व् 1 P, अभ्यवहृ 1 P, प्रत्यवसो 4 P; 'e. one's own words' स्ववचनमसत्यं-अवितथं-कृ 8 U, स्ववचनेन विसंवद् 1 P; 'e., drink and, be merry' अश्नीतपिबता, खादतमोदता. **-able,** *s*. भक्ष्यं, भोज्यं, अभ्यवहार्यं, खाद्यं, भोज्य-वस्तु-द्रव्यं. **-er,** *s*. खादकः, भक्षकः भोक्तृ *m*., आशिन् *m*., अशन-भुज् in comp.; अद्-अद् in comp.; 'flesh-e.s' मांसाशिनः, पिशिताशनाः; 'dead-body-e.' कुपण-

भुज्; क्रव्याद्, मांसादः, &c. -ing, s. भक्षणं, खादनं, अशनं, आस्वादनं, भोजनं, &c.; 'e. together' सहभोजनं, जग्धि f.; 'e.-house' सिद्धान्नविक्रयशाला.

Eaves, s. पटलप्रांतः, वलीकः-कं, नीध्रं, वल-(ड)भि-भी f. 'e.-dropper' निभृतश्रवणेच्छुः, प्रच्छन्नश्राविन् m.

Ebb, s. क्षीयमाणा वेला, वेलापरिवर्तनं-परावर्तः, परावेला. 2 (fig.) क्षयः, हानि f., अपचयः; व्यसनं, नाशः, परिवर्तः; 'e. and flow' व्यसनोदयौ. -v. i. क्षि pass., ह्रासं-लयं-गम् 1 P; (वेलावत्) परावृत् 1 A; *See* Decay.

Ebony, s. कोविदारः, चमरिकः, कुद्दालः, युगपत्रकः.

Ebriety, s. मदः, मत्तता, उन्मादः.

Ebriosity, s. उन्मादशीलता, क्षीवता.

Ebullition, s. उत्सेचनं, उत्सेकः; उद्रेकः, फेनायितं, फेनोद्गमः. 2 अंतःक्षोभः, अंतर्वेगः, चित्तवैक्लव्यं-व्याकुलता, अंतस्तापः.

Eccentric, a. सामान्येतर, विभिन्न, विलक्षण, लोकबाह्य, लोकाचारविरुद्ध, विपथगामिन्, व्यभिचारिन्, उत्क्रांतमर्याद, उत्सूत्र. 2 केंद्रभ्रष्ट-च्युत. -ity, s. वैषम्यं, उत्सूत्रता, वैलक्षण्यं, सामान्यविरोधः, लोकाचार-व्यवहार-विरोधः.

Ecclesiastic, s. पुरोहितः, आचार्यः, धर्माध्यापकः. -a., -al, a. धर्मोपदेशविषय, पौरोहित्यसंबंधिन्.

Echo, s. प्रतिशब्दः-ध्वनिः-स्वनः-रवः-नादः-वचनं-गर्जनं, अनुरसितं-नादः, प्रतिश्रुत्-ति f. -v. i. प्रतिस्वन्-ध्वन्-रस्-नद्-स्तन् 1 P, प्रतिरु 2 P, अनुनद्-रस्; कृ 8 U with (s.). -v. t. Causal of roots above; 'e.-ing the caves' कंदरभुवः प्रतिध्वानयन्-प्रतिध्वनिताः कुर्वन्.

Eclat, s. प्रतिष्ठा, शोभा, गौरवं; आडंबरः. 2 स्तुति f., कीर्ति f., ख्याति f., प्रशंसा.

Eclectic, a. उद्धारक.

Eclipse, s. ग्रहः, ग्रहणं, ग्रासः, उपरागः, उपसर्गः, उपप्लवः, ग्रहपीडनं. -v. t. ग्रस् 1 A, प्र-आ-च्छद् 10, तिमिरयति (D.), ग्रह् 9 P, उपसृज् 6 P. उप-प्लु 1 A, उपरंज् c. 2 (fig.) प्र-आ-छद्, (गुणवत्तरपात्रेण छाद्यंते गुणिनां गुणाः P. I. 10); प्रत्यादिश् 6 P; 'Urvasi e.s Lakshmi, proud of her beauty' उर्वशी प्रत्यादेशो रूपगर्वितायाः श्रियः (V. 1.). -ed, a. उपरक्त, उपसृष्ट, ग्रस्त, उपप्लुत, सोपप्लव, ग्रहपीडित. 2 तमोवृत, प्रच्छन्न, मलिनप्रभ. 3 प्रत्यादिष्ट, प्रत्याख्यात.

Ecliptic, s. क्रांतिवृत्तं-मंडलं, रविमार्गः.

Economy, s. निर्वाहः-हणं, प्रणयनं, नयः, नीति f.; 'e. of the house' गृहकार्यनिर्वाहः, गार्हस्थ्यं. 2 परिमित-मित-व्ययः, स्वल्पविवेक-व्ययः, अमुक्तहस्तत्वं. 3 विन्यासः, विरचनं, प्रकल्पनं, संविधानं. 4 (Political) अर्थशास्त्रं, राजनीतिः-शास्त्रं. -ic, -ical, a. मित-स्वल्प-व्यय, अमुक्तहस्त. 2 कार्यनिर्वाहसंबंधिन्. -ically, adv. मित-स्वल्प-व्ययेन, अमुक्तहस्त. -ist, s. मितव्ययिन् m., अमुक्तहस्तः. 2 अर्थशास्त्रज्ञः, राजशास्त्रविद् m., नीतिज्ञः. -ize, v. t. मितं व्यय् 10 (व्ययति); स्वल्पशः विनि-प्र-युज् 7 A, 10. -v. i. मितव्ययेन गृहकार्याणि निर्वह् c. or प्रणी 1 P.

Ecstasy, s. हर्षोन्मादः, आनंदभरः, प्रहर्षः, प्रमदः, अत्यानंदः, संमोहः, उन्मादः. -ed, a. हर्षोन्मत्त, -पुलकित, हर्षमूढ-जड. -Ecstatic -al, a. उन्मादिन्, संमोहिन्, परमानंदप्रद मोहक.

Ecumenical, a. सर्वसाधारण (णी f.).

Eczema, s. दद्रु m., पामन् m., पामा.

Edacious, See Greedy.

Eddy, s. आवर्तः, भ्रमः-मि f., भ्रमरकः.

Edentated, a. निर्दशन, नीरद.

Edge, s. धारा, अग्रं, कोटि-अणि f., पालि-ली f., अणि f.-णी. 2 उपांतः, सीमा, प्रांतः, परिसरः, पर्यंतः, उत्संगः; समंतः. 3 अंचलः, दशाः pl. (of garments). 4 तेजस् n., तीक्ष्णता, निशितता; 'e. of a brook' कच्छः, कूलं, तीरं, तटं; 'two or double e.-ed' द्विधार, उभयतस्तीक्ष्ण; कार्यद्वयसाधक; 'setting the teeth on e.' दंतहर्षः. -v. t. प्रांतयति (D.), पर्यंतेन सनाथीकृ 8 U. 2 शो 4 P, तिज् c., तीक्ष्णीकृ. -ed, a. कोटिमत्, धारासनाथ, तीक्ष्ण, सधार; 'sharp e.' तीक्ष्णाग्र, निशितधार. -less, a. अतीक्ष्ण, धाराहीन.

Edible, a. खाद्य, भक्ष्य, भोज्य.

Edict, s. शासनं, राजाज्ञा, राजशासनं; 'written e.' आज्ञा-शासन-पत्रं.

Edifice, s. भवनं, सदनं, हर्म्यं, मंदिरं, गृहं, प्रासादः, सौधं.

Edify, v. t. उत्कृष् 1 P, उन्नी 1 P, उन्नतिं-उत्कर्षं प्राप् c. 2 ज्ञानं वृध् c., शिक्ष् c., उपदिश् 6 P, मोहं-भ्रांतिं-नश् c. or निरस् 4 U. -ed, a. प्राप्तज्ञान, निरस्तमोह, उपदिष्ट. -ication, s. ज्ञानप्राप्ति-वृद्धि f., उपदेशः, शिक्षणं. -ing, a. उपदेशक, ज्ञानवर्धक.

Edit, v. t. शोधयित्वा प्रकाश् c., शुध् c. 2 लिख् 6 P. -ion, s. प्रकाशनं, शोधनं, प्रकटीकरणं. 2 आवृत्ति f. -or, s. प्रकाशकः. 2 लेखकः.

Educate, v. t. विनी 1 P, शास् 2 P, अनु शास्, प्रबुध् c., शिक्ष् c., अधि-इ c. (अध्यापयति), संस्कृ 8 U; उपदिश् 6 P. 2 विद्यादानेन पा c. (पालयति) or संवृ c. or पुष् c. -ed, a. कृत-गृहीत-उपात्त-लब्ध-विद्य, शिक्षित, प्रबुद्ध; संस्कृतचित्त, विनीत, व्युत्पन्न, कृताभ्यास, लब्धज्ञान. -ion, s. वि

-नयः, शिक्षा-क्षणं, अध्यापनं, अनुशासनं, संस्कारः, विद्याज्ञानं-ग्रहणं-प्राप्ति *f*., व्युत्पत्ति *f*., उपदेशः. 2 पोषणं, संवर्धनं. **-or**, *s*. विनेतृ *m*., शिक्षकः, प्रबोधकः.

Educe, *v. t.* निष्कृष् 1 P, निर्हृ 1 P.

Eel, *s*. जलव्यालः, अंधाहिः *m*.

Effable, *a*. कथनीय, निर्वचनीय; वाच्य; 'in-e.' अनिर्वचनीय; 'in-e. joy' कोपि आनंदः, किमपि सुखं.

Efface, *v. t.* अप-प्र-व्या-उद्-निर्-मृज् 2 P or c., विनश् c., उच्छिद् 7 P, विलुप् 6 P or c., उद्-हृ 1 P, उन्मूल् 10. **-***v. i.* उन्मृज् 2 P. **-ment**, *s*. अपमार्जनं, लोपः, व्यामर्दः; 'e. of colours' वर्तिकोच्छ्वासः (S. 6).

Effect, *s*. कार्यं, नैमित्तिकं; उत्पन्नं, निष्पन्नं, सिद्धि *f*. 2 फलं, परिणामः, फलोदयः, उत्तरफलं, अंतः. 3 अर्थः, प्रयोजनं, गुणः, फलं, प्रभावः. 4 अभिप्रायः, आशयः. 5 निष्पत्ति-सिद्धि *f*.; 'of no e.' निष्फल, निष्प्रयोजन, निर्गुण; 'to take e.' फल् 1 P, मूर्छ् 1 P, (छाया न मूर्छति मलोपहतप्रसादे दर्पणतले S. 7); 'to take no e.' ex. by कुंठ, (वज्रं तपोवीर्यमहत्सु कुंठं K. III. 12); 'to this e.' इति, एतदभिप्राय *a*.; 'to what e.' किमर्थं, केन हेतुना; 'to destroy the e. of' निष्फली-मोघी-कृ 8 U, 'in e.' अर्थतः, वस्तुतः, तत्त्वतः. 6 (E. s.) विभवः, द्रव्याणि, धनसामग्री, रिक्थं. **-***v. t.* कृ 8 U, विधा 3 U, सं-निः-पद् c., साध् 5 P or c., निर्वृत् c., निर्वह् c. 2 जन् c., उत्पद् c. **-ive**, *a*. कार्यसाधक, फलवत्, निष्पादक, संपादक, फलोत्पादक; 'e. speech' हृदयग्राहि वचः. **-ual**, **-Efficacious**, *a*. फलोत्पादक, गुणावह, अमोघ, अन्वर्थ, गुणवत्, सिद्धिकर (री *f*.), कार्यसाधक, सफल. 2 प्रबल, समर्थ, सप्रभाव, क्षम, अलंतम. **-ually**, *adv*. अमोघं, सफलं, निष्पत्तिपूर्वं, अन्वर्थं. 2 प्रभावेण, सामर्थ्येन. **-uate**, *v. t.* कृ, संपद् c., &c.

Effeminate, *a*. क्लीब, दुर्बल, सुकुमार. 2 स्त्रैण (णी *f*.), स्त्रीधर्मन्, स्त्रीवदाचारिन्, स्त्रीप्रकृति, स्त्रीगुणविशिष्ट; स्त्रीभाव; 'an e. man' क्लीबः, कापुरुषः, गेहेशूरः. **-***v. t.* क्लीबीकृ 8 U, दुर्बली-निष्पुरुषी-कृ. **-ly**, *adv*. क्लीबवत्, नारी-स्त्री-वत्, स्त्रीधर्मानुसारेण. **-Effeminacy**, *s*. क्लीबता, दौर्बल्यं, स्त्रीत्वं, स्त्रैणं, स्त्रीधर्माचरणं, सौकुमार्यं, मृदुता.

Effervesce, *v. i.* बुद्बुदायते (D.), फेनायते (D.), उत्सिच् pass., उच्छूनीभू, फेनिलीभू. **-escence**, *s*. फेनोद्गमः, उत्सेचनं, बुद्बुदायितं, फेनिलता, उच्छूनीभावः, मंडोद्गमः. 2 उत्तापः, संक्षोभः; आलोडनं. **-ing**, *a*. फेनिल, फेनायमान.

Effete, *a*. जीर्ण, दुर्बल, निःशक्ति, क्षीण, निःसत्त्व, क्षीणशक्ति. 2 वंध्य, निष्फल, मोघ.

Efficacy, *s*. प्रभावः, बलं, सामर्थ्यं, गुणः, शक्ति *f*., तेजस् *n*., क्षमता, अमोघता, सफलता, फलोत्पादकत्वं. **-ous**, *a*. प्रबल, समर्थ; *See* **Effectual**.

Efficient, *a*. कार्यसाधक, कार्यसिद्धिक्षम, कार्योपयुक्त, विचक्षण, कर्मक्षम, अलंकर्मीण, निपुण; *See* **Effectual** also. **-ly**, *adv*. अमोघं, सिद्धिपूर्वं, निपुणं, विचक्षणतया. **-Efficiency**, *s*. कार्यक्षमता, कार्यसिद्धिक्षमता, नैपुण्यं, वैचक्षण्यं.

Effigy, *s*. प्रतिमा, मूर्ति-प्रतिकृति *f*., प्रतिरूपं.

Efflorescence, *s*. पुष्पोत्पादनं, प्रस्फोटनं. 2 वप्रु *m*.

Effluence, *s*. प्रवाहः, निर्गमः, प्रस्रवः, निःसरणं.

Effluvium, Effluvia, *s*. उद्गारः, वासः. 2 दुर्गंधः, पूतिगंधः.

Efflux, Effluxion, *s*. प्रवाहः, निस्रावः, ओघः, निःसारः-सरणं, निर्गमः.

Effort, *s*. प्र,-यत्नः, उद्यमः, व्यवसायः, आयासः, चेष्टा, चेष्टितं; 'to make e. s' उद्यम् 1 P; *See* **Attempt**.

Effrontery, *s*. धाष्टर्यं, वैयात्यं, निर्लज्जत्वं; प्रागल्भ्यं, प्रतिभानं.

Effulgent, *a*. दीप्तिमत्, तैजस (सी *f*.), उज्ज्वल, सुप्रभ, तेजस्विन्. **-Effulgence**, *s*. तेजस् *n*., दीप्ति-कांति *f*., प्रभा; त्विष् *f*., शोभा; *See* **Brightness**.

Effuse, *v. t.* प्र-निः-सृ c., प्रसृज् 6 P, उत्-वि-सृज् 6 P, वर्त् c., नि-अव-सिच् 6 P. **-ion**, *s*. उत्सर्गः, निषेकः, स्रावः, मोक्षणं, अवसेचनं.

Egg, *s*. अंडं, पेशि-शी *f*., कोषः-शः; 'lay e. s' अंडमोक्षणं कृ 8 U, अंडानि सू 2 A; 'e. on' *v. t.* प्रोत्सह् c.; *See* **Prompt**.

Eglantine, *s*. अरण्यजपा-वा.

Ego, *s*. जीवात्मन् *m*. **-ism**, *s*. आत्म-हितं-लाभः. 2 अहंप्रत्ययः, अहंभावः. **-ist**, *s*. आत्मश्लाघिन् *m*. 2 अहंप्रत्ययवादिन्.

Egotism, *s*. अहंकारः, आत्मश्लाघा-स्तुति *f*., आत्माभिमानः, ममता. **-Egotist**, *s*. आत्मश्लाघिन्-अहंकारिन्-आत्माभिमानिन् *m*., विकत्थनशीलः. **-ic, -ical**, *a*. अहंकारिन्, दृप्त, गर्वित; *See* **Arrogant**. **-ically**, *adv*. सदर्पं, आत्मश्लाघापूर्वं.

Egregious, *a*. अत्यंत, असाधारण (णी *f*.), विशिष्ट, प्रख्यात, प्रसिद्ध, उत्तम, प्रमुख; oft. by अति pr.; 'an e. rogue' सुप्रसिद्धः शठः; अतिमूर्खः, &c. **-ly**, *adv*. अत्यंतं, अतीव, भृशं, अतिमात्रं, सातिशयं.

Egress, *s*. निर्गमः, निष्क्रमः, निर्याणं, निःसरणं, अपसारः, निर्गति *f*.

Eight, *a*. अष्टन्, अष्टौ; 'in e. ways' अष्टधा; 'e. times' अष्टकृत्वः; 'e.-fold' अष्टगुण.

Eighteen, *a*. अष्टादशन्.

Eighty, *a.* अशीति *f.*

Either, *pron., a.* अन्यतर; 'on e. side' उभयतः. *-conj.* (-or) वा-वा; or वा singly.

Ejaculate, *v. i.* सहसा उदीर् 10 or उच्चर् c., प्रार्थना उद्वाह् 1 P. 2 उद्गृ 6 P. उत्क्षिप् 6 P. -ion, *s.* उद्गारः, आक्रंदनं, सहसा उदीरणं, उच्चारणं.

Eject, *v. t.* निरस् 4 U, निराकृ 8 U, निःसृ c.; *See* **Drive away, Discharge.** 2 उत्क्षिप्-उद्गृ-6 P. -ion, *s.* निःसारणं, निराकरणं, निष्कासनं; अधिकाराद् भ्रंशनं.

Ejulation, *s.* विलपनं, परिदेवनं, आर्तनादः, आक्रंदनं.

Eke, *v. t.* वृध् c., विस्तृ c., प्रसृ c., तन् 8 U. -*ado.* अपिच.

Elaborate, *v. t.* महाश्रमेण साध् c., or निष्पद् c. or निर्मा 3 A or विधा 3 U or प्रक्लृप् c. -ed, *a.* बहुश्रमसिद्ध, महाप्रयत्नकृत-विरचित-प्रकल्पित. -ly, *adv.* महायत्नेन, बहुश्रमेण, महायासेन. -ion, *s.* बहुश्रमेण निर्माणं.

Elapse, *v. i.* व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, व्यतिक्रम्, गम् 1 P; 'days having e.-ed' दिनेषु गच्छत्सु.

Elastic, *a.* स्थितिस्थापक, प्रकृतिप्रापक. -ity, *s.* स्थितिस्थापकता-त्वं.

Elate, *v. t.* उत्सिच् 6 P; दृप् c., आध्मा 1 P; दर्पेण उद्-श्वि c. or उद्-हन् 2 P; *See* **Puff.** 2 प्रहृष् c., प्रमुद् c., उल्लस् c. -*a.*, -ed, *a.* दर्पाध्मात, उद्धत, गर्वित, उत्सिक्त, मदोद्धत, दृप्त, गर्वोच्छून. 2 प्रहृष्ट, प्रमुदित, सोल्लास, हृष्टचित्त. -ion, *s.* गर्वः, दर्पः, औद्धत्यं, प्रहर्षः, चित्तोल्लासः.

Elbow, *s.* कूर्परः, कफ(फो)णि *m. f.* 2 वंकः, पुटभेदः. -*v. t.* कूर्परेण आहत्य बहिष्कृ 8 U.

Elder, *a.* ज्यायस्, वरीयस्, अग्रज, पूर्वज, वर्षीयस्, वयोज्येष्ठ; 'e. brother' अग्रजः, अग्रजन्मा, ज्यायान् भ्राता. -*s.* गुरुः, वृद्धः; 'e. s, elderly persons' गुरुजनः, गुरवः, आर्यजनः, वृद्धाः.

Eldest, *s.* ज्येष्ठ, वर्षिष्ठ, वरिष्ठ, श्रेष्ठ, सर्वज्येष्ठ.

Elect, *v. t.* वृ 5 U or 10 (वरयति), वृ 9 U. 2 ग्रह् 9 P, आदा 3 A, स्वीकृ 8 U. 3 नियुज् 7 A, 10, निरूप् 10, निर्वच् c., 'self-election' स्वयंवरः; 'self-e. ed bride' स्वयंवरवधूः; 'e. ed him as her husband' पतित्वे तं वरयामास. -*a.*, -ed, *a.* नियुक्त, निरूपित, वृत, निर्वाचित; व्याहृत; 'a person e.' नियोज्यः, नियोगिन् *m.*; निर्वाचितः. -ion, *s.* नियोजनं, वरणं, निर्वाचनं, वृति *f.* -ive, *a.* जननियुक्त; 'e. right' वरणाधिकारः; 'e. municipality' जननियुक्तसभ्या ग्रामपालिका. -or, *s.* नियोजकः, निर्वाचकः, वरणाधिकारविशिष्टः; 'body of e. s, electoral body' नियोजकगणः.

Electer, Electrum, *s.* कांस्यं, मिश्रधातु *m.*

Electric, *a.* वैद्युत (ती *f.*), विद्युन्मय (यी *f.*), विद्युद्विषय. -ity, *s.* तडित्-विद्युत्-वैद्युतशक्ति *f.*

Electrubus, *s.* विद्युत्-यानं-वाहनं.

Electrocute, *s.* विद्युन्मरणेन दंड् 10.

Electuary, *v. t.* लेह्यं, अवलेहः.

Eleemosynary, *a.* दरिद्रार्थ, दरिद्रोपकारिन्.

Elegant, *a.* चारु, ललित, सुंदर, सुरूप, लावण्यवत्, श्लील, अग्राम्य, सुभग. 2 (As composition) सुरस, ललित, चारु. -ly, *adv.* सविलासं, चारु, ललितं. -Elegance, -cy, *s.* चारुता, सौंदर्यं, विलासः, लावण्यं, शोभा, विभ्रमः, लालित्यं; 'e. of words' पदलालित्यं.

Elegy, *s.* करुणरसं गीतं, शोकगानं-गीति *f.*

Elegiac, *a.* कारुण्यमय (यी *f.*), शोकप्रधान.

Element, *s.* भूतं, बीजं, मूलं, मूलवस्तु *n.* 2 तत्त्वं. 3 अवयवः, भागः, अंशः. 4 आरंभः, उपक्रमः, मूलतत्त्वं, बीजभूतं ज्ञानं. 5 वस्तुमार्थं; 'out of his e.' अस्थाने. -al, *a.* भौत (ती *f.*); भौतिक (की *f.*). -ary, *a.* अव्याकृत, शुद्ध, निरवयव. 2 मूल in comp. प्रारंभक.

Elephant, *s.* गजः, हस्तिन्-करिन् *m.*, मातंगः, मतंगजः, कुंजरः, नागः, वारणः, इभः, द्विरदः, द्वि-अनेक-पः, दंतिन् *m*, दंतावलः, स्तंबेरमः; 'she-e.' करिणी, करेणु *f.*-णुका, वशा, धेनुका; 'a young e.' कलभः, करिशावकः; 'e. driver' हस्तिपः-पकः, आधोरणः, महामात्रः, निषादिन् *m.*; 'wild e.' वनगजः, वन्यः करी; 'furious or rutting (e.)' मदोत्कटः, मदकलः. प्रभिन्नः, गर्जितः, मत्तः; 'e. out of rut' उद्वांतः; निर्मदः; 'head of a herd of e. s' यूथनाथः, यूथपः; 'herd of e.s' हास्तिकं, गजता, गजयूथं; 'war e.-s' गजघटा; 'e. s of the quarters' दिग्गजाः; 'frontal globe of an e.' कुंभः; 'e.'s fore-head' ललाटं, अवग्रहः; 'his eyeball' इ(ई)षि(षी)का, अक्षिकूटकं 'corner of his eye' निर्याणं; 'root of his ear' चूलिका; 'his withers' आसनं, स्कंधदेशः; 'his side' पार्श्वभागः, पक्षभागः; 'the temple-juice' मदः, दानं; 'water emitted from the trunk' वमथुः, करशीकरः; 'his roaring' बृंहितं, गर्जितं; 'the whip to strike him' तोत्रं, वेणुकं; 'binding-post' आलानं; 'binding chains' शृंखलं, अंदुकः, निगडः; 'caparisoning of an e.' कल्पना, सज्जना; 'coloured housings' प्रवेणी, आस्तरणं, वर्णः, परिष्टो(स्तो)मः, कुथः.

Elephantiasis, *s.* श्लीपदं, शिलीपदं.

Elevate, *v. t.* उन्नम् c. (उन्नमयति), उच्छ्रि c., उद्यम् 1 P, उत्कृष् 1 P; उत्था c., (उत्थापयति), उन्नी 1 P, अधिरुह् c. (रोपयति), उन्नति-उत्कर्ष-नी or कृ 8 U; 'e. to a high office' उत्तमपदे नियुज् 7 A, 10, उत्कृष्टपदं प्राप् c. -ed, *a.* अधिरोपित, उन्नीत; उत्तमपदनियुक्त. 2 उच्छ्रित, उत्तुंग, उन्नत, सोच्छ्राय; *See* High. -ion, *s.* उन्नति *f.*, उत्कर्षः; उच्छ्रायः, उत्थापनं, अधिरोपणं, उच्चपदप्रापणं, उदयः. 2 उत्सेधः, उत्तुंगता, उच्छ्रायः, उन्नतस्थानं; *See* Height.

Eleven, *a.* एकादशन्. -**Eleventh,** *a.* एकादश (शी *f.*); 'what is the use of doing things at the e. hour' प्रोद्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः (Bh. II. 88).

Elf, *s.* वेतालः, भूतः, पिशाचः, अपदेवता. -ish, *a.* पैशाच (ची *f.*).

Elf-lock, *s.* जटा, सटा.

Elicit, *v. t.* निर्गम् c. (गमयति), निष्कृष् 1 P, उद्धृ c., निःसृ c., प्रकाश् c., अपवह् 1 P or c., आविष्कृ 8 U, निर्णी 1 P, ज्ञा 9 U or c. (ज्ञापयति). -ation, *s.* निष्कर्षणं, निर्गमनं, &c.

Elide, *v. t.* लुप् 6 P or c. -**Elision,** *s.* लोपः.

Eligible, *a.* वरणीय, नियोज्य, ग्राह्य, आदेय.

Eliminate, *v. t.* नश् c., निष्कस् c., विलुप् 6 P or c., निराकृ 8 U. -ion, *s.* लोपः, नाशः, आहरणं, अपनयनं.

Elite, *s.* विशिष्टः; ex. by सार-विशेष-रत्न in comp.

Fame, *s.* यशस् *n.*, कीर्ति *f.*, ख्याति *f.*, विश्रुति *f.*, प्रसिद्धि *f.*, प्रतिष्ठा, प्र-वि-ख्यातिः. संप्रथा. **-ed, -ous,** *a.* ख्यात, प्रथित, विश्रुत, प्र-वि-ख्यात, प्रसिद्ध, यशस्विन्, यशस्वत्, कीर्तिमत्, कीर्तित, लोकविश्रुत, महायशस्क, लब्धप्रतिष्ठ-वर्ण.

Familiar, *a.* परिचित, संस्तुत, अभिज्ञ; ज्ञ-विद्-कुशल-in comp.; अभ्यंतर, (अनभ्यंतरे आवां मदनगतस्य वृत्तांतस्य S. 3.). 2 सुविदित, सुज्ञात, लोकसिद्ध, प्राकृत, लौकिक (की *f.*), सुप्रसिद्ध, सुप्रकाश. 3 विश्रब्ध, विश्रंभ in comp. 4 निरादर, निर्गौरव, आदरहीन, निःप्रश्रय. **-ity,** *s.* सु-, परिचयः; परिज्ञानं, संस्तवः; 'long f.' चिरपरिचयः; 2 सु-दृढ-संसर्गः, आसंगः, संसक्ति *f.* 3 अतिपरिचयः, अनादरः; 'f. breeds contempt अतिपरिचयादवज्ञा (भवति). **-ize,** *v. t.* परिचयं कृ 8 U, or c., अभ्यस् 4 U or c.; oft. by (*a.*); परिचितविविक्तेन मनसा (S. 5) 'with a mind f. ed to seclusion.' **-ly,** *adv.* सुपरिचितवत्, सुविश्रब्धं. 2 प्रायः, प्रायशः, लौकिकतया. 3 अनादरेण, निर्गौरवं.

Family, *s.* कुलं, वंशः, जाति *f.*, गोत्रं. 2 कुटुंबं, पुत्रकलत्रादि, गृहजनः. 3 अन्वयः, संतानः-नं, संतति *f.*; 'members of a. f.' कुटुंबिनः; 'head of a f.' कुटुंबिन् *m.*, कुलपतिः; 'of a good f.' कुलीन, महाकुल, अभिजात, कुल in comp.; 'his wife is in the f. way' आपन्नसत्त्वा-गर्भवती-जाता; 'of royal f.' राजवंश्य, राजकुलप्रसूत; 'f. dispute' गृहच्छिद्रं, अंतर्भेदः; 'a f. man (diligently caring for the f.)' अभ्यागारिकः, उपाधिः, कुटुंबव्यापृतः.

Famine, *s.* दुर्भिक्षं, अनशनं, दुष्कालः, प्रयामः, नीवाकः, आहाराभावः, अनाहारसमयः, 'f.-stricken' दुर्भिक्षपीडित.

Famish, *v. t.* (क्षुधया) पीड् 10, अवसद् c., क्षीणी-कृशी-कृ 8 U; 'f. ed with hunger' क्षुत्क्षाम, क्षुत्क्षामकंठ. -*v. i.* अनशनात् अवसद् 1 P or क्षि pass., क्षाम-कृशांग -*a.* भू. **-ed,** *a.* क्षुत्क्षाम, क्षुधार्त, क्षुत्पीडित, बुभुक्षित. **-ment,** *s.* बुभुक्षा, अनाहारः, अन्नाभावः, क्षुत्पीडा, क्षुत्क्षामता.

Fan, *s.* तालवृंतः-वृंतकं, व्यजनं, वीजनं, व्यजः. -*v. t.* वीज् 10, उप-अनु-सं°; व्यजनेन विधू 5, 9 U: (fig.) उद्-दीप् c., संधुक्ष् 10.

Fanatic, -al, *a.*, *s.* धर्मोन्मत्त, अतिश्रद्धाव्याप्त; उन्मत्त, भ्रांतबुद्धि. **-ally,** *adv.* उन्मत्तवत्, अतिश्रद्धया. **-ism,** *s.* धर्मोन्मादः, भक्त्युत्कर्षः, अतिभक्तिव्यग्रता. 2 उन्मादः, उन्मत्तता.

Fancy, *s.* वासना, भावना, कल्पना, भावना-कल्पना-शक्ति *f.* 2 बुद्धि *f.*, मति *f.*, संकल्पः. 3 मनोलौल्यं, कामचारः, बुद्धिचापल्यं, चापलं, लहरी, तरंगः, छंदः. 4 रुचि *f.*; अभिरुचिः, कामः; 'to have or take a f. for' स्पृह् 10 (with dat.) or ex. by काममनः with inf.; स्पृहयामि खलु दुर्ललितायास्मै (S. 7); 'took a f. to hunt' मृगयां कर्तुमना बभूव. -*v. t.* मन् 4 A, तर्क् 10, सं-वि-भू c.; चिंत् 10, मनसा क्लृप् c.; चित्ते-मनसि-कृ, आलोच् 10. 2 रुच् 1 A, अभिनंद् 1 P; 'f. ing oneself to be learned' पंडितंमन्य, पंडितमानिन्; 'doing what one f es' कामचारिन्. **-Fanciful,** *a.* मानस (सी *f.*), काल्पनिक-मानसिक (की *f.*), मनःकल्पित, भावित, मनोरथसृष्ट-कल्पित, भावनोत्पादित, वासनाकल्पित, संकल्पज, मायामय (यी *f.*) 2 (Of persons) चलचित्त, लोलमति, कामचारिन्, चपलबुद्धि, मनोलौल्यवत्, स्वैरिन्, स्वैरवृत्त. 3 अनर्थकवासनाकृत्, असंभवकल्पक **-ly,** *adv.* कामचारेण, मनोलौल्यात्, स्वैरं; चापल्येन. **-ness,** *s.* चलचित्तता, लोलमति *f.*, कामचारिता, मनोलौल्यं, बुद्धिचापल्यं, स्वैरिता.

Fane, *See* **Temple.**

Fang, *s.* दंष्ट्रा, दशनः-नं, रदः, रदनः, दंतः; 'f. of a serpent' विषदंतः, आशी. **-ed,** *a.* दंष्ट्रिन्, दंतिन्. **-less,** *a.* भग्नदंष्ट्र, निर्दशन, निर्दंत.

Fantasm, *s.* आभासः, माया, मनोरथसृष्टि *f.* **-Fantastic,** *a.* **Fanciful,** q. v. 2 विषम, असंगत, अपरूप, विलक्षण.

Fantasy, *s.* *See* **Fancy.**

Far, *a.* दूर (with abl. or gen.), विप्रकृष्ट; *See* **Distant;** 'f. from comfort' सुखादपेत. -*adv.* दूरं-रे, आरात् (with abl.), विदूरतः. अत्यंत, भृशं, अतीव, सु-अति 'pr.; f. away' दूरे, सुदूरं; 'from f.' दूरात्, दूरतः (

'how f.' किंयद्दूरं, कियत्यध्वनि; कियत्प्रमाणं, किंपर्यंतं, कियतांशेन; 'f. off' दूर, दूरस्थ, दूरवर्तिन्, दूरस्थायिन्; 'as f. as' ex. by आ with abl. or in comp.; 'as f. as the sea' आसमुद्रात् or आसमुद्रं; oft. by यावत् (with acc.) or पर्यंत in comp; 'so far as' 'as f. as' इति; *See* under As: 'not f. from the tree' तस्य वृक्षस्य नातिदूरे; 'by f.' भूयसा; 'your statement is not f. from the truth' भूतार्थकल्पं तव वचः; 'f. gone in love' दूरगतमन्मथा (S. 3). In comp. ex. by अति, बहु, दूर; 'f.-extended.' बहुविस्तीर्ण; 'f.-famed' प्रथितयशस्, उरुकीर्ति; 'f.-fetched' क्लिष्ट, यत्नकृत, असुगम, असुकर; 'f.-reaching' दूराधिरूढ; 'f.-seeing', 'f.-sighted' दूरदर्शिन्, दीर्घदृष्टि, दूरदृष्टि.

Farce, *s.* प्रहसनं, दुर्मल्लिका. **-Farcical,** *a.* उपहास्य, हासकर (री *f.*), हास्योत्पादक; असंगत, अपरूप, हासजनक.

Fardel, *s.* कूर्चः, गुच्छः, -च्छकः, पोटलिका, भारः.

Fare, *s.* अन्नं, आहारः, भक्ष्यं, भोजनं. 2 तार्यं, आता(त)रः, तारिकं, तरपण्य-मूल्यं. *-v. i.* भू 1 P, वृत् 1 A, अस् 2 P, स्था 1 P; को वृत्तांतस्तत्रभवत्याः (M. 4) 'how f.s it with her ladyship'; 'f. ing well' सुस्थ, सुस्थित; 'f. ing ill' दुःस्थित, दुर्गत. **-Farewell,** *interj.* स्वस्ति, भद्रं (भूयात्) with dat.; 'bid f.' आमंत्र् 10 A, आप्रच्छ् 6 A.

Farina, *s.* परागः, रजस् *n.*, पुष्परेणुः.

Farinaceous, *a.* धान्यमय, गोधूमचूर्णमय (यी *f.*).

Farm, *s.* क्षेत्रं, कृषिक्षेत्रं, क्षेत्रभूमि *f.*; 'f. house' क्षेत्रिकगृहं, क्षेत्रपतिगृहं; 'f. yard' क्षेत्रवाटः-टिका. **-er,** *s.* क्षेत्रपतिः, क्षेत्रपालः, क्षेत्रिकः, क्षेत्राजीवः, क्षेत्रिन् *m.*, कर्षकः, कृषीवलः, कृषिकः. **-ing,** *s.* कृषि *f.*, कृषिकर्मन् *n.*

Farrago, *s.* सन्निपातः, प्रकीर्णकं, संमिश्रणं. **-Farraginous,** *a.* संकीर्ण, संमिश्रित, सन्निपतित.

Farrier, *s.* अश्ववैद्यः-चिकित्सकः. 2 अश्वपादत्रकारः. **-y,** *s.* अश्वचिकित्सा.

Farrow, *s.* शूकरापत्यगणः.

Farther, *a.* दूरतर, दवीयस्. 2 अपर; 'the f. end' पारः, अपरप्रांतः. *-adv.* दूरतरं, अधिकदूरं. 2 अग्रे, अग्रतः, पुरः, पुरतः.

Farthest, *a.* दविष्ठ, दूरतम, सुदूर. *-adv.* सुदूरं, अतिदूरं-रे.

Farthing, *s.* ताम्रमुद्रा; 'not even a f.' न काकिणी अपि, न किमपि.

Fascia, *s.* बंधनं, वेष्टनं, पट्टः.

Fascinate, *v. t.* मुह् c., अभिमंत्र् 10 A, अभिचर् c., मंत्रद्वारेण वशीकृ 8 U. 2 हृ 1 P, आकृष् 1 P, प्र-वि-लुभ् c., ग्रह् 9 P, रम् c. (रमयति). **-ing,** *a.* मोदिन्, हारिन्, हृदयग्राहिन्, मनोहर, चित्ताकर्षिन्, हृदयंगम. **-ion,** *s.* मोहः-हनं, सं-परि-वि-मोहनं, अभिचारः, अभिमंत्रणं, माया, इंद्रजालं, वशक्रिया. 2 आकर्षः, चित्तापहारः, चित्तविलोभनं.

Fash, *v. t. See* Annoy.

Fashion, *s.* रीति *f.*, प्रकारः, विधिः, विधः, मार्गः; 'f. of dress' भूषाप्रकारः. 2 रूपं, आकारः, आकृति *f.*, मूर्ति *f.*, संस्थानं. 3 लोकाचारः, संप्रदायः, लोकमार्गः-रीतिः, लोकव्यवहारः, लौकिकव्यवहारः, लौकिकाचारः. *-v. t.* निर्मा 3 A, 2 P, वि-रच् 10, वि-धा 3 U, घट् c. (घटयति), सं-परि-क्लृप् c., तक्ष् 1, 5 P, त्वक्ष् 1 P. 2 युज् 7 U, 10, सं-समा-धा. **-able,** *a.* लौकिक-व्यावहारिक (की *f.*), लोकाचारानुरूप, लोकव्यवहारानुसारिन्, लोकमार्गानुयायिन्. **-Fashionably,** *adv.* लोकाचारानुरूपं, लोकरीतिवत्.

Fast, *a.* दृढ, गाढ, स्थिर, अचल, स्थावर, निश्चल, स्थायिन्, दृढबद्ध; 'f. friend' दृढसौहृदः; 'f. sleep' गाढनिद्रा, सुनिद्रा. 2 द्रुतगामिन्, त्वरितगति, शीघ्र, जविन्, जववत्, शीघ्रगति. *-adv.* दृढं, गाढं, स्थिरं; in comp. ex. by दृढ or सु; 'f. bound' सु-दृढबद्ध; 'f. roote' बद्धमूल, सुरूढ; 'f. asleep' सुखसुप्त, गाढनिद्रां गत. 2 शीघ्रं, आशु, सत्वरं, क्षिप्रं, त्वरितं 'not so f.' अलमलमीदृश्या त्वरया. **-ness,** *s.* दृढता, स्थिरता. 2 दुर्गं, कोटः. **-Fasten,** *v. t.* बंध् 9 P, सं-नि°, पिनह् 4 U, ग्रंथ् 9 P, (together); संयुज् 7 U, 10, सं-श्लिष् c., सं-धा 3 U, योक्त्रयति (D.). 2 पि-धा 3 U, सं-वृ 5 U, निरुध् 7 U, अर्गलेन बंध्. 3 दृढीकृ 8 U, स्थिरीकृ, संस्तंभ् 9 P or c. **-ing,** *s.* बंधनं-नी, ग्रंथिः. 2 संधिः, कुडुपः.

Fast, *-v. i.* उप-वस् 1 P, आहारात् निवृत् 1 A; 'f. to death' प्रायोपवेशनं कृ 8 U, अनशनेन मृ 6 A. **-s., -ing,** *s.* उपवासः, अनशनं, अनाहारः, लंघनं, उपोषणं, आक्षपणं, प्रायः; 'f. ing to death' प्रायोपवेशनं. **-er,** *s.* सोपवासः, कृतोपवासः.

Fastidious, *a.* दुस्तोषणीय, दुर्ललित, दुराराध्य. 2 सावज्ञ, अवमानिन्, उपेक्षक; 'a f. critic' दोषैकदृश्. **-ly,** *adv.* सावमानं, दुराराध्यतया.

Fat, *a.* पीन, पीवर, पुष्ट, मांसल, आप्यान, स्थूल, स्फीत; मेदस्विन्, पुष्टांग (गी *f.*), स्थूलदेह; 'f. land' उर्वरा. *-s.* मेदस् *n.*, वसा (शा) वपा, मांससारः-स्नेहः. *-v. t.*, **-ten,** *v. t.* आ-प्यै c., स्फाय् c. (स्फावयति), सं-[illegible], पीवरीकृ 8 U, परिपुष् c. *-v. i.* आ-प्यै 1 A, पीनीभू, संवृध् 1 A. स्फाय् 1 A, उपबृंह् 1 P. **-ness,** *s.* मेदस्विता, पीनता,

स्थूलता, मेदोवृद्धि *f.*, स्फीति *f.* **-ty,** *a.* मांसल, मेदस्विन्.

Fate, *s* दैवं, भाग्यं, भागधेयं, दिष्टं, अदृष्टं, कर्मन् *n.*, नियति *f.*, प्राक्तनं, भवितव्यता; 'personified f.' विधिः, विधाता, कृतांतः, कालः; 'it is our f. to do wrong' पापाचरणं दैवायत्तं-दैवाधीनं. 2 मृत्युः, नाशः, क्षयः, अंतः; गति *f.*, परिणामः; 'he met with a sad f.' शोचनीयः-कष्टः-तस्य अंतः समजायत; 'what was Sitâ's f.' सीतादेव्याः किं वृत्तं (U. 2); 'such has been the f. of your birth' ईदृशस्ते निर्माणभागः परिणतः (U. 4); 'ill-f.' दुर्दैवं, मंदभाग्यं, दैवदुर्विपाकः- विपर्ययः-विपर्यासः. **-ed,** *a.* नियत, दैवनियुक्त, निर्दिष्ट, भवितव्य; 'whose f. time has come' प्राप्तकालः; 'ill-f.' दैवोपहत, दुर्दैव, मंदभाग्य; 'well-f.' भाग्यवत्, धन्य, ससौभाग्य. **-Fatal,** *a.* प्राणहर, प्राणनाशक, जीवितापह, अंतकर, प्राणघातिन्, मृत्युजनक, दुर्विपाक, मर्मभेदिन्. 2 दैव (वी *f.*), नियत, दैवयुक्त, आवश्यक (की *f.*). **-ism,** *s.* दैवपरता, दैवाधीनता. **-ist,** *s.* दैवपरः, दैवायत्तः, दैवपरायणः, दैवाधीनः, यद्भविष्यः, दैवप्रमाणकः. **-ity,** *s.* प्राणहरत्वं; नियतिः, भवितव्यता, अवश्यकत्वं. **-ly,** *adv.* सनाशं, प्राणांतिकं; 'f. wounded' तथा क्षतो यथाऽसंदिग्धो मृत्युः.

Father, *s.* पितृ *m.*, जनकः, जनितृ-जनयितृ *m.*, जन्मदः, तातः; 'f. and mother' पितरौ, मातापितरौ, मातरपितरौ. 2 गुरुः, पूज्यः; 'f. in-law' श्वशुरः; 'f. land' जन्म-पैतृक-भूमि *f.* **-***v. t.* स्वीकृ 8 U, परिग्रह् 9 P. 2 आ-रुह् c. (रोपयति), निविश् c., (with loc.). **-hood,** *s.* पितृभावः-धर्मः, पितृत्वं. **-less,** *a.* आपितृक, तात-पितृ-हीन, अनाथ. **-ly,** *a.* तात-पितृ-तुल्यं, पितृनिर्विशेष; gen. by comp.; 'f. affection' पितृवात्सल्यं. **-***adv.* पितृवत्, तातरूपेण.

Fathom, *v. t.* (तलं or वेधं) परीक्ष् 1 A, निरूप् 10; मा 3 A or c. (मापयति), व्यध् 4 P; 'f. another's thoughts' मनः परीक्ष् or गाह् 1 A or निरूप्. **-***s.* व्यामः, व्यायामः. **-less,** *a.* अगाध, अतलस्पर्श, अनवगाह्य, अगम्यतल.

Fatigue, *s.* आयासः, क्लमः, श्रमः, अवसादः, खेदः, परिश्रमः, क्लेशः, ग्लानि-क्लांति-श्रांति-*f.*, तंद्रा; 'inured to f.' श्रमसहिष्णु, जितश्रम. **-***v. t.* खिद् c., आयस् c., अवसद् c., क्लम् c. or श्रम् c. (क्ल-श्र-मयति), क्लिश् 9 P., ग्लै c. (ग्ल-ग्ला-पयति). **-ed,** *a.* श्रांत, क्लांत, खिन्न, ग्लान, अवसन्न, श्रमार्त, सश्रम, जातखेद-श्रम; 'to be f.' श्रम् 4 P, क्लम् 1, 4 P, आयस् 1, 4 P, खिद् pass.

Fatuous, *See* **Foolish.**

Fault, *s.* दोषः, छिद्रं, अगुणः, अपराधः, पापं, प्रमादः, स्खलितं, वाच्यं, वाच्यता; 'find f. with' दोषं ग्रह् 9 U, निंद् 1 P, उपा-लभ् 1 A, दुष् c. (दूषयति), (नात्र कुलपतिर्दोषं ग्रहीष्यति S. 3); 'chase, though found f. with' दृष्टदोषापि मृगया (S. 2); 'f. finder' दोषदृश्, दोषैकदृश्, छिद्रान्वेषिन्, दोषग्राहिन्, निंदक, पुरोभागिन्. **-y,** *a.* सदोष, सापराध, दोषवत्, दोषिन्, निंद्य, वाच्य, अवद्य, निंदार्ह. 2 अशुद्ध, असत्य, अयथार्थ, वितथ, अनृत, मिथ्या-अप-pr.; 'f. conclusion' पक्षाभासः, अपसिद्धांतः. **-less,** *a.* अ-निर्-दोष, अनवद्य, निरपराध, दोषहीन, अपाप, अनघ, अकल्मष, निष्कलंक, विशुद्ध, निर्मल, पवित्र. 2 सत्य, यथार्थ, अवितथ.

Faun, *s.* वनदेवता.

Fauna, *s.* प्राणिजातं.

Favour, *v. t.* अनुग्रह् 9 P, उपकृ 8 U, प्रसादं-उपकारं-कृ 8 U, or दृश् c., साहाय्यं दा 3 P, अभ्युपपद् 4 A; often by (*s.*); 'not inclined to f.' प्रसादपराङ्मुख; 'I wish to be f. ed with the mention of it' कथनेनानुग्राह्यमात्मानमिच्छामि (Ka. 134). 2 अनु-पा c. (पालयति), अनु-मन् 4 A, अनु-मुद् 1 A, अनुकूलयति (D.). 3 आश्रि 1 U, आ-अव-लंब् 1 A, स्वीकृ, अंगीकृ. **-***s.* अनुग्रहः, प्रसादः, आनुकूल्यं, कृपा, प्रीति *f.*, स्नेहः; 'he is in the king's f.' स नृपप्रसादपात्रं-भाजनं. 2 आ-सं-श्रयः; साहाय्यं, अनुपालनं, अभ्युपपत्ति *f.*, आधारः. 3 हितं, उपकृतं-कारः, प्रियं, सुकृतं. 4 अनुज्ञा, अनुमति *f.*; 'in f. of' पक्षे (with gen.) 'I am speaking in your f.' अहं त्वदनुकूलं ब्रवीमि, त्वत्पक्षं समर्थये; 'ask a f.' प्र-सद् c., उपकारं प्रार्थ् 10 A; 'seek the f. of' आराध् c., अनुरंज् c. **-able,** *a.* अनुकूल, प्रसन्न, हितकारिन्, हितकाम, अनुग्रहपर, हित, हितबुद्धि, उपकारक; 'f. to' आवह, उत्पादक in comp. **-ably,** *adv.* सानुग्रहं, सानुकूल्यं, प्रसन्नतया. **-ite,** *s.* प्रियः, प्रीति-स्नेह-पात्रं-भाजनं, वल्लभः. **-***a.* प्रिय, दयित, अभीष्ट, इष्ट, दयिततम, हृद्य, वल्लभ. **-itism,** *s.* पक्षपातिता, पक्षानुग्रहः.

Fawn, *s.* मृगशावः-वकः, मृगपोतः-शिशुः, हरिणवत्सः, कुरंगकः. **-***v. i.* (upon) चाटुवचनैः आराध् c. or तुष् c., साष्टांगपातं सांत्व् 10 or उप-लल् 10, उपच्छंद् 10, छंदं अनुवृत् 1 A or अनुरुध् 4 A. **-er,** *s.* चाटुकारः, सांत्ववादः. **-ing,** *s.* उपलालनं, चाटूक्तिभिः आराधनं, उपच्छंदनं, चाटुवचनं. **-ingly,** *adv.* चाटूक्त्या, स्तुतिपूर्वं.

Fay, *See* **Fairy.**

Fealty, *s.* अनुरागः, भक्ति *f.*, निष्ठा, प्रभुभक्तिः.

Fear, *v.* भी 3 P, उद्विज् 6 A, संवि-त्रस् 4 P, (with abl.). 2 वि-, -, शंक् 1 A, तर्क् 10. 3 भयार्त *a.* भू, त्रस्, भी; 'do not f.' मा भैषीः. **-s.** भयं, भीः. भीति *f.*, सं-,त्रासः, साध्वसं, आशंका, दरः-रं; 'put in f.' *See* **Frighten;** through f.' भयात्, भीत्या. **-ful,** *a.* भयंकर, भयावह, भयप्रद, भीषण, भयानक, दारुण, भीम, रौद्र (द्री *f.*), उग्र, भैरव (वी *f.*), घोर, भीष्म, प्रतिभय. 2 (Afraid) भीत, सभय, ससाध्वस, भयार्त, भीरु, शंकित, साशंक, त्रस्त. **-fully,** *adv.* सभयं, सत्रासं, भयेन. 2 दारुणं, घोरं, उग्रं. **-less,** *a.* अभय, निर्भय, अभीत, निःशंक, निर्भीक, निर्विशंक, अभीरु, अकुतोभय; साहसिक (की *f.*), प्रगल्भ, साहसिन्. **-lessly,** *adv.* निर्भयं, निःशंकं, साहसेन.

Feasible, *a.* साध्य, शक्य, करणीय, संभाव्य, सुकर, उपपाद्य.

Feast, *s.* उत्सवः (lit. & fig.), महः, पर्वन् *n.*, उद्धर्षः; 'f. to the eyes' नयनोत्सवः. 2 संभोजनं, विशिष्टान्नसंभारः, सहभोजनं. **-v. i.** प्रकामं भक्ष् 10; 'f. ing on grass' तृणं प्रकामं भक्षयत्. 2 उत्तमान्नेन तृप् 4 P or संतुष् 4 P. **-v. t.** भोजनविशेषैः संतृप् c. or संतुष् c. 2 (fig.) आनंद् c., प्रमुद् c.; नयनाभ्यां पा 1 P.

Feat, *s.* अवदातं or अद्भुतं कर्मन् *n*, आश्चर्यकर्मन् *n.*, चेष्टितं, कर्मन् *n.*, क्रिया.

Feather, *s.* पिच्छं, पक्षः, गरुत् *m.*, पत्रं, वाजः, पर्णं; 'peacock's f.' बर्हः-र्हं; 'f. of arrows' पुंखः, पत्रं, वाजः; 'f. bed' मृदुशय्या, कोमलशयनं; 'he thinks it a f. in his cap' स तदात्मनो विशिष्टगौरवपदं मन्यते. **-ed,** *a.* पक्षयुक्त, सपक्ष, पक्षिन्, गरुत्मत्, पत्रिन्, पतत्रिन्. **-y,** *a.* पक्षतुल्य-समान.

Feature, *s.* रूपं, आकृति *f.*, आकारः, लक्षणं; 'inauspicious f. s' अभद्रलक्षणानि, अमंगलाकारः. 2 वदनाकृतिः; मुखरेखा, वदनाकारः. 3 (Sign) चिह्नं, लक्षणं, लिंगं.

Febrifacient, *a.* ज्वरोत्पादक.

Febrifuge, *a.* ज्वरघ्न (घ्नी *f.*), ज्वरनाशक-निवारक. **-s.** ज्वरापहं औषधं.

Febrile, *a.* सज्वर, ज्वरित, ज्वरार्त.

February, *s.* माघः, फाल्गुनः, तपस्यः.

Feces, *s.* मलं, पुरीषं, विष् *f.*, उच्चारः, अप(व)स्करः, विष्ठा; *See* **Dung.** 2 खलं, उच्छिष्टं, शेषं. **-Fecal,** *a.* विण्मय-मलमय (यी *f.*), अशुद्ध, अमेध्य. **-Feculent,** *a.* समल, कलुष, अमेध्य, मलदूषित, खलिन्.

Fecund, *a.* बहुप्रज, बह्वपत्य. 2 अवंध्य, बहुफलप्रद, उर्वर (as soil). **-Fecundate,** *v. t.* सफलीकृ 8 U; रेतः सिच् 6 P. **-Fecundity,** *s.* सफलता, अवंध्यत्वं, प्रसवत्वं, फलवत्त्वं, स्फीति *f.*

Federal, Federate, *a.* संहत, संघातवत्, सामयिक-सांघातिक (की *f.*), कृतसंधि, संयुक्त, संधिसंश्लिष्ट.

Fee, *s.* शुल्कः-ल्कं, वेतनं, प्रतिफलं, उपायनं, निस्तारः, पारितोषिकं; 'monthly f.' मासिकं; 'f. simple' स्वाधीना-स्वतंत्रा-भूमिः.

Feeble, *a.* दुर्बल, अशक्त, शक्तिहीन, निर्बल, क्षीणशक्ति, अल्पशक्ति, अल्पबल-वीर्य-सत्त्व, क्षीण, अवसन्न, क्षाम, असमर्थ, शिथिलबल निःसत्व. **-ness,** *s.* दौर्बल्यं, क्षीणता, अल्पबलं, अल्पवीर्यं, तेजोहानि *f.*, वीर्यहानिः, असामर्थ्यं, अवसादः, अशक्ति *f.*, शक्तिक्षयः, सत्त्वनाशः, निःसत्त्वता. **-Feebly,** *adv.* दुर्बलतया, अल्पशक्त्या, मंदं.

Feed, *v. t.* भुज् c., अश् c., अन्नदानेन आप्यै c. or परि-पुष् c. 2 पुष् 1,9 P or c.; सं-भृ 3 U, पा c. (पालयति), अन्नेन संवृध् c., or संतृप् c, or संतुष् c. 3 चर् c. 4 उपकॢप् c., उपस्था c. (स्थापयति). **-v. i.** (on) भक्ष् 10, अद् 2 P; *See* **Eat;** oft. by अशन, भुज् in comp.; पिशिताशनः, हुतभुक् &c. 2 (Grass) चर् 1 P. **-s.** भक्ष्यं, भोज्यं. **-er,** *s.* भोजयितृ *m.*, अन्नदातृ *m.* आशयितृ *m.* 2 पोषकः, उपकल्पकः. 3 भक्षकः, भोजिन् *m.*, अत्तृ *m.* भोक्तृ *m.*, आशिन् *m.*; अद्-भुज्-आशिन्-अशन in comp. **-ing,** *s.* अन्नदानं, पालनं, पोषणं, भरणं. 2 भक्षणं, खादनं, भोजनं, अशनं.

Feel, *v. t.* अनुभू 1 P, वि-भू c., (पादचारमपि न व्यभावयत् R. xi. 10), ज्ञा 9 U, उपलभ् 1 A, विद् 2 P, 10 A; ''f. certain' दृढं ज्ञा, प्रति-इ 1 P; 'I felt his remarks much' तस्य वचो मम हृदयमर्माणि अस्पृशत्-अभिनत्. 2 (Think) मन् 4 A, गण् 10, आकल् 10; *See* **Consider;** 'are felt by the mind as pleasant' मधुरतराण्यापतंति मनसः (K a. 103). 3 स्पृश् 6 P, परामृश् 6 P; आलभ् 1 A, स्पर्शेन परीक्ष् 1 A or निरूप् 10; 'f. ing the pulse' नाडीं स्पृष्ट्वा. **-v. i.** (आत्मानं) गण्, मन्. 2 (for) अनुकंप् 1 A, समदुःख *a.* भू; 'I f. sorry for you' अहं तव कृते दुःखाकुलोस्मि; 'felt proud of his company' तत्समागमेनारूढगौरवमिवात्मानं मेने; 'I f. easy now' लब्धं मयेदानीं स्वास्थ्यं (S. 4); 'I f. better' आस्ति मे विशेषः (S. 3). **-er,** *s.* स्पर्शशृंगः 'it was intended as a f.' साधारणलोकमतज्ञानाय इदं प्रयुक्तमासीत्. **-ing,** *s.* अनुभवः, अनुभूति *f.*, संवेदनं, बोधः, ज्ञानं, उपलंभः, उपलब्धि *f.*, उपागमः, चैतन्यं, चेतना; संज्ञा. 2 स्पर्शः, परामर्शः, संपर्कः, स्पर्शजं ज्ञानं. 3 वृत्ति *f.*, रसः, भावः, रागः, विकारः, चित्त-मनो-वृत्तिः, मनोविकारः-धर्मः; 'f. of anger' कोपवृत्तिः. 4 कृपा, दया, अनुकंपा, करुणा, समदुःखिता; 'a man of f.' सहृदयः, सचेतस् *m.* 'what man of f.

in not affected at heart ' सचेतसः कस्य मनो न दूयते (K. v. 48). -*a.* चेतन, चेतनायुक्त, चैतन्य-बोध-विशिष्ट. 3 रसवत्, रागिन्, भाविक, सरस. -ingly, *adv.* सरसं, सरागं, ज्ञानपूर्वं, स्वानुभूतिपूर्वं. 2 सदयं, सानुकंपं.

Feign, *v. t.* मनसा क्लृप् c. or सृज् 6 P. 2 कपट-व्याज-छद्म कृ 8 U; अप-दिश् 6 P; 'f. ing illness ' शरीरास्वास्थ्यमपदिश्य; oft. ex. by कृतक, कृत्रिम, or कपट-व्याज-छद्म-मिथ्या in comp. ; 'he f. ed himself to be dead' आत्मानं मृतवत्संदर्शयामास; 'f. ing anger ' कृतकं कोपं कृत्वा; ' f. ing sleep' प्रसुप्तलक्षण, व्याजसुप्त, लक्षसुप्त. -ed, *a* व्याज-कपट-छद्म-मिथ्या in comp.; कूटार्थ, कल्पित, कृतक, कृत्रिम; 'f. quarrel' कृतककलहः, 'a f. dress ' कपटवेशः ; ' f. sleep ' व्याजनिद्रा; ' a f. ascetic ' छद्मतापसः. -edly, -ingly, *adv.* मिथ्या, सकपटं, सव्याजं, छद्मना. -er, *s.* कापटिकः, छद्मिन् *m.*, प्रतारकः; ' f. of illness ' आतुरलिंगिन्.

Feint, *See* **Pretext.**

Felicity, *s.* सुखं, श्रेयस् *n.*, परमसुखं, परमानंदः, धन्यता, सौभाग्यं, कल्याणं, महर्षः; ' f. of expression' वचसां प्रौढत्वं (Mal. 1). 2 (Eternal f.) अपवर्गः, मोक्षः, निःश्रेयसं, परमा गतिः, परमपदं, मुक्ति *f.*, कैवल्यं, निर्वाणं, श्रेयस्, अमृतं. 3 सहजता, अकृत्रिमता, अनाहार्यत्वं. -ous, *a.* श्रेयस्कर (री *f.*), अतिकल्याण, परमसुखिन्, धन्य, सुभग. -**Felicitate,** *v. t.* अभिनंद् 1 P or c., दिष्ट्या वृध् c.; *See* **Congratulate.** -ion, *s.* अभिनंदनं, धन्यवादः, कल्याणवचनं.

Feline, *a.* मार्जारीय, वैडाल (ली *f.*).

Fell, *s.* चर्मन् *n.*, अजिनं, दृति *f.*, कृत्ति *f.* 2 औपलाद्रि *m.* -*a.* निष्ठुर, क्रूर, दारुण, उग्र. -*v. t.* नि-अव-पत् c., अवकृत् 6 P, अवच्छिद् 7 P, नि-अव-भंज् 7 P, भूम्यां पत् c., शद् c. (शातयति). -er, *s.* निपातकः, छेतृ *m.*

Fellow, *s.* सहायः, मित्रं, सहचरः, अनुषंगिन् *m.*, सजुस् *m.*, सहवर्तिन् *m.*, वयस्यः. 2 समपदभाज् *m.*, तुल्यपदस्थः, सवयस्कः. 3 जनः, पुरुषः, ' this f. is bold ' धृष्टोऽसौ जनः. 4 सजातीयः, सजातिः. 5 यमः, यमकः, एकतरः, युग्मकः. 6 कापुरुषः, माणवकः, जाल्मः; ' my good f. ' भद्र, सौम्य. In comp. words ex. by सम-सह; ' f.-being, -creature ' समानजातिः-जातीयः, सजातीयः, सममूर्तं ; 'f.-citizen ' एकनगरस्थः, एकग्रामीणः ; ' f.-citizenship ' पौरसख्यं, पौरसाहित्यं; ' f. countryman ' स्वदेशजः, स्व-एक-देशीयः; 'f.-feeling' सहानुभूति *f.*, समदुःखत्वं, समभावः, भूतानुकंपा; ' f.-student,-scholar ' सहाध्यायः, सतीर्थः, सहाध्यायिन् *m.*, सहपाठकः; ' f.-labourer, -worker ' सहकारिन् *m.*, संभूयकारिन् *m.*, सहकर्मिन् *m.* 'f.-servant' सहभृत्यः, एकगृहः; ' f.- soldier ' सहयोद्धा; ' f. sufferer' सम-सह-दुःख-खिन्न, समदुःखभाज्, सहभोगिन् ' ' f. traveller ' सहयायिन्, सहगामिन्; ' f. of a- body' पारिषद्यः, पांक्तेयः, श्रेण्यन्तरः. -ship, *s.* साहाय्यं, साहित्यं, संसर्गः, संगः-गमः, संघातः, संयोगः, साहचर्यं, सख्यं, मैत्री, समागमः. 2 वृत्ति *f.* 3 पारिषदपदं.

Felly, *See* **Circumference.**

Felon, *s.* साहसिकः, घोरपातकः, आततायिन् *m.*, महापापिन्-पातकिन् *m.*, महापराधिन् *m.* -ous, *a.* आततायिन्, जिघांसु, वधोद्यत. 2 दुराचार, दुष्ट, पापिष्ठ, दुर्वृत्त, अतिनिंद्य. -*y*, *s.* महापापं-पातकं, महापराधः, साहसं आततायिता, घोरपापं.

Felt, *s.* ऊर्णा, और्णकं, ऊर्णायुः, कंबलः.

Female, *s.* स्त्री, नारी; *See* **Woman.** -*a.* Ex. by the suffixes आ, ई, or वधू in comp.; 'f. sparrow' चटका; हरिणी, सिंही, चक्रवाकवधूः, &c.; ' f. friend ' वयस्या, सखी, सहचरी, आलि *f.* ' f. apartments ' अवरोधगृहं, शुद्धांतः, अंतःपुरं; ' a f. form ' स्त्रीरूपं, स्त्रीसंस्थानं ; ' a f. dress ' स्त्रीनेपथ्यं-वेषः.

Femesole, *s.* अनूढा स्त्री.

Feminine, *a.* स्त्रैण (णी *f.*), स्त्रीजातीय, स्त्रीधर्मन्. 2 कोमल, मृदु, पेलव, सुकुमार. 3 (In gram.) स्त्री ; ' this word is masculine or f.' अयं शब्दः पुंसि स्त्रियां वा.

Fen, *s.* अनूपः, अनूपभूः, कच्छभूः, पंकः, कर्दमः. -**Fenny,** *a.* जलाढ्य, सजल, पंकिल.

Fence, *s.* वृति *f.*, आवरणं, प्राकारः, प्राचीरं, वेष्टनं, वरणः, शा(सा)लः. 2 रक्षा-क्षणं, गुप्ति *f.* -*v. t.* वृत्या रक्ष् 1 P or आ-परि-वृ 5 U or c. or परिवेष्ट् c. or अव-नि-रुध् 7 U. -*v. i.* दंडयुद्धं अभ्यस् 4 U or शिक्ष् 1 A. 2 मुष्टिमुष्टि कृ 8 U, दंडादंडि युध् 4 A. -er, *s.* असि-गदा-योधः, दंडयोद्धृ *m.* -ing, *s.* यष्टिदंड-युद्धं, आयुध-शस्त्र-विद्या. -less, *a.* अरक्षित, अनावृत.

Fend, *v. t.* वृ c. निवृ 10, प्रतिहन् 2 P.

Fender, *s.* अंगारगुप्ति *f.* 2 वरूथः, रथगुप्तिः.

Fennel, *s.* शा-सा-लेयः, छत्रा, मधुरिका.

Feracious, *See* **Fecund.**

Ferine, *See* **Beastly.**

Ferment,-ation, *s.* मंडः-डं, अभिषवः, फेणः-नः, किण्वः-ण्वं, सुरामंडः, कारोत्तरः, नग्नहुः (*m.*). 2 अंतः-क्षोभः-तापः-दाहः-उत्सेकः-वेगः, उत्तापः. -*v. t.* आकुलीकृ 8 U, अंतः क्षुभ् c., उत्सिच् 6 P or c., उत्तप् c., अंतर्वेगं उत्पद् c., अंतः-तप् c. -*v. i.* फेनायते (D.), उत्सिच् pass., अंतः क्षुभ् 4 P. or तप् 4 A, अंतस्तापं या 2 P. 2 क्षुभ्, उत्तप्.

Fern, *s.* बहुपत्रकः.

Ferocious, *a.* रौद्र (द्री *f.*), उग्र, क्रूर, अतिक्रूर, दारुण, क्रूरकर्मन्, मारात्मक, साहसिक (की *f.*); *See* **Grim, Dreadful**, also. **-ness, -Ferocity**, *s.* रौद्रता, क्रौर्य, उग्रता, &c.

Ferreous, *a.* लौह (ही *f.*), आयस (सी *f.*). लोहमय (यी *f.*), अयोधर्मन्.

Ferret, *s.* बभ्रुः, नकुलः.

Ferruginous, *a.* लोहमलयुक्त.

Ferrule, *s.* लोहवलयः-यं, लोहरक्षणी.

Ferry, *s.* तरः, तरणस्थानं, घट्टः; 'f. boat' तरनौः, त(ता)रण्डः-ण्डि *f.*, तरीः, तरालुः, उडुपः, वहित्रं; 'f.-man' तरनायकः, नाविकः, तारकः, तारणः. **-*v. t.*** (over) नावा तॄ 1 P or पारं गम् 1 P.

Fertile, *a.* शस्यप्रद, उर्वर, बहुफलप्रद, बहुशस्यद, अवंध्य, स्फीत; 'f. in produce' समृद्धशस्य. 2 (Fig.) निर्माणकुशल, कल्पक, संविधायक. **-ity, -ness**, *s.* फलवत्ता, फलदता, सफलता, अवंध्यत्वं, स्फीति *f.* **-ize**, *v. t.* सफल- फलप्रद-*a.* कृ 8 U, फलदी-कृ, आप्ये c., स्फीतीकृ.

Ferule, Ferula, *s.* वेत्रं, दंडकाष्ठं.

Fervent, *a.* चंड, उत्सुक, तीक्ष्ण, सातिशय, उग्र, सोत्साह, आसक्त, व्यग्र, उत्कट, उत्तप्त, उद्युक्त, सोद्योग; 'f. in piety' भक्तिव्यग्र, अतिभक्त. **-ly**, *adv.* सोत्साहं, साशंसं, सोत्सुकं, व्यग्रतया, औत्सुक्येन, उत्कटतया. **-Fervency**, *s.* व्यग्रता, उत्साहः, औत्सुक्यं, उत्कटता, तीक्ष्णता, चंडता, आसक्ति *f.*, मनोनिर्बंधः.

Fervid, *a.* प्रचंड, तीव्र, तीक्ष्ण, उत्तप्त, सातिशय, प्रखर, तिग्म, उग्र. **-Fervour**, *s.* 'प्र-,चंडता, तीव्रता, तीक्ष्णता, उत्तापः, उत्कटता, व्यग्रता; ' religious f. अतिभक्ति *f.*, भक्तिव्यग्रता, श्रद्धोन्मादः.

Festal, *a.* औत्सविक (की *f.*).

Fester, *v. i.* पूय् 1 A, पूतीभू 1 P, पक्व *a.* भू, सपूय *a.* भू.

Festival, *s.* उत्सवः, महः, पर्वन् *n.*, क्षणः, उद्धर्षः, उद्धवः, यात्रा, अभ्युदयः; 'public or general f.' यात्रोत्सवः.

Festive, *a.* आनंदप्रद, सोत्सव, हर्षण, सानंद, उत्सव in comp.; 'f. day' उत्सवदिनं. **-ity**, *s.* उत्सवः, समुत्सवः. उत्सवकालः. 2 प्रमोदः, हर्षः, आनंदः, आल्हादः.

Festoon, *s.* माला, हारः, स[illegible] *f.*

Fetch, *v. t.* आहृ 1 P, उपा-आ-नी 1 P, उपा-दा 3 A, 2 निष्कृष् 1 P, उत्पद् c., सृ c.; 'f. a deep sigh' दीर्घं निश्वस् 2 P; what price does the book f.' कियता मूल्येन तत्पुस्तकं विक्रीयते ; 'f. up' उद्-धृ 1 P, 10; आ-सद् c.; *See* **Overtake**. **-*s.*** कपटं, व्याजः, अपदेशः, उपायः.

Fete, *v. t.* तृप् c., तुष् c. **-*s.*** उत्सवः.

Fetid, *a.* पूतिगंधि, पूत, अशुभगंधि, उग्रगंध, दुर्गंध.

Fetor, *s.* दुर्गंधः, पूति-उग्र-गंधः.

Fetter, *s.* निगडः-डं, बंधनं, पाशः, शृंखला-लं. **-*v. t.*** निगडेन बंध् 9 P, संयम् 1 P, यंत्र् 10, निगडयति (D.). **-ed**, *a.* निगडित, पाशबद्ध, संयत, शृंखलित, संदानित.

Fetus, *s.* गर्भः, भ्रूणः, पिंडः, कललं-नं, गर्भस्थः शिशुः.

Feud, *s.* कलहः, कलिः, विग्रहः विरोधः, विपक्षता, द्वंद्वं, युद्धं; 'family f.' गृहच्छिद्रं, गृहरंध्रं, अंतर्भेदः.

Feudatory, *s.* सामंतः.

Fever, *s.* ज्वरः (lit. & fig.), तापः, देहदाहः-तापः; 'inflammatory f.' दाहज्वरः; 'typhoid f.' संनिपातज्वरः, तंद्रिकसंनिपातः; 'ardent f.' तापोल्मणः; 'relapsing f.' मुक्तानुबंधिन् *m.*, संततः. **-*v. t.*** उद्-सं-तप् c., ज्वर् c. (ज्वरयति). **-ish**, *a.* ज्वरार्त, ज्वरग्रस्त, ज्वरातुर, ज्वरपीडित, ज्वरित, सज्वर, ज्वरिन्. 2 ज्वरोत्पादक, ज्वरजनक.

Few, *a.* अल्प, कतिपय, स्तोक, परिमित, मित, अप्रचुर, अबहु; 'a f.' कतिचित्, स्तोकाः, कतिपयाः. **-ness**, *s.* अल्पत्वं, स्तोकत्वं.

Fiance, *s.* वधू.

Fiasco, *s.* भंगः, अनिष्पत्ति *f.*, असिद्धि *f.*

Fiat, *s.* आज्ञा, निर्देशः, शासनं, नियोगः, व्यवस्थापत्रं.

Fib, *See* **Falsehood**.

Fibre, *s.* तंतुः, सूत्रं, गुणः, तंत्रं. 2 केस(श)रः-रं, अंशुः, पक्ष्मन् *n.* 3 शिरा, नाडी, स्नसा; 'f. of a lotus' मृणालः-लं-ली, बिसं. **-ed, -ous**, *a.* तंतुमत्, सूत्रिन्, केसरिन्, तंतुमय (यी *f.*), शिराल.

Fickle, *a.* चपल, चंचल, लोल, तरल, चल, अस्थिर, अनवस्थित, अधीर; (of persons only). चलचित्त, चंचलहृदय, लोलबुद्धि, नैकभावाश्रय, प्रकृतितरल, लोल-चंचल-मति, अस्थिरबुद्धि. **-ness**, *s.* चापल्यं, तरलता, लोलता, चांचल्यं, अधीरता, अस्थिरता, चलचित्तता, मनोलौल्यं.

Fiction, *s.* कल्पना, रचना, सृष्टि *f.*; मनःकल्पना-सृष्टिः, मानसी सृष्टिः. 2 मिथ्याकथा, कल्पिता कथा. **-Fictitions**, *a.* कृतक. कृत्रिम, कल्पित, असत्य, मृषार्थक, कूटार्थ, कपट, मिथ्या-कूट in comp. **-ly**, *adv.* मिथ्या, सकपटं, मृषा सकूटं, सव्याजं.

Fiddle. *s.* शा(सा)रंगी, पिनाकी. **-*v. t.*** सारंगीं वद् c., 'f. stick' शारिका, कोणः, घर्घरिका.

Fidelity, *s.* भक्ति *f.*, आसक्तता. अनुरागः, निष्कपटत्वं, विश्वास्यत्वं, स्वामि प्रभु-निष्ठा-भक्तिः, अभेद्यता; 'f. to a husband' पातिव्रत्यं, पतिसेवा, सतीत्वं, चारित्र्यं.

Fidget, *v. i.* चपल-चंचल-*a.* भू 1 P. -*s.* चापल्यं, चंचलता. -y, *a.* चपल, चंचल, लोल, अशांत, अधीर; *See* **Fickle.**

Fiducial, *a.* विश्वासिन, विश्वस्त, असंदिग्ध.

Fiduciary, *a.* न्यस्त, निक्षिप्त. -*s.* न्यास-निक्षेप-धारिन्.

Fie, *interj.* धिक् (with acc.),sometimes with gen.

Fief, *s.* क्षेत्रं, भूमि *f.*, क्षेत्रभूमिः.

Field, *s.* क्षेत्रं, भूमि *f.*, वप्रः-प्रं; 'a collection of f.s' केदारकं, कैदार्यं, क्षैत्रं, कैदारिकं; 'f. of battle' रणभूमिः, रणाजिरं, रणांगनं-णं, रणं, समरभूमिः; 'f. marshal' सेनापतिः, बलाध्यक्षः, चमूपतिः, दंडनायकः, सेनानी *m.* 'f. sports' वनक्रीडा, अरण्य-मृगया-विहारः; 'the general took the f.' सेनानीर्युद्धाय प्रवृत्तः; 'they lost the f.' तस्मिन्युद्धे पराजिग्यिरे. 2 अवसरः, प्रसरः, स्थानं, विषयः.

Fiend, *s.* पिशाचः, राक्षसः, भूतः, वेताल.; *See* **Demon** also. -**ish** -**like,** *a.* पिशाचतुल्य अतिदारुण, पैशाच (ची *f.*), राक्षस (सी *f.*), आसुर (री *f.*), अतिक्रूर.

Fierce, *a.* उग्र, क्रूर, घोर, रौद्र (द्री *f.*), दारुण, भीषण, भैरव (वी *f.*); *See* **Dreadful, Grim,** also. **2** तीक्ष्ण, तीव्र, चंड, प्रखर, परुष, निष्ठुर (of voice &c.). **3** संरब्ध, कोपज्वलित, क्रोधेद्ध, कोपाकुल, समन्यु, कोपोद्दीपित, क्रोधव्यंजक. -**ly,** *adv.* तीक्ष्णं, तीव्रं, उग्रं, क्रूरं, घोरं, चंडं, निष्ठुरं, सक्रोधं, संरंभेण. -**ness,** *s.* क्रूरता, उग्रत्वं, रौद्रता. 2 तीक्ष्णता, चंडता. **3** संरंभः, अतिमन्युः, कोपोन्मादः, क्रोधातिशयः.

Fiery, *See* under **Fire.**

Fife, *s.* वेणुः, वंशः. -**er,** *s.* वांशिकः, वेणुवादकः.

Fifteen, *a.* पंचदशन्; 'f-th' पंचदश (शी *f.*).

Fifty, *a.* पंचाशत्; 'f.-th' पंचाश (शी *f.*), पंचाशत्तम (मी *f*).

Fig, *s.* (Tree) अंजीरः, न्यग्रोधः, उदुंबरः; (fruit) न्यग्रोधं, उदुंबरं, or ex. by फल in comp.; 'I care a f. for you' न त्वां तृणायापि मन्ये-गणयामि.

Fight, *v. i.* युध् 4 A, विग्रह् 9 P, संप्र-हृ 1 P, संग्रामं आरभ् 1 A, वैरायते (D.), प्रति-आ-युध् (with acc.); 'f. a cause' कार्यार्थं युध्. -*s.*, -**ing,** *s.* युद्धं, रणः-णं, आयोधनं, समरः-रं, विग्रहः; *See* **Battle.** -**er,** *s.* योद्धृ *m.*, युयुत्सुः.

Figment, *s.* कल्पना, मिथ्या-कल्पित-कथा, मानसी सृष्टिः.

Figurante, *s.* नर्तकी, लासिका.

Figure, *s.* आकारः, रूपं, आकृति *f.*, मूर्ति *f.* **2** कायः, देहः, विग्रहः, अंगं, गात्रं, वपुस् *n.*, (**Body** q. v.). **3** मूर्तिः, प्रतिमा, प्रतिरूपं-कृति *f.* 4 अंकः. **5** अलंकारः; 'f. of speech' वाक्यालंकारः. **6** रूपकं, आरोपः, लक्षणा, उपलक्षणं-णा, उपचारः. **7** प्रतिष्ठा, गौरवं, यशस् *n.*, वर्णः, कीर्ति *f.*; *See* **Fame.** -*v. t.* वि-धा 3 U, विरच् 10, निर्मा 3 A, सं-परि-क्लृप् c. **2** वर्ण् 10, चित्र् 10, लिख् 6 P, वि-आ°, रूप् 10, चित्रीकृ 8 U, कर्बुरीकृ. **3** (To oneself) वि-भू c., चिंत् 10, क्लृप् c., विगण् 10. -**Figurate,** *a.* साकार, रूपवत्, मूर्तिमत्, सरूप. -**Figurative,** *a.* सालंकार. **2** लाक्षणिक-औपचारिक (की *f.*), उपलक्षित; 'f. use' उपचारः. -**ly,** *adv.* सालंकारं, सोपलक्षणं; 'to be used f.' उपचर् pass. (with loc.); अचेतनेपि कूले चेतनवदुपचारदर्शनात्, तस्माच्चेतनवदुपचर्यते (S. B. 99, 100).

Filament, *s.* केश(स)रः-रं, तंतुः, सूत्रं, पक्ष्मन् *n.*, अंशुः; 'f. of a lotus' मृणालः-लं, बिसं, किंजल्कः.

Filch, *v. t.* मुष् 9 P, चुर् 10, अप-हृ 1 P. -**ing,** *s.* स्तेयं, अपहारः, चौर्यं, मोषणं.

File, *s.* पंक्ति *f.*, आवलि-ली *f.*, श्रेणि-णी *f.*; 'f. of an army' दंडव्यूहः, सैन्यश्रेणिः, बलविन्यासः. **2** सूत्रं, गुणः, तंतुः. **3** लेख्यश्रेणी, लेख्यपत्रसमूहः. **4** व्रश्चनः, पत्रपरशुः. -*v. t.* यथाक्रमं रच् 10 or श्रेण्यां आरुह् c. **2** घृष् 1 P, मृज् 2 P. -*v. i.* व्यूहेन प्र-या 2 P.

Filial, *a.* पुत्रानुरूप, पुत्रयोग्य, पुत्रीय; gen. पुत्र in comp.; 'f. duty' पुत्रधर्मः; 'f. affection' पितृवात्सल्यं, पितृभक्ति *f.* -**ly,** *adv.* पुत्रवत्, पुत्रधर्मानुरूपं. -**Filiation,** *s.* पुत्रत्वं, पुत्रीकरणं.

Filiform, *a.* सूत्राकृति.

Filings, *s.* लोहचूर्ण-किट्टं, लोहजं.

Fill, *v.t.* पृ-पू 3 U, भृ 3 U, आ-नि-सं-चि 5 U, प्र-आ-सं-पूर् 10, आ-सं-कॄ 6 P, व्याप् 5 P, व्यश् 5 A, आवृ 5 U; better ex. by 'f. ed'; 'it f. ed my heart with terror' तेन मम हृदयं भयसंकुलं बभूव. **2** प्रचुरीकृ 8 U, बहुलीकृ, संकुलीकृ. -*s.* Ex. by यथेच्छं, पर्याप्तं, आतृप्ति, प्र-नि-कामं; 'drank his f.' यथेच्छमापबत्; नीवारौदनमंडं पर्याप्तमाचामति (U. 4) 'drinks his f. &c.' -**ed,** *a.* पूरित, पूर्ण, सं-परि-पूर्ण, आ-सं-कीर्ण, संकुल, आ-समा-कुल, व्याप्त, नि-सं-चित, आवृत, संभृत, आविष्ट, गर्भ in comp.

Fillet, *s.* पट्टः, बंधनं, वेष्टनं, बंधः (केशानां).

Fillip, *s.* अंगुलिप्रहारः-घातः-ताडनं, छोटिका.

Filly, *s.* किशोरी, बालतुरगी-वाजिनी-घोटिका.

Film, *s.* पटलं, सूक्ष्मतंतुः, सूक्ष्मत्वच् *f.*, पुटः-टं; 'f. of the eye' अक्षिपटलं, अंतर्धानं. -**y,** *a.* पटलावृत, सपटल.

Filter, *v. t.* शुध् c., संमृज् 2 P, पू 9 U. -*v. i.* निर्गल् 1 P, निस्यंद् 1 A, निःसृत्य शुध् 4 P.

Filth, *s.* मलः-लं, कालुष्यं, मालिन्यं, अप(व)स्करः, कल्कं, खलं, पंकः, कर्दमः. -**y,** *a.* मलिन, कलुष, समल, मलीमस, मलदूषित, पंकिल, पंकिन्. 2 अशुद्ध, अमेध्य, अपवित्र. 3 कुत्सित, निंद्य, गर्ह्य, दूषणीय, कु-कद् pr.

Fin, *s.* पक्षः, देहाधिः, वाजः (मत्स्यानां); 'f.-footed' जालपादः-द्. -**less,** *a.* पक्षहीन-रहित. -**Finny,** *a.* सपक्ष, पक्षविशिष्ट.

Final, *v.* अंतिम, अंत्य, अंत-शेष in comp., पाश्चिम, चरम. 2 निःसंदेह, परिच्छिन्न, सुनिश्चित, अविकल्प, सुनिर्णीत. 3 अपरिवर्तनीय, अप्रतिकार्य. -**ly,** *adv.* अंततः, अंते, शेषे. 2 निरुत्तरतया, सपरिच्छेदं.

Finance,-s, *s.* आयः, करः, बलिः, धनागमः, शुल्कं, राजस्वं; 'his financial condition is prosperous': परिस्फीतं तस्य कोशजातं. -**Financier,** *s.* कोशाध्यक्षः, धनाधिकारिन् *m.*

Find, *v. t.* आप् 5 P, लभ् 1 A, अधिगम् 1 P, विद् 6 U, आ-समा-सद् c., दृश् 1 P; इ-या 2 P, (acc.), प्रतिपद् 4 A. 2 (F. out) बुध् 1 P, ज्ञा 9 U, अवगम् 1 P, अव-इ 2 P, वि-भू c.; निरूप् 10, अनुसंधा 3 U, उपलभ्, अन्विष् 4 P, निर्णी 1 P, निश्चि 5 U, अव-निर्-धृ 10; 'they found him guilty' सोपराधीति ते निर्णिन्युः, तैः सोपराधी स्थापितः. 3 उप-सं-क्लृप् 10, चित् 10. 4 व्या-ख्या 2 P, व्या-कृ 8 U, व्यक्तीकृ. -**ing,** *s.* अधिगमः, अवाप्ति *f.* 2 निर्णयः.

Fine, *a.* सूक्ष्म, तनु, श्लक्ष्ण, अस्थूल, विरल; 'f. cloth' सूक्ष्मवस्त्रं, अंशुकं, सुवासस् *n.* 2 तीक्ष्ण, तीव्र, कुशाग्रीय, मार्मिक. 3 पेलव, सुकुमार, कोमल, मृदु. 4 विशुद्ध, विमल, निर्मल. 5 परम, उत्तम, उत्कृष्ट, विशिष्ट. 6 सुंदर, कांत, शोभन, वाम, चारु, रूपवत्, सुभग, gen. by सु in comp.; 'of f. teeth' सुदती; 'having f. eyes' सु-वाम-लोचना; 'a f. day' सुदिनं; 'f. art' कला; 'f.-fingered' लघुहस्त; 'it is a f. proposal' उदारः-प्रथमः-कल्पः. 'in fine' अंततः, शेषे, एतावता, एवं च. *v. t.* शुध् c., पू 9 U, मलं हृ or अपकृष् 1 P. -**ly,** *adv.* सूक्ष्मं, विरलतया. 2 चारु, सुष्ठु, सुंदरं, सु pr. -**ness,** *s.* सूक्ष्मता, विरलता, तीक्ष्णता, &c. 2 कांति *f.*, शोभा, चारुता, लावण्यं. -**ry,** *s.* शोभा, आडंबरः, बाह्यशोभा. 2 अलंकारः, मंडनं, भूषणं, प्रसाधनं, आभरणं, परिकर्मन् *n.*, परिष्कारः; 'fond of f.' प्रियमंडन, अलंकारप्रिय.

Fine, *s.* दंडः, अर्थ-धन-दंडः; 'liable to f.' दंड्य. -*v. t.* दंड् 10 (two acc.), दंडं दा c. (दापयति) with instr. of giver.

Finesse, *s.* माया, सूक्ष्मोपायप्रयोगः, व्यपदेशः. 2 कौशलं, धूर्तता.

Finger, *s.* अंगुलि-ली *f.*, करशाखा; 'fore-f.' तर्जनी, प्रदेशि(श)नी; 'middle f.' मध्यमा; 'third f.' अनामिका; 'last f.' कनिष्ठा, कनिष्ठिका, कनीनी-निका; 'f.-ring' अंगुलीयं, अंगुली(री)यकं, ऊर्मिका; 'three f. s in breadth' त्र्यंगुलं (दारु). -*v. t.* अंगुल्या स्पृश् or परामृश् 6 P.

Finical, *a.* अतिसूक्ष्म, एकांतकोमल-पेलव, अत्युत्कृष्ट.

Finis, *s.* *See* **End.**

Finish, *v. t.* समाप् c., सं-पृ c. -पूर् 10, निर्वृत् c., अवसो 4 P, निः-सं-पद् c., साध् 5 P or c.; अंतं गम् 1 P, निः-शिष् c., निःशेषीकृ 8 U, पारं गम्. 2 संस्कृ 8 U, परिष्कृ, यत्नतः साध्. -*s.*, -**ing,** *s.* समाप्ति *f.*, अंतः, निर्वृत्ति *f.*, सिद्धि *f.*, अंतगमनं, &c.

Finite, *a.* प्रमेय, परिच्छेद्य, निरूपणीय, नियत, समर्याद, परिमित, साद्यंत; 'not f.' अनंत. -**ly,** *adv.* समर्यादं, नियतं.

Fir-tree, *s.* देवदारु *m.*, *n.*, शक्रपादपः, पारिभद्रकः, भद्रदारु, द्रुकिलिमं, पीतदारु, दारु, पूतिकाष्ठं.

Fire, *s.* अग्निः, वैश्वानरः, ज्वलनः, अनलः, पावकः, कृशानुः, वह्निः, दहनः, जातवेदस् *m.*, हुताशनः, शिखिन् *m*, हुतभुज् *m.*, हुतवहः, बर्हिः, शुष्मन् *m.*, कृष्णवर्त्मन्, *m.*, तनूनपात्, उषर्बुधः, शिखावत्, *m.*, हव्यवाहनः, हिरण्यरेतस् *m.*, चित्रभानुः, विभावसुः, शुक्रः, शुचिः, कृपीटयोनिः. 2 तेजस् *n.*, सत्वं, उत्साहः; 'on f.' अग्नि-हुतवह-परीत, अग्निदीप्त; 'submarine f.' वाडवः, और्वः, वडवानलः; 'set on f.' दह् c., दीप् c., अग्निं विसृज् 6 P (with loc.) अग्निना ज्वल् c. or दह् c.; 'take f.'; *See* under **Catch.** -*v. t.* दह् 1 P, ज्वल् c., इंध् 7 A, अग्निसात्कृ 8 U. 2 उत्तिज् c., उद्दीप् c., प्रोत्सह् c., प्रचुद् 10, संक्षुभ् c., प्रेर् c., संधुक्ष् 10. -*v. i.* दीप् 4 A, ज्वल् 1 P, दह् pass. 2 लोहगोलान् प्रक्षिप् 6 P or विसृज् 6 P. 'F.-arms' आग्नेयास्त्राणि; 'f-brand' अग्निकाष्ठं, अंगारः-रं, अलातं, उल्का, उल्मुकं. 2 प्रोत्साहकः. 'f.-fly' पतंगः, शलभः, खद्योतः, ज्योतिरिंगणः, प्रभाकीटः; 'f.-pan' *See* **Hearth;** 'f.-place' चुल्लि-ल्ली *f.*, अश्मंतं, उध्मानं, उद्धानं, अधिश्रयणी, अंति(दि)का; 'f.-proof' अदाह्य; 'f.-side' अग्निस्थानं, &c. (f.-place). (f.-side comforts गृहसुखानि); 'f.-wood' इंधनं, इध्मं, दाह्यकाष्ठं; 'f.-works' अग्निक्रीडा,-द्रव्याणि. -**Fiery,** *a.* आग्नेय (यी *f.*), तेजस्विन्, अग्निमय (यी *f.*). 2 सुलभकोप, शीघ्रकोपिन्, क्रोधन, क्रोधिल, कोपशील, संरंभिन्. 3 उग्र, तीक्ष्ण, प्र-,चंड, तीव्र.

Firm, *a.* दृढ, स्थिर, निश्चल, अचल, अविचलित, अस्खलित, धीर, अकंपित, अक्षुब्ध, धृतिमत्, व्यवस्थित; 'f. step' अस्खलिता गतिः. 2 गाढ, घन, दृढ, अशिथिल, अविरल, सांद्र, सुसंहत, दृढसंधि; 'of a f. mind' स्थिरधी, स्थिर-निश्चल-मति, दृढात्मन्; 'f. in friendship' दृढसौहृद, गाढसख्य. **-s.** वणिग्जनसंसर्गः, समवायः, संभूय समुत्थानं. **-ly,** *adv.* दृढं, गाढं, घनं, स्थिरं, धीरं, निश्चलं, &c.; 'f. rooted' बद्ध-रूढ-मूल; 'f. devoted' दृढभक्ति; 'f. joined' दृढबद्ध, दृढसंधि. **-ness,** *s.* दृढता, स्थैर्यं, द्रढिमन् *m.*, धैर्यं, धृति *f.*; अक्षोभः, अस्खलनं, अकंपः. 2 संहति *f.*, घनता, संधिः.

Firmament, *s.* आकाशः-शं, नभोमंडलं, नभस्तलं; व्योमन् *n.*, गगनं-णं, खं, अंतरीक्षं, तारा-उडु-पथः, खगोलः; *See* **Sky** also. **-al,** *a.* वैहायस (सी *f.*), आंतरीक्ष (क्षी *f.*), आकाशीय, नभःस्थ.

First, *a.* प्रथम, आद्य, आदिम, पूर्व, अग्रिम, प्राक्तन (नी *f.*). 2 मुख्य, प्रमुख, प्रधान, अग्र्य, प्रवर, श्रेष्ठ, वरेण्य, अग्रणी, अग्रेसर, वर in comp.; *See* **Principal,** 'f. half' पूर्वार्धः; 'f. part of day' पूर्वाह्णः; 'f. part of night' पूर्वरात्रः, 'for the f. time' प्रथमं; 'from the f.' प्रथमावधि, आप्रथमं; 'f. of all, in the first place' प्रथमं-आदौ-तावत्; 'f. born' अग्रजः, पूर्वजः, अग्रजन्मन् *m.*, ज्येष्ठः, अग्र्यः, :, अग्रिमः; 'f.-fruits' प्रथम-आदि-अग्र-फलं, प्रथमोत्पन्नं; 'f.-rate' श्रेष्ठ, उत्कृष्ट, विशिष्टतम, परम, उत्तम. **-***adv.*, **-ly,** प्रथमं, पूर्वं, प्राक्, आदौ, अग्रे, पुरस्तात्.

Fiscal, *a.* धनसंबंधिन्.

Fish, *s.* मत्स्यः, मीनः, झषः, वैसारिणः, अंडजः, विसारः, शकुलिन् *m.*, पृथुरोमन् *m.* **-***v. i.* मत्स्यान् ग्रह् 9 U or धृ 1 P or बंध् 9 P. 2 अनुसृ 1 P; 'f.-basket' मत्स्याधानी, कुवेणी; 'f.-hook' बडिशं-शा-शी, मत्स्यवेधनं; f.-ing net' जालं, आनायः, कुपिनी; 'f.-market' मीनविक्रयस्थानं; 'f.-monger' मत्स्यविक्रयिन्; 'f.-pond' मीनाश्रयः, मत्स्यालयः, मत्स्यपूर्णं सरः; 'f.-spawn' मत्स्यांडं; 'f.-woman' मत्स्यविक्रेत्री. **-er, -erman,** *s.* धीवरः, कैवर्तः, दासः-शः, जालिकः, मत्स्याजीवः, मत्स्योपजीविन् *m.*, मात्स्यिकः, निषादः. **-ery, -ing,** *s.* धीवरकर्मन् *n.*, मत्स्यबंधनं-ग्रहणं.

Fissile, *a.* भिदुर, भिदेलिम.

Fission, *s.* छेदः.

Fissure, *s.* छिद्रं, रंध्रं, संधिः, भंगः, विदलः-लं, भेदः; (in the ground) बिलं, गर्तः-र्ता, विवरं. **-***v. t.* छिद् 10, विदल् c. (दलयति).

Fist, *s.* मुष्टि *m. f.*-ष्टी; 'fisticuffs' 'blows with the f.' मुष्टिघातः-प्रहारः-युद्धं, मुष्टीमुष्टि-युद्धं; 'doubling or clenching the f.' मुष्टिबंधः-संग्राहः, खटः. **-***v.* मुष्टीमुष्टि युध् 4 A, मुष्टिना तड् 10 or प्र-हृ 1 P.

Fistula, *s.* नाडि-डी-लि-ली *f.*, नाडीव्रणं, नाडीक्षतं; 'f. in anus' भगंदरः.

Fit, *a.* योग्य, क्षम, न्याय्य, अनुरूप, उपपन्न, युक्त, उचित, यथार्ह, समुचित, यथायोग्य, संगत; oft. by अर्ह् or pot. pass. part.; 'to be f. for' क्लृप् 1 A (with dat.), युज्-उपपद् pass. अर्ह् 1P, उचित-योग्य-*a.* भू; 'f. to do a work' कर्मक्षम, अलंकर्मीण. **-***v. t.* युज् 7 U, 10, समा-सं-धा 3 U, योग्य-युक्त -*a.* कृ 8 U; 'f. an arrow' बाणं सं-धा; *See* **Fix;** 'this ili f. s thee' नैतदनुरूपं भवतः; 'f. out' सज्जीकृ, सन्नह् c., उपकरणैः उपक्लृप् c., or संयुज् or उपस्कृ; 'fit up' **Decorate,** q. v. **-***v. i.* युज्-उपपद्-pass., श्लिष् pass., युक्त *a.* भू; 'this f. s well' सुश्लिष्टमेतत् (Mal. 1), सुसंगतमिदं. **-***s.* आक्रमः, आवेशः, अवतारः, अभिभवः, 'f. of anger' कोपावेशः; 'f. of fever' ज्वराक्रमः, ज्वराभिभवः. 2 मूर्छा, भ्रमि *f.*, भ्रामरं. **-ful,** -*a.* चल, चपल, चंचल, अनित्य, विषम, लोल, अस्थिर. **-ly,** *adv.* युक्तं, उचितं, सम्यक्, यथार्हं, सांप्रतं, स्थाने. **-ness,** *s.* युक्तता, योग्यता, क्षमता, पात्रता, उपयोगिता, उपपत्ति *f.*, संगति *f.*, पर्याप्ति *f.*, याथार्थ्यं, देशरूपं.

Fitch, *s.* चणकः.

Five, *a.* पंचन्, पंचक, पंचतय; 'in f. ways' पंचधा;, 'f. times' पंचकृत्वः; 'f. fold' पंचगुण *a.* **-Fifth,** *a.* पंचम (मी *f.*)

Fives, *s.* कंदुकक्रीडा.

Fix, *v. t.* स्था c. (स्थापयति), प्रति-सं°, निधा 3 U, निरुह् c.; 'f. your dwelling there' तत्र वसतिं कुरु, तत्स्थाने निवस. 2 स्थिरीकृ 8 U, दृढीकृ. 3 (F. upon) निर्णी 1 P, निश्चि 5 U, अव-धृ 10, निरूप् 10, संपरि-क्लृप् c., निर्दिश् 6 P, नियुज् 7 A, 10. 4 बंध् 9 P (lit. & fig.), युज्, आसंज् c.; निविश् c.; 'did not f. her love on him' तस्मिन्न बबंध भावं (R. vi. 36); 'f. the eyes' दृष्टिं निविश् c., लक्षं बंध्, अनन्यदृष्ट्या-अनिमेषेण-स्तिमितलोचनेन-दृश् 1 P; 'with his eyes f. ed on my face' मन्मुखासक्तदृष्टिः; व्यापृ c., उमामुखे व्यापारयामास विलोचनानि (K. III. 67); 'f. an arrow' सं-धा 3 U, (धनुष्यमोघं समधत्त बाणं K. III. 66); 'f. the mind' मनः-चित्तं-निविश् c., or युज् or बंध् or आधा, एकाग्र *a.* भू; तेन उपदेशेन मम चेतसि दृढं पदं चक्रे 'the advice is firmly f. ed &c.'; 'I am in a f.' चक्रांतरस्थित इवास्मि. **-ed,** *a.* व्यवस्थित, स्थिरीकृत, स्थापित, प्रतिष्ठित, निरूढ. 2 नियत, निश्चित, ध्रुव, स्थिर,

दृढ, निश्चल, अचल; *See* **Firm**. 3 सक्त, आ-सं-सक्त, सं-परि-लग्न; निविष्ट, बद्ध. 4 स्थावर, अजंगम, ध्रुव; 'firmly f.' दृढबद्ध, बद्धमूल, प्रतिष्ठित, रूढमूल; 'having the gaze f.' 'with a f. look' आसक्त-बद्ध-दृष्टि, स्तिमित-अनिमेष-लोचन; 'having the mind f. (on one thing)'; एकाग्रचित्त, अनन्यमनस्क, निविष्ट-आसक्त-मनस्; एकतान, अनन्यवृत्ति, एकाग्र, एकायन, एकसर्ग, एकाग्र्य, एकायनगत; 'of f. resolution' दृढ-निश्चय-संकल्प, धीर-स्थिर-मति, स्थिरधी. **-edly**, *adv.* दृढं, स्थिरं, ध्रुवं, &c ; स्थिर-दृष्ट्या, अनिमेषेण, स्तिमितं, एकाग्रतया, &c. **-edness**, *s.* Firmness, q. v. **-ity**, *s.* स्थिरता, स्थैर्यं, निष्ठा; 'the mind, devoid of f., rambles' मनो निष्ठाशून्यं भ्रमति (Mal. 1). **-ture**, *s.* स्थावरद्रव्यं.

Flabby, *a.* शिथिल, ललित, कोमल, स्निग्ध, मेदुर, अकठिन. **-ness**, शैथिल्यं, लालित्यं.

Flaccid, *a. See* **Flabby**.

Flag, *s.* ध्वजः, केतुः, पताका; 'f.-staff' ध्वज-दंडः-यष्टिः-स्तंभः. 2 (Stone) शिलापट्टः-प्रस्तरः. **-v. i.** अवसद् 1 P, म्लै-ग्लै 1 P, ध्वंस् 1 A, अपचि-क्षि- pass. 2 (Of persons) शिथिलबल-अवसन्न-भग्नोत्साह *a.* भू, अंगानि मुच् 6 P; *See* **Droop**. **-v. t.** शिलाभिः आस्तॄ 5 U. **-gy**, *a.* शिथिल, क्षीण, अवसन्न, श्लथ.

Flagellate, *v. t.* कशया तड् 10 or प्र-हृ 1 P or आहन् 2 U. **-ion**, *s.* कशाघातः, कशाप्रहारः.

Flageolet, *s.* वंशः, वेणुः.

Flagitious, *a.* घोर, दारुण, अतिदुष्ट, अतिदुर्वृत्त, अति-महा-पापिन्, अतिनिंद्य. **-ness**, *s.* महा-अति-पापं-पातकं, अतिदुष्टता, घोरता, दौरात्म्यं.

Flagon, *s.* पानपात्रं-भाजनं, पुटग्रीवः, कंसः-सं.

Flagrant, *a.* घोर, दारुण, अतिदुष्ट, अतिनिंद्य, पापिष्ठतम. 2 सर्वज्ञात, लोकप्रसिद्ध, सुप्रकाश, सुव्यक्त, पुरःस्फुरत्. **-Flagrancy**, *s.* घोरता, अतिदुष्टता; सुव्यक्तता.

Flail, *s.* मुसलः-लं, कंडनी.

Flair, *s. See* **Odour**.

Flake, *s.* हिम or तुषार-लवः or कणः, हिमतूलं, तुषार-हिम-घनः. 2 शकलः-लं, लवः, कणः, अल्पभागः. 3 फलकः, संस्तरः. **-v. i.** शकलीभू 1 P. **-y**, *a.* सशकल.

Flambeau, *s.* उल्का, अलातं, उल्मुकं.

Flame, *s.* ज्वाला, शिखा, अर्चिस् *f.*, *n.*, कीलः-ला, अग्निज्वाला-जिह्वा; 'in f. s' ज्वलत्, हुतवहपरीत, दह्यमान. **-v. t.** ज्वल् c., दीप् c., दह् c., **-v. i.** ज्वल् 1 P, दीप् 4 A, दह् pass. **-ing**, *a.* उच्छिख, प्रदीप्त, अर्चिष्मत्, उज्ज्वल, ज्वलित, ज्वलत्; 'f. fire' ज्वालाग्निः. **-y**, *a.* शिखा-ज्वाला-मय (यी *f.*), शिखिन्.

Flamingo, *s.* मरालः, राजहंसः.

Flank, *s.* पार्श्वः-र्श्वं, पक्षः, कुक्षिः, उत्संगः, पार्श्व-पक्ष-भागः, पार्श्वांगं. **-v.** पार्श्वतः रक्ष् or गुप् 1 P. 2 पार्श्वतः अभिद्रु 1 P. 3 स्पृश् 6 P, निकटे-पार्श्वे-वृत् 1 A; *See* **Border**.

Flannel, *s* उर्णायुः, और्णपट्टं.

Flap, *v. t.* वि-धू 5 U, 9 U, 6 P, उत्क्षिप् 6 P, चल् c., आ-स्फल् c. **-v. i.** आस्फल् 1 P, विधू-उत्क्षिप्-pass. **-s.** प्रालंबः, लोलकः. 2 (f. ing) आस्फालनं, विधूननं, विधुवनं, उत्क्षेपः-पणं; 'f. ing of ears' कर्णतालः.

Flare, *v. i.* लोलशिखया ज्वल् 1 P. **-s.** लोलशिखा, कंपितज्वाला

Flash, *v. i.* स्फुर् 6 P, दीप् 4 A, वि-लस् 1 P, विद्युत् 1 A, सहसा प्रकाश् 1 A or ज्वल् 1 P, अचिरं प्र-भा 2 P. 2 विद्युद्वेगेन-अकस्माद्-उदि 2 P or आविर्भू 1 P or उत्पद् 4 A. **-s.** स्फुरणं. स्फुरितं, विलासः, सहसा दीप्ति *f.*, आभासः, विभ्रमः, अचिर-क्षण-प्रभा, प्रभाकंपः, क्षणद्युति *f.*, अचिरद्युतिः. **-y**, *a.* क्षणप्रभ, तैजस (सी *f.*). 2 असार, नीरस, फल्गु, निःसत्त्व.

Flask, *s.* काचपात्रं-भाजनं, पानपात्रं, पुटग्रीवः.

Flat, *a.* सम, समस्थ, समरेख, सपाट, अभुग्न. 2 निम्न, अनुच्च, नत, अनुन्नत. 3 असार, नीरस, फल्गु, विरस, रस-स्वाद-हीन, निस्तेजस्, निःसत्त्व. 4 स्पष्ट, स्फुट, व्यक्त, अवक्र, असंदिग्ध, सुव्यक्त, परिस्फुट. 5 अवनिं गत, दंडवत् क्षिप्त; 'he laid himself f. on the ground' भूमौ दंडवत्पतितः; 'f. surface' समपृष्ठं; 'f. roof' पृष्टं; 'f.-nosed' अवनाट, अवटीट, अवभ्रट, नत-चिपिट-नासिक. **-s.** समभूमि *f.*, समस्थलं-ली, समस्थानं, पाटः. 2 निम्नभूमिः. 3 सैकतं, पुलिनं. 4 पत्रं, फलकः-कं. 5 मंदः, अनुदात्तः, मंद्रः. **-ly**, *adv.* समं. 2 स्फुटं, सुव्यक्तं, अवक्रं, असंदेहं. **-ness**, *s.* समता, निम्नता, असारत्वं, &c. **-ten**, *v. t.* समीकृ 8 U. 2 आ-अव-नम् c. (नमयति), नम्रीकृ, निम्नीकृ. 3 रसं हृ 1 P, नीरसीकृ. **-v. i.** समीभू, नम्रीभू.

Flatter, *v. t.* सं-अभि-परि-स्तु 2 U, प्र-शंस् 1 P, चाटुवचनैः-स्तुत्या-सांत्व् 10 or संतुष् c. or उप-लल् 10 or प्र-लुभ् c. or आकृष् 1 P, उपच्छंद् 10. 2 चाटूनि वच्-ब्रू- 2P, प्रियं वद् 1 P. 3 अनु-नी 1 P, आ-राध् c., मिथ्या प्रशंस् श्लाघ् 1 A. 4 मिथ्या आशां उत्पद् c. or वृध् c. **-er**, *s.* चाटुकारः, संस्तावकः, सांत्ववादिन् *m.*, प्रशंसकः, प्रियंवदः, चाटुवादिन् *m.*, मिथ्याशंसकः. **-ing**, *a* स्तुतिमय (यी *f.*), परितोषक, प्रीतिकर (री *f.*), प्रशंसामय. **-ingly**, *adv.* चाटूक्त्या, अतिप्रशंसापूर्वं, सांत्वनपूर्वं. **-y**, *s.* संस्तावः, स्तुति *f.*

स्तवः, चाटु *m.n.*, चाटूक्ति *f.*, अतिप्रशंसा, सांत्वनं-ना, उपलालनं, मधुर-प्रिय-वचनं, सांत्ववादः, मिथ्याप्रशंसा, व्याजस्तुतिः, चाटुवादः. 2 अनुनयः, आराधनं, संतोषणं.

Flatulent, *a.* वात-वायु-ग्रस्त, बद्धवात, वातफुल्ल, वायुपूर्ण, वातुल. **-Flatulence, -cy,** *s.* वायुः, वातः, वायुफुल्लता, अंत्राध्मानं, वातिकत्वं.

Flatus, *s.* वातः, वायुः, अंत्रवायुः.

Flaunt, *v. i.* सावलेपं चल्-चर् 1 P. सदर्पं-उद्धतं-विकटं-परिक्रम् 1 U, 4 P. **-ing,** *a.* उद्धतमति, विलासाद् मंदगामिन्-दर्शनीयमानिन्, सुभगंमन्य; 'a f. gait' विकटा-धीरोद्धता-गतिः.

Flavour, *s.* आ-,स्वादः, रसः, रुचि *f.* **-***v. t.* सरस *a.* कृ 8 U. **-ed,** *a.* सरस; 'well-f.' सुरस, स्वादु, सुस्वाद. **-less,** *a.* अरस, नीरस, विरस, अस्वादु. **-ous,** *a.* मिष्ट, स्वादु, सुरस.

Flaw, *s.* दोषः, छिद्रं, रंध्रं, वैकल्यं, न्यूनता; 'seeking or finding f. s' रंध्रान्वेषिन्, छिद्रान्वेषिन्, दोषैकदृश्. 2 चंडवातः, प्रभंजनः; *See* **Hurricane.** 3 भंगः, संधिः, भेदः, रंध्रं, छिद्रं; 'f. in a jewel' पुलकः, खंडः. **-***v. t.* छिद्र् 10, व्यध्, 4 P. **-less,** *a.* निर्दोष; *See* **Faultless.** 2 निश्छिद्र, नीरंध्र. **-y,** *a.* सरंध्र, सच्छिद्र, सदोष.

Flax, *s.* क्षमा, अतसी, उमा; शणं; 'f.-comb' उमामार्जनी. **-en,** *a.* क्षौम-औम (मी *f.*).

Flay, *v. t.* चर्म अपनी or निर्हृ 1 P or उल्लिख् 6 P or निष्कुष् 1 P, 'निस्त्वचयति (D.), निस्त्वचीकृ 8 U, त्वक्ष् 1 P. **-er,** *s.* त्वग्विदारकः, चर्मनिष्कर्षकः. **-ing,** *s.* चर्मनिष्कर्षणं, निश्चर्मकरण.

Flea, *s.* मक्षिका, मत्कुणः, देहिका, तल्पकीटः. **-***v. t.* देहिकाः अपनी 1 P.

Fleck, *s.* रे(ले)खा, बिंदु *m.*

Fledged, *a.* संजातपक्ष, गरुत्मत्, सपक्ष, पक्षयुक्त.

Flee, *v. i.* पलाय् 1 A, अपक्रम् 1 U, 4 P, वि-प्र-द्रु 1 P, परा-इ 2 P, अपधाव् 1 P, अप-निस्-गम् 1 P, अप-सृ-सृप् 1 P. 2 त्यज् 1 P, परिहृ 1 P, वृज् 10.

Fleece, *s.* मेषलो(रो)मन् *n.* **-***v. t.* (लोम) छिद् 7 P or लू 9 U. 2 अपहृ 1 P; 'f. ed' हृतसर्वस्व. **-cy,** *a.* बहुलोमन्, लोमश, लोमावृत.

Fleer, *v. t.* अव-उप-हस् 1 P, तिरस्कृ 8 U, अवमन् 4 A, अव-ज्ञा 9 U; *See* **Contemn.** **-***s.* उप-अव-हासः; तिरस्कारः, अवहेलना, अवज्ञा.

Fleet, *s.* नौसमाजः-साधनं, पोतावलि *f.*, युद्धनौसमूहः. **-***v. i.* द्रुतं-शीघ्रं-प्रसृप् 1 P or गम् 1 P, वेगेन चल् 1 P, त्वर् 1 A. **-***a.* वेगवत्, शीघ्र-त्वरित-लघु-गति, प्रजाविन्, अतिरंहस्, जवन (नी *f.*), शीघ्रगामिन्, महाजव; 'f. as the wind' वायुगति, वायुवेग; 'f. as thought' मनोजव. **-ing,** *a.* क्षणिक, क्षणभंगुर, अध्रुव, क्षणस्थायिन्; *See* **Fickle.** **-ly,** *adv.* द्रुतं, शीघ्रं, लघु, सत्वरं, जवेन, वेगेन, रंहसा. **-ness,** *s.* वेगः, प्र-,जवः, रंहस् *n.*, त्वरितगति *f.*

Flesh, *s.* मांसं, आमिषं, पिशितं, क्रव्यं, तरसं, पललं; 'dried f.' वल्लूरं-रा, उत्तप्तं, शुष्कं मांसं. 2 शरीरं, विषयसेवा, विषयासक्ति *f.*; 'f. diet or meat' मांसाहारः; 'f.-colour' मांसवर्णः-रागः-लोहितः; 'f.-monger' मांसविक्रयिन् *m.* **-less,** *a.* अमांस, अपुष्ट, मांसहीन. **-ly,** *a.* शारीरिक-दैहिक (की *f.*), विषयिन्, सांसारिक-ऐहिक (की *f.*). **-y,** *a.* मांसल, पुष्ट, पीन, पीवर, मेदस्विन्; *See* **Fat.**

Flexible, *a.* आ-,नम्य, कुंचनीय, नमन-कुंचनशील, कोमल, मृदु, आयम्य. 2 अनुनेय.

Flexion, Flexture, *s.* आ-,नति *f.*-नमनं; भंगः, आ-अव-कुंचनं, वक्रता, वक्रिमन् *m.*

Flexuous, *a.* वक्र, कुटिल, जिह्म, भंगुर.

Flick, *v. t.* आहन् 2 P, प्रहृ 1 P, आस्फाल् 10. **-***s. See* **Flip.**

Flicker, *v. i.* चल् 1 P, चंचलतया ज्वल् 1 P, लोलशिखया ज्वल्, चंचलीभू 1 P. 2 पक्षौ आ-स्फल् c. **-ing,** *a.* चल, चंचल, अस्थिर, लोल. **-***s.* चंचलशिखा, चलनं, चांचल्यं.

Flimsy, *a.* असार, फल्गु, सारहीन, निर्बल, निःसत्त्व, अल्पबल, क्षीणशक्ति. **-ness,** *s* असारता.

Flinch, *v. i.* विमुखी-पराङ्मुखी-भू 1 P, विचल् 1 P, नि-परा-वृत् 1 A, (abl.); पलाय् 1 A, त्यज् 1 P, त्यक्त्वा निर्गम् 1 P or अपसृप् 1 P मुखं परा-वृत् c. **-ing,** *s.* निवर्तनं, विमुखता, विचलनं, विमुखीभवनं.

Fling, *v. t.* (सहसा-बलेन) क्षिप् 6 P, अस् 4 P, मुच् 6 P, वि-सृज् 6 P, पत् c., ईर् c.; 'f. away or off' अप-क्षिप्, निरा-कृ, अपास्, अप-हा 3 P; 'f. open' सहसा or बलाद् अपावृ 5 U. **-s.** क्षेपः-पणं, पातः-तनं; प्रक्षेपः.

Flint, *s.* अरणिः, अग्निग्रावन् *m.*, अग्निप्रस्तरः. **-y,** *a.* अग्निप्रस्तरमय (यी *f.*). 2 कठिणहृदय, पाषाणहृदय.

Flip, *s.* आघातः, प्रहारः, आस्फालनं.

Flippant, *a.* वाचाल, वावदूक, निःसार, वाक्चंचल. 2 चपल, अस्थिर, लोल, चंचल. **-ly,** *adv.* वाक्चापल्येन. **-Flippancy,** *s.* वाक्चापल्यं, वावदूकता; निःसारता. 2 प्रगल्भता, लौल्यं, चापल्यं.

Flirt, *v. t.* सहसा क्षिप् 6 P. **-***v. i.* अव-हस् 1 P, अधिक्षिप् 6 P. 2 वि-भ्रम् 1, 4 P, विलस् 1 P, विलासं-विभ्रमं-दृश् c. 3 चल *a.* भू 1 P, स्पंद् 1 A, कंप् 1 A, स्फुर् 6 P. **-***s.*

आकस्मिकक्षेपः. 2 विलासिनी, लीलावती, चपला, प्रगल्भा. -ation, s. लीला, हेला, विभ्रमः, विलासः, हावः, खेला, प्रेमलीला. 2 स्पंदनं, स्फुरणं; हृदयकंपः.

Flit, *v. i.* लघु चल् 1 P, द्रुतं वि-प्र-सृप् 1 P, स्थानात्स्थानं गम् or चल् 1 P, इतस्ततो भ्रम् 1, 4 P. 2 प्र-उत्-डी 1, 4 A, व्योम्नि विसृप्, चपलीभू. **-ting,** *s.* भ्रमणं, चलनं, लघु सर्पणं.

Flitch, *s.* वल्लूरं, शूकरोत्तंसं.

Flitter *s.* चीरं, कर्पटः, वस्त्रखंडः-डं.

Flittermouse, *s.* जतुका, अजिनपत्रा.

Float, *v. i.* प्लु 1 A; तॄ 1 P. 2 भास् 1 A. -*v. t.* प्लु c., वह् c. -*s.* प्लवः, उडुपः, कोलः, वहित्रं, तरणः-णी, तरीः.

Flocculent, *a.* सांद्र, घनीभूत, श्यान.

Flock, *s.* यूथं, संघः, निवहः, समूहः, कुलं, गणः; *See* **Multitude**; 'f. of cattle' पाशवं, पशुकुलं, गो-वृंद-कुलं, 'f. of sheep' अविकुलं, आविकं; 'f. of sheep and goats' अजाविकं; 'in f. s' गणशः, संघशः. -*v. i.* (Together) संघशः-गणशः-समागम् 1 P or मिल् 6 P or सं-नि-पत् 1 P, एकत्र मिल्, एकीभू.

Flog, *v. t.* कशया-वेत्रेण-तड् 10 or आ-हन् 2 U or दंड् 10 or प्र-हृ 1 P. **-ging,** *s.* कशाघातः, कशाप्रहारः; 'deserving f.' कश्य.

Flood, *s.* पूरः, ओघः; स्रोतस् *n.*, प्रवाहः, रयः. 2 आप्लावः, संप्लवः, तोयविप्लवः, जलप्रलयः, जलोपप्लवः; 'universal f.' महाप्रलयः, भूतसंप्लवः, संवर्तः. 3 प्राचुर्यं, बाहुल्यं, पूरः, ओघः; 'f. of tears' बाष्पपूरः-ओघः-वर्षः, अश्रुपातः-वर्षः, 'f.-gate' द्वारं, निर्गममार्गः, परि(री)वाहः, जलद्वारं, जलनिर्गमः. -*v. t.* प्लु c., आ-सं-परि°-, परिवह् c.; 'with her eyes f.-ed with tears' अश्रुपरिप्लुतेक्षणा; 'a f.-ed river' आप्लुतोदका-परिवादिणी-नदी.

Flook, *s.* हलदंतः.

Fulsome, *a.* गर्हित, कुत्सित, गर्ह्य, बीभत्सजनक, विरस. **-ness,** *s.* विरसता, गर्ह्यता.

Fulvous, *a.* आपीत, पिंगल, कपिल.

Fumble, *v. i.* परामृश् 6 P, समालभ् 1 A, अदक्षं कार्यं वि-धा 3 U. **-ing,** *a.* संभ्रांतं परामृशत्, अदक्षतया कार्यविधायिन्. -*s.* अदक्षं कार्यविधानं.

Fume, *s.* धूमः-मिका, बाष्पः, धूपः. **2** धूमोद्गारः. **3** क्रोधः, संरंभः. -*v. t.* धूमयति (D.), धूप् 1 P (धूपायति). **-Fumigate,** *v. t.* धूप् 10, धूप् 1 P (धूपायति), धूपेन वास् 10 or भू c.; 'a thing f. ed' वासितं, भावितं. -*v. i.* धूमायते (D.), बाष्पं उद्गॄ 6 P. 2 Angry; (to be) q. v. **-ion,** *s.* वासनं, भावनं, अधिवासनं. **-Fumy,** *a.* सधूम, सधूप.

Fun, *s.* परि(री)हासः, नर्मन् *n.*, क्रीडा, खेला, केलि *f.*, प्रहसनं, क्रीडाकौतुकं; 'said in f.' नर्मभाषितं, नर्मालापः. **-Funny,** *a.* हासजनक, विनोदनशील, रसिक, कौतुककारिन्, नर्म-परिहास- in comp. **2** उपहास्य, अपरूप.

Funambulist, *s.* रज्जु-चारिन् *m.*-नर्तकः.

Function, *s.* व्यापारः, कर्मन् *n.*, कार्यं, कृत्यं, चेष्टा, क्रिया, चेष्टितं, व्यवसायः, व्यवहारः, वृत्ति *f.*, प्रवृत्ति *f.* **2** नियोगः, अधिकारः, पदं. **3** आचरणं, अनुष्ठानं, करणं. **4** गुणः, धर्मः, स्वभावः. **5** इंद्रियं, शक्ति *f.*, कर्मेंद्रियं. **-ary,** *s.* नियोगिन् *m.*, अधिकारिन् *m.* कार्यनिर्वाहकः, नियुक्तः, अधिकृतः.

Fund, *s.* संचयः, पुंजः, राशिः, समुदायः, निचयः, संयोगः, संनिपातः; *See* **Collection. 2** मूलधनं, नीवि-वी *f.* -*v. t.* सं-चि 5 U, संग्रह् 9 P, पुंजीकृ 8 U, राशीकृ.

Fundament, *s.* गुदं, पायुः, अपानं, मलद्वारं. **2** अधोभागः, तलं.

Fundamental, *a.* प्रधान, सार, सारभूत, गुर्वर्थ, मौलिक, मूल in comp.; 'f. cause' मूलकारणं; 'f. principle' मूलतत्वं. -*s.* प्रधान-मूल-तत्वं, मूलं, तत्त्वं, सारः.

Funeral, *s.* और्ध्वदेहिकक्रिया, अंत्येष्टि *f.*, प्रेतकार्य-कृत्यं, प्रेतनिर्हारः, अंत्यक्रिया, उत्तरक्रिया-कर्मन् *n.*, और्ध्वदेहिकं, श्राद्धादि कर्म. -*a.* और्ध्वदेहिक, और्ध्वदैहिक(की *f.*), better by (*s.*); 'f. pile' चिता, चिति-ती *f.*, चित्या.

Fungus, *s.* विडजं, गोमयजं, शिलींध्रं, शा(सा)लेयः, शीतशिवः, छत्रा, मधुरिका, मिसि-शि-सी-ही- *f.*, मिश्रया.

Funicle, *s.* क्षुद्ररज्जु *f.*, क्षुद्रगुणः, सूत्रं.

Funk, *s.* महद्भयं, संत्रासः. **-y,** *a.* भीत, संत्रस्त.

Funnel, *s.* धूममार्गः-पथः-द्वारं. 2 नाली, प्रणाली-लिका, नाडि-डी *f.*

Fur, *s.* रो(लो)मन् *n.*, तनुरुहः-हं, पशुलोमन् *n.*; 'f. on the tongue' कुलुकं, मलं. **-red,** *a.* लोमावृत, लोमान्वित. 2 समल.

Furbish, *v. t.* तिज् *c.*, निः-तप् *c.*, प्रमृज् 2 P or *c.*, धाव् 10, परिष्कृ 8 U. **-ed,** *a.* निर्धौत, प्रमृष्ट, निष्टप्त. **-er,** *s.* तेजकः, मार्जकः, निर्णेजकः; 'f. of weapons' शस्त्रमार्जः, असिधावकः. **-ing,** *s.* धावनं, परिष्कारः, तेजनं.

Furcated, *a.* द्व्यग्र.

Furl, *v. t.* सं-वेष्ट् *c.*, सं-वृ 5 U, संपुटीकृ 8 U, सं-हृ 1 P.

Furlong, *s.* नल्वः

Furlough, *s.* कर्मत्याग-कर्मविराम-अनुज्ञा. 2 कर्मनिवृत्ति *f.*

Furmenty, *s.* क्षीरान्नं, परमान्नं, पायसं.

Furnace, *s.* अग्निकुंडं, अधिश्रयणी, अंति(दि)का, उद्ध्मानं; 'a portable f.' *See* **Hearth**.

Furnish, *v. t.* (उपकरणैः) संयुज् 10 or सनाथीकृ 8 U; (उपस्करं) उप-क्लृप् *c.*, उपपद् *c.*, सं-भृ 3 U, वि-धा 3 U; gen. ex. by स or सनाथ in comp.; 'f. ed with arrows' सशरं (धनुः); मणिशिलापट्टसनाथं लतागृहं (V. 2) 'f. ed with a marble slab'; 'to f. with arms' शस्त्रास्त्रैः संनह् 4 P or सज्जीकृ. **-ed,** *a.* सं-युक्त, समन्वित, उपेत, उप-परि-क्लृप्त, सनाथ, संभृत, स in comp. 2 सोपस्कर, सोपकरण, उपस्करादियुक्त. 3 सन्नद्ध, सज्जीकृत. **-Furniture,** *s.* उपस्करः, उपकरणं, परिच्छदः, सामग्री, सज्जा, संभारः, उपचारः, परिबर्हः; 'on sofas with all f.' उपचारवत्सु मंचेषु (R. vi. 1.); परिबर्हवंति वेश्मानि (R. xiv. 15); 'household f.' गृहोपस्करः, पारिणाह्यं.

Furor, *s.* *See* **Fury**.

Furore, *s.* अत्याश्चर्यं, महद्विस्मयः,

Furrow, *s.* सीता, हलिः, लांगलमार्गः-पद्धति *f.*, हलरेखा. 2 रे(ले)खा, सुषिरं. 3 वदनरेखा, वलि-ली *f.* **-***v. t.* (हलेन) कृष् 1 P. (लांगलेन) लिख् 6 P or रेखाः कृ 8 U. **-ed,** *a.* सीत्य, कृष्ट, हल्यवत्.

Further, *a.* दूरतर, दूरस्थ, दवीयस्. 2 अधिक, अपर, अधिकतर, पर. **-***adv.* दूरतरं, अधिकदूरं, अग्रे-ग्रतः, पुरतः, अग्रतरां, पुरस्तात्; 'a little f. on' स्तोकांतरं, अग्रतः, किंचिदग्रे, 'f. and f.' अधिकाधिकं, उत्तरोत्तरं. 2 अपरं, अन्यच्च, अपरं च, किं च, अपि च, अपरं तु. **-***v. t.* प्र-सं-वृध् *c.*, अनुग्रह् 9 P, उपकृ 8 U, त्वर् *c.* (त्वरयति) पुरस्कृ, प्रवृत् *c.*, साहाय्यं दा 3 U, उत्कृष् 1 P, उन्नतिं-उत्कर्षं-नी 1 P. **-ance,** *s.* सं-प्र-वर्धनं, प्रवर्तनं, अभि-वृद्धि *f.*, अनुग्रहः, उपकारः, साहाय्यं, उत्कर्षः. **-er,** *s.* उपकारकः, प्रवर्धकः. **-more,** *See* (*adv.*).

Furthest, *a.* दविष्ठ, दूरतम. **-***adv.* सुदूरं, दविष्ठं.

Furtive, *a.* चौर्येण गृहीत, अपहृत, छलापहृत, निभृतं कृत. **-ly,** *adv.* चौरवत्, उपांशु, रहसि, निभृतं, छलेन.

Fury, *s.* मत्तता, उन्मत्तता, चंडता, उग्रता, औत्कट्यं. 2 संरंभः, कोपः, क्रोधः, रोषः, आवेशः, अमर्षः. 3 महावेगः, अत्यंतवेगः-जवः, बलं, आ[illegible]. 4 चंडी, दुर्गा. **-Furious,** *a.* प्र-चंड, तीव्र, उग्र, प्रबल, महावेगवत्. 2 उन्मत्त, मत्त, मदोत्कट, मदकल, समद, उदग्रमद, उन्मादसंरब्ध, उत्कट. 3 कोपाकुल, संरब्ध, क्रोधाविष्ट, कोपपरीत, रोषण, इद्धकोप, जातामर्ष. **-ly,** *adv.* उग्रं, चंडं, महावेगेन, संरंभेण. **-ness,** *s.* संरंभः, उग्रता, उन्मादः, कोपाकुलत्व.

Fuscous, *a.* आकृष्ण, आनील.

Fuse, *v. t.* वि-द्रु *c.*, विली *c.*, जलसात् कृ 8 U. 2 एकरूप *a.* कृ, संमिश्र् 10, सायुज्यं कृ, संयुज् 10, सदृशीकृ. **-***v. i.* वि-द्रु 1 P, वि-ली 4 A, द्रवीभू, गल्-स्रु 1 P. 2 सदृशीभू, सायुज्यं आप् 5 P, एकरूप *a.* भू. **-ible,** *a.* द्राव्य, विलयनीय, द्रवशील, क्षरणशील. **-ion,** *s.* द्रावः, विलयनं, विलयः, द्रवत्व, क्षरणं. 2 एकरूपता, सदृशभावः, एकभावः, संमिश्रणं, संकरः, संयोगः.

Fuss, *s.* आडंबरः, तुमुलं, कोलाहलः, संभ्रमः. **-y,** *a.* संभ्रमकारिन्.

Fust, *s.* स्तंभः, स्तंभदंडः. 2 उग्र-पूति-गंधः, दुर्गंधः. **-Fusty,** *a.* पूति, पूतिगंधि, उग्रगंध. **-iness,** *s.* पूति *f.*, दुर्गंधः.

Fustian, *s.* स्थूलशाटकः, वराशिः, स्थूलपट्टवस्त्रं-कार्पासं. 2 अतिशयोक्ति *f.*, गर्वोक्तिः, दर्पवचनं, सदर्पवाच्-उक्ति *f.* **-***a.* स्थूलकार्पासिक (की *f.*). 2 अतिगर्वित, दर्पाध्मात, सगर्व.

Futile, *a.* निरर्थक, मोघ, व्यर्थ, निर्गुण. 2 असार, लघ्वर्थ, निःसार, निःसत्त्व, फल्गु, तृणप्राय, तुच्छ. **-ity,** *s.* मोघता, लाघवं असारता, &c.

Future, *a.* भविष्यत्, उत्तर, अनागत, आगामिन्, भाविन्, उत्तरकालीन, श्वस्तन (नी *f.*). 'f. time' अनागतवेला, उत्तरकालः, आयति

f. 2 पारलौकिक-पारत्रिक-आमुष्मिक (की *f*.), अमुत्रत्य, परलोकगत. –*s*., –**ity**, *s*. भावि-उत्तर-कालः, भविष्यत्-आगामि-कालः, भाविन् *n*., अनागतं, अनागतकालः, आयति *f*., उदर्कः; 'past, present and f.' समतीतं च भवच्च भावि च (R. viii. 78); 'ignorant of the f.' अश्वस्तनविद्, उदर्कानभिज्ञ.

G.

Gaberdine, *s*. वराशिः, स्थूलशाटकः.

Gabble,–er, *See* **Babble,–er.**

Gabel, *s*. करः, राजस्वं, शुल्कः-ल्कं, बलिः.

Gable, *s*. गृह-प्रासाद-शिखरं.

Gad, *s*. बाणाग्रं, शूलाग्रं; अग्रं, कर्णः. 2 कीलः, लोहकीलः. –*v*. *i*. अट् 1 P, परिभ्रम् 1, 4 P. –**ding**, *s*. परि-, अटन-भ्रमणं.

Gad-fly, *s*. दंशकः, गोमक्षिका, दंशः-शी, वनमक्षिका.

Gaffer, *s*. वृद्धजनः; अशिष्टाचारः.

Gag, *s*. मुखबंधनी-पिधानं, रोधनं. –*v*. *t*. मुखं बंध् 9 P or निरुध् 7 U or पि-धा 3 U.

Gage, *s*. पणः, आधिः, परिपणनं. 2 मानं, प्र-परि-माणं. 3 मापनयंत्रं. 4 आह्वानं. –*v*. *i*. पण् 1 A, प्रति-ज्ञा 9 U, अंगीकृ 8 U, प्रतिपद् 4 A, सशपथं प्रतिज्ञा.

Gaggle, *v*. *i*. कलं रु 2 P; कूज् 1 P.

Gain, *v*. *i*. लभ् 1 A, अर्ज् 1 P or *c*., आप् 5 P, आ-समा-सद् *c*.; *See* **Get**; 'g. ground' उप-चि *pass*., प्रवृध् 1 A; प्ररुह् 1 P; 'g. over' प्राप् *c*., वशं नी 1 P (धनदानादिना); अनुरंज् *c*., ग्रह् 9 U; 'g. over to one's side' स्वपक्षं ग्रह् *c*.; 'g. a battle' युद्धे जयं लभ्; 'g. the day' जयं प्राप्, विजयिन् *a*. भू; 'g. upon one's steps' समासद् *c*.; *See* **Overtake.** –*v*. *t*. क्रमशः प्रसृप् or प्रगम् 1 P. –*s*. लाभः, प्राप्ति *f*., फलं, आयः, अर्थः, उत्पन्नं, फलोदयः, अर्जनं. –**er**, *s*. अर्जकः; प्राप्तलाभः; फलप्रापकः. –**ful**, *a*. फलद; लाभजनक, अर्थोत्पादक. –**ly**, *adv*. दक्षं, चतुरं, सपाटवं.

Gainsay, *v*. *t*. विरुध् 7 U; नि-प्रति-षिध् 1 P, प्रत्या ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, अपलप् 1 P, अधरीकृ 8 U, निरा-कृ, बाध् 1 A, निरस् 4 U. –**er**, *s*. अपवादकः, निषेधकः.

Gairish, *a*. अतिशोभन, रूपगर्वित. –**ness**, *s*. अतिशोभा, रूपगर्वः, दंभः.

Gait, *s*. गति *f*. गमनं, : गतं, चारः; 'graceful in g.' हंसगति, चारुगामिन्.

Gala, *s*. उत्सवः, उत्सवदिवसः, पर्वदिनं.

Galaxy, *s*. सुरनदी, आकाशगंगा, स्वर्गंगा, वियद्गंगा. 2 सुवस्तुमंडलं.

Gale, *s*. वातः, वायुः, पवनः; 'strong g.' वात्या, वातालि, चंडवातः, झंझानिलः, वेगानिलः, प्रकंपनः, ब्राजि *f*.

Gall, *s*. क्षतं, विषं; दंशः; (fig.) पीडा; दुष्टभावः, संबाधा. 2 पित्तं, मायुः. 3 कटुता, तिग्मता, कठोरता, अरुंतुदत्वं. –*v*. *t*. चर्म घृष् 1 P or क्षुद् 1 P. 2 सं-परि-तप् *c*., पीड् 10, बाध् 1 A, क्लिश् 9 P; अर्द् 1 P, मर्माणि कृत् 6 P or भिद् 7 P. –*v*. *i*. आत्मानं तप् *c*. –**ing**, *a*. परुष, मर्मच्छिद्-भिद्, अरुंतुद.

Gallant, *a*. शोभन, सुभगदर्शन; सभ्य, सभ्याचार, सुशील; दाक्षिण; स्त्र्युपचारपर-दक्ष. 2 वीर, शूर, विक्रांत, महावीर्य; *See* **Brave.** –*s*. वल्लभः, रमणः, कामुकः, कामिजनः, कामिन् *m*., नायकः, दयितः. 2 जारः, विटः, उपपतिः. 3 सभ्याचारः, सुजनः; स्त्र्युपचारशीलः-परः. –**ry**, *s*. दाक्षिण्यं; कामचेष्टा, शृंगारविलसितं, स्त्र्युपासना, स्त्र्युपचारः. 2 वीर्यं, शौर्यं, धामन् *n*., विक्रमः, पौरुषं. 3 उदारता, माहात्म्यं. –**ly**, *adv*. सविक्रमं, सवीर्यं, शूर-वीर-वत्. 2 रमणवत्.

Gallery, *s*. मंचाः (pl.), मंचसनाथः कोष्ठः. 2 छन्नपथः-मार्गः. 3 अलिंदः-दकः.

Gallinaceous (fowl), *s*. कुक्कुटः, ताम्रचूडः, चरणायुधः.

Gallinule, *s*. दात्यूहः, कालकंठकः.

Gallop, *v*. *i*. वल्ग् 1 P, प्लुतगत्या चल् or धाव् 1 A, प्लु 1 A. –*s*. प्लुतं, वल्गितं, प्लवनं.

Gallows, *s*. वधस्तंभः, वध्यशिला-काष्ठं, वधघातस्थानं, वध्यस्थलं. 'met his death on the g.' शूलमारोपितः.

Galoche, *s*. काष्ठपादुका, पादुका.

Galvanize, *v*. *t*. विद्युच्छक्त्या आकृष् 1 P or उपहन् 2 P.

Gamble, *v*. *i*. दिव् 4 P (अक्षैः अक्षान् वा); अक्षैःक्रीड् 1 P. –**er**, *s*. द्यूतकारः, देवितृ *m*., द्यूतकृत् *m*., धूर्तः, अक्षदेविन् *m*., कितवः, अक्षधूर्तः. –**ing**, *s*. द्यूतं, दुरोदरं, पणः, अक्षवती, अक्षक्रीडा-द्यूतं, कैतवं, देवनं, द्यूतसेवा; 'g.-house' द्यूतशाला-सभा; 'he who keeps a g.-house' सभिकः, द्यूतकारकः.

Gambol, *v*. *i*. क्रीड् 1 P, नृत् 4 P, इतस्ततः वल्ग् 1 P, प्लु 1 A. –*s*. नृत्यं, क्रीडा, लास्यं लीला, केलि *f*., खेला.

Game, *s*. क्रीडा, खेला, केलि *f*., लीला, विलासः, परि(री)हासः. 2 वन्यपश्वादि, जांगलः, वन्यपक्षिन् *m*. 3 मृगया. 4 संकल्पः, व्यवसायः, कल्पना, संदिग्धव्यवसायः. –*v*. *i*. क्रीड् 1 P, दिव् 4 P; 'G.-cock' चरणायुधः, योधकुक्कुटः; 'g.-keeper' वन्यपक्षिपालकः; 'g.-leg' पंगुपादः. –**ing**, *s*. द्यूतं. –**ster**, *s*. धूर्तः; *See* under **Gamble.**

-**some**, *a.* क्रीडा-लीला-पर, विलासशील, विलासिन्, परिहासशील, उल्लासिन्, परिहासिन्, विनोदिन्, नर्मालापिन्.

Gammer, *s.* वृद्धा स्त्री.

Gammon, *s.* वल्लूरं, उत्ततं, सूकरशुष्कमांसं. 2 चर्मपट्ट-शारि-क्रीडा. 3 **Deceit**, q. v. –*v. t.* सूकरमांसं लवणीकृ 8 U. 2 **Cheat**, q. v.

Gamut, *s.* ग्रामः.

Gander, *s.* हंसः, चक्रांगः, चक्रवाकः, चक्रः; श्वेतगरुत् *m.*, मानसौकस् *m.*, राजहंसः (white).

Ganesh, *s.* गणेशः, गणपतिः, विनायकः, विघ्नेशः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदंतः, हेरंबः, लंबोदरः, गजाननः, गजास्यः, गजदंतः.

Gang, *s.* गणः, संघः, निवहः; *See* **Collection.**

Ganges, *s.* गंगा, मंदाकिनी, वियद्गंगा, स्वर्णदी, सुरदीर्घिका, जाह्नवी, जह्नुतनया-कन्या, भागीरथी, अमरापगा, सुरनदी, त्रिस्रोतस् *f.*, त्रिपथगा.

Ganglion, *s.* शिरास्फोटः.

Gangrene, *s.* पूतिमांसं ; मांसपाकः; कोथः. –*v. i.* कोथीभू 1 P; पूतीभू.

Gangway, *s.* आरोहावरोहपथः.

Gaol, -**er**, *See* **Jail**, -**er.**

Gap, *s.* छिद्रं, भंगः, विच्छेदः, भेदः, रंध्रं, छेदः, विवरं, गर्तः-र्ता.

Gape, *v. i.* वि-प्र-जृंभ् 1 A; जभ्-जंभ् 1 A, मुखं व्यादा 3 A. 2 वि-, दल् 1 P, स्फुट् 1 P. –*s.*, -**ing**, *s.* जृंभः-भा, जृंभणं, जृंभिका, जृंभितं, हर्मन् *n.*, हाफिका, मुखव्यादानं. -**ing**, *a.* जृंभिन्, जृंभित, व्यात्तमुख.

Garb, *s.* वेशः-षः, वस्त्रं, वसनं, वासस् *n.*, परिधानं, प्रसाधनं; 'putting on the g. of virtue' धर्मकंचुकप्रवेशिनः (S. 5).

Garbage, *s.* उच्छिष्टं, मलं.

Garble, *v. t.* साचीकृ 8 U; सत्यं गुह् 1 U, विकृ, वक्रीकृ.

Garden, *s.* उद्यानं, उपवनं; 'g. near a house' गृहारामः, निष्कुटः, गृहवाटिका; 'pleasure-g.' क्रीडोपवनं, आरामः, प्रमदवनं, आक्रीडः; 'flower-g.' पुष्पवनं-वाटः-वाटिका, कुसुमाकरः; 'fruit-g.' फलवृक्षवाटिका; 'vegetable g.' शाकवाटिका, शाकशाकटं, शाकशाकिनं; 'g.-wall' उद्यानपरिसरः-प्राकारः. -**er**, *s.* उद्यानपालकः-रक्षकः, मालाकारः, मालिकः, मालिन् *m.* -**ing**, *s.* उद्यानकर्मन् *n.*, उद्यानसेवनं-कर्षणं, फलोत्पत्तिकर्मन् *n.*

Gargle, *v. i.* (जलं) आचम् 1 P, उप-स्पृश् 6 P, जलेन मुखं मृज् 2 P or धाव् 1 P. –*s.* आचमनीयं, आचाम्यं.

Garish, *a.* *See* **Gairish.**

Garland, *s.* माला, स्रज् *f.*, माल्यं, आपीडः; शेखरः, हारः; 'g. worn in the hair' गर्भकः; 'g. hanging from the crest' प्रभ्रष्टकं, शिखालंबि माल्यं; 'g. worn straight' प्रालंबः-बिका; 'g. worn sideways' वैकक्षिकं; 'g. of pearls' हारः, मुक्तावली, मौक्तिकसरः.

Garlic, *s.* ल(र)शुनं, रसोनः-नकः, महौषधं-गृंजनं, अरिष्टः, महाकंदः, सोनहः.

Garment, *s.* वस्त्रं, वासस् *n.*, वसनं, पटः, परिधानं, परिच्छदः, अंबरं, प्रच्छादनं; वेशः-षः; 'under or lower g.' अंतरीयं, अधोंशुकं, उपसंव्यानं, परिधानं, अधोवासस् *n.*-वसनं; 'upper g.' उत्तरीयं, प्रावा(व)रः, उत्तरासंगः, बृहतिका, संव्यानं; 'g. as a protection from wind and cold' नीशारः.

Garner, *s.* कुशू(सू)लः, धान्यागारं, धान्यकोष्ठः, कंडोलः-लकः; पिटः. –*v. t.* कंडोले निविश् c. or नि-धा 3 U.

Garnet, *s.* रक्तमणि *m.*

Garnish, *v. t.* भूष् 10, मंड् 10, अलंकृ 8 U, परिष्कृ, शुभ् c. –*s.*, -**ment**, -**Garniture**, *s.* प्रसाधनं, भूषणं, अलंकारः, मंडनं, आभरणं; उपकरणानि (pl.), सज्जा.

Garret, *s.* शिरोगृहं, चंद्रशाला, अट्टः, अट्टालः.

Garrison, *s.* दुर्गरक्षकाः (pl.); दुर्गसैन्यं-बलं. रक्षिणः-रक्षकाः (pl.); रक्षिवर्गः. –*v. t.* रक्षापुरुषैः युज् 10, (दुर्गे) रक्षिणः निविश् c. or स्था c. (स्थापयति).

Garrulous, *a.* अतिवक्तृ, वावदूक, बहुभाषिन्-वादिन्, वाचाल, वाचाट, जल्पाक, मुखर. -**ness**, **Garrulity**, *s.* वाचालता, वावदूकता, अतिवादः, बहुभाषित्वं, अतिजल्पनं.

Garter, *s.* पादावरणबंधनी, जंघाबंधनी.

Garth, *s.* अंगणं, प्रांगणं. 2 उपवनं. 3 धरणः.

Garuda, *s.* गरुडः, गरुत्मत् *m.*, तार्क्ष्यः, वैनतेयः, खगेश्वरः, नागांतकः, विष्णुरथः, सुपर्णः, पन्नगाशनः, भुजगदारणः, भुजगरिपुः.

Gas, *s.* वायुः. -**eous**, *a.* वायुरूप.

Gash, *s.* दीर्घच्छेदः, दीर्घं गंभीर-क्षतं.

Gasometer, *s.* वायुमापनयंत्रं.

Gasp, *v. i.* कृच्छ्रेण श्वस् or अन् 2 P, दुःखेन श्वस्, स्थूलस्थूलं निश्वस्. –*s.* उच्छ्वासः, निश्वासः, कृच्छ्रोच्छ्वासः, कष्टश्वासः.

Gastric, *a.* जाठर (री *f.*), उदरीय, जठरीय; उदर-जठर in comp.; 'g. juice' जठराग्निः.

Gastronome, *s.* औदरिकः, उदरंभरिः, कुक्षिंभरिः, उदरपरायणः; *See* **Glutton.** -**Gastronomy**, *s.* उदरपरायणता, उदरसेवा.

Gate, *s.* द्वारं, प्रतिहारः, द्वार् *f.*; 'g.-way' तोरणः-णं, गोपुरं; निर्गमः, द्वारपथः; for other comps. : *See* **Door.**

Gather, *v. t.* चि 5 U. सं-अव-प्र-आ-°; समाहृ 1 P, समा-नी 1 P, संग्रह् 9 P, सं-भृ 1, 3 U, एकीकृ 8 U: *See* **Collect**; 'g. flowers' पुष्पाणि चि or लू 9 U. **2** ज्ञा 9 U, अनु-मा 3 A. 2 P. ऊह् 1 A. अव-गम् 1 P. **3** उद्-वृ 5 U. उद्धृ 1 P. —*v. i.* संगम् 1 A, सं-इ 2 P, संमिल् 6 P. सन्नि-पत् 1 P, एकत्र मिल्, एकस्थ *a.* भू 1 P, एकीभू **2** उपचि pass., प्र-वि-वृध् 1 A, एध् 1 A. **3** पूयं बंध् 9 P, पूय् 1 A. —*s.* पुटः, चूगः. —**er,** *s.* अवचायिन् *m.*, संग्राहकः; 'g. of taxes' शौल्किकः, करग्राहकः. —**ing,** *s.* चयः, अवसंचयः, संग्रहणं. **2** समूहः, गणः, संघः, समागमः, निवहः, संघातः; जनसमूहः, लोकनिवहः-संघः.

Gaud, *s.* बाह्यशोभा. —**y,** *a.* उज्ज्वल, शोभन, नानावर्ण, चित्र; 'having a g. dress' उज्ज्वलवेशधारिन्, आर्य-उदार-नेपथ्यभृत्. —*s.* **Festival,** q. v. —**ness,** *s.* अतिशोभा, औज्ज्वल्यं, चित्रता, नानावर्णता.

Gauge, *See* **Measure.**

Gaunt, *a.* क्षाम, कृश, क्षीण, शुष्कमांस, क्षुत्क्षाम, कृश-क्षीण-देह.

Gauntlet, *s.* हस्तत्राणं; 'throw down the g.' युद्धार्थं आह्वे 1 A: 'take up the g.' युद्धाह्वानं स्वीकृ or उरीकृ 8 U.

Gawk, *s.* मूर्खः; *See* **Fool**. **2** **Cuckoo,** q. v.

Gawky, *a.* स्थूल-दीर्घ-देह, स्थूल.

Gay, *a.* प्रमोदिन्, प्रहृष्ट, आनंदित, उल्लासित, प्रमुदित, सानंद, प्रफुल्ल, अनुत्सुक, सोल्लास. **2** विलासिन्, परिहासशील, विनोदन-शील-पर, केलिपर. **3** **Gaudy,** q. v. —**Gaiety,** *s.* प्रमोदः, उल्लासः, प्रहर्षः, आनंदः, आह्लादः **2** उत्सवः; *See* **Festival.** —**Gaily,** *adv.* सहर्षं, सोल्लासं, सानंदं, प्रफुल्लतया. **2** उज्ज्वलं, शोभनं.

Gaze, *v. i.* निर्-ईक्ष् 1 A, निर्वर्ण् 10, निध्यै 1 P. बद्ध-स्थिर-दृष्ट्या दृश् 1 P or आलोक् 1 A, 10; दृष्टिं or लक्ष्यं बंध् 9 P. (loc.): 'g. ing up to heaven' नभोदत्तदृष्टि; 'g. ing in all directions' दिक्षु दृष्टिं क्षिप्त्वा. —*s.* निरीक्षणं, निर्वर्णनं. आ-अव-लोकनं; दृष्टि *f.*, प्रेक्षणं, दर्शनं; बद्ध-स्थिर-अनिमेष-दृष्टिः; 'with a fixed g.' अनिमेषनयन, बद्धदृष्टि *a.*

Gazelle, *s.* मृगः, हरिणः.

Gazette, *s.* वार्ताहरः. वार्तापत्र.

Gear, *s.* उपकरणं, सामग्री. सज्जा, प्रसाधनं. **2** कार्यं, व्यापारः; 'out of g.' विलग्न, असंगत, असंबद्ध.

Gelatinous, *a.* सांद्र, श्यान, स्त्यान, संलग्नशील.

Geld, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P or उत्पद् 10. —**ing,** *s.* छिन्नमुष्कः (अश्वः).

Gelid, *a.* अतिशीत, हिम, शिशिर.

Gem, *s.* रत्नं, मणि *m. f.* **2** **Bud,** q. v. —*v. t.* रत्नैः शुभ् *c.* —**med,** *a.* रत्नखचित, मणिभूषित, रत्नानुविद्ध. —**my,** *a.* मणिमय (यी *f.*), रत्नभासिन्, रत्नोज्ज्वल.

Gemmate, *a.* मुकुलित, बद्धपल्लव.

Gemini, *s.* मिथुनं. द्वंद्वं, युगं, युगलं, युग्मं, द्वयं, यमकं-लं; यमौ, यमजौ- लौ. —**Geminate,** —**Geminous,** *a.* द्विगुण, द्विरावृत्त, द्विक यम, यमज-ल.

Gender, *s.* लिंगं, प्रकृति *f.* —*v. t.* **Beget,** q. v. —*v. i.* **Copulate,** q. v.

Geneology, *s.* वंशावलि-ली *f.*, वंशक्रमः, वंशश्रेणी परंपरा-वृक्षः; oft. ex. by वंशः, अन्वयः. —**ical,** *a.* (*s.*) in comp. —**ist,** *s.* अन्वयज्ञः, वंशक्रमज्ञः, वंशावलिरचकः.

General, *a.* सामान्य, साधारण, सर्वजनीय-न, सार्वत्रिक-सार्वलौकिक-औत्सर्गिक- (की *f.*), सर्व-बहु-सामान्य, व्यापक, सर्वव्यापिन्, अविशेषक, प्रायिक, सर्वत्र प्रचलित; 'a g. rule' उत्सर्गः; 'a g. practice' लोकाचारः, जनरूढि *f.*, जनव्यवहारः, लोकः; 'against g. practice' लोकविरुद्धं; 'g. opinion' बहुमतं; 'g. reader' चुंबकः. —*s.* सेनापतिः, सेनाध्यक्षः, चमूपतिः, सेनानीः, बलाध्यक्षः-नायकः. —**ity,** *s.* बहुतरभागः, मुख्यांशः, प्रधानभागः; better by 'g. ly': 'the g. of beasts' प्रायः सर्वे पशवः. **2** सामान्यता, साधारण्यं. —**ize,** *v. t.* जातीः निर्दिश् 6 P, जातिशः गणीकृ 8 U, साधारणधर्म प्रदृश् *c.*, वर्गीकृ. **2** सामान्यतः वद् 1 P. उत्सर्गरूपेण कथ् or निरूप् 10. —**ization,** *s.* जातिनिर्देशः, गणीकरणं, सामान्यधर्मकथनं, सामान्यवादः. —**ly,** *adv.* 'in g.' प्रायः, प्रायेण, प्रायशः, सामान्यतः, बहुशः, भूयसा, भूयिष्ठं, साधारण्येन; oft. ex. by हि. —**ness,** *s.* व्यापकत्वं, सामान्यता. —**ship,** *s.* सैनापत्यं, सेनाध्यक्षत्वं. रणकौशलं, युद्धनैपुण्यं, बलविन्यासकौशलं.

Generate, *v. t.* उत्पद् *c.*, प्र-सू 2, 4 A, आवह् 1 P, सं-उद्-भू *c.*, जन् *c.* (जनयति), *See* **Cause** also. —**ion,** *s.* उत्पादनं, प्रसवः, जननं, जन्मन् *n.*, उत्पत्ति *f.*, प्रसूति *f.*, संभवः, उद्भवः. **2** अन्वयः, कुलं, वंशः, जाति *f.*, संतानः, संतति *f.* **3** पुरुषः, पुरुषपरंपरा, वंशश्रेणी; 'former g.' पूर्वे पुरुषाः; 'a pair, one g. removed from the creator' स्रष्टुरेकांतरं (S. 7). **4** समकालीनपुरुषाः. —**ive,** *a.* उत्पादक, जनक; 'g. organ' उपस्थः, योनि *f.* —**or,** *s.* जनयितृ *m.*, जनकः, उत्पादकः, जन्मप्रदः-दातृ *m.*

Generic,-al, *a.* जातिगत, सामान्य, साधारण, व्यापक, वर्गीय; 'g. property' जातिधर्म

-लक्षणं-स्वभावः, जातित्वं, सामान्यधर्मः-लक्षणं. **-ally,** *adv.* जातिमुद्दिश्य, सामान्यतः.

Generous, *a.* उदार, वदा(द)न्य, त्यागशील, अवदात, दानशील, दानरत, दानशौंड, स्थूललक्ष्य, बहुप्रद. 2 महात्मन्, उदारधी-चेतस्, महामनस्, उदारचरित, महेच्छ, महाशय. 3 कुलीन, महाकुल, अभिजात. **-ness, -Generosity,** *s.* औदार्यं, त्यागिता, त्यागः, दानशीलं, वदान्यता. 2 उदारात्मता, महात्मता, माहात्म्यं.

Genesis, *s.* उत्पत्ति *f.*, आदि *m.*

Genial, *a.* सुखप्रद, आनंदद, सुखावह, रम्य, रमणीय, मनोहर-रम्य, रुचिर, प्रसन्न, सुखकर (री *f.*), उत्साहवर्धक, जीवद. 2 प्रसवकारिन्, जनक. 3 प्रसन्नचित्त, सोल्लास, उदार. **-ly,** *adv.* प्रसन्नं, सानंदं, सहर्षं, सोल्लासं, प्रफुल्लं. **-ness,** *s.* रम्यता, उल्लासः, प्रसादः, प्रसन्नता.

Geniculated, *a.* ग्रंथिल.

Genie, *s.* भूतः, पिशाचः.

Genital, *a.* जननसंबंधिन्, जनन in comp.; 'g. organ' जननेंद्रियं, उपस्थः, योनि *f.*, शिश्नं.

Genitive, *s.* षष्ठी विभक्तिः.

Genitor, *See* **Generator.**

Genius, *s.* धीशक्ति *f.*, मति *f.*, बुद्धि *f.*, धीः, मति-बुद्धि-प्रभावः-सामर्थ्यं, मतिप्रकर्षः. 2 धीसंपन्नः, धीमत् *m.*, धीशक्तियुतः, गुणवत् *m.* 3 कल्पना-निर्माण-शक्तिः. 4 प्रकृति *f.*, स्वभावः, शीलं. 5 लक्षणं, विशेषचिह्नं, वृत्ति *f.*, स्वधर्मः. 6 भूतः, पिशाचः, वेतालः; *See* **Demon;** 'dramatic g.' नाट्यशक्तिः कल्पना; 'good g.' सुदैवं; 'evil g.' दुर्दैवं.

Genteel, *a.* विनीत, दक्षिण, सभ्य, सुजन, सुशील, आर्य, आर्य-साधु-वृत्त, शिष्टाचार, आर्यचरित, सदाचार. 2 कुलीन, अभिजात, कुलोत्पन्न. 3 चारु, ललित, सुभग. **-ly,** *adv.* आर्यवत्, सुजनवत्. **-ness, -Gentility,** *s.* विनयः, दाक्षिण्यं, आर्यता, सौजन्यं, सुशीलता, सभ्यता, साधुता. 2 आभिजात्यं, कुलोत्कर्षः. 3 लालित्यं, चारुता.

Gentian, *s.* किरातः, चिर(रा)तिक्तः, भूनिंबः, हिमकः, किराततिक्तः, अनार्यतिक्तः.

Gentile, *a., s.* अन्य-भिन्न-देशीय, देवार्चक. 2 सगोत्र, गोत्रज, ज्ञातीय.

Gentle, *a.* भद्र, कल्याण (णी *f.*), शिव, सुख. 2 कोमल, मृदु, मसृण, अपरुष, सुकुमार, अचंड, मृदुल, मंद, सौम्य; 'a g. laugh' मंदस्मितं, ईषद्धासः; 'g. breeze' मंदानिलः, मृदुपवनः; 'g. means' सामोपचारः, सामन् *n.*, मृदूपायः; 'g. words' प्रिय-मृदु-वचनं. 3 महाकुल, कुलीन, अभिजात, सुजन्मन्, साधु-आर्य-वंशज, कुल in comp.; 'a girl of g. blood' कुलकन्यका कुलप्रसूता. 4 (In addressing) अयि, भद्र, सौम्य, आर्य; 'g. lightning' अयि विद्युत्; 'g. folk' आर्यमिश्राः, आर्याः, साधुजनाः. 5 शांत, दांत. **-ness,** *s.* मृदुता, कोमलता, सौम्यता, सौकुमार्यं, मंदता; 'g. of manners' आचारसौजन्यं, आर्यवृत्तिः. **-Gently,** *adv.* मृदु, सदयं, अजातव्यथं, यथासुखं; 'shall rub g.' यथासुखं संवाहयामि (S. 3). 2 मंदं मंदं, शनैः शनैः, शनैः, अपरुषं, अचंडं. 3 निभृतं, अलक्षितं, मंदं. **-Gentleman,** *s.* आर्यः, सुजनः, साधुजनः, आर्यवृत्तः, कुलीनः; सुविनीतः, महाजनः, आर्य-कुलीन-जनः, भद्रः, महानुभावः; oft. by श्री in comp. **-like, -ly,** *a.* सभ्य, विनीत, शिष्ट, सुशील, आर्य; 'g. manner' आर्यवृत्तिः, सौजन्यं; 'in a g. manner' नागरिकवृत्त्या (S. 5).

Gentry, *s.* विशिष्टजनाः, आर्याः, आर्यलोकाः-जनाः, कुलीनवर्गः-जनाः, सुजनता.

Genuflect, *v. i.* जानुं नम् *c.* **-ion,** *s.* जानुभ्यां आनतिः *f.*, जानुनतिः.

Genuine, *a.* अकृतक, अकृत्रिम, अकाल्पित, निर्व्याज, निर्व्यलीक, अकपट, निष्कपट, अवितथ, सत्य, यथार्थ. **-ly,** *adv.* सत्यं, निष्कपटं, निर्व्याजं. **-ness,** *s.* सत्यता, यथार्थता, निर्व्याजत्वं, अकृत्रिमता.

Genus, *s.* जाति *f.*, गणः, वर्गः.

Geography, *s.* भूगोलविद्या-शास्त्रं, भूपृष्ठविद्या. **-er,** *s.* भूगोलशास्त्रज्ञः, भूपृष्ठविद्याज्ञः. **-ical,** *a.* भूगोलशास्त्रविषयक.

Geology, *s.* भूतत्त्वं, भूगर्भशास्त्रं, भूतत्त्वविद्या. **-ical,** *a.* भूतत्त्वविषयक. **-ist,** *s.* भूतत्त्वज्ञः.

Geometry, *s.* ज्यामिति *f.*, रेखागणनागणितं, भूमितिः. **-ic,-ical,** *a.* (*s.*) in comp.; 'g. proof' रेखागणितेन उपपत्तिः. **-ician,** *s.* भूमितिज्ञः.

Georgic, *s.* कृषि-काव्यं-गीतं.

Germ, *s.* अंकुरः, अभिनवोद्भिद् *m.* 2 बीजं, मूलं, योनि *f.*, आदिः, प्रभवः, बीजकारणं. **-Germinate,** *v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, विकस् 1 P. **-ing,** *a.* उद्भिद्-द्-ज, अंकुरित. **-ion,** *s.* उद्भेदः, स्फुटनं.

Germane, *a.* सनाभि, संपर्किन्, संपृक्त.

Gestation, *s.* गर्भ-धारणं-वहनं-पोषणं; गर्भिणीभावः.

Gesticulate, *v. i.* अंगानि विक्षिप् 6 P or संचल् *c.* **-v.** *t.* अभि-नी 1 P, नि-, रूप् 10, सूच् 10. नट् 10; *See* **Act.** **-ion,** *s.* अभिनयः; अंगविक्षेपः, चेष्टा, सूचना, अंगहारः, हावः, संकेतसूचनं. **-or,** *s.* अंगविक्षेपकः.

Gesture, *s.* चेष्टा, व्यापारः, इंगितं, भावः, अभिनयः; विलासः, विभ्रमः, अंगविक्षेपः, हावः; हस्तादिचालनं

Get, *v. t.* लभ् 1 A, आप् 5 P, अर्ज् 1 P or c., आ-समा-सद् c., विद् 6 U, प्रति-आ-पद् 4 A, अश् 5 A, अधिगम् 1 P, ग्रह् 9 U, आ-दा 3 A. 2 (To be produced) जन् 4 A, उत्पद् 4 A, सं-उद्-भू 1 P, प्र-सू 2, 4 A, (with genitive of person): 'I have got a pain in my teeth' दंतपीडा मे उत्पन्ना-जाता. 3 धृ 1 P, 10, भृ 3 U: धा 3 U; 'I have got that book with me' तत्पुस्तकं मत्सकाशे वर्तते; *See* **Bear** also. 4 (Cause) ex. by causal; 'g. it done by him', तं तत्कारय; oft. by अनुनी 1 P, प्रोत्सह् c., प्रवृत् c.; 'g. ahead' अग्रेसरीभू; 'g. clear of' मुच् pass.; 'g. rid of' आत्मानं मुच् c., (with abl.) by निर् in comp.; 'g. abroad' प्रसृ-प्रसृप् 1 P, बहुलीभू 1 P: *See* under **Abroad.** **-among,** मध्ये प्रविश् 6 P or गम्. **-at,** प्राप्, आगम्, आ-या 2 P, उप-स्था 1 U. **-away,** अपसृ 1 P, अप-इ 2 P, अपक्रम् 1 U, 4 P; चल् 1 P, अप-या गम्; 'g. away, you fool' अपेहि रे मूर्ख. **-back,** प्रतिलभ्, प्रत्या-इ, &c. **-beyond,** तॄ 1 P, अति-इ, अतिक्रम्. **-down,** अवतॄ, अवरुह् 1 P, अधो गम्, नि-अव-पत् 1 P; (*v. i.*) अवतॄ c., अवरुह् c. &c. **-in,** प्रविश् 6 P. **-into,** पत्; संकटे पतितः 'got into troubles'; आरुह् 1 P (a car &c.); 'he got into debt' ऋणग्रस्तो बभूव; 'g. ing into deep mud' पंकपूरमासाद्य. **-off,** (*v. i.*) निःसृ, निर्गम्, अप-या, अप-क्रम्, निस्तॄ. 2 अवतॄ, अवरुह्; (*v. t.*) निरस् 4 U, अप-नी 1 P. **-on,** प्रवृत् 1 A, प्रचल्, प्र-सृ; 'they long got on well' चिरं ते सुखेन अवर्तंत or कालं निन्युः. **-out,** निर्गम्, अप-इ, निःसृ. 2 त्यज् 1 P, मुच् 6 P; 'g. out of bed now' अधुना मुंच शय्यां. **-over, -through,** संतॄ; पारं-अंतं-गम्, अतिक्रम्, निस्तॄ, तीर् 10; आरुह्. 2 समाप् c.; *See* **Complete.** **-together,** संचि 5 U; समा-नी, संग्रह्; *See* **Collect.** **-up,** उत्-स्था; प्रबुध् 4 A, शयनं त्यज् 1 P or मुच्; (*v. t.*) सज्जीकृ 8 U, विरच् 10; उपक्लृप् c. **-upon,** अधि-आ-रुह्. **-ter,** *s.* प्रापकः, लब्धृ *m.*, अर्जकः. **-ting,** *s.* लाभः, अवाप्ति *f.*, अर्जनं, अधिगमः-मनं, आगमः, आसादनं.

Gewgaw, *s.* क्रीडनकं, अल्पमूल्यं द्रव्यं or आभरणं. -*a.* निःसार, बहिरेव मनोहर.

Geyser, *s.* उष्णोदक-निर्झरः-स्रोतस् *n.*

Ghastly, *a.* प्रेत-शव-तुल्य, विवर्ण, शवसरूप-सवर्ण. 2 कराल, विकट, भीम, उग्र, दारुण, भयानक, भीमदर्शन, करालवदन, घोराकृति. **-ness,** *s.* प्रेतसारूप्यं, वैवर्ण्यं; विकटत्वं, दारुणत्वं.

Ghee, *s.* घृतं, आज्यं, हविस् *n.*, सर्पिस् *n.*, तनूनपं.

Ghost, *s.* भूतः, पिशाचः, वेतालः, निशाचरः, प्रेतनरः. 2 आत्मन् *m.*: 'give up the g.' मृ 6 A; *See* **Die.** **-like,** *a.* प्रेत-भूत-सरूप, प्रेततुल्य. **-ly,** *a.* भूतविषयक-संबंधिन्. 2 पारत्रिक (की *f.*). आत्मविषय, पारमार्थिक (की *f.*).

Giant, *s.* महापुरुषः, विकटविग्रहः, बृहच्छरीरः, भीमविग्रहः, बृहत्कायः, अतिशक्त्युपेतः, राक्षसः. 2 दैत्यः, दानवः; *See* **Demon.** **-a., -like,** *a.* अतिस्थूल, प्रकांडदेह, स्थूलप्रमाण, अतिमहत्, बृहत्काय, महाशरीर, विकट. **-ess,** *s.* राक्षसी, बृहच्छरीरा. **-Gigantic,** *a.* अतिमानुष (षी *f.*), राक्षसपरिमाण, भीमविग्रह, अतिमहत्-बृहत्, स्थूलकाय, विकट.

Gibber, *v. i.* *See* **Babble.** **-ish,** *s.* असंबद्धवचनं, प्रलापः, प्रजल्पितं, मृषार्थक वाक्य. -*a.* मृषार्थकं, अनर्थकं.

Gibbet, *s.* वध्यकाष्ठं-शिला, वध-घात-स्थानं. -*v. t.* वधं आदिश् 6 P, उद्-बंध् 9 P.

Gibbous, *a.* न्युब्ज, वक्र, आभोगवत्, बिंबाकार.

Gibe, *See* **Abuse.**

Giddy, *a.* भ्रमिन्, भ्रमरोगिन्, विभ्रांत, भ्रमणशील; better ex. by भ्रम् 1, 4 P. 2 भ्रमकारिन्, मत्त, उन्मादिन्. 3 (Fig.) चपल, चंचल, लोल, अस्थिर; *See* **Fickle.** 4 उद्धत, उन्मत्त, उत्सिक्त, गर्वित. **-ly,** *adv.* अविचार्य, लौल्यात्, चापल्येन. **-ness,** *s.* भ्र(भ्रा)मरं, भ्रमः-मि *f.*, घूर्णनं, घूर्णि *f.* 2 चापल्यं, लौल्यं, अस्थैर्यं, &c.

Gift, *See* under **Give.**

Gig, *s.* भ्रमरं. 2 लघुयानं-रथः. 3 क्षुद्र-लघु-नौका.

Giggle, *v. i.* मूर्खवत् हस् 1 P.

Gild, *v. t.* स्वर्णेन रंज् c., हेमरसेन-द्रवेण लिप् 6 P, सुवर्णयति (D.); बाह्यतेजसा रंज् c. 2 प्रकाश् c., विद्युत् c., विराज् c. **-ing,** *s.* स्वर्णरंजनं, स्वर्णच्छदः. **-ed, -Gilt,** *a.* सुवर्णित, हेमरसखचित, स्वर्णमंडित, स्वर्णप्रतिबद्ध. 2 रंजित, विराजित.

Gill, *s.* श्वासेंद्रियं, अधोगंडः.

Gimcrack, *s.* क्रीडनकं, क्रीडावस्तु *n.*

Gimlet, *s.* वेधनिका, आस्फोटनी.

Gin, *s.* **Liquor,** q. v. 2 पाशः, उन्माथः, कूटयंत्रं, बंधनं, वागुरा.

Ginger, *s.* आर्द्रकं, शृंगवेरं, गुल्ममूलं; 'dry g.' शुंठि-ठी *f.*, विश्वं-श्वा *f.*, नागरं, विश्वभेषजं, महौषधं; 'g. beer or wine' आर्द्रकासवं, आर्द्रकमद्यं-पानं; 'g.-bread' आर्द्रकापिष्ट

Gingerly, *adv.* असहसा, सावधानं, शनैः.

Gingle, *See* **Jingle.**

Gipsy, *s.* याक्षिणी, विप्रश्निका, ईक्षणिका.

Giraffe, *s.* चित्रोष्ट्रः.

Gird, *v. t.* परि-अधि-वेष्ट् c., परि-वृ 5 U or c. 2 आ-बंध् 9 P, परि-धा 3 U, सं-पि-नह् 4 P; 'g. round the body' शरीरं प्रावृ or आ-च्छद् 10. परि-बंध् or परि-धा; 'g. up one's loins' परिकरं बंधः 'girt by the (golden) lightning, as by a yellow garb' विद्युत्प्रभारचितपीतपटोत्तरीयः (Mr. 5). **-s.** *See* **Cramp. -ed, -Girt,** *a.* बद्ध, आनद्ध, परिवेष्टित, परिवृत; वलय-मेखला-रसना in comp.; 'sea-g. earth' समुद्ररसना-उदधिवलया-पृथ्वी.

Girdle, *s.* मेखला, रश(स)ना, कांचि-ची *f.*, सप्तकी, सारसनं (of women); कटिसूत्रं, कटिवलयं, कक्ष्या-क्षा, परिकरः, कटिबंधनी, शृंखलः-ला-लं (of men). 2 वेष्टनं, परि-आ-वेष्टनं, मंडलं, वलयः-यं, चक्रवालं., 3 राशिचक्रं. **-***v. t.* परि-वेष्ट् c., परि-वृ 5 U, मेखलया बंध् 9 P, *See* **Gird.**

Girl, *s.* कन्या, बाला, बालिका, कुमारी, दारिका, वासूः, *See* **Daughter** also; one born from a g.' कानीनः, कन्यकाजातः. **-hood,** *s.* बालभावः, बाल्यं, कुमारीत्वं. **-ish,** *s.* कन्यानुरूप, बालेय.

Girth, *s.* वरत्रा, नध्री, वध्री; दू(चू)ष्या, कक्षा-क्ष्या.

Gist, *s.* फलितार्थः, निष्कर्षः, भावः, फलितं, परमार्थः, पिंडितार्थः.

Give, *v. t.* दा 1 P, 3 U, ऋ c. (अर्पयति), प्रतिपद् c., दद् 1 A, विश्रण् 10, उत्-वि-सृज् 6 P, (with dat. of person); निक्षिप् 6 P, संक्रम् c. (with loc.); त्यज् 1 P, दिश् 6 P. 2 (Produce) ex by भू 1 P, संपद् 4 A, जन् 4 A; '3 repeated 2 times g. s 6' द्विरावृत्तास्त्रयः षड् भवंति-संपद्यंते 'g. chase' अनुसृ-अनुधाव् 1 P; 'g. ear' अव-धा 3 U, कर्णं दा, श्रु 5 P; 'g. ground' अपक्रम् 1 U, 4 P; अपसृ, परा-नि-वृत् 1 A; त्यक्त्वा गम् 1 P; 'g. one's self up to' सेव् 1 A, भज् 1 A; आसंज् pass., आसक्त-निरत-निविष्ट-*a.* भू, (with loc.): 'g. offence' अपराध् 4, 5 P, विप्रियं-प्रतिकूलं-कृ 8 U or आचर् 1 P; 'g. utterance' उदीर् 10, उच्चर् c., उदाहृ 1 P. **-away,** (in marriage) प्रतिपद् c., उत्सृज्, प्र-दा. 2 विश्रण्, दानेन क्षै c. (क्षपयति). **-back,** प्रतिदा, प्रति-ऋ c., निर्यत् 10. **-forth,** प्रथ् 10, प्रकाश् c., निवेद् c., ख्या c. (ख्यापयति). **-in,** अनुमन् 4 A, अनुसृ 1 A: स्वाग्रहं त्यज्. **-off,** **Abandon,** q. v. **-out,** निविद् c., प्रकाश् c., घुष् 10, प्रथ् 10, प्र-ख्या c. 2 मुच् 6 P, विमृज्, उद्वम् 1 P उद्-गॄ 6 P, निःसृ c. **-over,** त्यज्, उत्सृज्, निवृत् 1 A, विरम् 1 P, (with abl.). 2 असाध्य *a.* इति मत्वा त्यज्; आशां त्यज्; (*v. i.*) शम् 4 P, पत् 1 P; 'when the winds g. over' शांते पवने. **-up,** त्यज्, हा 3 P, उत्-वि-सृज्. 2 निवृत्, विरम्; 'g. up for lost' नष्टप्राय *a.* मन् 4 A. **-way,** शम् 4 P, निवृत्, विरम्, शिथिलीभू. 2 भंज् pass., अवसद् 1 P; 'the cord gave way' रज्जुर्भग्ना; 'the wall gave way' भित्तिरवसन्ना. 3 अव(प)सृ, अप-इ, मार्गं दा or त्यज्, अपक्रम्, अप-या. 4 वशं गम्-इ-या, अधीन-वश-आयत्त *a.* भू; 'do not g. way to grief' शुचो वशं मा गमः, शोकाधीनो मा भूः, वैक्लव्यं मावलंबस्व. **-er,** *s.* दातृ *m.*, त्यागिन् *m.*; gen. ex. by दायक, द, प्रद, दायिन्, in comp.; 'g. of milk' पयोदायिनी; दुग्धप्रदा, &c. **-ing,** *s.* दानं, विसर्जनं, उत्सर्गः, त्यागः, वितरणं, अर्पणं, प्रतिपादनं, विश्राणनं. **-Gift,** *s.* दानं, प्रतिपादनं; *See* above. 2 दानं, उपहारः, उपायनं, उपदा, प्रीतिदानं, प्राभृतं, प्रदेशनं, उपग्राह्यं; 'one deserving a g.' दक्षिणीय, दक्षिणार्ह, दक्षिण्य; 'marriage-g.' यौतकं, सुदायः. 3 गुणः, शक्ति *f.* **-ed,** *a.* उपेत, सं-उप-पन्न, विशिष्ट, युक्त, अन्वित, शालिन् in comp. 2 गुणोपेत, गुणसंपन्न, गुणिन्, गुणवत्.

Glacial, *a.* हिमरूप, हैम (मी *f.*), हिम.

Glacier, s. हिमानी, हिमसंहति *f.*

Glacis, *s.* प्रवण निम्न-भूमि *f.*

Glad, *a.* प्र-,सं-,हृष्ट, आनंदित, प्रीत, सानंद, प्रमुदित, तृप्त, सोल्लास, उल्लसित, प्रसन्न. 2 हर्षजनक, हर्ष-आनंद-कर (री *f.*); नंदक, रमणीय, प्रमोदिन्; 'I am g.' हंत, दिष्ट्या. **-den,** *v. t.* आ-नंद् c., प्री 9 P, 10: *See* **Delight. -dening,** *a.* हर्षद, प्रीतिप्रद, हर्षकर, प्रमोदिन्. **-ly,** *adv.* सहर्षं, सानंदं, सप्रमोदं, हृष्टमनसा, संतोषेण, प्रीत्या, साह्लादं. **-ness,** *s.* हर्षः, प्रमोदः, आह्लादः, संतोषः, प्रीति *f.*, उल्लासः, चित्तप्रसादः, तुष्टि *f.* **-some,** *See* (*a.*).

Glade, *s.* वन-गुल्मः-पथः-मार्गः, तरुगहनमार्गः.

Gladiator, *s.* असिक्रीडकः, आसिकः, मल्लः. **-Gladiature,** असिक्रीडा-युद्धं.

Glair, *s.* अंडशुक्लं.

Glamour, *a.* *See* 'Enchantment.'

Glance, *s.* दृष्टिपातः, ईक्षणं, वीक्षितं, नयनपातः-विक्षेपः, दृक्पातः, आलोकितं; 'side-long g.' नयनोपांतविलोकितं; साचिविलोकितं, अपांग-दर्शनं-दृष्टि *f.*, कटाक्षः; 'at the very first g.' सकृद्दृष्टिपातेन, प्रथममेव; 'good at the first g.' आपाततो रमणीय, आपातरमणीय. 2 अर्धवीक्षणं.

ईषद्दृष्टिः. 3 स्फुरितं, स्फुरणं, द्युति *f.* –*v. i.* दृष्टिं क्षिप् 6 P, चक्षुः-दृष्टिं *f.*-दा 3 U or पत् c. (with loc.); ' g.-ing at the antelope' कृष्णसारे ददच्चक्षुः (S. 1). 2 लघु निर्घृष् 1 P, लघु हत्वा अति-इ 2 P. 3 (जवेन) परिस्फुर् 6 P or विलस् 1 P. **–ingly,** *adv.* लघु, ईषत्, अल्पमात्रं, स्तोकं. 2 दृक्पातेन, तिर्यक्, साचि, कटाक्षेण.

Gland, *s.* अधिमांसं, मांसपिंडः, पिंडः.

Glanders, *s.* क्षयथुः.

Glare, *s.* तेजस् *n.*, दीप्ति *f.*, द्युति *f.*, प्रखर-अति-तेजः, अतिप्रभा-द्युतिः-दीप्तिः, नेत्रप्रतिघातिनी प्रभा. 2 उग्रदृष्टि *f.*, क्रोधदृष्टिः. –*v. i.* संदीप् 4 A, प्रद्युत् 1 A, उज्ज्वल् 1 P, अतितेजसा स्फुर् 6 P or दृष्टिं प्रतिहन् 2 P or संतप् c.; दीप् freq. (देदीप्यते). 2 उग्रदृष्टिं पत् c., कोपेन दृश् 1 P or ईक्ष् 1 A. **–ing,** *a.* संदीप्त, उज्ज्वल, अतिभास्वत्, देदीप्यमान. 2 सुस्पष्ट, सुप्रकाश, प्रत्यक्ष, पुरःस्फुरत्. **–ingly,** *adv.* सुस्पष्टं, सुप्रकाशं.

Glass, *s.* काचः, स्फटिकः, क्षारः. 2 (Cup) चषकः-कं, काचपात्रं-भाजनं. 3 आदर्शः, दर्पणः, मुकुरः. –*a.* काचमय (यी *f.*), काचनिर्मित, काच in comp.; ' g.-blower ' काचध्मकः; 'g.-grinder' काचपरिष्कारकः; ' g. house, ' काचनिर्माणशाला-स्थानं; ' g.-man ' काचविक्रयिन् *m.*; ' g.-work ' काचनिर्माणं-कर्मन् *n.* **–like,** *a.* काचोपम, काचतुल्य. **–y,** *a.* स्फटिकोपम, काचवत्स्वच्छ, काचाविमल, स्फटिकप्रभ, स्फाटिक (की *f.*), सुप्रसन्न. 2 श्लक्ष्ण, स्निग्ध. **–Glaze,** *v. t.* काचयति (D.), काचेन आच्छद् 10. 2 श्लक्ष्णीकृ 8 U, स्निग्धीकृ, श्लक्ष्णयति (D.), –*s.* स्निग्धता, श्लक्ष्णता, **–Glazier,** *a* काचसंधातृ *m.*, काचबंधकः.

Glaucous, *a.* घनश्याम, मेघनील, समुद्रवर्ण.

Glaze, *v. t.* *See* under **Glass.**

Gleam, *v. i.* परि-,स्फुर् 6 P, विलस् 1 P, क्षणमात्रं प्रकाश् 1 A or उज्ज्वल् 1 P; *See* **Shine** also. –*s.* प्रभा, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं. 2 स्फुरणं, स्फुरितं, क्षणप्रभा-कांतिः, अचिरप्रभा, क्षणज्योतिस् *n.* 3 रश्मिः, करः, किरणः, अंशुः; ' not a g. of hope ' न आशालवोऽपि. **–y,** *a.* क्षण-अचिर-प्रभ, चलद्युति, कंपितप्रभ; क्षणद्योतिन्.

Glean, *v. t.* (bits &c.) उंछ् 6 P, शिल् 6 P, उद्-ग्रस् 9 P or c., अवशेषं चि 5 U or संग्रह् 9 P. 2 संकल् 10 संग्रह्, उद्धृ 1 P. –*s.* धान्यशेषः, शेषधान्यसंचयः. **–er,** *s.* उंछशीलः-वृत्तिः, उंछनकृत् *m.* 2 संग्रहीतृ *m.* **–ing,** *s.* उंछः, शिलं, उंछशिलं, ऋतं. 2 संग्रहः, संकलनं, उद्धारः.

Glebe, *s.* मृद् *f.*, मृत्तिका; स्थलं-ली; भूमि *f.*

Glee, *See* **Delight.**

Gleet, *s.* इक्षु-मधु-मेहः, मेहविकारः.

Glen, *s.* दरी; कंदरः-रा; अद्रिद्रोणी, उपत्यका.

Glib, *a.* वाक्चपल, त्वरित-द्रुत-वाच्; चपल, लोल. 2 पिच्छिल, मसृण, स्निग्ध, श्लक्ष्ण, चिक्कण. –*v. t.* **Castrate,** q. v. 2 श्लक्ष्णीकृ 8 U. **–ly,** *adv.* चपलतया, वाक्चापल्येन. 2 श्लक्ष्णं. **–ness,** *s.* वाक्चापल्यं, चापल्यं. 2 श्लक्ष्णता, मसृणता.

Glide, *v. t.* सृप् 1 P, सं-नि-प्र°, प्र-वि-सृ 1 P; मंदं इ-या 2 P or गम् 1 P, शनैः प्रसृ or चल् 1 P; अलक्षितं-निभृतं गम् or या or अति-इ; *See* **Steal.** 2 वह् 1 P, स्रु 1 P; स्यंद् 1 A, री 4 A. **–ing,** *s.* संसर्पः-र्पणं, स्रवणं, निस्यंदः-दनं.

Glimmer, *v. i.* मंदं मंदं ज्वल् 1 P or दीप् 4 A; मंदप्रभया-अचिरप्रभया प्रकाश् 1 A or द्युत् 1 A or स्फुर् 6 P. –*s.*, **Glim,** *s.* मंदप्रभा-तेजस् *n.*, मंद-अचिर-द्युति *f.*, -दीप्ति *f.*, स्फुरणं, स्फुरितं. **–ing,** *a.* मंदप्रभ-द्युति-तेजस्, ईषत्स्फुरित, पांडुद्युति-किरण, मंदच्छाय. 2 मंद, असुप्रकाश, अव्यक्त, अस्पष्ट.

Glimpse, *s.* क्षण-मुहुर्त-दर्शनं; ईषद्दृष्टि *f.*, अर्धवीक्षणं, अल्पो दृक्पातः. 2 क्षण-अचिर-प्रभा; *See* **Gleam.**

Glint, *v. i.* प्रकाश् 1 A. –*v. t.* द्युत् c.

Glisten, Glister, *v. i.* स्फुर् 6 P, प्रकाश् 1 A, द्युत् 1 A. **–ing,** *a.* मसृण, चिक्कण, श्लक्ष्ण, स्निग्ध.

Glitter, *v. i.* द्युत्-प्रकाश् 1 A; भास् 1 A, भा 2 P; स्फुर् 6 P; *See* **Shine.** –*s.* दीप्ति-द्युति-रुचि-कांति-*f.*, प्रभा, तेजस् *n.*; ज्योतिस् *n.*, वर्चस् *n.*, आभा. **–ing,** *a.* प्रभावत्, उज्ज्वल, भासमान, विद्योतिन्, भासुर.

Gloaming, *s.* संध्या; संध्यासमयः.

Gloat, *v. i.* संतृप् 4 P, संतुष् 4 P; आत्मानं संतृप् c. or संतुष् c., लोभाद् निरीक्ष् 1 A or निर्वर्ण् 10.

Globe, *s.* गोलः-लं; वर्तुलः-लं; मंडलं; चक्रं. 2 भूमंडलं, भूगोलः, क्षितिमंडलं-तलं. **–Globate,** **–Globular,** *a.* वर्तुल, गोलाकार, गोलाकृति, वृत्त, निस्तल, मंडलाकार, गोल. **–ly,** *adv.* मंडलरूपेण, मंडलवत्, गोलाकारेण. **–Globule,** *s.* बिंदुः, लघुगोलः, गोलकः.

Glomerate, *v. t.* मंडलीकृ 8 U, गोलीकृ, पिंडीकृ.

Gloom, *s.* अंधकारः, तमस् *n.*, तमिस्रं-स्रा, तिमिरं, ध्वांतं; अवतमसं, ईषत्तमः (partial g.). 2 निष्प्रभत्वं, विषादः, छाया. –*v. t.* **Darken,** q. v. **–Gloomy,** *a.* सतिमिर, तिमिरावगुंठित. 2 तमोवृत, सांधकार, दुर्दर्शन, मलिनप्रभ, अप्रभ, निष्प्रभ, निरालोक, मलिन. 3 विषण्ण, दीन, अवसन्न, सविषाद, निरानंद, म्लान, खिन्न, उद्विग्न. **–ly** *adv.* निष्प्रभं, सांधकारं. 2 सविषादं, सखेदं, सोद्वेगं. **–ness,** *s.* निष्प्रभत्वं, &c. 2 विषादः, दौर्मनस्यं, अवसादः, चित्तोद्वेगः, खेदः, म्लानता. 3 उद्वेगः.

Glory, *s.* कीर्ति *f.*, यशस् *n.*, ख्याति *f.*, विश्रुति *f.* महिमन् *m.*, प्रतापः, ओजस्विता. 2 श्रीः, तेजस् *n.* शोभा, द्युति *f.*: 'g. of youth' यौवनश्रीः. 3 माहात्म्यं, गौरवं, प्रतिष्ठा, पूजा, मानः. 4 प्रशंसा, स्तुति *f.*, श्लाघा, स्तवः, स्तुतिवाक्यं 5 रत्नं, अवतंसः, तिलकः, ललामं. 6 Absolution, q. v.; 'vain g.' अहंकारः, विकत्थनं-ना, दर्पः, गर्वः, आत्मश्लाघा; 'g. to you, Oh king' जयतु जयतु देवः; 'g. of victory' जयोदाहरणं. **-***v. i.* अत्यंतं प्रमुद् 1 A or आनंद् 1 P, उल्लस् 1 P; 'you g. in disobeying your father' पितुरवज्ञानं आत्मगौरवं मन्यसे. 2 विकत्थ् 1 A, दृप् 4 P, आत्मानं श्लाघ् 1 A; 'I do g. in that name' तन्नामधारी कृतिनमात्मानं मन्ये खलु. **-Glorify,** *v. t.* उत्-सं-कृत् 10. प्रशंस् 1 P, श्लाघ्, स्तु 2 U; गुणान् वर्ण् 10 or कृत् or प्रकाश् c., कीर्तिं गै 1 P. 2 स्वर्गं आरुह् c., परमपदं प्राप् c. **-ication,** *s.* गुणवर्णनं-ना, प्रशंसा, स्तुतिवादः, गुणकीर्तनं, यशःख्यापनं. **-Glorious,** *a.* यशस्वत्, कीर्तिमत्, महायशस्, प्रथित, विश्रुत, ख्यात, यशस्विन्, उदग्रयशस्. 2 कीर्तिकर-यशस्कर (री *f.*), श्लाघावह, प्रशस्य. 3 तेजस्विन्, महत्, महोज्ज्वल, श्रीमत्; प्रतापवत्, महोदय, अतिशोभन, ओजस्विन्, सुप्रभ, वर्चस्विन्. 4 विशिष्ट, परम, उत्तम, उत्कृष्ट, प्रशस्ततम, श्रेष्ठ. **-ly,** *adv.* सप्रतापं, कीर्तियुक्त, परमं, उत्कृष्टं.

Gloss, *s.* टीका, टिप्पनी, भाष्यं, व्याख्यानं, वृत्ति *f.*, विवरण. 2 बाह्यशोभा-कांति-रुचि *f.*, बहिराभा, कृत्रिमच्छवि *f.*, कल्पितशोभा. **-***v. t.* टीकया व्या-ख्या 2 P or वि-वृ 5 U; भाष्यं लिख् 6 P. 2 बाह्यतः शुभ् c.: स्निग्धी-मसृणी-कृ 8 U: बाह्यशोभां दा 3 U or उत्पद् c. **-y,** *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मसृण. 2 बाह्यप्रभ, बाह्यतः शोभित, आपातरुचिर, बहीरमणीय.

Glossary, *s.* कोशः-षः. शब्दसंग्रहः-कोशः, निघंटुः, अभिधानं, समाम्नायः; पशुसमाम्नायः 'g. of words relating to beasts.' **-ist,** *s.* कोशलेखकः; संकलयितृ *m.*

Glottis, *s.* प्रति-अलि-उप-जिह्वा.

Glove, *s* करच्छदः, हस्तत्राणं-परिधानं, हस्ताच्छादनं.

Glow, *s.* तापः, आतपः, दाहः, उष्मन् *m.*, दीप्ति-द्युति *f.*, तेजस् *n.*, उत्तापः. 2 रक्तता, रक्तिमन् *m.*, रागः, अरुणिमन् *m.* **-***v. i.* दीप् 4 A, प्रकाश् 1 A, ज्वल् 1 P, तप् 1 P, 4 A, दह् pass.; अरुणीभू 1 P, रंज् pass., रक्तीभू; 'g. ing with rage' क्रोधेद्ध, रोषसंतप्त; प्रदीप्तक्रोध; ज्वलन्निव ब्रह्ममयेन तेजसा (K. v. 30) 'as if g. ing with Brahmanic lustre.' **-ing,** *a.* सं-,प्र-, दीप्त, ज्वलित, उत्तप्त, देदीप्यमान, उज्ज्वल, चंड; रक्त अरुण; 'in g. colours' उज्ज्वलरूपेण, हृदयहारितया, हृदयंगम, मनोरम; 'with g. eyes' दीप्ताक्ष *a.* **-ingly,** *adv.* तेजसा, उत्तापेन, चंडं, दीप्त्या. **-worm,** *s.* खद्योतः, ज्योतिरिंगणः, प्रभाकीटः

Glower, *v. t.* सभ्रूभंगं प्रेक्ष् 1 A.

Gloze, *See* **Flatter.**

Glue, *s.* संश्लेषणद्रव्यं, लेपः. **-***v. t.* सं-धा 3 U, संश्लिष् c., संयुज् 7 U, 10. संलग्नीकृ 8 U. **-y,** *a.* श्यान, सांद्र, चिक्कण.

Glum, *a.* प्रतीप-वाम-चक्र-शील.

Glut, *v. t.* भक्ष् 10, ग्रस् 1 A, निगृ 6 P, अतिमात्रं तृप् c., अत्यंतं पूर् 10, सौहित्यं जन् c. (जनयति). **-***s.* अतितृप्ति *f.*, अतिसौहित्यं, निर्वेदः. 2 अतिरेकः, उद्रेकः. अतिबाहुल्यं, प्राचुर्यं.

Glutinate, *v. t.* लेपेन संश्लिष् c. or संयुज् 7 U, 10.

Glutinous, *a.* श्यान, सांद्र, चिक्कण, स्निग्ध, संलग्नशील.

Glutton, s. औदरिकः, उदरंभरिः, घस्मरः, आद्यूनः, कुक्षिंभरिः, अत्याहारिन् *m.*: *See* below. **-ous,-ish,** *a.* औदरिक (की *f.*), अत्याहारिन्, बहुभोजिन्, अत्याहारप्रिय, भक्षक, घस्मर, अद्मर, आद्यून, कुक्षिंभरि, उदरंभरि, गृध्नु, लोलुप-भ, अतिलुब्ध, अतृप्त. **-ously,** *adv.* अत्याहारेण, लोलुपतया. **-y,** *s.* अत्याहारः, घस्मरता, गृध्नुता, जिह्वालौल्यं, अतृप्ति *f.*, औदरिकता.

Gnarl, *v. i.* गर्ज् 1 P.

Gnarled, *a.* ग्रंथिल, ग्रंथि-पर्व-विशिष्ट.

Gnash, *v. t.* (The teeth) दंतैर्दंतान् निष्पीड् 10 or विघट्ट् c. or घृष् 1 P, निष्पिष् 7 P, or सं-दंश् 1 P, क्ष्विड् 1 P. **-ing,** *s.* दंतनिष्पेषः-घर्षणं, क्ष्वेडनं.

Gnat, *s.* मशकः, दंशः, प्राचिका, वनमक्षिका.

Gnaw, *v. t.* दंश् 1 P, चर्व् 1 P or c., अल्पशः भक्ष् 10 or खाद् 1 P; चर्वणेन कृत् 6 P **-ing,** *s.* चर्वणं, दंशनं.

Gnome, *s.* सूक्तिः. 2 भूतः, पिशाचः.

Gnomon, *s.* शंकुः; कीलः-लकः.

Go, *v. i.* गम् 1 P, या-इ 2 P, व्रज् 1 P, चल्-चर् 1 P, पद् 4 A. ऋ 1, 3 P; सृ 1, 3 P; क्रम् 1 U, 4 P; (as water) वह् 1 P, स्रु 1 P, स्यंद् 1 A. 2 (Fare) वृत् 1 A, स्था 1 P; 'how g. es it with her' कस्तस्या वृत्तांतः. 3 (As prospective future) ex. by fut. part., मनः or काम with inf. or desid. forms; *See* **About;** 'g. astray' भ्रम् 1, 4 P; उत्पथं या, सन्मार्गात् च्यु 1 A or भ्रंश् 1 A, 4 P; उत्क्रम्, अति-व्यभि-चर्; 'g. on foot' पद्भ्यां व्रज्; 'g. on horse-back' अश्वेन संचर्; 'as the story g. es' किल,

'g. for nothing' (go to dogs) विफलीभू; 'g. to bed' शय्यां भज्-सेव् 1 A; 'she is far gone in love' दूरगतमन्मथा सा (S. 3), अतिभूमिं गतोस्या अनुरागः; 'g.- between' मध्यस्थः, मध्यपुरुषः; (female g.) शंभली, कुट्टिनी; सुरतदूती; 'g. by' निर्गमः, पलायनं, व्यपदेशः; 'g.-cart' क्रीडाशकटः. **-about.** परिगम्-इ &c. 2 यत् 1 A, उद्यम् 1 A, व्यव-सो 4 P. आरभ् 1 A, उपक्रम् 1 A. 3 अनुष्ठा, वि-धा 3 U, *See* **Execute. -away,** अप-इ-सृ-क्रम्-गम्-या-सृप्, प्र-इ, स्था 1 A. **-between,** मध्ये स्था or वृत्, अंतः-इ. **-by,** अति-इ, समीपतः गम्. 2 अनुगम्, अनुवृत्, अनुरुध् 4 A, अनु-सृ; 'he goes by the name of' इति ख्यातः or ज्ञातः; उमाख्यां सुमुखी जगाम (K. I. 26) 'went by the name of' &c. **-down,** अधो गम्. 2 अस्तं गम्-या; (fig.) नाशं-क्षयं-या; प्र-ली 4 A, ध्वंस् 1 A. **-forth,-forward,** निर्गम्, निःसृ-क्रम्, प्र-सृ, प्र-स्था, प्र-या. **-in,** प्र-आ-विश् 6 P, अंतर्गम्-या. 2 (for) समद् 4 A, उरी-अंगी-कृ 8 U, प्रति-पद् 4 A. **-off,** अपगम् &c. 2 प्र-इ, मृ 6 A; परलोकं या. **-on,** प्र-वृत्, प्रगम्-या-सृप्. 2 प्र-स्तु 2 U, प्रारभ् 1 A; 'g. on with your study' प्रवर्ततां-प्रस्तूयतां-अध्ययनं. **-out,** निर्गम्, निःसृ, &c., बहिर्गम्. 2 (Of light) निर्वा 2 P or c. pass.: शम् 4 P. **-over,** वच् c., अधि-इ 2 A: (to one's self) अनुवच् c. 2 परि-ईक्ष् 1 A. 3 आक्रम्, लंघ् 1 A, 10. 4 अन्यपक्षं सं-आ-श्रि 1 U: स्वपक्षाद् भ्रंश् 1 A, 4 P. **-round,** परि-इ-गम्; प्रदक्षिणीकृ. **-through,** अनुभू, उपागम्, वि-धा, अनु-ष्ठा, कृ, निर्वह् c.; सेव् 1 A, आचर्. 2 पारं गम्, समाप् c.; अव-सो 4 P. 3 प्र-निर्-विश्, निर्भिद् 7 P; भित्त्वा निर्गम्; व्यध् 4 P. **-to, up to,** उप-सृ-इ-गम्-या, उप-स्था, प्रति-पद् &c. 2 (*Interj.*) धिक्, अपेहि, अपसर. **-up,** उद्-इ, उत्पद्, ऊर्ध्वं गम्. **-er,** *s.* गामिन्-गंतृ *m.*, चरः, यायिन् *m.* in comp. **-ing,** *s.* गमनं, यानं, सरणं, चलनं, व्रजनं, गति *f.*, अयनं, &c.

Goad, *s.* अंकुशः, सृ(शृ)णि *f.* **-*v. t.*** अंकुशेन तुद् 6 P or प्रचुद् 10. 2 प्रचुद्, प्रणुद् c., प्रोत्सह् c., प्रेर् c., प्रवृत् c., उद्युज् 10, उत्तिज् c.

Goal, *s.* अंतः, अंतस्थानं, अवधिः, अवसानभूमि *f.*; 'g. of ambition' आशावधिः. 2 आशयः, अभिप्रायः, उद्देशः.

Goat, *s.* अजः, छागः, छगलकः, बस्तः, स्तुभः; 'she-g.' अजा, छागी; 'g.-herd' अजाजीवः, जाबालः, अजपालः-लकः, छागपोषकः; 'a flock of g.s' आजकं. **-ish,** *a.* अजगंध.

Gobbet, *s.* कवलः, ग्रासः.

Gobble, *v. t.* सत्वरं ग्रस् 1 A or भक्ष् 10.

Goblet, *s.* चषकः-कं, पानपात्रं-भाजनं, कंसः-सं.

Goblin, *s.* भूतः, वेतालः, पिशाचः, राक्षसः, निशाचरः, रात्रि(त्रिं)चरः.

God, *s.* देवः, सुरः, अमरः, निर्जरः, विबुधः, सुपर्वन् *m.*, सुमनस् *m.* त्रिदिवेशः, दिवौकस् *m.*, आदितेयः, दिविषद् *m.*, लेखः, अदितिनंदनः, आदित्यः, ऋभुः, अस्वप्नः, अमर्त्यः, अमृतांधस् *m* बर्हिर्मुखः, क्रतुभुज् *m.*, गीर्वाणः, दानवारिः, वृंदारकः, दैवतः-तं; 'great g.' परमेश्वरः, परमात्मन्; *m.* 'god-dess' देवी, भगवती, सुरांगना, देवपत्नी; in comp. words ex. by धर्म; 'g.-father' धर्मपितृ *m*, so धर्ममातृ *f.* धर्मपुत्रः-त्री, धर्मकन्या-सुता, &c **-less,** *a.* निरीश्वर, नास्तिक, अनीश्वरवादिन्. **-lessness,** *s.* मिथ्यादृष्टि *f.*, नास्तिकता. **-like,** *a.* देवतुल्य-रूप, देवोपम, दिव्य. **-ly,** *a.* धार्मिक (की *f.*), धर्मनिष्ठ-परायण, पुण्यशील, पुण्यात्मन्, ईश्वरभक्त-पूजक. **-liness,** *s.* धर्मसेवा, पुण्यशीलता, ईश्वरभक्ति *f.*, श्रद्धा, &c. **-ship,** *s.* देवत्वं, देवभावः. **-Godsend,** *s.* ईश्वरप्रेरित *a.* इव, ईश्वरप्रसादः, सौभाग्यं, लक्ष्मीदत्तं.

Goggle, *v. i.* नयने विक्षिप् 6 P or लुल् c.; 'g eye' लोलनयनं; 'g.-eyed' लोलनयन, वक्र-तिर्यक्-दृष्टि.

Goitre, *s.* गडुः.

Gold, *s.* सुवर्णं, स्वर्णं, कनकं, कांचनं, हेमन् *n.*, चामीकरं, जातरूपं, हिरण्यं, हाटकं, तपनीयं, शातकुंभं, गांगेयं, भर्मन् *n.*, कर्बुरं, महारजतं, रुक्मं, कार्तस्वरं, जांबूनदं, अष्टापदः-दं; 'g. for ornaments' शृंगिः, शृंगिकनकं; 'g.-beater or drawer' सुवर्णोद्वर्तनकृत् *m.*; 'g.-dust' कांचनभूः, कनकरागः; 'g.-smith' स्वर्ण-सुवर्ण-कारः, कलादः, नाडिंधमः, रुक्मकारकः; 'g.-thread' कनकसूत्रं. **-*a.*, -en,** *a.* हैम (मी *f.*), सौवर्ण (र्णी *f.*), (*s.*) in comp., or by मय (यी *f.*) affixed to (*s.*).

Golf, *s.* कंदुकक्रीडा-लीला.

Gong, *s.* घनं, कांस्यं.

Gonorrhœa, *s.* शुक्रदोषः.

Good, *a.* भद्र, साधु, प्रशस्त, प्रशस्य, शुभ, कल्याण (णी *f.*), सत्, वर, शोभन, गुणवत्, निर्दोष; oft. by सु or सत् in comp. 2 धर्मशील, साधु-आर्य-वृत्त, सदाचार, सच्चरित, सुकृतिन्, पुण्य, पुण्यात्मन्, पुण्यशील, धार्मिक (की *f.*). 3 योग्य, उचित, युक्त, उपयुक्त, हित; gen. ex. by pot. pass. part. 4 सुजन, हितकाम; प्रियकारिन्, उपकारक, हित, प्रियकर. 5 अन्यून, अदूषित, अक्षत, संपूर्ण. 6 बहु, प्रचुर, महत्, अनल्प, भूरि, सु or अति pr.; 'a g. fellow' भद्रः, सौम्यः; 'my g. sir,' भद्र, सौम्य; 'g. quality' गुणः, स-

दुणः; 'g. wishes' आशिस् *f.*, आशीर्वादः-वचनं; 'g. and bad' शुभाशुभ; 'so g. as' अनुग्रह-पूर्वकं, कृपया; 'for g.' अत्यंतं, असन्निवृत्त्यै; 'a g. deal' भृशं, अतीव, सु or अति pr.; 'g. morning to you' शुभस्ते प्रभातकालः; 'it will be g. for you' तव कल्याणाय भवेत्, कल्याणभावहेतुः; 'is g. unto weariness' आयासजनकमेव, श्रममात्रदायकं; g. for nothing' निरुपयोग, निर्गुण, निष्फल; 'as g. as' समं. -*s.* उपकारः, उपकृति *f.* 2 हितं, भूति *f.*, भद्रं, शुभं, कल्याणं, कुशलं, श्रेयस् *n.*, क्षेमं; oft. by अर्थ; 'for the g. of the people' प्रजार्थं, लोकहिताय, प्रजाभूतये, &c. 3 उपयोगः, लाभः, फलं; oft. ex. by किं, अर्थ, अलं, with inst.; 'what is the g. of seeing her' किं तया दृष्ट्वा (S. 2), कोऽर्थस्तस्या दर्शनेन; 'what g. do you get by weeping' अलं परिदेवनेन. 4 सुकृतं, पुण्यं, धर्मः, सुचरितं, साधुवृत्तं, सदाचारः; 'to do g.' उपकृ 8 U; हितं-कल्याणं-कृ; क्षेमं आवह् 1 P; 'g. and evil (bad)' शुभाशुभं, हिताहितं. -*interj.* साधु, सुष्ठु, सम्यक्, बाढं, कामं, भवतु, तथास्तु, तथेति; युज्यते, अनुमतं मम (V. 2). 'G.-breeding' साधुता, सौजन्यं, विनयः, सभ्यता, 'possessed of g.-breeding' सुशील, सुविनीत, सुजन, अभिजात; 'g.-conditioned' सुस्थ, सुस्थित; 'g. fortune or luck' *See* **Fortune**; 'g.-humour' सद्भावः, उल्लासः, चित्तप्रसादः, उल्लासवृत्ति *f.*, आनंदः, प्रमोदः; 'g.-nature' सद्भावः, सुस्वभावः, सौजन्यं, सुशीलता; सुप्रकृति *f.*; 'g.-humoured or g.-natured' हृष्टचित्त, प्रसन्नचित्त, सोल्लास, सानंद, सुस्वभाव, सुशील, सुप्रकृति, सुजन, सद्भाववत्, साधुशील, धर्मात्मन्, पुण्यात्मन्, सुहृदय; 'g.-looking' दर्शनीय, सुरूप, सुदर्शन, सुभग, प्रियदर्शन, प्रेक्षणीय, रम्याकार, सुवदन; 'g.-manners' विनयः, विनीतता, मर्यादा, सुनीति-रीति *f.*; सभ्यता, शिष्टाचारः, सुशीलता, सौजन्यं, सु-सत्-चरित्रं, सदाचारः, साधुवृत्तं; 'g.-sense' विवेकः, ज्ञानं, प्रज्ञता, प्रबुद्धता, प्रबोधः. सौजन्यं, सद्भावः, सुशीलता; 'g.-will' हितेच्छा, हितकाम्या, प्रीति *f.*, प्रियता, अनुकूलता, भक्ति *f.*, अनुरागः. -**ly**, *a.* चारु, सुंदर (री *f.*), सुरूप, सुदृश्य, प्रेक्षणीय, लावण्यवत्, रम्य, रमणीय, मनोरम-हर, रुचिर. 2 अनल्प, महत्, प्रचुर, बहु, अल्पेतर. -**ness**, *s.* साधुता, प्रशस्तता, गुणवत्ता, श्रेष्ठता, विशिष्टता. 2 साधुशीलता, सदाचारता, धार्मिकत्वं. 3 सुशीलता, दया, कृपालुत्वं, सद्भावः, सौजन्यं, सुजनता; 'tendency to g.' सत्वगुणः.

Goods, *s.* द्रव्यं, द्रव्यराशिः, विभवः, सामग्री, वस्तुजातं, द्रव्याणि-वस्तूनि (pl.). 2 भांडकं, भांडसमुदायः, पण्यं, भांडानि (pl.); 'household g.' गृहोपस्करः, गृहोपकरणानि.

Goose, *s.* हंसः (सी *f.*), चक्रांगः (गी *f.*), वरटः-टा; कलहंसः (सी *f.*); *See* **Gander**; 'ruddy g.' चक्रवाकः (की *f.*), चक्रः रथांगः, कोकः, द्वंद्वचरः. 2 **Fool**, q. v.

Gorbellied, *a.* महोदर, बृहत्कुक्षि, तुंदिन्, स्थूलोदर; *See* **Corpulent.**

Gore, *s.* रक्तं, शोणितं, रुधिरं, असृज् *n.*, लोहितं. 2 रक्तगुल्मः, रक्तपिंडः. 3 संधितवस्त्रखंडः. -*v. t.* व्यध् 4 P, निर्भिद् 7 P, छिद् 7 P, वि-दृ 10, क्षण् 5 P, उल्लिख् 6 P. -**ed**, *a.* छिन्नत्वच्, क्षतचर्मन्. -**y**, *a.* रक्ताक्त, असृग्दिग्ध. 2 रुधिरप्रिय, मारात्मक.

Gorge, *s.* कंठः, गलः. 2 रंध्रं, दुर्गमार्गः, संकटसंबाध-पथः, संचारः, संकटं, गिरिकंदरः. -*v. t.* उद्-ग्रस् 1 A, गृ 6 P. 2 (One's self) कुक्षिं पूर् 10, अत्यंतं तृप् c., अन्नादिना परिपॄ 3 P.

Gorgeous, *a.* शोभन, उज्ज्वल, अतिशोभन, विभ्राजमान, तेजस्विन्, सुप्रभ, एकांतरमणीय-चारु, महाप्रभ-दीप्ति, विचित्र. -**ly**, *adv.* अतितेजसा, उज्ज्वलं. -**ness**, *s.* औज्ज्वल्यं, अति-प्रभा-तेजस् *n.*, सुप्रभा.

Gorget, *s.* ग्रीवा-गल-त्राणं.

Gormand, *See* **Glutton.** -**ize**, *v. i.* अत्याहारं or अतिभोजनं कृ 8 U. -**izer**, *s.* *See* **Glutton.**

Gosling, *s.* हंसशिशुः-शावकः.

Gospel, *s.* सुवार्ता, शुभवार्ता.

Gossamer, *s.* ऊर्णनाभजालतंतु *m.*

Gossip, *s.* वावदूकः, प्रलापिन् *m.*, जल्पकः. 2 पानमित्रं, सहपायिन् *m.* 3 वार्ता, जनप्रवादः, जल्पः, जल्पितं, प्रलापः, प्रजल्पः, वृथाकथासंलापः. -*v. i.* प्रजल्प् 1 P, प्रलप् 1 P.

Gouge, *v. t.* (नयनं) उत्पट् 10, उद्धृ 1 P.

Gourd, *s.* अ(आ)लाबु-बू *f.*, तुंबि-बी *f.*, लाबु-बू *f.*, तुंबा. 2 (Vessel of g.) कमंडलुः; 'bitter g.' इक्ष्वाकु *f.*, कटुतुंबी.

Gourmand, *See* **Gormand.**

Gourmet. *s.* आस्वादपरायणः.

Gout, *s.* वातरक्तं, वातशोणितं. -**y**. *a.* वातग्रस्त, वातरोगोपहत, वातरोगिन्, वातकिन्.

Govern, *v. t.* प्र-शास् 2 P, परि-पा c. (पालयति), ईश् 2 A (with gen.); गुप् 1 P, तंत्र् 10 A, नियम् 1 P; *See* **Rule.** 2 वि-धा 3 U, वि-नी 1 P, निग्रह् 9 P, सं-नि-यम्, आ-वृ 5 U, वशीकृ 8 U, दम् c. (दमयति), सं-हृ 1 P, नि-यंत्र् 10; *See* **Control.** 3 (In grammar) अनु-इ 2 P, वि-धा; 'g.-ed by another' परायत्त, पराधीन, परतंत्र, विधेय. -**ment**, *s.* नियमनं, सं-नि-यमः, निग्रहः. 2 शासनं, परिपालनं; 'during the g. of Rama' रामे महीं शासति. 3 प्रभुत्वं,

Hurl, *v. t.* (तरसा-सावेगं) क्षिप् 6 P, वि-सृज्-मुच् 6 P, प्रास् 4 U, ईर् c., प्रेष् c., प्रहृ 1 P; 'h. down' नि-अव-पत् c., अव-भ्रंश् c., अधःक्षिप्. **-*s.*** क्षेपः-पणं, पातनं. 2 तुमुलं, कोलाहलः. **-ing,** *s.* क्षेपणं; 'h. of stones' शिलावर्षः-आसारः.

Hurly-burly, *s.* तुमुलं, कोलाहलः, तुमुलरवः. कलकलः.

Hurrah, *interj.* जय or हर्ष-निस्वनः-शब्दः-नादः.

Hurricane, *s.* प्रकंपनः, महावातः, अतिवातः, वा-प्रभंजनः, वात्या, प्रचंडवातः, वेगानिलः, जवानिलः, झंझावातः (with showers).

Hurry, *v. i.* त्वर् 1 A, शीघ्रं गम् 1 P, ससंभ्रमं गम्. **-*v. t.*** त्वर् c. (त्वरयति). 2 सत्वरं आकृष् 1 P or प्रणुद् 6 P, or प्रेर् c.; शीघ्रं सं-निः-पद् c. or वि-धा 3 U or साध् 5 P. **-*s.*** त्वरा, संभ्रमः, रभस् *n.*, रभसः, व्यग्रता, वेगः, आकुलत्वं, आ-सं-वेगः, त्वरितगति *f.*; 'why are you in such a h.' किमसि

संभ्रांतेव (U. 3); 'in a h.' संभ्रांत, व्याकुल, व्यग्र. -ed, *a*. त्वरित, शीघ्र; 'a h. speech' निरस्तं वचः, त्वरितोदितं. -edly, *adv*. शीघ्रं, त्वरितं, सत्वरं, ससंभ्रमं, सरभसं, व्यग्रं.

Hurt, *v. t.* क्षि 5 P, तुद् 6 P, हिंस् 7 P, अर्द् 1 P or c., बाध् 1 A, व्यथ् c. (व्यथयति), द्रुह् 4 P, क्षण् 8 P, पीड् 10, अपकृ 8 U, विप्रकृ, दु 5 P; 'does not h. one's reputation' यशः न क्षिणोति (R. II. 40). -s क्षतं, हिंसा, अपकारः, अपकृति *f*., बाधा, पीडा, व्यथा. 2 अपायः, क्षयः, हानि *f*., नाशः. -ful, *a*. पीडाकर (री *f*.), अपायावह, हिंसात्मक, बाधक, अपकारिन्, अहित-हानि-क्षति-कर. 2 हिंस्र, घातुक, शरारु. -fully, *adv*. हिंसापूर्वं, सापकारं. -less, *a*. अक्षत. 2 अहिंस्र, अनपकारिन्, अनुपद्रविन्.

Hurtle, *v. i.* संघट्ट् 1 A, अभिसंपत् 1 P. 2 सरभसं निष्क्रम् 1 U, 4 P or निर्गम् 1 P. 3 Echo, q. v.

Husband, *s.* पतिः, भर्तृ, उपयंतृ, परिणेतृ, परिग्रहीतृ, विवोढृ; कांतः, दयितः, धवः, नाथः, स्वामिन्; इष्टः, प्रियतमः, प्राणेशः, हृदयेशः, all *m*. (poetical words) ; 'h. and wife' दं(जं)पती; जायापती, भार्यापती; 'h.'s brother' देवरः, देवृ *m*., देवलः; 'a second h' दिधिषुः; 'h.'s sister' ननांदृ; 'h.'s brother's wife' यातृ ; 'sister's h.' श्यालः, श्यालकः, आवुत्तः, भगिनीपतिः. -*v. t.* परिमितं व्यय् 10 (व्यययति), न विक्षिप् 6 P, परिमितव्ययं कृ 8 U. 2 कृष् 1 P, 6 U. -less, *a*. विधवा, अनाथा, पतिहीना, गतभर्तृका, निर्नाथा. -ry, *s*. कृषि *f*., कृषिकर्मन् *n*., कर्षणं, कृषिविद्या, वैश्यवृत्ति *f*., हलभृति *f*. 2 परिमितव्ययः, गृहकर्मनिर्वाहविद्या. -Husbandman, *s*. कृष(षि)कः, कर्षकः, कृषीवलः, क्षेत्रिकः, हालिकः; *See* Farmer. 2 वैश्यः, विश् *m*. ऊरुजः, ऊरव्यः, अर्यः, भूमिस्पृश् *m*.

Hush, *interj*. तूष्णीं भव, शांतं, वाचंयम-निःशब्द-*a*. भव. -*v. i.* शम् 4 P, प्र-उप-शम्, तूष्णीं भू, मौनीभू. -*v. t.* शम् c. (शमयति), निभृतं समा-धा 3 U; *See* **Conceal** also.

Husk, *s*. तुषः, त्वच् *f*., कोशः, पुटः-टं, आवेष्टनं. 2 बुषं-सं, कडंगरः. -*v. t.* निस्तुषयति-निस्त्वचयति (D.), त्वचं हृ 1 P, निस्तुषीकृ 8 U. -ed, *a*. निस्तुष, त्वग्हीन. 2 सतुष, त्वग्युक्त. -y, *a*. सतुष, तुषवत्. 2 रूक्ष, कर्कश; 'in h. tones' रूक्षस्वरेण, बाष्पवृत्तिकलुषं.

Hussar, *s*. *See* **Cavalier.**

Hussy, *s*. बंधकी, पापा, दुष्टा स्त्री.

Hustle, *v. t.* **Drive away,** q. v. 2 संबाध् 1 A, संक्षुभ् c.

Hut, *s*. उटजः-जं, पर्णशाला, कुटीरः, तृणकुटी कायमानं.

Hutch, *s*. कुशू(सू)लः, धान्यकोष्ठः.

Huzza, *s*. जयध्वनिः, हर्षनादः-स्वनः.

Hyaline, *a*. काचमय, काचनिर्मित.

Hybrid, *a*. संकीर्णजाति, संकीर्ण, संकरजात, मिश्रज.

Hydra, *s*. जलव्याल.

Hydraulic, *a*. जल-प्रेरित-चोदित. 2 जलवाहिन्. -s, *s*. चलज्जलविज्ञानं.

Hydrocele, *s*. कोष-मुष्क-वृद्धि *f*., फल or कोष-शोफः.

Hydrocephalus, *s*. मस्तिष्कशोथः, शिरोग्रहः.

Hydrography, *s*. समुद्रवेलादिविवरणं.

Hydromel, *s*. जलसंसृष्टं मधु.

Hydropathy, *s*. जलोपचारः, जलप्रयोगचिकित्सा.

Hydrophobia, *s*. जलसंत्रासः; अलर्काभिभवः, आलर्कं.

Hydropsy, *See* **Dropsy.**

Hyemal, *a*. हैमंत (ती *f*.), शीतकालीन

Hyena, *s*. तरक्षुः-क्षः, तर्क्षुः.

Hygiene, *s*. आरोग्यविद्या.

Hygrometer, *s*. क्लेदमापकः.

Hymen, *s*. विवाहः, उद्वाहः. 2 विवाहाधिष्ठात्री देवता. -cal, *a*. विवाहीय, वैवाहिक-उद्वाहिक (की *f*.).

Hymn, *s*. स्तोत्रं, सूक्तं, गेयं, गानं, गीतं, स्तुतिगीतं; 'a chanter of h.s' उद्गातृ *m*., सुम्नयुः. -*v. t.* गै 1 P, वर्ण् 10, गानद्वारेण स्तु 2 U or प्रशंस् 1 P; 'h.s praises' उपवीणयति (D.).

Hyp *s*. *See* **Dejection.**

Hyperbole, *s*. अतिशयोक्ति *f*., अत्युक्तिः, वागुपचयः, सत्यातिक्रमः. -ic, -ical, *a*. अत्युक्तिपूर्व, सत्यातिक्रामिन्. -ize, *v. t.* अत्युक्त्या वर्ण् 10 or कथ् 10.

Hyperborean, *a*. उत्तर, उदच्, उदीचीन, उत्तरीय.

Hypercritic, *s*. एकांततः गुणदोषनिरूपकः or छिद्रान्वेषिन् *m*., दोषैकदृश् *m*.

Hypnotic, *a*. सुषुप्तिजनक.

Hypochondria, *s*. पित्तोन्मादः, वायुकोपः. 2 विषादः, उद्वेगः, अवसादः. -cal, *a*. पित्तोन्मादिन्, विषण्ण.

Hypocrite, *s*. दांभिकः, दंभिन् *m*., कपटिन् *m*., कापटिकः, कुहक-वृत्तिः, छद्म-कपट-वेशिन् *m*., 'a religious h.' धर्मध्वजिन् *m*. लिंगवृत्तिः, बकवृत्तिः-व्रतः, आर्य-रूपः-लिंगिन् *m*., छद्मतापसः. वैडालव्रतः. -ical, *a*. दंभिन्, कपटिन्, छाद्मिक-कापटिक-दांभिक (की *f*.), छद्म-कपट- in comp.; 'a h. sage' छद्मतापसः, कपटव्रतिन् *m*. मुनिवेषधारिन् *m*. -ically, *adv*. सदंभं, सकपटं, सव्याजं; दांभिकवत्, छद्मना. -Hypocrisy, *s*. दंभः, दांभिकता, कपटधर्म

धर्मोपधा, वकव्रतं, धर्मध्वजमानं, लिंगवृत्ति *f.*, कुहकवृत्तिः, छाद्मिकत्वं, कापट्यं, सव्याजता, आर्यरूपता.

Hypodermic, *a.* त्वगंतर्गत.

Hypotenuse, *s.* कर्णः, श्रुति *f.*

Hypothecate, *v. t.* आधिं गृहे गुप् 1 P; 'a h.-ed article' गोप्याधिः.

Hypothesis, *s.* उपन्यासः, प्रतिज्ञा, संकेतः, समयः. **-Hypothetic,-al,** *a.* उपन्यस्त, सांकेतिक (की *f.*), सोपन्यास, कल्पित. **-ally,** *adv.* सोपन्यासं, ससंकेतं, ससमयं, प्रतिज्ञाक्रमेण.

Hysterics, (**Hysteria,**) *s.* वातोन्मादः; हर्षमूर्च्छा, हर्षमोहः; मोहः, मूर्च्छा. **-Hysteric,-al,** *a.* हर्षमूर्च्छाल, मूर्च्छावत्; मोहोपहत, मूढ, मुग्ध.

I.

I, *pron.* अहं; oft ex. by अयं जनः (referring to persons, of any number or gender).

Ice, *s.* तुषार-हिम-संघातः, हिमसंहति *f.*, संहत-घनीकृत-जलं, हिमं; *See* **Snow** also; 'i.-berg' हिमपर्वतः-राशिः, हिमसंघातः, तुषारराशिः. **-***v. t.* हिमीकृ 8 U, हिमेन शीतीकृ. **-Icy,** 'i.-cold', *a.* हिम, हिम्य, हैम (मी *f.*), तुषारवत्. 2 हिमशिशिर, शीतल; जड, शीत, शिशिर. 3 निरुत्साह, निःस्नेह, वीतराग. **-Icicle,** *s.* हिमकणः-बिंदुः.

Ichneumon, *s.* नकुलः, बभ्रुः, अंगूषः.

Ichor, *s.* पूयरक्तं.

Ichthyography, *s.* मत्स्यवर्णनं. **-Ichthyology,** *s.* मत्स्यशास्त्रं.

Icon, *s.* मूर्ति *f.*, देवताप्रतिमा. **-oclasm,** *s.* प्रतिमाभंगः. **-oclast,** *s.* देवताप्रतिमाभंजकः. **-ography,** *s.* प्रतिमालिखनं. **-ology,** *s.* प्रतिमाविद्या.

Idea, *s.* मति *f.*, बुद्धि *f.* 2 मतं, अभिप्रायः, आशयः, मनोगतं, भावः. 3 कल्पः, संकल्पः, कल्पना, भावना, वासना, बोधः; 'with the i. that' ex. by बुद्ध्या in comp. or इति कृत्वा. **-Ideal,** *a.* मनःकल्पित, मानस (सी *f.*), काल्पनिक-मानसिक (की *f.*), चित्तोद्भावित; मनसिज, मनोभव. **-***s.* मनोरथसृष्टि *f.*; oft ex. by परम; 'i. of beauty' परमलावण्यं. **-ism,** *s.* बाह्यशून्यवादः. **-ly,** *adv.* मनसा, कल्पनया, भावनापूर्वं.

Identical, *a.* तद् (*pron. a.*) with एव, अनन्य, अनन्यरूप, निर्विशेष, अभिन्न, अव्यतिरिक्त, अभिन्नरूप, सम, समान, निरस्तभेद, आत्मन्-रूप in comp.; 'i. with the world' जगदात्मक विश्वरूप; 'becoming i. with Brahman' ब्रह्मसायुज्यं प्राप्तः, ब्रह्मलीनः. **-ly,** *adv.* अभिन्नं, समं, निर्विशेषं. **-Identify,** *v. t.* समीकृ 8 U, तुल्यीकृ, अनन्यीकृ. 2 तदेव इति प्रति-पद् c. or विद् c., or अभि-ज्ञा 9 U, तुल्यत्वेन परिच्छिद् 7 P. **-***v. i.* समीभू. **-ication,** *s.* समीकरणं, एकरूपता, सायुज्यं, अभिज्ञानं, विभावनं; 'i. with Brahman' ब्रह्मसायुज्यं, ब्रह्मभूयं. **-Identity,** *s.* ऐक्यं, साम्यं, संवादः, निर्विशेषता, अभेदः, अनन्यता, तादात्म्यं, सारूप्यं, सरूपता, आत्मता, सायुज्यं; 'i. of thoughts' चित्तैक्यं, एकचित्तता; 'i. of class' सावर्ण्यं, सजातित्वं; 'i. of hand' वर्णसंवादः.

Ideology, *s* मानसशास्त्रं.

Idiom, *s.* वाक्पद्धति-रीति *f.*, वाग्व्यवहारः, वाक्संप्रदायः, विशिष्टस्वरूपं. **-atic,** *a.* Ex. by (*s.*).

Idiosyncrasy, *s.* देहस्वभावः, जातिस्वभावः.

Idiot, *s.* जडः, मूर्खः, अनात्मज्ञः, मूढः, वैधेयः, बालिशः, अज्ञः, निर्बुद्धिः. **-ic,** *a.* जड, मूढ, मूर्ख, हतज्ञान, बुद्धिविकल. **-Idiocy,** *s.* मूढता, मूर्खता, जाड्यं, अज्ञता, बालिशता; *See* **Fool,-ish, Folly.**

Idle, *a.* अलस, कर्म or कार्य-विमुख or पराङ्मुख (खी *f.*), कर्मद्वेषिन्, आलस्यशील, अनुद्योगशील. 2 अव्यापृत, निरुद्योग, निर्व्यवसाय, कर्म or कार्य-शून्य or रहित, निर्व्यापार, निरुद्यम, निश्चेष्ट; उदासीन, निरुत्साह. 3 निरर्थक, निष्प्रयोजन, व्यर्थ, मोघ; 'it were i. to talk of friend or foe in Govinda' गोविंदविषये मित्रामित्रकल्पनं व्याघातः, व्याहतं एव; 'to be i.' उदास् 2 A; 'i. talk' वृथालापः, वृथाकथा. **-***v. t.* (time) उद्वास्, कालं मुधा क्षै c. (क्षपयति) or नी 1 P or अतिवह् c., कालं हृ 1 P or क्षिप् 6 P, कालक्षेपं कृ 8 U, अलस-निर्व्यापार -*a.* भू. **-er,** *s.* निर्व्यापारः, कालक्षेपकः, कार्यमुढः, सुखनिरीक्षकः. **-ness,** *s.* आलस्यं, कार्यद्वेषः, कार्यविमुखता, उदासीनता. 2 अनुद्योगः, अव्यापारः, कार्यशून्यता, कालक्षेपणं. **-Idly,** *adv.* आलस्येन, अलसवत्. 2 निरुद्योगं, निर्व्यापारं. 3 निरर्थकं, व्यर्थं, वृथा, मुधा.

Idol, *s.* (देव-) प्रतिमा-मानं, मूर्ति *f.*, दैवतं, 2 (Fig.) देवता, देवताविग्रहः, प्रतिच्छाति *f.* आराध्यदेवता; 'attendant on an i.' देवलः, देवाजीवः-विन् *m.* **-Idolater,** (**Idolatrous**) *s.* मूर्ति-प्रतिमापूजकः-अर्चकः-उपासकः, देवतार्चकः, प्रतिमासेविन् *m.* **-Idolatry,** *s.* प्रतिमा or मूर्ति-पूजा or अर्चनं, देवतार्चनं, प्रतिमासेवा देवतोपासना, मूर्तिसेवा-उपासनं. **-Idolatrize,** *v. i.* प्रतिमां पूज् 10 or अर्च् 1 P. 10. **-Idolize,** *v. t.* देवतां इव आराध् c.

देववत् पूज्, or भज् 1 U; एकांततः सी-अनुरंज् pass., अत्यंतानुरक्त-*a.* भू, अतिप्रेम कृ 8 U.

Idoneous, *a. See* Fit.

If, *conj.* यदि, चेत् (not at beginning); 'if so' यद्येवं, एवं स्थिते; 'if not' नोचेत्, अन्यथा, यदि न; 'as if' इव.

Igneous, *a.* अग्निमत्, आग्नेय-अग्निमय (यी *f.*).

Ignis-Fatuus, *s.* मिथ्याग्निः, मिथ्यादीप्ति *f.*, दीप्त्याभासः.

Ignite, *v. t.* ज्वल् c., दीप् c., सं-इंध् 7 A, संधुक्ष् 10, दह् 1 P, तप् c. –*v. i.* ज्वल् 1 P, दीप् 4 A, सं-इंध् pass. **-ion,** *s.* दीपनं, ज्वलनं, इंधनं.

Ignoble, *a.* अकुलीन, हीनजाति-वर्ण, नि-अपकृष्ट, नीच, अधम, जघन्य, अनार्य; *See* Base. 2 अकीर्तिकर-लज्जाकर (री *f.*). **-Ignobly,** *adv.* अनार्यवत्, नीच-अधम-वत्.

Ignominy, *s.* Disgrace, q. v. 2 अपकर्षः, अवज्ञा, अपमानः, कलंकः, अप्रतिष्ठा, तिरस्कारः, परिभवः. **-ious,** *a.* अपकीर्ति-लज्जा-कलंक-कर (री *f.*), गर्ह्य, कलंकावह, वाच्य.

Ignoramus, *s.* अज्ञः, पंडितंमन्यः.

Ignore, *v. t.* न ज्ञा 9 U, न स्वीकृ 8 U. **-ance,** *s.* अज्ञानं, अविद्या, ज्ञानाभावः, अबोधः, मोहः. 2 ज्ञानहीनता, अनभिज्ञता, अज्ञता, अनभिज्ञानं, निर्बुद्धित्वं; 'difference imagined by i.' अविद्याकल्पितभेदः. **-ant,** *a.* अज्ञ, अवेदिन्, अज्ञान, अनभिज्ञ, oft. ex. by not 'know', q. v. 2 अप्राज्ञ, अविज्ञ, अपंडित, दुर्बुद्धि, निर्बुद्धि, अ-निर्बोध, विद्या-ज्ञान-प्रज्ञा-बोध-हीन-शून्य-रहित, दुर्मति, अविद्वस्. **-antly,** *adv.* अज्ञानतः, अज्ञानेन, अज्ञान-अबोध-पूर्वं.

Iguana, *s.* गोधा, गोधारः.

Iliac, *a.* आंत्रिक (की *f.*), अंत्र in comp.; 'i. pain' अंत्रशूलं, शूलव्याधिः-रोगः.

Ill, *a.* दुष्ट, पाप, असत्, असाधु, गर्ह्य, खल, कुत्सित, अभद्र, अमंगल, अशुभ, gen. ex. by दुर्, कु, अप, वि, कद्, pr.; *See* Bad; oft. by अ in comp. 2 अस्वस्थ, अस्वस्थ-असुस्थ-शरीर, असुस्थ, असुस्थित, व्याधित, सामय, रोगिन्; gen. ex. by आर्त, ग्रस्त, आतुर, पीडित in comp.; 'i. with fever' ज्वरार्त, ज्वरपीडित. –*s.* दुष्टता, खलता, असाधुता. 2 पापं, दुराचारः, अधर्मः, दुर्वृत्तं, दोषः, अपराधः. 3 अनिष्टं, अशुभं, अमंगलं, अकुशलं, अभद्रं, दुःखं, दुर्गति *f.*, आपद्-विपद् *f.*, व्यसनं, उत्पातः, अनर्थः, अरिष्टं, अनिष्टपातः, कष्टः-ष्टं, अपायः. 4 अपकारः, अपकृति *f.*, अहितं, अपायः, क्षति-हानि *f.*, क्षयः, अपचयः. 5 रोगः, व्याधिः, आमयः, पीडा, उपतापः, अस्वास्थ्यं; *See* Disease. –*adv.* असाधु, अनार्यं, असम्यक्, दुष्टं. 2 दुःखेन, कष्टेन, कृच्छ्रेण; in comp. words, ex. by दुर्, कु, अप, वि, कद्, अ, दुष्ट, पाप; 'i.-advised' अपरीक्षित, अविमृश्य कृत; 'i.-affected' वि-अप-रक्त, द्रोहबुद्धि, अहितेप्सिन्; 'i.-arranged,-ordered,-regulated' दुष्क्रम, दुर्विरचित, अव्यवस्थित; 'i.-behaved,-bred,-natured' अविनीत, दुःशील, दुर्वृत्त, कुशील, अविनय, दुर्विनीत, अशिष्ट, असभ्य, दुराचार, पाप, कुचारि, विनयापेत; 'i.-breeding' अविनयः, दुःशीलता, असभ्यता, विनयप्रमाथः, दुर्वृत्ति *f.*, दुराचारः; 'i.-conditioned' दुर्गत, दुःस्थित; 'i.-dressed' दुर्वाससू, कुप्रावृत; 'i.-fame' अयशः, अपकीर्ति *f.*, अप्रतिष्ठा; 'i.-fated' दुर्भाग्य, मंदभाग्य, दुर्दैव, दैवोपहत, दुर्दैवग्रस्त-उपहत; 'i.-favoured,-formed,-shaped' अप-कु-रूप, कदाकार, दुर्दर्शन; 'i.-fitted' अयोग्य, अनर्ह, अनुचित; 'i.-gotten' अन्यायार्जित; 'i.-grounded' अमूलक; 'i.-judged' अविमृश्य-अविचार्य-कृत, अनालोचित; 'i.-judging' विवेकशून्य; निर्विवेक; 'i.-looking' दुर्दर्शन, कुरूप; 'i.-luck' दुर्दैवं, दुर्भाग्यं, मंदभाग्यं, दैवविपर्यासः-दुर्विपाकः, दुर्जातं, अनिष्टं; *See* (*s.*); 'i.-nature,-temper' दुःशीलं, दुष्प्रकृति *f.*, वक्रभावः-शीलं, वामशीलं, भावप्रतीपता, वामशीलता, स्वभाववक्रता 'i.-natured, -tempered' दुष्प्रकृति, वक्र-वाम-शील, दुष्ट-खल-स्वभाव, कटु-कर्कश-प्रतीप-स्वभाव, कु-दुः-शील; 'i.-omened' अशुभसूचक, अनिष्टशंसिन्, अनिष्टलक्षण; 'i.-sounding' अपस्वर, वि-कु-स्वर, कटु; 'i.-timed अकाल, अप्राप्तकाल, अप्राप्तावसर, अनवसर, आकालिक (की *f.*); 'i.-treat' विप्र-अप-नि-कृ 8 U, उपस 1 A, पीड् 10, अर्द् 1 P or c., खलीकृ; 'i.-treatment' अपकारः, पीडा, अर्दनं; *See* (*s.*); 'i.-turn' अपकारः, पापं, अप्रियं अहितं, हिंसा, द्रोहः; 'i.-will' दुष्टभावः-बुद्धिः, द्रोहः, द्वेषः, मात्सर्यं, असूया. **-ness,** *s.* रोगः, व्याधिः, आमयः, रुजा, अस्वास्थ्यं, पीडा, बाधा, आर्ति *f.*, क्लेशः, उपतापः, दुःखं, विकारः, विकृति *f.*; 'dangerous i.' जीवितसंशयः, सन्निपातः.

Illapse, *s.* सहसा प्रवेशः or आक्रमणं. –*v. i.* सहसा प्रविश् 6 P or पत् 1 P.

Illation, *s.* अनुमानं, तर्कः. **-Illative,** *a.* आनुमानिक (की *f.*). **-ly,** *adv.* अनुमानेन, अपोहेन.

Illegal, *a.* नियम-विधि-विरुद्ध, शास्त्र-स्मृति-व्यवहार-न्याय-विरुद्ध, स्मृत्यपेत, अधर्म्य, अन्याय्य, न्याय-धर्म-रोधिन्, अविधि. **-ity,** *s.* विधि-धर्म-शास्त्र-नियम-विरोधः, अन्याय्यता, अधर्म्यता, अव्यवस्था, नियम-व्यवस्था-विधि-भंगः. **-ly,** *adv.* नियम-विधि-विरुद्धं.

Illegible, *a.* दुर्वाच्य, अव्यक्ताक्षर, अस्पष्टाक्षर, अस्पष्ट-अव्यक्त-वर्ण.

Illegitimate, *a.* अन्याय्य, विधिविरुद्ध; *See* **Illegal.** 2 विजात, जारजात, जारज, असतीप्रसूत, अनौरस, विजन्मन्, जारोत्पन्न. 3 कृत्रिम, कृतक, कल्पित; 'an i. child' अनौरसः-सी, जारजः-जा, दासीपुत्रः, कौलटेयः-यी, कौलटेरः-री, बंधकी-उपस्त्री-सुतः-ता, बंधुलः, कौलटिनेयः-यी. **-ly,** *adv.* विजन्मना; अधर्मेण. **-Illegitimacy,** *s.* विजन्मन् *m.*, वैजात्यं, अनौरसत्वं.

Illiberal, *a.* अनुदार, कृपण, कृपणबुद्धि-चेतस्-स्वभाव, (lit. and fig.) ; अत्याग-[illegible]न-शील, अवदान्य. **-ity,** *s.* अत्यागः, अवदान्यत्वं, अनौदार्यं, कार्पण्यं, नीचता, दीनता.

Illicit, *a.* प्रति-नि-षिद्ध, अधर्म्य, अन्याय्य, नियम-धर्म-विरुद्ध, व्यवहारविरोधिन्.

Illiterate, *a.* अशिक्षित, अप्रबुद्ध, असंस्कृत, अव्युत्पन्न, विद्या-ज्ञान-हीन, निरक्षर, अनक्षर, असंस्कृतचित्त.

Illimited,-able, *a.* निरवधि; अनंत, अमेय, असीम, अमित, अमर्याद; *See* **Endless.**

Illogical, *a.* अयुक्तिसिद्ध, न्यायविरुद्ध-विपरीत, अन्यायानुसारिन्, अन्याय्य, अतार्किक (की *f.*) ; 'i. conclusion' अपसिद्धांतः, अविनिगमः. **-ly,** *adv.* न्यायविरुद्धं.

Illude, *v. t.* वंच् 10, मुह् c., प्रलभ् c.; *See* **Cheat. -Illusion,** *s.* माया, प्रपंचः, इंद्रजालं, अलीकता, अविद्या; *See* **Delusion. Illusive, -Illusory,** *a.* मायिन्, अलीक, ऐंद्रजालिक; *See* **Delusive.**

Illume, Illumine, Illuminate, *v. t.* द्युत् c., प्रकाश् c. उद्भास् c., उद्दीप् c., वि-,राज् c., भ्राज् c., उज्ज्वल् c. 2 (पत्राणि) रंज् c. **-Illumination,** *s.* उद्भासनं, द्योतनं, प्रकाशनं, उज्ज्वलनं, दीप्ति-द्युति *f.*, भ्राजिष्णुता. 2 (i. s) दीपालि *f.*, दीपमाला-समूहः, दीपोत्सवः. 3 पत्ररंजनं. **-Illuminator,** *s.* द्योतकः, प्रकाशकः, दीपकः. 2 पत्ररंजकः.

Illustrate, *v. t.* व्या-ख्या 2 P, व्या-चक्ष् 2 A, स्पष्टीकृ 8 U, विवृ 5 U; उदा-हृ 1 P, निर्दिश् c., निदर्शनेन व्या-ख्या, व्यक्ती-विशदी-कृ, चित्रेण स्पष्टीकृ, प्रकाश् c., द्युत् c., शुभ् c., दीप् c, चित्रादिना शुभ् c. **-ion,** *s.* उदाहरणं, दृष्टांतः, निदर्शनं, व्याख्या-ख्यानं, प्रकाशनं, निरूपणं. **-ive,** *a.* प्रकाशक, दार्ष्टांतिक (की *f.*). **-or,** प्रकाशकः, निदर्शकः, व्याख्यातृ *m.*

Illustrious, *a.* विश्रुत, ख्यात, प्रथित, प्रसिद्ध, महायशस्क; *See* **Famous.** 2 विशिष्ट, उत्तम, उत्कृष्ट, परम, प्रमुख, महत्. **-ly,** *adv.* विश्रुतं, प्रथितयशसा, विशिष्टतया. **-ness,** *s.* विश्रुति-ख्याति- *f.*

Image, *s.* प्रतिमा, मूर्त्ति *f.*, प्रतिकृति *f.* मूर्त्तिः-मानं-रूपं, प्रतिच्छंदकः 2 प्रतिबिंबं, बिंबं, छाया, प्रतिच्छाया, प्रतिच्छंदः-दकः; 'this youth is the complete i. of Râma' रामस्याकृतिरस्मिन् शिशौ संपूर्ण प्रतिबिंबिता (U. 4). 3 Idea, q. v.; 'iron i.' लोहप्रतिमा, स्थूणा, सू(शू)र्मी. **-v. t.** मनसा क्लृप् c. or चिंत् 10, प्रतिबिंबयति (D.) ; 'i. various shapes' तैस्तैराकृतिविस्तैरनुगताः (Mr. 5). **-ery,** *s.* मनः-कल्पना-सृष्टि *f.*-संकल्पः, भावना, वासना. 2 उपलक्षणं, लक्षणा. 3 आभासः, आडंबरः, अनुकारः.

Imagine, *v. t.* मनसा क्लृप् c., सं-परि°, सं-वि-भू c., सृज् 6 P, ध्यै 1 P. 2 मन् 4 A, गण् 10, चिंत् 10, तर्क् 10, उत्प्रेक्ष् 1 A, बुध् 1 P, अव-इ 2 P, अवगम् 1 P, उपलक्ष् 1 A. **-able,** *a.* संभाव्य, चिंतनीय, बोधगम्य; 'with all i. ease' मनसोप्यगोचरीभूतया-मनसाप्यकल्प्यमानया-लीलया. **-ary,** *a.* मनःकल्पित, वासना-भावना-सृष्ट, मनोरथसृष्ट, मानस (सी *f.*), काल्पनिक (की *f.*), संकल्पज. 2 अमूलक, असत्य, मायामय (यी *f.*). **-ation,** *s.* भावना-नं, कल्पना-नं, संकल्पः, वासना, मनःकल्पना. 2 (Faculty of i.) कल्पना-तर्क-शक्ति *f.*, भावना, उपलब्धि *f.* **-ative,** *a.* कल्पक, विभावक, भावनापर, कल्पनाशील.

Imbecile, *a.* दुर्बल, अशक्त, क्षीणबल; *See* **Feeble.** 2 (In mind) न्यूनबुद्धि, अल्प-विकल-मति, बालिश, कृपणबुद्धि. **-ity,** *s.* दौर्बल्यं, न्यूनबुद्धिता, बालिशत्वं.

Imbed, *v. i.* अंतर्गम् 1 P, निविश् 6 P.

Imbibe, *v. t.* नि-पा 1 P, आ-पा, शुष् c. 2 (Fig.) अधिगम् 1 P, मनसा ग्रह् 9 U or आकल् 10 (कलयति) or उपलभ् 1 A.

Imbricate, *v. t.* अतिव्याप् 5 P.

Imbroglio, *s. See* **Embroglio.**

Imbrue, *v. t.* सिच् 6 P, लिप्, 6P, उक्ष् 1 P, क्लिद् c.; अंज् 7 P, दिह् 2 U; 'i. ed with blood' रक्ताक्त, रक्ताक्लिन्न.

Imbue, *v. t.* अभिरंज् c. 2 शास् 2 P, उपदिश् 6 P, शिक्ष् c.

Imitate, *v. t.* अनुकृ 8 U (oft. with gen.), अनुगम्-सृ 1 P, अनु-इ-या 2 P, अनुवृत् 1 A, अनुविधा 3 U, अनुवद् 1 P, अनुहृ 1 P, अनुविडंब् 10. **-ion,** *s.* अनुकारः-करणं, अनुकृति *f.*, विडंबनं, अनुवृत्ति *f.*, अनुसरणं. 2 उपमानं, प्रतिरूपं, सादृश्यं. **-ive,** *a.* अनुकरणशील, अनुकारिन्, अनुगामिन्. **-or,** *s.* अनुकर्तृ *m.*, अनुकारकः, अनुयायिन्-अनुकारिन् *m.*, अनुगतिकः.

Immaculate, *a.* निष्कलंक, निर्मल, अकल्मष, अनघ, निर्दोष, विमल.

Immanent, *a*, अंतर्भव, अंतरस्थ.

Immaterial, *a*. अमूर्त, निरवयव, अशरीरिन्, अमूर्तिमत्. 2 लघु, अगुरु, अगुर्वर्थ, यत्किंचित्, निष्प्रयोजन, अनावश्यक (की *f*.), निरर्थक. -ism, *s*. निराकारवादः. -ist, *s*. निराकारवादिन् *m*. -ity, *s*. अमूर्तता, अशरीरता. -ly, *adv*. निरर्थकं, निष्प्रयोजनं.

Immature, *a*. अपक्व, अपरिणत, असंपूर्णकाल, असिद्ध, अप्राप्तकाल आकालिक(की *f*.). -ly, *adv*. अपक्वं, अपरिणतं, अप्राप्तकालं, अतिशीघ्रं, परिणामकालात् प्राक्. -ity, -ness, *s*. अपाकः, अपरिपाकः, अपरिणामः, अप्रौढता, अप्राप्तकालता.

Immeasurable, *a*. अमेय, अमित, अपरिमाण, दुर्मेय, महत्, बहु, अति pr.

Immediate, *a*. अनंतर, अव्यवहित, निरंतर, अव्यवधान. 2 तात्कालिक (की *f*.), सद्यस्क, अचिर, शीघ्र; better by 'i. ly.' 3 सन्निहित, उपस्थित, आसन्न, निकट. -ly, *adv* सद्यः, सपद्येव, समनंतरमेव, सपदि तत्क्षणात्, तत्काले, सद्य एव, झटिति, द्राक्, आशु, अविलंबितं, अचिरादेव; oft. by एव or मात्र; 'i. after he had spoken' तस्मिन्नुक्तवत्येव; मुक्तमात्रे सायके &c.

Immedicable, दुरुपचार, अचिकित्स्य.

Immemorable, *a*. अस्मर्तव्य.

Immemorial, *a*. अस्मार्त, स्मरणातिक्रांत, अतिप्राचीन, अनादि; 'i. succession' अनादिपरंपरा; 'from times i.' अनादिकालात्, अस्मार्तकालात्.

Immense, *a*. अत्यंत, अपरिमेय, अतिमात्र, अनंत, अपरिमाण, अमित, अतिमर्याद, दुर्मेय; महत्, बृहत्, सु-अति-महत्, अतिबृहत्. -ly, *adv*. अत्यंतं, अतिमात्रं. -ity, *s*. आनंत्यं, अमितता, अपरिमाणत्वं, महत्त्वं, सुमहत्त्वं. -urable, *a*. *See* **Immeasurable**.

Immerge, Immerse, *v. t*. अवगाह् c., निमस्ज् c. (मज्जयति), आप्लु c., जले प्रविश् c. -ed, *a*. मग्न, नि-अभिनि-विष्ट, व्यापृत, लीन, आसक्त, निष्ठ-पर-तत्पर-in comp.; *See* **Fixed, Intent**. -immersion, *s*. निमज्जनं, अवगाहः-हनं, आप्लावः, स्नानं, अभिषेकः. 2 मग्नता, निष्ठा, तत्परता, अभिनिवेशः.

Immethodical, *a*. क्रमहीन, क्रमविरुद्ध, अव्यवस्थित. -ly, *adv*. क्रमविरुद्धं, अक्रमेण.

Immigrate, *v. i*. देशांतरं अधिवस् 1 P or अध्यास् 2 A (with acc.). -ion, *s*. देशांतराधिवासः, देशत्यागः. -Immigrant, *s*. देशांतराधिवासिन् *m*.

Imminent, *a*. उपस्थित, आसन्न, संनिकृष्ट, उपनत, निकट-आसन्न-वर्तिन्; 'a drought is i.' अनावृष्टिः संपद्यते लोके (P. I. 7). 2 आत्ययिक (की *f*.), जीवितसंशयावह; 'he stood in i. peril of death' महति जीवितसंशये अवर्तत.

Immit, *v. t*. *See* **Place**.

Immobile, *a*. स्थिर, निश्चल, अचल, निष्कंप.

Immoderate, *a*. अमित, अपरिमित, अमर्याद, अत्यंत, अतिमात्र, अत्यधिक, सु-अति pr. -ly, *adv*. अतिमात्रं, अत्यंतं, सु-अति-pr. -ion, *s*. अमर्यादा, मर्यादातिक्रमः, अत्याचारः, अतिरेकः, अतिशयः.

Immodest, *a*. वियात, निर्लज्ज, निस्त्रप, अविनीत, प्रगल्भ, धृष्ट, लज्जा-व्रीडा-त्रपा-हीन. 2 अश्लील, ग्राम्य, अवाच्य, अशुद्ध, अशुचि. 3 असाधु, असद्वृत्त, पांसुल, व्यभिचारिन्. -ly, *adv*. निर्लज्जं, प्रगल्भं, धृष्टवत्, अश्लीलं. -y, *s*. वैयात्यं, अविनयः, प्रागल्भ्यं, धृष्टता निर्लज्जत्वं.

Immolate, *v. t*. (यज्ञे) हन् 2 P, विशस् 1 P, उपहारीकृ 8 U, हत्वा उत्सृज् 6 P, बलिं दा 3 U or कृ, आलभ् 1 A, सं-ज्ञा c. (ज्ञपयति); 'i. oneself' प्रेतेन सह आत्मानं दह् 1 P, सह गम्. -ion, *s*. उपहारीकरणं, उपहारः, बलिदानं, आलंभः, संज्ञपनं, उत्सर्गार्थं वधः or विशसनं.

Immoral, *a*. असाधु, दुश्चरित्र, दुर्वृत्त, दुराचार-पापकर्मन्, व्यभिचारिन्, व्यसनिन्, पापिन्; दुष्ट, धर्मविरुद्ध, अपुण्य, अशुचि, पाप. -ity, *s*. असाधुता, दुर्वृत्तता; व्यसनं, अधर्मः, पापं, पापचरितं, दुश्चरितं, व्यभिचारः. -ly, *adv*. धर्मविरुद्धं, दुराचारेण.

Immortal, *a*. अमर, अमर्त्य, जरामरणरहित, अक्षय, अजर, निर्जर, अनश्वर, अविनाशिन्, नित्य, सनातन (नी *f*.), अनंत, शाश्वत (ती *f*.), सदास्थायिन्. -ity, *s*. अमरता-त्वं अनश्वरता, आनंत्यं, नित्यता. -ize, *v. t*. अमरी-अक्षयी-कृ 8 U; better by (*a*.). -ly, *adv*. अजरं, अक्षयं, अनश्वरं, शाश्वतं.

Immoveable, *a*. अचल, स्थिर, स्थावर, अचर, अजंगम.

Immune, *a*. मुक्त, रहित; ex. by अ or निर् pr. अगम्य, अक्षम, अनर्ह. -ity, *s*. मुक्ति *f*., मोक्षः. 2 अभावः, विरहः न्यूनता, राहित्यं; oft. by अ or निर् pr.; 'i from danger' अभयं, निर्भयत्वं.

Immure, *v. t*. नि-अव-रुध् 7 U, बंध् 9 संयम् 1 P, कारायां गुप् 1 P. 2 परिवृ 5 U, परिवेष्ट् 1 A or c.

Immutable, *a*. अव्यय, निर्विकार, नित्य, अविक्रिय, विकाराक्षम, स्थिर, निर्विकल्प, अपरिवर्तनीय. -Immutability, *s*. अविकारः, नित्यता, अव्ययः.

Imp, *s*. पिशाचः, भूतः; *See* **Devil, Demon**.

Impact, *s*. संस्पर्शः, संपर्कः, समा-प्रति-घातः, संघट्टः.

Impair, *v. t.* ह्रस् c., अप-क्षि 5 U, क्षि 1, 5 P or c., नश् c., विलुप् c., लघूकृ 8 U, खंड् 10, अप-हन् 2 P, दुष् c. (दूषयति), अल्पीकृ, विकलीकृ, क्षीणीकृ. 2 तेजः-बलं-हृ 1 P, दुर्बलीकृ. **-ed,** *a.* स्खलित, क्षीण, विकल, अपचित, उपहत, विशीर्ण, क्षत, न्यूनी-विकली-कृत; 'i. in strength' क्षीणबल, निःसत्त्व. **-ing,** *s.* क्षयः, ह्रासः, अपचयः, अवसादः; वैकल्यं, न्यूनता, लोपः.

Impale, *v. t. See* **Empale.**

Impalpable, *a.* अस्पृश्य, अग्राह्य, स्पर्शाव्यक्त, इंद्रियागोचर, अव्यक्त, अतिसूक्ष्म.

Imparity, *s.* वैषम्यं, भेदः, असाम्यं.

Impart, *v. t.* दा 3 U, 1 P, प्रति-पद् c., सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, संक्रम् c., ग्रह् c., वि-हृ 1 P (with loc.), संसृज् 6 P, सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजंति (S. B. 431) 'do not i. to gold their properties'. 2 नि-आ-विद् c., कथ् 10; प्रकाश् c., वि-ज्ञा c (ज्ञापयति), ख्या 2 P or c. 3 संचर् c., संक्रम् c.

Impartial, *a.* अपक्षपातिन्, समक्रिय, समदर्शिन्, समवृत्तिभाज्, उदासीन, मुक्तसंग, सर्वसम, पक्षपातहीन, न्यायवर्तिन्, न्याय्य, धर्म्य. **-ity,** *s.* अपक्षपातः, धर्मः, समता, निःसंगता, औदासीन्यं, न्याय्यता. **-ly,** *adv.* न्यायेन, निःसंगं, अपक्षपातेन.

Impartible, *a.* अविभाज्य, अवंटनीय.

Impassable, *a.* अगम्य, अलंघ्य, दुस्तर, दुर्गम, दुस्तार्य, गहन, संबाध, संकट.

Impassible, *a.* अ-निः-चेतन, सुखदुःखाक्षम.

Impassioned, *a.* अनुरक्त, अनुरागवत्, रागान्वित, बद्धभाव, सानुराग, प्रीत्याकृष्ट, आसक्तचित्त. 2 सरस, रसिक, रागयुक्त, रागिन्; 'what an i. strain अहो रागपरिवाहिणी गीतिः (S. 5).

Impassive, *a.* विकार-अक्षम-अगम्य.

Impatient, *a.* (For) उत्सुक, व्यग्र सोत्कंठ, प्रसित, उत्क; *See* **Eager.** 2 (Of) असह, असहन, अक्षमिन्, असहिष्णु, अक्षम. 3 अधीर, कालहरणाक्षम, अमर्षण, अतितिक्षु. **-ly,** *adv.* अधीरं, सोत्सुकं, व्यग्रं, सावेगं, अक्षांत्या. **-Impatience,** *s.* अधीरता, औत्सुक्यं, व्यग्रता, उत्कंठा, अक्षमा, असहत्वं.

Impawn, *v. t. See* **Pledge.**

Impeach, *v. t.* अभियुज् 7 A, 10, अभिशंस् 1 P, अपवद् 1 U, आक्षिप् c. **-er,** *s.* अभियोगिन्-योक्तृ *m.* **-ment,** *s.* अभियोगः, अभिशंसनं.

Impeccable, *a.* अपाप, निर्दोष.

Impecunious, *a.* दरिद्र, अकिंचन, निर्धन.

Impede, *v. t.* रुध् 7 U, प्रतिबंध् 9 P, विप्रति-हन् 2 P, नि-वृ c., स्तंभ् 9 P, or c., बाध् 1 A, कुंठयति (D.). **-Impediment,** *s.* विघ्नः, प्रत्यूहः, अंतरायः, व्याघातः, उपरोधः, प्रतिबंधः; *See* **Obstacle.**

Impel, *v. t.* नि-प्र-उद्-चुद् 10, प्रवृत् c., प्रोत्सह् c., समीर् c., प्रेर् c., तुद् 6 P or c., प्रणुद्, प्रचुद् 10, कृष् 1 P; *See* **Drive. -lent,** *s.* प्रवर्तकः, प्रेरकः, प्रोत्साहकः, प्रचोदकः.

Impend, *v. i.* आ-प्र-लंब् 1 A, उपरि लंब्. 2 उन्नम् 1 P, समा-पत् 1 P, प्रत्यासद् 1 P, उप-स्था 1 U, उपागम् 1 P, निकटे-समीपं वृत् 1 A, or स्था; 'an untimely storm i. s' उन्नमत्यकालदुर्दिनं (Mr. 5); 'a drought is closely i. ing' अनावृष्टिः संपद्यते लग्ना (P. I. 7). **-ent, -ing,** *a.* उपस्थित, आसन्न, निकटवर्तिन्, उपनत, उपागत.

Impenetrable, *a.* अभेद्य, अच्छेद्य, अप्रवेश्य, गहन, दुर्गम. 2 कठिन, वज्रमय (यी *f.*); 'darkness i. by the sun' अभानुभेद्यं तमः.

Impenitent, *a.* अननुशयिन्, अननुतापिन्, खेद-पश्चात्ताप-हीन, अननुतप्त. **-Impenitence,** *s.* अननुतापः, अननुशयः, अखेदः; कठिनता, कठोरता.

Imperative, *a.* आज्ञापक, आदेशक, नियोजक, विधायक, प्रचोदक. 2 अविचार्य, अवश्यकर्तव्य, अनुपेक्ष्य; 'i. mood' लोट्, आज्ञार्थः. **-ly,** *adv.* अवश्यमेव.

Imperceptible, *a.* अस्पष्ट, अव्यक्त, अविभाव्य, अगोचर, अगम्य; 'i. to the senses' इंद्रियागोचर, इंद्रियातीत, अतींद्रिय; 'i. to the eye' अप्रत्यक्ष, परोक्ष, नयनागोचर; 'i. difference' अतिसूक्ष्मः भेदः. **-Imperceptibly,** *adv.* अव्यक्तं, अगोचरं, अलक्षितं, निभृतं.

Imperfect, *a.* अपूर्ण, अपरिणत, असंपन्न, अपक्व, असमाप्त, असमग्र. 2 न्यून, विकल, लुप्त, हीन, सदोष, सच्छिद्र, ऊनावयव, विकलेंद्रिय, विकलांग; 'i. memory विकला स्मृतिः; 'i. comparison' लुप्तोपमा; 'i. tense' लङ्. **-ion,** *s.* दोषः, छिद्रं, रंध्रं, अगुणः दूषणं; कलंकः, वैकल्यं, न्यूनता, हानि *f.*, क्षति *f.*, अपर्याप्ति *f.* **-ly.** *adv.* असंपूर्णं, असम्यक्, विकलं.

Imperforate, *a.* नीरंध्र, अच्छिद्र.

Imperial, *a.* महेश्वरीय, महाराज-अधिराज-in comp.; 'i. rule' आधिराज्यं, चक्रवर्तित्वं.

Imperil, *v. t. See* **Endanger.**

Imperious, *a.* आज्ञापक. 2 दृप्त, उद्धत, धृष्ट, अवलिप्त, सावलेप; 'in an i. (one' सावलेपं, तर्जयंत्या गिरा, उद्धतं, साटोपं. **-ness,** *s.* दर्पः, अवलेपः उत्सेकः, औद्धत्यं; *See* **Pride.**

Imperishable, *a.* अनश्वर, अक्षय-य्य, अक्षयिन्, अविनाशिन्, अव्यय, अजर, अक्षर.

Impermeable, *a.* अप्रवेश्य, अभेद्य.

mpersonal, *a.* अकर्तृक, अकर्तृवाच्य; ex. by भाव 'i. verb, भाववाच्यं.

mpersonate, *v. t.* चेतनवत् उपचर् 1 P. (with loc.). 2 Feign, q. v.; 'i. ed Râma' गृहीतरामरूप-वेशः.

Impertinent, *a.* वाचाल, अशिष्ट, प्रगल्भ, धृष्ट, अविनीत, दुः-कु-शील. 2 अप्रस्तुत, अप्रकृत, अप्रासंगिक (की *f.*); असंगत, असंबद्ध, निष्प्रयोजन, अनर्थक. 3 पराधिकारचर्चक, अव्यापारेषु व्यापारं कुर्वत्. **-ly**, *adv.* अविनयेन, धृष्टतया, प्रगल्भं, अप्रस्तुतं. **-Impertinence**, *s.* अविनयः, प्रागल्भ्यं, धृष्टता, अशिष्टता, वैयात्यं. 2 अप्रस्तुतत्वं, असंबंधः, अनन्वयः, असंगतता.

Imperturbable, *a.* अक्षोभ्य, निर्विकार, समवृत्ति-बुद्धि; अपारिप्लव.

Impervious, *a.* दुर्भेद्य, दुष्प्रवेश्य, अभेद्य. 2 गहन, निबिड, अगम्य, संकट, संबाध, नीरंध्र.

Impetuous, *a.* तीव्र, चंड, तीक्ष्ण, उग्र, प्रबल, अविमृश्य कृत, वेगवत्, सरभस. 2 संरंभिन्, साहसिन्, अमर्षण, साहसिक (की *f.*), असमीक्ष्यकारिन्, तीक्ष्णकर्मन्. **-ly**, *adv.* वेगेन, महावेगेन, सवेगं, उग्रं, ससंरंभं, तीक्ष्णं, साहसेन, सरभसं, तरसा. **-ness**, **-Impetuosity**, *s.* वेगः, सं-आ-महा-वेगः; चंडता, संरंभः, तीव्रता, साहसं, अमर्षता, रभस् *n.*, रभसः.

Impetus, *s.* वेगः, सं-आ-वेगः, गति-शक्ति *f.*, (fig;) प्रेरणा, प्रचोदना, प्रोत्साहनं.

Impinge, *v. t.* आहन् 2 U (usually A), समापत् 1 P, संघट्ट् 1 A.

Impious, *a.* अभक्त, अधार्मिक (की *f.*), अपुण्यशील, अधर्मिन्; दुष्ट, पापिष्ठ, असाधु. **-ness**, **-Impiety**, *s.* अभक्ति *f.*, अधर्मः, पापं, दुष्कृतं, धर्मलोपः, देवनिंदा, धर्महीनता, असाधुता, दुष्टता.

Implacable, *a.* अहार्य, अचल, अशाम्य, अशमनीय, अतोषणीय, अनाराध्य, अप्रसाद्य, असांत्वनीय. 2 दीर्घ-अति-द्वेषिन्; 'i. hatred' आमरणांतिकं वैरं, दीर्घद्वेषः, बद्धवैरं.

Implant, *v. t.* नि-धा 3 U, विलिख् 6 P, निरुह् c., प्रति-नि-ष्ठा c. (ष्ठापयति), प्रतिवप् 1 P, निखन् 1 P, 'as if i. ed in the heart' प्रत्युप्तेव...अंतर्निखातेव च (Mal.5;) 'so many are the thorns of anxiety i. ed in the heart' तावंतोपि विलिख्यंते हृदये शोकशंकवः (H. 4).

Implement, *s.* उपकरणं, साधनं, उपस्करः, सामग्री, द्रव्यं, पात्रं, यंत्रं.

Implicate, *v. t.* संबंध् 9 P, संश्लिष् c., लिप् 6 P, संसृज् 6 P, संक्रम् c.; 'he is i. ed in many crimes' अनेकपापैर्लिप्यते, अनेकदोषास्तस्मिन् संक्रांताः. **-ion**, *s.* संबंधः, संसर्गः, समन्वयः, अनुषंगः.

Implicit, *a.* निर्विवाद, अवैकल्पिक-असांशयिक (की *f.*); विचारानपेक्ष, अवितर्कित, अनाशंकित, अविचारित; better by 'i. ly.' **-ly**, *adv.* अवितर्कं, अनाशंकं, असंशयपूर्वं, अविचार्य, निःशंकं, निर्विवादं, निर्विकल्पं.

Implore, *v. t.* प्र-अभि-अर्थ् 10 A, याच् 1 A, सविनयं-सांजलि-याच्, अनुनी 1 P, आराध् c., प्र-सद् c. **-ingly**, *adv.* बद्धांजलि *a.*, पादयोः पतित्वा, सप्रणिपातं, सविनयं.

Imply, *v. t.* सूच् 10, ध्वन् c., वच् desid. (विवक्षति), भंग्या व्यंज् c., उप-लक्ष् 10, बुध् c. 2 (As meaning) प्रति-इ c., द्युत् c., गम् c., अभि-धा 3 U; *See* **Mean**; 'these senses are i. ed' एते अर्थाः प्रतीयंते (S. B. 33); oft. by अर्थ, गर्भ in comp.; 'words i. ing censure' निंदार्थं वचः. **-ed**, *a.* विवक्षित, प्रतीत, उपलक्षित, भंग्या सूचित-ध्वनित; 'i. sense' ध्वनिः, फलितं, फलित-ध्वनित-गर्भित-अर्थः. **-ication**, *s.* विवक्षा, उपलक्षणं-णा, भंगी *f.*, व्यंजना, अनुमानं.

Impolite, *a.* अशिष्ट, असभ्य, ग्राम्य, दुर्मर्याद, असुजन, दुःशील, अनार्य, अविनीत, अदक्षिण.

Impolitic, *a.* अनीतिज्ञ, नयानभिज्ञ, अबुध, अविवेचक, अविज्ञ, असमीक्ष्यकारिन्, अमतिमत्. 2 अहित, सापकार, अनर्थावह, अनिष्टकर (री *f.*), असमीक्ष्यकृत, न्यायविरुद्ध. **-ally**, *adv.* असमीक्ष्य, अनीतिज्ञवत्, अविचार्य. **-Impolicy**, *s.* दुर्णयः, अनयः, अनीति *f.*

Imponderable, **Imponderous**, *a.* अगुरु, लघु, निर्भार.

Import, *v. t.* (देशांतरात्) आनी or आहृ or आवह् 1 P. 2 सूच् 10, बुध् c., उद्दिश् 6 P, द्युत् c.; *See* **Imply**, **Mean**. 3 गुरुतया संबंध् 9 P or अवलंब् 1 A. **-s.** (I. s) विदेशीयपण्यानि, विदेशजद्रव्याणि, बहिर्देशागतवाणिज्यद्रव्याणि. 2 अर्थः, भावः, अभिप्रायः, आशयः, उद्देशः, विवक्षा; 'of like i.' तुल्यार्थ, समानार्थ. 3 गुरुत्वं, गौरवं. **-ance**, *s.* महत्त्वं, गुरुत्वं, गुरुता, गौरवं, प्रभावः, गरिमन्-महिमन् *m.* 2 उत्कर्षः, उन्नति *f.*, प्रतिष्ठा, प्रतिपत्ति *f.*, गौरवपदं; परम-उच्च-पदं. 3 अभिमानः, दर्पः. **-ant**, *a.* महत्, गुरु, अलघु, गुर्वर्थ, बह्वर्थ, बहु-गुरु-प्रभाव, परम; 'i. object' गुर्वर्थः. **-antly**, *adv.* गुरुतया, परमं. **-ation**, *s.* देशांतरादानयनं. 2 आनीतद्रव्याणि.

Importune, *v. t.* निर्बंधेन प्रच्छ् 6 P or प्रार्थ् 10 A or याच् 1 A, अनु-निर्-बंध् 9 P, अनुरुध् 7 U, अतिप्रार्थनया उद्विज् c. or आयस् c.; 'being i. ed &c.' निर्बंधपृष्टः स जगाद सर्वं (R. xiv. 32); पुनः पुनश्चानुबध्यमाना (Ks. 69). **-acy**, **-ity**, *s.* निर्बंधः, अतिनिर्बंधः, अतियाचना-प्रार्थना, नित्यप्रार्थना,

आग्रहः. -ate, *a.* निर्बंधशील-पर, आग्रहिन्, अतियाचक-प्रार्थक; 'i. demand' अतिनिर्बंधः. -ately, *adv.* साग्रहं, निर्बंधेन, पुनः-पुनः, सनिर्बंधं.

Impose, *v. t.* निक्षिप् 6 P, नि-विश् c., न्यस् 4 U, नि-आ-धा 3 U, आ-समा-रुह् c. (रोपयति), स्था c. (स्थापयति), नियुज् 7 A, 10; 'i. upon' वंच् 10, विप्र-लभ् 1 A; *See* **Cheat.** -ing, *a.* गांभीर्यद्योतिन्, गुरुप्रभाव, विस्मयावह, अद्भुत, विस्मापक, भव्य, प्रकांड, महातेजस्. -ition, *s.* न्यासः, आरोपः-पणं, स्थापनं, निवेशनं. 2 करः, शुल्कः-ल्कं. 3 छलं, कपटं, दंभः; *See* **Fraud.**

Impostor, *s.* धूर्तः, दांभिकः, वंचकः, प्रतारकः, कितवः. 2 (In religion) धर्मध्वजिन् *m.*, लिंगवृत्तिः; *See* **Hypocrite.**

Imposture, *s.* वंचना-नं, छद्मन् *n.*, दंभः, कपटं, माया, विप्रलंभः, अतिसंधानं, प्रतारणा; *See* **Fraud.**

Impossible, *a.* अशक्य, असाध्य, असंभव, अकरणीय, दुष्कर; gen. ex. by न शक् pass. -Impossibility, *s.* अशक्यता, असाध्यता. 2 असाध्यं, असंभवः; oft. ex. by शशविषाणं-शृंगं, खपुष्पं, गगनकुसुमं.

Impost, *s.* करः, शुल्कः-ल्कं; बलिः. राजस्वं, राजभागः.

Imposthume, *s.* विद्रधिः.

Impotent, *a.* निर्बल, दुर्बल, अशक्त, निःसत्व; *See* **Feeble.** 2 क्लीब, पुंस्त्वहीन, नपुंसक. निष्पौरुष. 3 निष्फल, निरर्थक, व्यर्थ, वृथा-मुधा- in comp. -ly, *adv.* दुर्बलं, निर्वीर्यं, निःसत्वं. -Impotency, *s.* दौर्बल्यं, निःसत्वं, वीर्याभावः, क्लीबता, अपौरुषं, पुंस्त्वाभावः, वैक्लव्यं.

Impound, *v. t.* गोष्ठे नि-अव-रुध् 7 U or रक्ष् 1 P.

Impoverish, *v. t.* निर्धनीकृ 8 U, दरिद्रीकृ, धनं नश् c. or क्षि c. 2 वीर्य-शक्तिं-हृ 1 P or नश् c. -ed, *a.* निर्धन, क्षीणधन, परिक्षीण; गतविभव, नष्टार्थ, दरिद्रीकृत, अकिंचन, गत-प्रचलित-विभव; *See* **Poor.** -ment, *s.* दारिद्र्यं, धननाशः-क्षयः, परिक्षीणता.

Impracticable, *a.* असाध्य, अशक्य, दुष्कर, असंभव, अनुपपाद्य, अकार्य.

Imprecate, *v. t.* शप् 1 U, आ-क्रुश् 1 P, गर्ह् 1, 10 A, अभिशंस् 1 P. -ion, *s.* शापः, आक्रोशः-शनं, अभिशंसनं, गालि *f.* -ory, *a.* आक्रोशक, अनिष्टावेदिन्, शापगर्भ.

Impregnable, *a.* अजय्य, अलंघ्य, दुर्जय, दुराक्रम, अनाक्रम्य. 2 गहन, दुर्गम, अगम्य.

Impregnate *v. t.* सिच् 6 P, नि-आ°-, प्र-क्षिप् 6 P; व्याप् 5 P or c., व्यश् 5 A, पूर् 10 2 (Make pregnant) रेतः सिच्, गर्भं ग्रह् c. or उत्पद् c., ससत्वां कृ; *See* **Pregnant.** -ed, *a.* सिक्त, व्याप्त, पूर्ण-गर्भ-in comp. 2 आपन्नसत्त्वा, गर्भवती. -ion, *s.* सेकः, निषेकः, गर्भाधानं.

Impress, *v. t.* नि-धा 3 U, न्यस् 4 U, निविश् c.; पदं ग्रह् c., निष्ठा c. (निष्ठापयति), चित्तनिष्ठ-*a.* कृ 8 U; संस्कृ; (हृदये) पदं कृ, स्थानं लभ् 1 A (in the mind). 2 अंक् 10, चिह्न् 10, मुद्र् 10; *See* below. 3 हृ 1 P, आकृष् 1 P; *See* **Attract.** -*s.* मुद्रा, अंकः, चिह्नं, लक्षणं. -ed, *a.* मुद्रित, अवगाढ, अंकित; निवेशित, निष्ठ-स्थ- in comp.; 'i. in the mind' हृदयस्थ, चित्तनिष्ठ; 'deeply i. on the ground' अवगाढा भूमौ (S. 3). -ion, *s.* अंकनं, चिह्नं, मुद्रा, अंकः. 2 संस्कारः, चित्तसंस्कारः. 3 अनुभवः, बुद्धि *f.*, मति *f.*, मतं. 4 परिणामः, उत्पन्नं, संस्कारजन्यं फलं; oft. ex. by अंतरं, अवकाशः, पदं with लभ् or ग्रह्; तदलब्धपदं हृदि शोकघने (R. VIII. 91), लेभेंतरं चेतसि नोपदेशः (R. VI. 66) 'made or left no i. on the heart &c.'. 5 आघातचिह्नं, छेदः. -ive, *a.* हृदयहारिन्, हृदयंगम, चित्ताकर्षिन्, हृदयस्पृश्.

Imprint, *v. t.* मुद्र् 10. अंक् 10, न्यस् 4 U; *See* **Impress.**

Imprison, *v. t.* कारायां-कारागृहे-निक्षिप् 6 P or बंध् 9 P or निरुध् 7 U. 2 बंदिग्राहं ग्रह् 9 U, आसिध् 1 P, बंदीकृ 8 U. -ment, *s.* कारावासः, कारानिरोधः, कारावंधनं-प्रवेशः, निरोधः-धनं. बंधनं, आसेधः, प्रग्रहः, बंदीकरणं.

Improbable, *a.* असंभव, अघटनीय, दुर्घट, अनुपपन्न; 'it is i.' नैतदुपपद्यते, संभवति or घटते. -Improbability, *s.* असंभवः, अनुपपत्ति *f.*, असंगति *f.*

Improbity, *s.* अशुचिता, अनृजुता, असारल्यं, कापट्यं, कौटिल्यं. शाठ्यं, जिह्मता, खलता; *See* **Fraud.**

Impromptu, *a.* आकस्मिक (की *f.*), अयत्नपूर्व, अचिंतितपूर्व. -*adv.* पूर्वचिंतां विना.

Improper, *a.* अयुक्त, अनुचित, अनुपपन्न, अनर्ह; oft. by कु-अ pr.; 'i. union' असंगतिः, कुयोगः. -ly, *adv.* अयुक्तं, असम्यक्, अस्थाने, अनुचितं, अनुपपन्नं; 'acting i.' अकृत्यकारिन्. -Impropriety, *s.* अनौचित्यं, अन्यायः, अयुक्तता, अनुपपत्ति *f.* 2 (Of conduct) अविनयः, कुचरितं, अमर्यादा, दुश्चरितं, अकार्यं, अपचारः, मर्यादातिक्रमः.

Improve, *v. t.* उत्कृष् 1 P or c., संस्कृ 8 U, उप-वि उन्नतिं-श्रेयस्त्वं-नी 1 P or प्राप् c., प्रमृज् 5 U, भद्रतर-श्रेयस्-*a.* कृ; शुध् c., 2 P or c., प्रतिसं-समा-धा 3 U, (as faults). -*v. i.* सं-वि-अभि-वृध् 1 A, उपचि pass., वृद्धिं-उन्नतिं-उत्कर्षं-इ-या 2 P or गम् 1 P or प्राप् 5 P. श्रेयस्-भद्रतर-*a.* भू. 'has i. ed in health ' अस्ति विशेषः; ' to i. in knowledge ' विद्यां अर्ज् 1 P or अधिगम् or आप्. **-ment**, *s.* वृद्धि *f.*, अभि-प्र-वृद्धिः, उत्कर्षः, उन्नति *f.*, उपचयः, उदयः, अभ्युदयः, आगमः, आधिक्यं, बृंहणं. 2 श्रेयस्त्वं, भद्रतरत्वं, वरीयस्त्वं. 3 शोधनं, प्रतिसमाधानं; ' i. in knowledge ' विद्यागमः, ज्ञानोपचयः; ' i. in health ' विशेषः.

Improvident, *a.* अदीर्घदृष्टि, अदूरदर्शिन्; *See* **Imprudent**. **-ly**, *adv.* असमीक्ष्य, अविमृश्य. **-Improvidence**, *s.* अदीर्घ-अदूर-दृष्टि *f.*

Improvise, *v. t.* अचिंतितपूर्वं-प्राप्तकालं-कृ 8 U or रच् 10.

Imprudent, *a.* अनयज्ञ, अनीतिमत्, अविज्ञ, अविचक्षण, अनीतिज्ञ, अनभिज्ञ, अमतिमत्; अदीर्घ-अदूर-दृष्टि, अविमृश्य-असमीक्ष्य-कारिन्, अदूरदर्शिन्, अविवेकिन्, निर्विवेक, असावधान. 2 (Of acts) अविमृश्यकृत, अनवहित; better by ' i.-ly '. **-ly**, *adv.* अविमृश्य, असमीक्ष्य, अविचार्य, अनालोचितं, अदीर्घदृष्ट्या, निर्विवेकं, अविज्ञवत्, अविवेकितया, साहसेन, सावेगं, ससंरंभं. **-Imprudence**, *s.* अदीर्घ-अदूर-दृष्टि *f.*, अपूर्वचिंता, असमीक्षा-क्षणं, अविमर्शः, अविवेकः, अविचारः. 2 अविनयः, दुर्णीति *f*, दुर्णयः.

Impudent, *a.* धृष्ट, वियात, प्रगल्भ, निर्लज्ज, अविनीत, दुर्विनीत, निस्त्रप, लज्जा-त्रपा-व्रीडाहीन, प्रौढ, प्रतिभावत्. **-ly**, *adv.* धृष्टवत्, प्रगल्भं, निर्लज्जं, वैयात्येन, धार्ष्ट्येन. **-Impudence**, *s.* धृष्टता, धार्ष्ट्यं, वैयात्यं, प्रागल्भ्यं, अविनयः, अलज्जा, निर्लज्जता, प्रतिभा-भानं.

Impugn, *v. t.* प्रत्या-ख्या 2 P, विरुध् 7 U, निरा-कृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* **Contradict**. 2 अपवद् 1 A, विपरीतं वद्, निंद् 1 P, दोषं ग्रह् 9 U.

Impulse, *s.* प्रवर्तनं, प्रणोदनं, प्रवृत्ति *f.*, प्रचोदनं-ना, प्रोत्साहनं-ना; ' sudden i. ' आकस्मिकी प्रवृत्तिः, वेगः, सं-आ-वेगः. 2 हेतुः, कारणं, निमित्तं, प्रयोजनं. **-Impulsive**, *a.* प्रवर्तक, प्रणोदक, प्रोत्साहक, प्रचोदक. 2 आवेगशील, सहसाप्रवर्तिन्, वेगानुवर्तिन्, संरंभिन्; ' pray, don't grow i. ' सहसा-आकस्मिकवृत्त्या कर्मणि प्रवर्तितुं नार्हसि. **-ly**, *adv.* सहसा, आकस्मिकप्रवृत्त्या.

Impunity, *s.* दंडाभावः, दंडमुक्ति *f.* 2 अनपायः, अनपकारः, अक्षति *f.*, अहानि *f.*, अनाशः, अहिंसा, अपीडा; ' with i. (to oneself) ' अपकारं विना, स्वयमक्षतेन, आत्महानिं विना.

Impure, *a.* अशुद्ध, अशुचि, अपवित्र, अनिर्मल, समल, अमेध्य. 2 गर्ह्य, निंद्य, कश्मल, कुत्सित. 3 पांसुल, व्यभिचारिन्. **-ly**, *adv.* अपवित्रं, अशुचिवत्. **-ity**, **-ness**, *s.* अशुचित्वं, अमेध्यता. 2 मलः-लं, अशौचं, कालुष्यं, किट्टं, मालिन्यं, अपद्रव्यं; *See* **Dirt**. 3 गर्ह्यता, निंद्यता. 4 पांसुलता, लांपट्यं, व्यभिचारः.

Impute, *v. t.* आरुह् c., (रोपयति), संबंध् 9 P, क्लृप् c., प्रसंज् c., निक्षिप् 6 P; *See* **Ascribe**. 2 अप-परि-वद् 1 U, आ-अधि-क्षिप्, निंद् 1 P; *See* **Censure**. **-ation**, *s.* (Act) आरोपः-पणं, कल्पना, संबंधः, प्रसंगः; ' i. of a crime ' दोषकल्पना, दोषारोपः. 2 अभियोगः, अभिशंसनं. 3 आरोपः, आ-अधिक्षेपः, दूषणं, अपवादः, कलंकः, परि(री)-वादः; *See* **Calumny**.

In, *prep.* Gen. ex. by loc.; अंतरे, मध्ये, in comp.; with verbs by नि pr. 2 (Denoting instrument, manner, time, direction). ex. by instr.; 'i. great intimacy' महता स्नेहेन; 'i. six days' षडहेन; ' i. a short time ' अचिरेण, अचिरात्; ' i. breadth ' विस्तारेण; ' drives i. a chariot' रथेन याति-चरति; ' i. a joyful mood ' आनंदेन; ' i. order ' क्रमेण, क्रमशः; ' i. small quantities ' अल्पशः; ' i. the same manner ' तद्वत्, तथैव; ' i. as much as ' यतः, यस्मात्, यत्, oft. by abl. or instr. of abstract nouns ; *See* **Because** ; ' i. as much as it arises from ingorance ' अविद्यामूलत्वात्.

Inability, *s.* असामर्थ्यं, दौर्बल्यं, अशक्ति *f.*

Inabstinence, *s.* असंयमः, अनिग्रहः.

Inaccessible, *a.* अगम्य, दुर्गम, दुरासद, दुष्प्राप, दुरारोह, गहन, विषमस्थ.

Inaccurate, *a.* अयथार्थ, अनृत, अतथ्य, अशुद्ध. **-ly**, *adv.* अयथार्थं, अन्यथा.

Inaction, Inactivity, *s.* आलस्यं, अनुद्योगः, निर्व्यापारत्वं, कार्यद्वेषः, औदासीन्यं.

Inactive, *a.* अलस, निर्व्यापार, निरुद्यम, अव्यवसाय; *See* **Idle**; ' to be i. ' उदास् 2 A.

Inadequate, *a.* अक्षम, अयोग्य, असमर्थ, अपर्याप्त, अनुचित, अननुरूप.

Inadmissible, *a.* अग्राह्य, अनुपादेय; ' i. into society ' अपांक्तेय, अपांक्त.

Inadvertent, *a.* अनवधान, प्रमादिन्, प्रमत्त, उपेक्षक, निरवेक्ष, असमीक्ष्य-सप्रमादं-कृत. **-ly**, *adv.* सप्रमादं, निरवेक्षं, अनवधानात्, असमीक्ष्य, असावधानं. **-Inadvertence**, *s.* प्रमादः, उपेक्षा, अनवेक्षा, अनवधानं.

Inalienable, *a.* अविच्छेद्य, अनन्यहार्य.

Inamorata,-Inamorato, *s.* *See* **Lover.**

Inane, *a.* रिक्त, शून्य, अ-निः-सार.

Inanimate, *a.* अ-वि-चेतन, प्राणहीन निर्जीव.

Inapplicable, *a.* अनुपयोज्य, अनुपपन्न, अयोग्य, अनुचित.

Inapplication, *s.* आलस्यं, अनुद्योगः, कार्यनिवृत्ति *f.*, अप्रवृत्ति *f.*, अमनोयोगः, अनभिनिवेशः.

Inapposite, Inappropriate, *a.* अयोग्य, असंगत, अप्रस्तुत, विरुद्ध.

Inappreciable, *a.* अत्यल्प, क्षुद्र.

Inapprehensive, *a.* निःशंक, अकुतोभय, वीतभय.

Inapt, *a.* अपात्र, अयोग्य. **-itude**, *s.* अपात्रता, अयोग्यता. **-ly**, *adv.* अस्थाने, असंगतं.

Inarticulate, *a.* अव्यक्त, अस्पष्ट, अस्फुट, अव्यक्तपद-वर्ण-अक्षर **-ly**, *adv.* अस्पष्टं, अव्यक्तं; गद्गदवाचा.

Inartificial, *a.* अकृत्रिम, सहज.

Inasmuch as, *adv.* यस्मात्, येन, यतः.

Inattentive, *a.* अनवधान, निरपे(वे)क्ष, अनासक्त, उपेक्षक, मंदादर, प्रमत्त, प्रमादिन्, अनवहित, अनिविष्टचित्त, शून्यहृदय. **-ly**, *adv.* सप्रमादं, अनवधानेन, प्रमादतः, असमीक्ष्य, अविमृश्य, निरपेक्षं. **-Inattention**, *s.* अनवधानं, अनपे(वे)क्षा, उपेक्षा, अनादरः, अननुरागः, अमनोयोगः, प्रमादः, शून्यहृदयत्वं.

Inaudible, *a.* अश्राव्य, कर्णागोचर; 'i. weeping' निःशब्दरोदनं.

Inaugurate, *v. t.* अभिषिच् 6 P, अधिकारे निविश् c. 2 प्रति-ष्ठा c. (प्रतिष्ठापयति), संस्कृ 8 U, उपक्रम् c., आरभ् c. (रंभयति). **-ion**, *s.* अभिषेकः, प्रतिष्ठापनं, संस्कारः; उपक्रमः.

Inaurate, *See* **Gild,-ed.**

Inauspicious, *a.* अशुभ, अमंगल, अभद्र, अकल्याण (णी *f.*). **-ly**, *adv.* अशुभं, अशुभलग्ने.

Inborn, Inbred, *a.* सहज, नैसर्गिक-स्वाभाविक (की *f.*), स्वभावज, अंतर्भव.

Incalculable, *a.* अगण्य, संख्यातीत. 2 अमित.

Incandesce, *v. t.* प्र-, ज्वल् 10, उत्-तप् c. **-ence**, *s.* अत्युष्णता, उच्चंडता. **-ent**, *a.* प्रज्वलन, उत्तप्त, अत्युष्ण.

Incantation, *s.* मंत्रः, अभिचारः, योगः, मंत्रप्रयोगः, माया; 'to use i.s' मंत्रैः वशीकृ 8 U or मुह् c., अभिमंत्र् 10 A, अभिचर् c.

Incapable, *a.* अक्षम, असमर्थ, अशक्त, अपर्याप्त, अनुचित, अयोग्य.

Incapacious, *a.* अपृथु, अविपुल, अविशाल, संकट, संबाध.

Incapacitate, *v. t.* शक्तिं हृ 1 P, अक्षमं-अक्षमी-कृ 8 U, अपात्री-अयोग्यं कृ.

Incapacity, *s.* असामर्थ्यं, अशक्ति, *f.*, अनर्हता, अयोग्यता, अपात्रता. 2 मेधाभावः, बुद्धिहीनता.

Incarcerate,-ion, *See* **Imprison.-ment.**

Incarnadine, *v. t.* अरुणीकृ 8 U. **-a.** रक्त, रुधिरताम्र, आताम्र.

Incarnate, *a.* मूर्त, मूर्तिमत्, देहवत्, शरीरिन्, शरीरबद्ध, देहिन्, सशरीर. 2 अवतारिन्, मनुष्यरूपधारिन्, गृहीतदेह, मनुष्यरूपेण अवतीर्ण. **-ion**, *s.* अवतारः; शरीरधारणं, देहग्रहणं, मूर्तिमत्ता, सशरीरता; better by (*a.*); *See* **Embody** also.

Incase, *v. t.* भांडे नि-धा 3 U or निविश् c. 2 पि-धा, आवृ 5 U, आ-परि-वेष्ट् c., परि-आ-च्छद् 10.

Incautious, *a.* असमीक्ष्य-अविमृश्य-कारिन्, साहसिन्. 2 अनवधान, प्रमादिन्, प्रमत्त. **-Incaution**, *s.* प्रमादः, असमीक्षा; *See* **Inattention.**

Incendiary, *s.* गृह-अगार-दाहिन् *m.* **-Incendiarism**, *s.* गृहदाहः.

Incense, *s.* धूपः, तुरुष्कः, पिंडकः, सिह्लः, यावनः (olibanum); यक्षधूपः, सर्जरसः, रालः, सर्वरसः; 'artificial i.' कृतधूपः, कृत्रिमधूपकः. **-v. t.** धूप् 1 P, 10, धूपेन वास् 10. 2 उत्तिज् c., उद्दीप् c., संधुक्ष् 10, क्षुभ् c., कुप् c., प्रकुप् c.; *See* **Enrage.** **-Incensory**, *s.* धूपपात्रं-भाजनं.

Incentive, *s.* प्रलोभनं, प्रचोदनं, प्रवर्तनं, उत्तेजनं, प्रोत्साहनं; प्रेरणं, प्रणोदनं, उद्योजनं. 2 कारणं, निमित्तं, प्रयोजनं, हेतुः. **-a.** प्रवर्तक, प्रचोदक, &c.

Inception, *s.* प्रारंभः, उपक्रमः.

Incertitude, *s.* विकल्पः, शंका, अनिर्णयः.

Incessant, *a.* सतत, अविरत, अनवरत, अविच्छिन्न, अविश्रांत, प्रसक्त. **-ly**, *adv.* अनवरतं, सततं, अजस्रं, अविच्छेदं, अश्रांतं, सर्वदा, प्रसक्तं, निरंतरं, अभीक्ष्णं.

Incest, *s.* व्यभिचारः, अगम्यगमनं; oft. by गमनं; 'i. with a mother, sister &c.' मातृगमनं; स्वसृगमनं, &c. **-uous**, *a.* अगम्यगामिन्, व्यभिचारिन्; 'i. son' मातृगामिन् *m.*

Inch, *s.* अंगुलः; 'not even an i.' न रेखामात्रमपि, नाल्पमपि; 'by i. es' अल्पाल्पं, अल्पशः.

Inchastity, *s.* व्यभिचारः; असतीत्व, पांसुलता (of women).

Inchoate, *a.* उपक्रांत, अचिरमारब्ध. 2 असंपूर्ण. **-ion**, *s.* उपक्रमः, प्रारंभः.

Incident, *s.* वृत्तं, वृत्तांतः, व्यतिकरः, प्रसंगः, संगति *f.*, घटना. 2 उपाख्यानं, प्रासंगिककथा. **-al**, *a.* प्रासंगिक-आनुषंगिक-आगंतुक-आकस्मिक-आपतिक-नैमित्तिक- (की *f.*), आहार्य, आगंतु, अप्रस्तुत, अप्रकृत; 'i. cause' आगंतुकारणं, कार्यनिमित्तं. **-ally**, *adv.* प्रसंगतः, प्रसंगवशात्, यदृच्छया, कथाप्रसंगेन, कार्यकारणतः, दैवात्, आगंतुकतया.

Incinerate, *v. t.* भस्मसात्कृ 8 U, भस्मीकृ.

Incipient, *a.* आरब्ध, उपक्रांत; प्रथम, अग्र, पुरोगामिन्.

Incise, *v. t.* छिद् 7 P, कृत् 6 P, तक्ष् 1, 5 P; *See* **Cut.** **-ion**, *s.* छेदः, कर्तनं, क्षतं, भेदः.

Incite, *v. t.* प्रवृत् c., प्रोत्सह् c., प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., उत्तुज् 10; (anger &c.) उद्दीप् c., उत्तिज् c., संधुक्ष् 10. 2 आ-समा-श्वस् c. **-ation, -ment**, *s.* प्रोत्साहनं, प्रचोदनं प्रवर्तनं, प्रेरणं, उत्तेजनं. 2 **Incentive**, q. v.

Inclement, *a.* निष्ठुर, कर्कश, निर्घृण, निर्दय. 2 (Of weather) उग्र, कठोर, रूक्ष, असौम्य, तीक्ष्ण, तीव्र, प्रचंड. 3 वातवृष्टिमत्. **Inclemency**, *s.* अदया, अकारुण्यं, रूक्षता, कटुता.

Incline, *v. i.* नम् 1 P, अव-आ°-, नम्रीभू 1 P. 2 प्रवण-*a.* भू; 'favourably i. ed towards her by (her) penance' तपसा तत्प्रवणीकृतः (K. iv. 42); gen. ex. by शील in comp.; 'i. ed to favour' अनुग्रहशील; or by इष् 6 P, वांछ् 1 P; by मनस् or काम with inf. form, or by desid. forms. **-***v. t.* आ-अव-नम् c. (नमयति), आवृज् 10, नम्रीकृ. 2 प्रवणीकृ, प्रवृत् c., नि-उप-युज् 10, प्रोत्सह् c., प्रेर् c.; *See* **Incite.** **-***s.* उत्सर्पिणी or अवसर्पिणी भूमिः, प्रवणा भूमिः. **-ation**, *s.* प्रवृत्ति *f.*, प्रवाहः, प्रावण्यं; gen. ex. by शीलता-त्वं or आलुता-त्वं in comp. or by desid. forms; 'i. to fall' पतनशीलता, पतयालुता, पिपतिषा. 2 भावः, अभिलाषः, इच्छा, कामः, छंदः, छंदस् *n.*, रुचि *f.*, चित्तप्रवृत्तिः; 'following one's own i.' कामचारिन्, स्वच्छंद, स्वैरवृत्त, कामचार, स्वैर, स्वैरिन्. 3 आ-, नति *f.*; 'i. of a planet's orbit to the ecliptic' परमापमः. **-ed**, *a.* नत, आवर्जित. 2 प्रवर्तित, प्रवण, in comp., शील or आलु in comp. or by desid. forms.

Inclose, *v. t.* *See* **Enclose.**

Include, *v. t.* परिग्रह् 9 P, अंतर्गण् 10, समाविश् c., अंतः कल् 10, परिसमाप्-अभिव्याप्- 5 P, प्रतिसं-हृ 1 P; gen. ex. by अंतर् with भू-गम्-पत् 1 P or वृत् 1 A (with nom. of what is included). 2 आ-धा 3 U, धृ 10, आ-दा 3 A, गर्भ in comp. **-ed**, *a.* अंतर्भावित, अंतर्गणित; परिगृहीत, अंतर्भूत, अंतर्गत, अंतर्वर्तिन्, समाविष्ट, सहित, अवांतर, गर्भित, अभिव्याप्त; गर्भ in comp.; 'i. space' अंतरालः-लं, अभ्यंतरं; 'those persons i.' तावतान् समाकलय्य, तैस्तैः सह. **-ing, -Inclusive**, *a.* परिग्राहिन्, अभिव्यापक; oft. by सह, or सहित *a.*; 'both days i.' उभाभ्यामपि दिनाभ्यां सह, उभयदिनसहितं; 'then enter a hermit with two others (three i. himself)' ततः प्रविशत्यात्मनातृतीयो वैखानसः (S. 1). **-Inclusively**, *adv.* साकल्येन, अशेषेण, सहितं. **-Inclusion**, *s.* अंतर्भावः, अंतर्गणना-नं, समावेशः-शनं, परिग्रहः, अभि-, व्याप्ति *f.*, प्रतिसंहारः.

Incognito, *a.*, प्रच्छन्न, अलक्षित, प्रच्छन्न-गुप्त-रूप. **-***adv.* प्रच्छन्नं, गुप्त-अलक्ष्य-रूपेण, निभृताकारेण.

Incognizance, *s.* अनभिज्ञानं, अप्रतिपत्ति *f.* **-Incognizant**, *a.* अनभिज्ञ, अज्ञ.

Incoherent, *a.* असंगत, असंबद्ध, अनन्वित. **-ly**, *adv.* असंगतं, अनन्वयं. **-Incoherence**, *s.* असंबंधः, असंगति *f.*, अनन्वयः, असंदर्भः.

Incombustible, *a.* अदाह्य, दुर्दाह्य.

Income, *s.* आयः, उदयः, आगमः, धनागमः, अर्थप्राप्ति *f.*, धनोदयः.

Incommensurable, *a.* असमपरिमाण. असमान, असदृश. 2 अपर्याप्त.

Incommensurate, *a.* अतुल्य, असमान, अननुरूप; अपर्याप्त, न अलं, असदृश.

Incommode, *v. t.* पीड् 10, क्लिश् 9 P, आयस् c.; 'don't i. yourself' अलमायासेन. **Incommodious**, *a.* अनुपयुक्त, अयोग्य. 2 क्लेश-पीडा-कर (री *f.*), असुखद, उपरोधिन्.

Incommunicative, *a.* वाग्यत, मितवाच्, मितकथ, भाषणविरक्त, संलापविमुख (खी *f.*).

Incomparable, *a.* अतुल, अनुपम, अद्वितीय, निरुपम, अप्रतिम, अप्रतिरूप, अनुपमेय.

Incompassionate, *a.* निर्घृण, क्रूर, नृशंस, निर्दय; *See* **Cruel.**

Incompatible, *a.* *See* **Inconsistent.**

Incompetent, *a.* अशक्त, असमर्थ, अयोग्य, अकर्मक्षम, अनलंकर्मीण. **-ly**, *adv.* अयोग्यं, अक्षमवत्. **-Incompetence, -cy**, *s.* अक्षमता, असामर्थ्यं, कार्याक्षमता, अपर्याप्ति *f.*

Incomplete, *a.* अपूर्ण, असमाप्त, अनिष्पन्न, सावशेष. 2 विकल, न्यून, लुप्त, हीनांग, न्यूनावयव, लुप्तावयव, असमग्र. **-ly**, *adv.* अपूर्णं, सावशेषं, अपर्याप्तं; वैकल्येन, असमस्तं. **-ness**, *s.* अपूर्णता, असमाप्ति *f.* 2 वैकल्यं, न्यूनता.

Incomplex, Incomposite, *a.* अमिश्रित, असंकीर्ण, शुद्ध.

Incomprehensible, Inconceivable, *a.* अज्ञेय, अगम्य, दुर्बोध, अचिंत्य, अविभाव्य, अग्राह्य, अबोधगम्य, अतर्क्य, अधीगम्य, बोधातीत, इंद्रियातीत, अतींद्रिय, इंद्रियागोचर.

Inconclusive, *a.* अनिर्णायक, अप्रमाण, अनिश्चायक. **-ly**, *adv.* अप्रमाणं, प्रमाणं विना, अनिर्णायकत्वेन.

Incongruous, *a.* असंगत, विरुद्ध, असंबद्ध, अनुपपन्न. **-ness, -Incongruity**, *s.*

विरोधः, असंगति *f*., अनुपपत्ति *f*.; oft. by क्ष-क्ष; *See* **Congruous.**

Inconsequent, *a*. अप्रयुक्त, अप्रयोगिन्, अयौक्तिक, न्यायविरुद्ध, अयुक्तिसिद्ध.

Inconsiderable, *a*. अल्प, क्षुद्र, तुच्छ. 2 अल्पार्थ.

Inconsiderate, *a*. असमीक्ष्य-अविमृश्य-कारिन्, अविवेकिन्, अविमर्शिन्, साहसिन्, प्रमत्त, असावधान; 'an i. deed' साहसं. **-ly,** *adv*. अविमृश्य, असमीक्ष्य, अविचार्य, सहसा, निर्विवेकं, सरभसं, अनालोचितं, निरवधानं, प्रमादतः, साहसेन. **-ness,** *s*. अविमर्शः, अविवेकः, असमीक्ष्यकारित्वं, अविचारणा, असमीक्षा.

Inconsistent, *a*. असंगत, विरुद्ध, विरोधिन्, असंबद्ध, अनन्वित, विसंवादिन्, विगीत, विपरीत; परस्पर विरोधिन्-विरुद्ध, परस्परपराहत, संकुल, पूर्वापरविरुद्ध, क्लिष्ट; oft. ex. by विसंवद् 1 U, विरुध् pass., विप्रवद्; *See* **Consistent** also. **-ly,** *adv*. विरोधेन, विरुद्धं, विसंवादेन, परस्परविरुद्धं.

Inconsistence,-cy, *s*. असंगति *f*., असंबंधः, अनन्वयः, विरोधः, वैपरीत्यं, विभेदः, असादृश्यं, विसंवादः, विप्रतिपत्ति *f*., परस्परविरोधः, विरोधोक्ति *f*.

Inconsolable, *a*. अशरण, निर्विनोद, शोकाकुल.

Inconsonant, *a*. *See* **Inconsistent.**

Inconspicuous, *a*. अप्रकाश, अस्पष्ट. 2 अप्रधान.

Inconstant, *a*. अस्थिर, अदृढ; चल, चंचल; तरल, लोलमति, चलचित्त. **-Inconstancy,** *s*. अस्थैर्यं, तरलता, चंचलत्वं; *See* **Fickle. -ness.**

Incontaminate, *a*. अकलंक, अदूषित, पवित्र.

Incontestable, *a*. निर्विवाद, अविचार्य, अप्रत्याख्येय, निःसंदेह, सुनिश्चित.

Incontinent, *a*. असंयत, अवशिन्, अजितेंद्रिय, व्याभिचारिन्. **-Incontinence,** *s*. असंयमः, अदमः, अयमः, अजितेंद्रियत्वं, व्यभिचारः, लांपट्यं, इंद्रियादमः.

Incontrovertible, *a*. अप्रत्याख्येय, निर्विवाद, अबाध्य, असंदिग्ध.

Inconvenient *a*. अनुपयुक्त, अनुचित, अपर्याप्त, अयोग्य; अहित, असुखकर, क्लेशकर (री *f*.); क्लेशद, दुःखावह, उपरोधक, दुःखद. **-Inconvenience,** *s*. अयोग्यता, अनौचित्यं, अनुपयोगः, अपर्याप्ति *f*. 2 क्लेशः, असुखं, उपरोधः, पीडा, आयासः, आयास or क्लेश-हेतु. or कारणं. **-*v*. *t*.** उप-रुध् 7 U, बाध् 1 A, पीड् 10; *See* **Convenience.**

Inconversant, *a*. अनभिज्ञ, अविज्ञ; अनभ्यंतर.

Incorporate, *v*. *t*. संमिश्र् 10, संहन् 2 P, संयुज् 7 U, 10, संसृज् 6 P; संश्लिष् c., एकीकृ 8 U. **-*v*. *i*.** एकीभू, संसृज्-संयुज्- pass. **-ion,** *s*. संयोगः, संश्लेषः, संमिश्रणं, संसर्गः.

Just, *a.* (Of persons) न्यायवर्तिन्, न्यायिन्, न्यायशील-पर, साधुवृत्ति, ऋजु, विमलात्मन्, निष्कपट, निर्व्याज, शुचि, न्यायपरायण, धार्मिक-सात्त्विक (की *f.*). 2 न्याय्य, धर्म्य, यथान्याय, न्यायानुसारिन्, सत्य, तथ्य, योग्य, युक्त, यथार्थ, उचित, सम्यच्. 3 सम, समवृत्ति, निःपक्षपात, समदर्शिन्. 4 संपूर्ण, अविकल, अन्यून. -*adv.* अंतिकं-के, समीपं, निकटे. 2 प्रायः, प्रायशः; oft. by भूयिष्ठ, कल्प, प्राय in comp., or by desid.; *See* **About.** 3 सद्यः, अचिरादेव, नातिचिरात्, प्राक्; oft. by एव, मात्र in comp.; 'j. now' अधुनैव; 'it is j. proper' उचितमेव; 'j. dead' सद्योमृत; 'j. born' जातमात्र. 4 युक्तं, सम्यक्, यथार्थं, यथावत्. 5 तावत् 'j. come here' इतस्तावदागम्यतां; 'j. so' एवमेव, तथैव, एवमेतत्, अथ किं, युक्तं, युज्यते; 'j. as' 'j. like' इव, यद्वत्, or निर्विशेष in comp.; 'stay j. as in your own house' स्वगृहनिर्विशेषमत्र वस; 'bred j. like one's own children' स्वपुत्रनिर्विशेषं संवर्धित. कष्टेन, कृच्छ्रेण. -ly, *adv.* निर्व्याजं, निर्व्यलीकं, सारल्येन. 2 यथान्यायं, न्यायेन, धर्मेण, न्यायतः, धर्मतः, यथाधर्मं, न्यायानुसारेण, सम्यक्, यथावत्. 3 सत्यं, अवितथं, यथार्थं, अर्थतः, यथावत्, यथातथं, यथार्हं, उपपन्नं, यथोचितं, युक्तं, स्थाने, यथायोग्यं, अंजसा. -ness, *s.* न्याय्यता, यथार्थता, योग्यता, औचित्यं, युक्तता; साम्यं, पक्षपातः. -**Justice,** *s.* धर्मः, न्यायः, नयः, नीति *f.*, न्यायिता, ऋजुता, साधुता. 2 न्याय्यता, युक्तता, योग्यता, यथार्थता, सत्यता, युक्ति *f.*, याथार्थ्यं. 3 साम्यं, समवृत्तित्वं, अपक्षपातः, सर्वसमता. 4 न्यायदंडः, योग्य-दंडः-शिक्षा, अपराधानुरूपो दंडः. 5 धर्माध्यक्षः, प्राड्विवाकः; *See* **Judge**; 'court of j.' न्याय-धर्म-सभा, व्यवहारमंडपः. -ship, *s.* धर्माधिकारः, न्यायाध्यक्षत्वं. -**Justiciary,** *s.* **Judge,** q. v. -**Justify,** *v. t.* न्याय्य -*a.* इति प्रति-पद् c. or प्रघुष् c.; शुध् c., दोषं निराकृ 8 U or निवृ 10 or शुध् c. or मृज् 2 P, दोषात् मुच् 6 P or c. -able, *a* निवार्यदोष, शोधनीय, शुद्धिक्षम. -ication, *s.* शुद्धि *f.*, शोधनं, दोषशुद्धिः, दोषमुक्ति *f.* -मार्जना, दोषप्रतीकारः, विमोचनहेतुः, अपव्यप-देशः. -er, *s.* शोधकः, दोषनिवारकः.

Justle, *v. See* **Jostle.**

Jut, *v. i.* प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. -*s.* प्रलंबनं, आभोगः, प्रलंबः.

Jute, *s.* शणं.

Juvenescent, *a.* तरुणीभवत्.

Juvenile, *a.* तरुण, अल्पवयस्क, युवन्, कौमार (री *f.*), अभिनववयस्. -ity, *s.* यौवनं, तारुण्यं, कौमारं, यौवनावस्था, तारुण्यभावः.

Juxtapose, *v. t.* संनि-धा *c.* -ition, *s.* सान्निध्यं, संनिधिः, संस्थिति *f.*, सन्निकर्षः, संसर्गः, नैकट्यं, उपश्लेषः.

K.

Kaw, *v. i.* कै 1 P, ध्वां(ध्रां)क्ष् 1 P. -*s.* काकरवः-रुतं

Keel, *s.* नौतलं.

Keen, *a.* तीक्ष्ण, शित, निशित, शात, निशात, शितधार, तीक्ष्णाग्र; तीव्र, तिग्म, प्रखर. 2 व्यग्र, उच्चंड, उत्सुक, उत्कट, कुतूहलिन्; *See* **Eager.** 3 सूक्ष्म, कुशाग्र-धीय, विदग्ध. 4 उग्र, कटु, अरुंतुद, मर्मस्पृश्, तिग्म (words); 'k. words' वागिषुः, वागसिः; 'k.-eyed' 'k.-sighted' सूक्ष्ममति, तीक्ष्ण-सूक्ष्म-बुद्धि, कुशाग्रमति-बुद्धि, दूरदर्शिन्. -ly, *adv.* तीक्ष्णं, तीव्रं, उग्रं, प्रखरतया. -ness, *s.* तीक्ष्णता, तीव्रता. 2 व्यग्रता, उच्चंडता, कौतूहलं, अत्युत्साहः. 3 सूक्ष्मता, विदग्धता, कुशाग्रमतित्वं, बुद्धिसूक्ष्मता. 4 कटुता, तिग्मता, उग्रता.

Keep, *v. t.* रक्ष् 1 P, पा 2 P, पा c. (पालयति), गुप् 1 P, त्रै 1 A, अव 1 P. 2 धृ 1 P, 10; धा 3 U, नि-आ-°, निविश् c., स्था c. (स्थापयति), न्यस् 4 U. 3 रुध् 7 U,

नि-अव-उप-°, धृ, बंध् 9 P, निवारू 10, प्रति-नि-षिध् 1 P, नि-सं-यम् 1P. 4 (As cattle) निरुप् 10, पा c., रक्ष्. 5 (As a secret) न प्रकाश् c. or अंज् 7 P, or भिद् 7 P गुप्, रक्ष्. 6 (Observe) आचर् 1 P, अनु-ष्ठा 1 P, वि-धा, कृ, सेव् 1 A, भज् 1 U, आश्रि 1 U, आ-स्था 1 U, आ-अव-लंब् 1 A. 7 शुभ् c., निर्वह् c., अप-वृज् 10, पूर् 10, तॄ 1 P, साध् 5 P or c., पा c. (पालयति) (as a promise). 8 भृ 1 P, 3 U, पुष् c., पा c.; (as servants) व्यापृ c., सेवायां नियुज् 7 A, 10, वेतनं-भृतिं-दा 3 U; 'to k. bad hours' वेलातिक्रमेण स्वप् 2 P; 'to k. in mind' हृदये-मनसि-कृ, अव-धृ; 'k. company with' संगम् 1 A, सं-इ 2 P, सह वस् or चर् 1 P, संचर्; *See* Associate. —*v. i.* स्था, वृत् 1 A, आस् 2 A, न विरम् 1 P or निवृत् or विश्रम् 4 P, with pres. part. (when followed by p. p. &c.); 'he kept weeping' रुदन्नास्त, रुदन्नोपरराम; 'k. going up and down' आरोहावरोहं कुर्वन्नास्त. 2 संसंज्-संश्लिष्-अनुबंध्- pass., लग् 1 P. 3 वस् 1 P. —*s.* रक्षा-क्षणं, पालनं, गुप्ति *f.* 2 अवस्था, दशा, स्थिति *f.*, वृत्ति *f.*, भावः. 3 भृति *f.*, पोषणं. 4 दुर्गं, कोटः. 5 कारावंधनं, निरोधः, गुप्तिः. —**back, —from,** निग्रह् 9 P, संयम्, संहृ 1 P, निवृ c.; (*v. i.*) निवृत्, विरम्. —**in,** गुह् 1 U, आच्छद् 10, अंतर्धा, संवृ 5 U. —**off,** निवारू, निवृत् c., निरुध्, प्रति-वि-हन् 2 P, प्रतिकृ, व्यप-ऊह् 1 U, परिहृ 1 P; (*v. i.*) निवृत्, विरम्; *See* **Cease.** —**on,** *See* **Keep** (*v. i.*) above; प्रवृत्, प्रारब्धं सं-पद् c. —**out,** व्यावृत् c., प्रतिषिध्; *See* **Exclude.** —**to,** अनुवृत्, अनुसृ 1 P, अनुरुध् 4 A, परिरक्ष्, परिपा c. (पालयति); *See* **Keep** (*v. t.*) above. —**under,** वशीकृ, वशं नी 1 P, स्वायत्तीकृ. —**up,** प्रवृत् c., पा c.; (*v. i.*) जागृ 2 P; न दम् or श्रम् 4 P. —**er,** *s.* रक्षकः, पालकः, रक्षितृ *m.*, रक्षिन् *m.*, गोप्तृ *m.*, पः-पालः in comp. —**ing,** *s.* रक्षा, अवेक्षा, पालनं, गुप्तिः. 2 सादृश्यं, अविरोधः, संगति *f.*, आनुरूप्यं; 'in k. with' अनुरूप-संवादिन्-सदृश-योग्य-*a.*

Keep-sake, *s.* स्मृतिदानं; स्नेहाभिज्ञानं.

Keg, *s.* काष्ठभांडं.

Kelter, *s. See* **Order.**

Ken, *s.* गोचरः-रं, विषयः; नयनविषयः-पथः, बुद्धिविषयः. —*v. t.* दूरादालोक् 1 A, 10 or ईक्ष् 1 A or दृश् 1 P. 2 परि-ज्ञा 9 U, अव-गम् 1 P.

Kennel, *s.* श्वशाला, श्वगृहं, कुक्कुरालयः. 2 श्वगणः. 3 जलमार्गः, प्रणालः-ली. —*v. i.* श्वगृहे वस् 1 P.

Kerchief, *s.* आवरणं, वेष्टनं, आभरणं, 'hand-k.' हस्तप्रावारकः, नक्तकः; 'neck-k.' ग्रीवावेष्टनं, कंठपटं.

Kernel, *s.* बीजं, गर्भः, अष्ठि *f.*, अष्ठील, फलबीजं-गर्भः, सारभूतं द्रव्यं. 2 मध्यः-ध्यं, गर्भः, उदरं, हृदयं, अभ्यंतरं. —**ly,** *a.* बीजाकार, बीजपूर्ण.

Kestrel, s. See Castrel.

Kettle, *s.* कटाहः, पिठरः-रं, स्थाली, उखा, कुंडं; 'k.-drum' भेरि-री *f.*, दुंदुभिः डिंडिमः.

Key, *s.* अंकुशः, कुंचिका, ताली, उद्घाटकः-कं. 2 व्याख्या, निर्वचनं, टीका; 'k.-hole' कुंचिकाछिद्रं; 'k.-stone' संधान-संयोग-प्रस्तरः.

Kibe, *s.* पादस्फोटः, विपादिका.

Kick, *v. t.* पादेन-लत्तया-प्रहृ 1 P or तड् 10 or आ-हन् 2 U, लत्ताप्रहारं कृ 8 U; पादं-पार्ष्णिं-खुरं-क्षिप् 6 P. —*s.* पाद-लत्ता-प्रहारः पादाघातः, पार्ष्णि-खुर-क्षेपः, खुराघातः.

Kid, *s.* छागशावः-शावकः, अजशिशुः, अजपोतः, छागशिशुः. 2 काष्ठभारः.

Kidnap, *v. t.* (बालकं-दासं) चुर् 10, अपहृ 1 P, or बलाद् हृ. —**per,** *s.* बालस्तेयकृत् *m.* —**ping,** *s.* बालस्तेयं, बालापहारः.

Kidney, *s.* वृक्कः-क्का, गुर्दः; 'k.-bean' मुद्गः, माषः, शिंबा, शिंबिकः-का.

Kill, *v. t.* हन् 2 P, व्यापद् c., मृ c., सूद् 10, निषूद्, नश् c., प्र-मी 9 U or c. (मापयति), हिंस् 7 P, तृह् 6, 7 P, वि-शस् 1 P, पंचत्वं-परलोकं गम् c. (गमयति) or नी 1 P; शद् c. (शातयति), निपत् c., नि-कृत् 6 P, अप-नी, क्षि 5 P or c. —**er,** *s.* हंतृ *m.*, घातकः, नाशकः, निषूदनः, अंतकः; gen. हन् or घातिन् in comp.; 'k. of Vritra' वृत्रहन्; 'k. of Madhu' मधुसूदनः. —**ing** *s.* हत्या, वधः, हननं, घातः, मारणं, नाशः निषूदनं, हिंसा-सनं, आलंभः, विशसनं, व्यापादनं, प्रमापणं, निबर्हणं, निकारणं, विशारणं, प्रवासनं, परासनं, संज्ञपनं, निर्ग्रंथनं, निस्तर्हणं, क्षणनं, परिवर्जनं, निर्वापणं, प्रमथनं, क्रथनं, उज्जासनं, पिंजः, विशरः, उन्माथः.

Kiln, *s.* पाकपुटी, आपाकः.

Kimbo, *a.* वि-अव-भुग्न, वक्र, कुटिल.

Kin, *See* **Kindred;** 'of k.' सजातीय, सगोत्र. 'Kith and k.' आप्ताः (pl.)

Kind, *a.* दयालु, सदय, कृपाकुल, कृपालु, अनुकंपिन्, सानुकंप, सकरुण, करुणात्मन्, दयाकरुणा-शील, करुणार्द्र, दयार्द्र, स्निग्ध, कृपा-दया-घृणा-वत्, कारुणिक (की *f.*); प्रियकर (री *f.*), हित, प्रियैषिन्, हितैषिन्, हितकाम, हितबुद्धि, उपकार-पर-शील, उपकारिन्, सुहृदय, अनुकूल, सुशील, प्रसन्न, प्रीत. 2 मधुर, प्रिय; 'k. to the poor' दीनानुकंपिन्, दीनवत्सल; 'k. office' उपकारः; 'k. act'

सुकृतं; 'k. words' प्रियवचनं; 'speaking k. words' प्रियंवद, प्रियवादिन्; 'k. present' प्रीतिदानं. —s. जाति f., गणः, वर्गः. 2 विशेषः, भेदः, प्रकारः, जातिः, रूपं, विधा, in comp.; 'of many k. s' बहुविध; 'of various k. s' विविध, नानारूपविध, नाना ind.; 'of this k.' एवंविध, इत्थंरूप; 'of all k. s' सर्वप्रकार; 'Jati is a k. of flower' जातिः कुसुमविशेषः-भेदः. -ly, a. सौम्य, मृदु, कोमल, स्निग्ध, प्रिय. 2 अनुकूल; समानशील. —adv. सदयं, सकरुणं, दयया, कृपया, प्रीत्या, सस्नेहं, सानुकंपं, सानुग्रहं; प्रियं, हितेच्छया, सुशीलवत्. सुजनवत्; 'speaking k.' प्रियवादिन्; 'k. disposed' हितबुद्धि, अनुरक्त. -ness, s. प्रसादः, अनुग्रहः, कृपा, दया, अनुकंपा, करुणा, प्रीति f., स्नेहः, कृपालुता, दयालुता, हितेच्छा, कृपाशीलता, सुशीलं, सौजन्यं, प्रेमन् m. n., आनुकूल्यं. 2 उपकारः, उपकृतं-ति f., प्रियं, सुकृतं-तिः, हितं. —Kindliness, s. सौम्यता, स्निग्धता, सौजन्यं, सुशीलता.

Kindle, v. t. प्र-उत्-सं-दीप् c., इंध् 7 A, ज्वल् c., तप् 1 P or c. 2 उत्तिज् c., संधुक्ष् 10, प्रोत्सह् c.; प्रकुप् c., रुष् c.; 'with glances k. ed with anger' क्रोधेद्धैर्दृष्टिपातैः (Rat. 1). —v. i. ज्वल् 1 P, दीप् 4 A, तप् 4 A.

Kindred, a. सजातीय, सगोत्र, सनाभि, सवर्ण, सवंशीय, सकुल्य, संबंधीय. 2 समान, समतुल्य-गुण, सधर्मन्, अनुगुण. —s. बंधुता, ज्ञातित्वं, ज्ञातिभावः, सगोत्रता, सजातित्वं, संबंधः, सपिंडता. 2 (Relatives) बंधवः, ज्ञातयः, बांधवाः, सगोत्राः, सकुल्याः, गोत्रजाः, संबंधिनः (pl.); बंधुजनः, बंधु-ज्ञाति-वर्गः, बंधुबांधव-गणः.

Kine, s. pl. of **Cow,** q. v.

Kinematics, s. गतिशास्त्रं.

King, s. राजन् m., नृपः, नरपतिः, नृपतिः, भूपतिः, भूपः, भूपालः, नरेंद्रः; and comp. of ईशः, अधीशः, पतिः, इंद्रः, पः, पालः, भृत् or भुज् with 'Man' and 'Earth,' q. v. अवनीपः, क्षोणीपालः, भूभृत्, महीभुज्, क्षितिपतिः; 'supreme or great k.' महाराजः, अधिराजः, सम्राज्, अधीश्वरः, मंडलेश्वरः; 'k. of k. s' राजराजः, राजाधिराजः, सार्वभौमः, चक्रवर्तिन् m. 'k. of beasts' मृगेंद्रः, मृगाधिपः, पशुपतिः; 'k.-craft' राजनीति f., -नयः, राज्यचातुर्यं; 'k.'s-evil' गंडमाला. -dom, s. राज्यं. राष्ट्रं, विषयः. 2 आधिपत्यं, ऐश्वर्यं, प्रभुत्वं, स्वामित्वं. 3 जाति f., वर्गः, गणः; 'animal k.' प्राणिवर्गः-जातिः. -less, a. अराजक, अनायक, राज-नृप-हीन. -like, -ly, a. राजकीय. 2 राजानुरूप, राजयोग्य, राजार्ह, राजसदृश (शी f.), नृपोचित, राज in comp. -ship, s. राजत्वं, प्रभुत्वं, ऐश्वर्यं, आधिपत्यं, नृपत्वं, राजपदं, राजाधिकारः.

Kinsfolk, *See* **Kindred** (*s.*).

Kinsman, s. बंधुः, बांधवः, ज्ञातिः, सकुल्यः, सजातिः-तीयः, सगोत्रः, सनाभिः, गोत्रजः, बंधुजनः.

Kirk, s. *See* **Church.**

Kismet, s. *See* **Fate.**

Kiss, v. t. चुंब् 1 P, निस् 2 A; 'k. the lip' अधरं पा 1 P, अधररसं पा; 'k. on the head' शिरसि आ-सम्-उप-घ्रा 1 P. —s. चुंबनं, चुंबितं, अधरपानं. -er, s. चुंबकः.

Kit, s. उपकरणसमुदायः, उपस्करः, उपकरणसामग्री, संभारः. 2 महाकुपी. 3 लघुसारंगी.

Kitchen, s. महानसं, रसवती, सूदशाला, पाकशाला-स्थान-गृहं; 'k.-garden' शाकशाकिनं, शाकशाकटं, शाकवाटिका; 'k.-maid' पाकचेटी; 'k.-work' पाककार्यं, पाकनिष्पत्ति f.; 'superintendent of the k.' पौरोगवः.

Kite, s. चिल्लः-ल्ला, आतायि(यि)न् m. 2 चिल्लाभासः, चिल्लासदृशं क्रीडनकं.

Kitten, s. मार्जारशावः-वत्सः-शिशुः.

Kittle, a. संशयस्थ, संदिग्ध. —v. t. कुतकुतयति (D.).

Kleptomania, s. चौर्यरुचि f.

Knab, v. t. दंश् 1 P, दंतैः ग्रह् 9 U or धृ 1 P.

Knack, s. कौशलं, चातुर्यं, वैदग्ध्यं, पाटवं, हस्त-कौशलं-लाघवं; *See* **Skill.** 2 क्रीडनकं, क्रीडावस्तु-द्रव्यं.

Knag, s. ग्रंथिः, पर्वन् n. 2 **Peg,** q. v. -ged -gy, a. ग्रंथिल, पर्ववत्.

Knap, s. **Knob,** q. v. 2 उन्नतभूभागः, उत्सेधः —v. i. **Snap,** q. v.

Knar, Knarl, s. काष्ठग्रंथि f.

Knave, s. धूर्तः, कितवः, जाल्मः, वंचकः, शठः, प्रतारकः, कूटकारः, दांभिकः. -ish, a. ध कितव, शठ, जाल्म, वंचक, प्रतारक, धूर्तशी कपटिन्. -ishly, adv. सकपटं, सव्याजं, शठवत्, धूर्ततया. -ishness, -ry, s. धूर्तता, शाठ्यं, कैतवं, माया, व्याजः, छलं, कपटं.

Knead, v. t. (कराभ्यां) मृद् 9 P or c., स पीड् 10, चूर्ण् 10, पिष् 7 P. -ing, s. मर्द पीडनं; 'k.-trough' द्रोणि-णी f.

Knee, s. जानु n., ऊरुपर्वन् n., अष्ठीवत् m. n ऊरुसंधिः; 'go or fall on the k. s' ज नुभ्यां (अवनौ) गम् or पत् 1 P; 'k.-dee जानुदघ्न (घ्नी f.), -द्वयस (सी f.), -म (त्री f.); 'k.-pan' जानुफलकं.

Kneel, v. i. जानुभ्यां (अवनौ) गम् or 1 P or नम् 1 P, (क्षितितले) जानुनी धा 3 U or न्यस् 4 U or निविश् c. or नम्

Knell, s. प्रेतघंटा.

Knick-knack, s. क्रीडनकं, क्रीडाद्रव्यं-व

Knife, *s.* कर्तरिका, छुरिका, छुरी, कृपाणी, कृपाणिका, असिपुत्री-पुत्रिका, शस्त्री, असिधेनुः-नुका.

Knight, *s.* सादिन् *m.*, योधः, भटः.

Knit, *v. t.* सं-,ग्रंथ् 9 P, सिव् 4 P, विसिव्. 2 संबंध् 9 P, सयुज् 7 U, 10, संश्लिष् c., व्यतिषंज् 1 P, संहन् 2 P; व्यतिषजति पदार्थान् (Mal. 1) 'k. s objects together'; 'k. the eyebrows' भ्रुकुटिं बंध्, भ्रुवौ संकुच् 1 P or भिद् 7 P; *See* Frown. -*a.* ग्रथित, स्यूत, संश्लिष्ट, व्यतिषक्त; 'well-k.' संहत, सुसंहत, दृढसंधि. -ting, *s.* सूत्रश्लेषः-ग्रथनं; 'k.-needle' सूचिः-सूचि-ची *f.*

Knob, *s.* पिंडः, गंडः; ग्रंथिः, पर्वन् *n.*, संधिः (in wood). -bed, -by, *a.* सपिंड, पिंडिन्, ग्रंथिल, सगंड.

Knock, *v. t.* समा-आ-हन् 2 U, तड् 10, प्रहृ 1 P; 'k. on the head' मस्तकं तड्, मस्तकाघातेन व्यापद् c.; (fig.) क्षोभीकृ 8 U, विकलीकृ, भंज् 7 P. -*v. i.* द्वारं तड् or प्रहृ. -*s.* आघातः, अभिघातः, प्रहारः, ताडनं, पातः, हति *f.*; 'k. with a stick' वेत्राघातः; 'k. with the fist' मुष्टिघातः-प्रहारः. -against, अभि-प्रति-आ-हन्, संघट्ट् 1 A, अभिसं-पत् 1 P; 'k. ed her head against a rock' दृषदं शीर्षेण आजघ्ने. -down, नि-अव-पत् c., आघातेन-प्रहारेण-नि-पत् c. or भ्रंश् c. -off, सत्वरं-लघु-संपद् c. or साध् 5 P. 2 विरम् 1 P, निवृत् 1 A. -out, प्रहारेण निर्गम् c. (गमयति) or निः-सृ c. or बहिष्कृ 8 U; 'k. out the brains' मस्तिष्कं निष्पिष् 7 P. -up, खिद् c., आयस् c., अवसद् c., श्रम् c. or क्लम् c. (श्र-क्ल-मयति); (*v. i.*) श्रम् 4 P, क्लम् 1, 4 P, खिद् pass., अवसद् 1 P, ग्लै-म्लै 1 P; 'k. ed up by the journey' अध्वसंजातखेदः, नितांतं परिश्रांतः. -er, *s.* प्रहर्तृ *m.*, ताडयितृ *m.* 2 द्वारमुद्गरः, द्वारताडनी.

Knoll, *v. i.* घंटां वद् c. or तड् 10. -*s.* क्षुद्रपर्वतः, उन्नतभूभागः, वप्रः-प्रं.

Knot, *s.* ग्रंथिः, बंधनं, ग्रंथिका, बंधः, गंडः; (of garments) नीवि- वी *f.*; (in wood) पर्वन् *n.*, संधिः. 2 संधिः, संयोगः, संश्लेषः, संबंधः. 3 मंडलं, समूहः, गणः, वर्गः, संघः, चक्रं, निवहः. 4 (Of trees) षंडः, गुच्छः, स्तबकः, गुल्मः-ल्मं, स्तंबः, कांडः. -*v. t.* ग्रंथिं बंध् 9 P, ग्रंथ् 9 P, संश्लिष् c., 'k. ed hair' वेणी; 'k. ed wound' रूढग्रंथिः व्रणः (U. 2). -ted, -ty, *a.* ग्रंथिल, ग्रंथिमत्, पर्व-संधि-मय (यी *f.*), पर्ववत्. 2 विषम, वक्र, दुर्ज्ञेय, दुर्बोध, गहन, गूढार्थ; 'k. point' ग्रंथिः, विषमपदं.

Know, *v. t.* ज्ञा 9 U, विद् 2 P, बुध् 1 P, अवगम् 1 P, अव-इ 2 P, अभि-ज्ञा, परिचित-*a.* भू 1 P. 2 अनु-भू, वि-भू c., समाक्रम् 1 A, ग्रह् 9 U; 'how should a dependent k. of sincere happiness (pleasure)' परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः (Mu. 3). -er, *s.* ज्ञातृ *m.*, ज्ञानिन् *m.*, वेदिन् *m.* ज्ञः-अभिज्ञः in comp. -ing, *a.* विज्ञ, ज्ञानिन्; gen. ex. by विद्, ज्ञ or अभिज्ञ in comp.; 'k. Dharma' धर्मविद्, धर्मज्ञः. -ingly, *adv.* ज्ञानपूर्वं, ज्ञानतः, बोध-मति-बुद्धि-पूर्वं, जानत् -*a.* with अपि. -ledge, *s.* (Act) ज्ञानं, परि-वि-ज्ञानं, बोधः-धनं, वेदनं, अवगमः, उपलंभः, उपलब्धि *f.* 2 (Learning) ज्ञानं, विद्या, विद्वत्ता, पांडित्यं, व्युत्पन्नता, वैदुष्यं. 3 अभिज्ञानं, परिचयः; 'spiritual k.' आत्मज्ञानं-विद्या, परमार्थज्ञानं, अध्यात्मविद्या, परमार्थः, ब्रह्मविद्या, तत्त्वार्थबोधः; 'acquiring k.' विद्यार्जनं, विद्यागमः, ज्ञानप्राप्ति *f.*; 'eager after k.' ज्ञानेच्छु, जिज्ञासु; 'thirst after k.' जिज्ञासा, ज्ञानलिप्सा, ज्ञानेच्छा; 'according to one's k.' यथाज्ञानं; 'for the right k. of words and their meaning' वागर्थप्रतिपत्तये (R. I. 1); 'without the k. of' अविज्ञाप्य, अनिवेद्य, अगोचरं-रेण, परोक्षं-क्षे; 'with the k. of' गोचरं-रेण, प्रत्यक्षं, साक्षात्, समक्षं; 'to come to the k. of' श्रुति-कर्ण-पथं या-इ-2 P. or गम् 1 P; 'k. is power' बुद्धिर्यस्य बलं तस्य (P. I. 8). -Known, *a.* ज्ञात, विदित, अवगत, बोधित, उपलब्ध, अनुभूत, विभावित. 2 ख्यात, विश्रुत, प्रसिद्ध, वि-प्र-ख्यात, विज्ञात; 'to make k.' वि-ज्ञा c. (ज्ञापयति), नि-आ-विद् c., सूच् c., 'to become k.' ज्ञा-प्रति-विद् pass.; 'be it k. to your honor' एष सन्नभवंतो विदांकुर्वंतु; 'be it k.' ज्ञातं-विदितं अस्तु; 'became k. by that name' तदाख्यया (श्रुति) पप्रथे (R. xv. 101), तदाख्यां जगाम.

Knuckle, *s.* अंगुलिपर्वन् *n.*-संधिः-ग्रंथिः- पर्व; संधिः, ग्रंथिः. -*v. i.* वशीभू 1 P, वशं गम् 1 P or इ-या-2 P. -ed, *a.* संधि-पर्व-विशिष्ट, ग्रंथिल.

Knurl, *s.* ग्रंथिः, गंडः. -ed, *a.* ग्रंथिल.

Kosmos, *s.* विश्वं, जगत् *n*

L.

Label, *s.* पत्रं, अंकपत्रं, पंजिकं, लेपपत्रं. -*v. t.* लेपपत्रं आसंज् c. or अनुबंध् 9 P.

Labial, *a.* ओष्ठ्य.

Labio-dental, *a.* दंतो(तौ)ष्ठ्य.

Labor (Labour), *s.* श्रमः, परिश्रमः, प्र-आ-यासः, क्लेशः, कष्टं, दुःखं 2 उद्यमः, उ-द्योगः, व्यापारः, व्यवसायः, चेष्टा, प्र-,यत्नः, उत्साहः. 3 प्रसूतिकालः-समयः, प्रसवकालः, प्रसवावस्था; 'pain of l.' प्रसूति-प्रसव-वेदना-यातना-व्यथा; 'bodily l.' व्रातं, देह-काय-क्लेश-आयासः-श्रमः; 'unpaid l.' विष्टि *f.*, आजूः; 'got by one's l.' स्वकष्टार्जित. -*v. i.* परिश्रमं-आयासं-कृ 8 U, श्रम् 4 P, प्र-,यत् 1 A, व्यव-सो 4 U. चेष्ट् 1 A, उद्यम् 1 P, प्रवृत् 1 A, आयस् 1, 4 P, व्रातं कृ, शरीरायासं कृ. 2 खिद्-क्लिश्-पीड् pass., व्यथ् 1 A. 3 प्रसवावस्थायां वृत्, (आसन्नप्रसवा or प्राप्तप्रसववेदना सा स्त्री); 'l. under' बाध्-अभिभू- आक्रम्-पीड्-उपहन्-pass., 'l.ing under hundreds of anxieties' चिंताशतैर्बाध्यमान-अभिभूत; अतिभाराक्रांत &c.; 'l.ing under a disease' रोगपीडित, रुजार्त. -*v. t.* महाश्रमेण-प्रयत्नेन-साध् 5 P or सं-पद् c. or क्लृप् c. or वि-धा 3 U or कृ or अनु-ष्ठा 1 P. 2 कृष् 6 U. -**ed,** *a.* श्रम-यत्न-कष्ट-सिद्ध, यत्न-श्रम-पूर्व, प्रयत्नकृत. -**er,** *s.* कृतश्रमः, कर्मिन् *m.*, व्यवसायिन् *m.*, कार्मः. 2 कर्मकरः, कर्मकारः, भृतकः, वैतनिकः, भृति-भरण्य- भुज् *m.* 3 कृषकः, कृषीवलः; *See* **Farmer.** -**Laborious,** *a.* श्रम-आयास-कष्ट-साध्य, कष्ट-आयास-प्रद, पीडाकर (री *f.*), दुःखसाध्य, कष्ट. 2 आयासिन्, कृतश्रम, श्रम-उद्योग-कर्म-शील. उद्यमिन्, उद्योगिन्, सोद्यम, सोद्योग, सोत्साह; *See* **Industrious.** -**ly,** *adv.* श्रमेण, श्रम-आयास-पूर्वं, आ-प्र-यासेन, सयत्नं, सोद्योगं, सोद्यमं, सोत्साहं; कष्टेन, कृच्छ्रेण. -**ness,** *s.* श्रमसाध्यता. 2 उद्योगः, उद्यमः, व्यवसायः, उद्योगशीलता. -**Laboratory,** *s.* रसक्रियास्थानं, रससंस्कारशाला. 2 उद्योग-शिल्प-शाला-गृहं.

Labyrinth, *s.* अतिगहनः प्रदेशः, दुस्तरं or सुगहनं स्थानं, अशक्यनिर्गमः प्रदेशः, गहनं. -**ian,** *a.* गहन, सुदुस्तर.

Lac, *s.* ला(रा)क्षा, अलक्तः-क्तकः, जतु *n.*, यावः, द्रुमामयः. 2 लक्षं.

Lace, *s.* सूत्रं, तंतुः, गुणः. 2 सूत्रजालं, जालाभरणं, जालरूपं, वस्त्राभरणं. -*v. t.* सूत्रेण बंध् 9 P, or संयुज् 7 U, 10 or संश्लिष् c. 2 जालाभरणैः भूष् 10 or अलं-कृ 8 U.

Lacerate, *v. t.* दृ 9 P, 10, निर्भिद् 7 P, अवच्छिद् 7 P, वि-पट् 10, कृत् 6 P; *See* **Tear.** -**ion,** *s.* विदारः-रणं, निर्भेदः, विपाटनं. 2 भेदः, छिद्रं, संधिः.

Laches, *s.* कालातिपातः, कालव्ययः; उपेक्षा.

Lachrymal, *a.* अश्रुप्रवाहिन्, अश्रूत्पादिन्. 2 अश्रुसंबंधिन्. -**Lachrymatory,** *s.* अश्रुपात्रं भाजनं. -**Lachrymose,** *a.* सास्र, बाष्पाकुल.

Lack, *v.* न धा 3 U or धृ 1 P or भृ 3 U; gen. ex. by हीन, रहित, वर्जित, शून्य in comp., or अ or निर् pr.; 'l.s wisdom' निर्बुद्धिः, अज्ञानः, बुद्धिहीनः, &c. -*s.* अभावः, हीनता, न्यूनता, विरहः, शून्यता. 2 प्रयोजनं; 'l.-lustre' निष्प्रभ, अतेजस्, मंदच्छाय, मलिनकांति; 'l.-brain' निर्बुद्धिः, मतिहीनः, मूढः, मूर्खः.

Lack-a-day, *interj.* अहो, हंत, हा, अहह, बत.

Lack-a-daisical, *a.* ध्यानपर-मग्न, चिंताकुल, उत्कंठित, विषण्ण.

Lacker, Lacquer, *v. t.* लाक्षारसेन छद् 10, कुक्कुभेन लिप् 6 P.

Lackey, *s.* चेटः, दासः, भृत्यः, पार्ष्णिग्राहः, पार्श्वानुचरः.

Laconic,-al, *a.* संक्षिप्त, लघु, अल्प-मित-शब्दक, अविस्तीर्ण, सांक्षेपिक (की *f.*); 'l. message' लघुसंदेशपदा सरस्वती. 2 अल्प-मित-भाषिन्. -**ally,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, मितोक्त्या. -**ism,** -**Laconism,** *s.* लाघवं; लघूक्ति *f.*, संक्षेपोक्तिः; मितवाक्यं-भाषणं.

Lactary, *s.* क्षीरस्थानं, गोदुग्धस्थानं.

Lactation, *s.* क्षीर-दुग्ध-दानं.

Lacteal, Lactean, Lactious, *a.* क्षीरिन्, क्षीर-दुग्ध-मय (यी *f.*), पायस (सी *f.*). 2 अन्नरसवाहिन्.

Lactiferous, *a.* दुग्ध-क्षीर-वाहिन्.

Lactometer, *s.* दुग्धमापनयंत्रं, दुग्धमापनी.

Lad, *s.* बालः-लकः, बटुः, दारकः, कुमारः-रकः, शिशुः, किशोरः, माणवकः.

Ladder, *s.* नि(निः)श्रेणि-णी *f.*, निश्रयि-(य)णी, अधिरोहिणी, सोपानपथः, सोपान-परंपरा-पद्धति *f.*

Lade, *v. t. See* **Load.**

Lading, *s.* नौभारः, पोतस्थद्रव्यं.

Ladle, *s.* दर्वि-र्वी *f.*, कंबि-बी *f.*, खजाका; 'wooden l.' तर्दूः, दारुहस्तकः; 'sacrificial l.' स्रुवः-वा, स्रुच् *f.*, चमसः-सी. -**ful,** *s.* कंबि-दर्वी-पूरकं-मात्रं.

Ladrone, *s.* दस्युः, जाल्मः, कितवः.

Lady, *s.* (As a title) देवी; 'your or her ladyship' अत्रभवती, तत्रभवती, भवती. 2 गृहिणी, स्वामिनी, भार्या. 3 आर्या, वनिता, कुलांगना, कुलस्त्री, कुलवधूः, भाविनी, कुलजा; 'l.-bird,-fly,-cow' इंद्रगोपः, शक्रगोपः, इंद्र-शक्र-कीटः; 'l.-love' प्रिया, कांता,

प्रणयिनी, कामिनी, दयिता; ‘l.’s maid’ प्रसाधिका, वस्त्रपरिकल्पिका. -like, *a.* शिष्ट, सभ्य, सुविनीत, आर्यवृत्ति. 2 पेलव, कोमल, मृदु, सुकुमार.

Lag, *v. i.* मंदायते (D.), चिर(रा)यति (D.), विलंब् 1 A, मंदं मंदं चल्-चर् 1 P. -*s.* अंत्यजाः, हीनजनाः (pl.); हीनवर्णाः. -*a.*, -**Laggard,** *a.* मंद, मंदकर्मन्, विलंबिन्, चिरक्रिय, मंदायमान.

Lagoon, *s.* अनूपः, कच्छः, कच्छभूः, जलसनाथः प्रदेशः.

Laic,-al, *a. See* under **Lay.**

Laidly, *a.* अप्रिय, जुगुप्सित, बीभत्स.

Lair, *s.* (श्वापदानां) आ-नि-लयः, शयनस्थानं, वासस्थानं, गुहा, बिलं.

Laity, *s. See* under **Lay.**

Lake, *s.* सरस् *n.*, कासारः, ह्रदः, सरसी, तडागः-गं, तटाकः-कं; पद्माकरः, सरोवरः, जलाधारः, जलाशयः.

Lamb, *s.* मेषशावः-वकः, अजाशिशुः, मेषवत्सः-पोतः, अविपोतः. -**kin,** *s.* क्षुद्रमेषशिशुः, अविपोतकः.

Lambative, *a.* लेह्य. -*s.* लेह्यं, अवलेहः-ह्यं.

Lambent, *a.* इतस्ततः वेपमान, लोल, कंपमान, तरल, चंचल.

Lame, *a.* खंज, पंगु (गू *f.*), खोड-ल-र, विकलगति, व्यंग; ‘l. of a leg’ पादेन खंज. 2 (Fig.) दुर्बल, विकल, सच्छिद्र, न्यून. -**ly,** *adv.* खंजवत्. 2 विकलं. -**ness,** *s.* खंजता, पंगुता, गतिवैकल्यं. 2 वैकल्यं, दुर्बलता, न्यूनता, सच्छिद्रता.

Lamel, Lamella, *s.* कवचः, आवेष्टनं, पटलं.

Lament, *v.* विलप् 1 P, रुद् 2 P, आ-,क्रंद् 1 P, अनु-,शुच् 1 P, परि-देव् 1 A, परिदिव् 10 A, क्रुश् 1 P, वि-आ-अभि-°; ‘they l.ed his departure’ तद्गमनमन्वशोचन्, तद्गमनमुद्दिश्य अक्रोशन्, &c. -**able,** *a.* शोच्य, शोचनीय, शोकविषय, शोकास्पदं, शोकार्ह. -**ation,** *s.* विलापः, रोदनं, परिदेवना-नं, परिदेवितं, शोकः, शुच् *f.*, विलपनं, रुदितं, आ-वि-क्रोशः, आ-,क्रंदनं, क्रंदितं. -**ed,** *a.* शोचित; ‘the l. Krishna’ शोकास्पदीभूतः or स्वर्ग-परलोक-वासी कृष्णः. -**er,** *s.* शोचकः, परिदेवकः.

Lameter, Lamiter, *s.* खंजः, पंगुः.

Lamina, *s* कवचः-चं, शल्कं, पत्रं, फलकः-कं. -**Laminated,** *a.* सपत्र, फलकिन्.

Lamp, *s.* प्र-,दीपः, दीपकः, दीपिका, दशाकर्षः, दोषास्यः; ‘l.-black’ कज्जलं, दीपकिट्टं; ‘l. -light’ दीपप्रभा-प्रकाशः; ‘l.-stand’ दीपवृक्षः-पादपः-आधारः.

Lampoon, *s.* निंदालेखः, अवगीतं, निंदार्थो लेखः. -*v. t.* लेखैः निंद् 1 P or आक्षिप् 6 P or अव-गै 1 P. -**er,** *s.* निंदकः, अवगायकः, आक्षेपकः.

Lanate,-ed, *a.* लोमश, लोमविशिष्ट.

Lance, *s.* प्रासः, कुंतः, शूलः-लं, शल्यं, शक्ति *f.*, तोमरः. -*v. t.* प्रासेन व्यध् 4 P or निर्भिद् 7 P. -**er,** *s.* प्रासिकः, कौंतिकः, शाक्तीकः, शक्तिधरः-ग्रहः, शूलधरः. -**ing,** *s.* (gums) लेखनं.

Lancet, *s.* शलाका.

Lanch, *v. t. See* **Cast.**

Lancinate, *See* **Lacerate, Tear.**

Land, *s.* (Opposed to sea) स्थलं; ‘proceeded by l.’ प्रतस्थे स्थलवर्त्मना (R. IV. 60); ‘the way by l.’ स्थलमार्गः-वर्त्मन् *m.* 2 भूः, भूमि *f.*, प्रदेशः, विषयः, राष्ट्रं. 3 मृद् *f.*, मृत्तिका. 4 क्षेत्रं, क्षेत्रभूमिः, ‘arable l.’ कृष्ट-सीत्य-भूमिः; ‘barren l.’ मरुः, मरुस्थलं-ली, धन्वन् *m.*; ‘marshy l.’ कच्छभूः, अनूपभूमिः; ‘waste or fallow l.’ खिला-अप्रहता-भूमिः; ‘gift of l.’ भूमिदानं; ‘l.-animal’ स्थलचरजंतुः, भूमिचरजंतुः; ‘l.-fight’ स्थलयुद्धं; ‘l.-force’ स्थलसैन्यं, स्थलयोधाः; ‘l.-holder’ भू-क्षेत्रस्वामिन् *m.*, क्षेत्रपतिः; ‘l.-lord,-lady’ भूक्षेत्र-स्वामी-मिनी, गृहपतिः, गृहेश्वरः-री. ‘l.-locked’ भूवेष्टित, भूमिपरिगत; ‘l.-lotus’ स्थलारविंदं, स्थलकमलिनी, ‘l.-mark’ सीमाचिह्नं, स्थल-भूमि-सीमा, सीमालिंगं; ‘l.-owner’ भूस्वामी, क्षेत्रपतिः-स्वामी; ‘l.-scape’ नयनगोचरीभूतः भूप्रदेशः or भूभागः दृष्टिगत-दृष्टिगोचर-प्रदेशः; भूभागः, प्र-,देशः; ‘l.-tax’ भू-क्षेत्र-करः; ‘l.-waiter’ शौल्किकः. -*v. t.* (पोताद्-नावः) अवतॄ c., अव-रुह् c. (रोपयति); उत्तॄ c., स्थले निविश् c. -*v. i.* अवतॄ 1P, अवरुह् 1 P, उत्तॄ, निविश् 6 P. -**ed,** *a.* अवतीर्ण, नौकावरूढ, नौकोत्तीर्ण. 2 भूमिसंपन्न, क्षेत्रवत्, भूमिधन; भू in comp.; ‘l. property’ भूमिद्रव्यं, भूमिः, क्षेत्रं, स्थावरद्रव्यं; ‘l. proprietors,’ भूस्वामिनः. -**ing,** *s.* उत्तरणं; l.-place तरस्थानं, तरः, तरणस्थानं, घट्टः-ट्टी.

Lane, *s.* संकट-संबाध-पथः-मार्गः, कुपथः.

Language, *s.* भाषा, वाणी, वाच् *f.* 2 वचनं, व्याहारः, वचस् *n.*, वाक्यं, उक्ति *f.*, भारती. निगदः, भाषणं, भाषितं, आलापः, वाग्व्यापारः; 3 भाषासरणि-पद्धति *f.*, वचोविन्यासः; ‘abusive l.’ वाक्पारुष्यं, खलोक्तिः. आक्षेपवचः; आक्षरणं; ‘dignity of l.’ वचसां प्रौढता.

Languid, *a.* परि-,म्लान, क्लांत, ग्लान, तुलित, अवसन्न, शिथिल, विषण्ण, खिन्न, श्रांत, स्रस्त, विश्लथ, मुक्त; अलस, मंद, शिथिल-क्षीण-बल, श्लथांग-स्रस्तांग (गी *f.*); *See* **Droop.** -**ly,** *adv.* म्लान-ग्लान-वत्, सविषादं, अलसवत्, मंदं, क्लांतमनसा, मुक्तगात्रैः. -**ness,** -**Languor,** *s.* ग्लानि *f.*, म्लानि *f.*, अवसादः, शिथिलता,

क्लांति *f.*, ग्ला(म्ला)नता, शुष्कावयवता; मांद्यं, बलशैथिल्यं, गात्रस्रंसः, अंगश्लथः, तंद्रा-न्द्रि *f.*, आलस्यं, जडता, जाड्यं, कार्यविमुखता.

Languish, *v. i.* अवसद् 1 P, परि-,क्लम् 1, 4 P, परि-,म्लै-ग्लै 1 P, स्रंस् 1 A, गल् 1 P, शिथिलीभू 1 P, क्षि-विशॄ-खिद्- pass.; ध्वंस् 1 A. 2 (With love) उत्तम् 4 P, उत्कंद् 1 A, उत्सुक-*a.* भू. -ing, *a.* म्लायत्, क्षीयमाण, स्रंसिन्, शुष्क. 2 उत्सुक, उत्कंठित, कामालस; ' with her l. looks ' अलसेक्षणा, कामालसदृष्टिः, कामार्द्रदृष्टिः. -ingly, *adv.* अवसादेन, अलसवत्. 2 सोत्कंठं, सोत्सुकं; कामालसदृष्ट्या. -ment, *s.* अवसादः, ग्लानता; *See* Languor. 2 औत्सुक्यं, उत्कंठा, उत्सुकता.

Laniary, *s.* घात-वध-स्थानं. 2 चर्वणदंतः. अग्रदंतः.

Lanier, *s.* चर्मबंधः, वरत्रा

Laniferous, *a.* रोमोत्पादिन्, लोमोद्भवकारिन्.

Lank, *a.* कृश, क्षाम, क्षणि, क्षीणमांस-शरीर; *See* Lean. 2 दीर्घतनु, दीर्घदेह. 3 श्लथ, शिथिल. -ness, *s.* कृशता, कार्श्यं, क्षामता, &c. -y, *a.* कृशदीर्घ, दीर्घक्षाम.

Lantern, *s.* प्रच्छन्नदीपः, सावेष्टनो दीपः, आवृतदीपिका; दीपः, दीपिका; 'l.-jawed ' क्षीणवदन.

Lanuginous, *a.* लोमश, लोममय (यी *f.*).

Lap, *s.* उत्संगः, अंकः, क्रोडं. 2 अंचलः-लं; वस्त्रांतः, दशाः-वस्तयः (pl.); ' to place on the l. ' क्रोडीकृ 8 U. -*v. t.* पुटीकृ, व्यावृत् c. 2 आ-परि-वेष्ट् 1 A or c.: अवगुंठ् 10, आ-परि-वृ 5 U, क्रोडे नि-धा 3 U. 3 लिह् 2 U, आ-अव-सं°; आ-स्वाद् 1 A; ' l.-dog' अंके पालनीयः कुक्कुरः; ' l. ful ' अंकपूरणं-कं.

Lapidarious, *a.* शिला-प्रस्तर-मय (यी *f.*).

Lapidary, *s.* मणिकारः, रत्नाजीवः. 2 रत्न-मणि-च्छिद् *m.*

Lapis-Lazuli, *s.* वैडूर्यं, असितोपलः, नीलोपलः.

Lappet, *s. See* Lap (2).

Lapse, *s.* क्रमः, गति *f.*, प्रवाहः, प्रवृत्ति *f.*, अत्ययः, अतिक्रमः; ' after a l. of time ' अथ दिनेषु गच्छत्सु, कालक्रमेण, गच्छता कालेन. 2 स्खलितं, प्रमादः, भ्रमः. 3 स्खलनं, पातः, भ्रंशः, च्युति *f.*, पतनं. -*v. i.* क्रमशः या 2 P or गम् 1 P or सृप् 1 P; शनैः शनैः अति-इ 2 P or अतिक्रम् 1 U, 4 P. 2 भ्रंश् 1 A, 4 P, च्यु 1 A, पत् 1 P, विचल् 1 P, व्युत्क्रम्. 3 स्खल् 1 P, प्रमद् 4 P, भ्रम् 1, 4 P. 4 संक्रम्, अपवृत् 1 A. -ed, *a.* पतित, भ्रष्ट, &c. 2 परहस्तगत, संक्रांत, अपवृत्त; ' a l. suit ' नियतवेलातीतं कार्यं.

Lapwing, *s.* टिट्टिभः-भकः, कोयष्टिकः

Lar, *s.* कुल-गृह-देवता.

Larboard, *s.* नौवामभागः.

Larceny, *s.* चौर्यं, स्तेयं; *See* Theft.

Lard, *s.* शूकरवसा-मेदस् *n.* 2 शूकरमांसं, वल्लूरं. -*v. t.* शूकरमेदसा पृ 3 U or c. 2 वि-सं-मिश्र् 10. 3 आ-प्यै c.; पुष् 1, 9 P or c.

Larder, *s.* भक्ष्यमांसागारं, भोजनागारं.

Large, *a.* (In size) विशाल, पृथु, बृहत्, स्थूल, विपुल, महत्, गुरु, उरु, पृथुल, आयत, विस्तीर्ण. 2 (Of l. body) महाकाय, स्थूल-विकट-शरीर, पृथु-बृहत्-शरीर; पीन, पीवर. 3 (In number) महत्, गुरु, पुष्कल, विपुल, प्रभूत, प्रचुर, बहु, बहुल, भूरि; ' of l. soul ' महात्मन्; ' of l. nature ' उदारधी, महात्मन्, अकृपणचेतस्. 4 (In age) वृद्ध, वयोधिक; ' larger boy ' वर्षीयान् बालः; 'at l. ' अपराधीनं, स्वेच्छया, स्वेच्छाचारेण, निर्यंत्रणं, निरवग्रहं, निरवरोधं. 2 सविस्तरं, विस्तरेण, विस्तरशः. 3 पूर्णतया, साकल्येन. -ly, *adv.* बहु, भूरि, अतीव, विपुलं, प्राचुर्येण, सु-अति-pr. -ness, *s.* स्थूलता, बृहत्त्वं, वैपुल्यं, प्राचुर्यं, बहुत्वं, बाहुल्यं; महाकायता, शरीरबृहत्त्वं, पीनता, पीवरता. 2 आयामः, विस्तारः.

Largess, *s.* दानं, वितरणं, पारितोषिकं, उपायनं, उपहारः; *See* Gift.

Lark, *s.* भा(भ)रद्वाजः, व्याघ्राटः, भारयः.

Larum, *s.* आसन्नभयसूचना-घोषणा.

Larva, *s.* कीटः, कीटडिंभः.

Larynx, *s.* कंठनालः-ली, कृकः.

Lascar, *s.* नाविकः, पोतवाहः.

Lascivious, *a.* कामुक, कामिन्, रतार्थिन्, कामासक्त, रतिसुखासक्त, भोगासक्त, लंपट, स्त्रीलंपट, कामप्रवण; *See* Lustful. 2 कामहेतुक, काममूलक. -ly, *adv.* कामुकवत्, लंपटवत्, भोगासक्त्या. -ness, *s.* कामुकत्वं, भोगासक्ति *f.*, रतासक्तिः, व्यवायेच्छा, लांपट्यं.

Lash, *s.* कशा, प्रतिष्कशः-षः, चर्मरज्जु *f.*, चर्मबंधः. 2 कशाघातः-ताडनं-प्रहारः. 3 वागसिः, परुषवचनं. -*v. t.* कशया आहन् 2 U or तड् 10 or प्रहृ 1 P. 2 वि-धू 5, 9 U, 6 P, विचल् c., इतस्ततः क्षिप् 6 P or चल् c. 3 वाग्बाणैः भिद् 7 P or तड्, वागसिना प्रहृ; तीक्ष्णं निंद् 1 P; ' l. ed into fury ' वाग्बाणैः उत्तेजितक्रोधः; शिलातलप्रतिघातोत्पतनफेनिलानामपां (Ka. 133); ' l. ed into foam by striking ' &c. जर्जरितजलतरंगविततनीहारं (Mal. 9) ' so as to l. the water into snowy foam. ' 4 रज्ज्वा बंध् 9 P; ' worthy of being l. ed ' कश्य, कशार्ह.

Lass, *s.* तरुणी, कन्या, बाला, कुमारिका, दारिका.

Lassitude, *s.* खेदः, क्लमः, ग्लानि *f.*; *See* Languidness.

Lasso, *s.* पाशः, पाशबंधः-रज्जु *f.*

Last, *a.* अंत्य, अंतिम, अवर, अवतरम, चरम, पश्चिम; शेष-अंत-in comp. 2 गत, अतीत, चरम, पूर्व, भूत. 3 जघन्य, अधम, अपकृष्ट. 4

परम, उत्तम, अत्यंत; 'l. night' गतायां रात्रौ; 'the l. year' गत-अतीत-संवत्सरः, परुत् *ind.*; 'l. but one' उपांत्य, उपांतिक; 'l.-born' अवरज; 'at l.' अंते, अंततः; 'l. part' शेषभागः; 'l. part of the night' उत्तररात्रः, चरमयामः; 'l. half' उत्तरार्धः, पश्चार्धः, परार्धः; 'the year before l.' परारि *ind.*: 'to the l.' शेषं यावत्. -*adv.* अंते, शेषे, अंततः, अवरं, चरमं, अवरतः. -*v. i.* अव-स्था 1 A, स्था 1 P; oft. by अवधिः in comp.; 'l. ing for many days' चिरस्थायिन्, एष ते जीवितावधिः प्रवादः (U. 1) 'will l. through life'; 'this will l. as food for four months' एतेन (अस्माकं) मासचतुष्टयस्य भोजनं भविष्यति; 'the bloom of youth l.s for a few days' कतिपयदिवसस्थायिनी यौवनश्रीः (Bh. II. 2). -**ing,** *a.* स्थायिन्, चिर-दीर्घ-कालस्थायिन्; अनपायिन्, नित्य, स्थिर, ध्रुव, अक्षय, शाश्वत (ती *f.*), अजर, चिरंतन (नी *f.*). -**ly,** *adv.* अंते, अंततः, चरमतः, शेषे, अवरतः.

Latch, *s.* अर्गला-लं, विष्कंभः, अर्गलाबंधः, तालकं, द्वारबंधनी; 'the postern door was on the l.' अर्गलानिरुद्धं पक्षद्वारं.

Latchet, *s.* पादुकाबंधनी.

Late, *a.* विलंबेन आगत or प्राप्त; कालातीत, वेलातीत, समयातीत; अतिक्रांतकाल, अतिकाल, अतीतकाल-समय. 2 अवसित, परिणत, अवसन्न. 3 नूतन, अचिर, प्रत्यग्र, अभिनव, आधुनिक (की *f.*), नातिपुराण, सद्यस्कालीन. 4 अतीत, गत, व्यतीत, भूत; प्राक्तन-पूर्वतन (नी *f.*), पौर्विक (की *f.*), 'at a l. hour of the day' परिणते दिवसे, अवसन्नप्राये अहनि; 'at a l. hour of the night' क्षीणभूयिष्ठायां क्षपायां; 'at a l. period of life' परिणते वयसि. -*adv.* विलंबेन, विलंबात्, वेलातिक्रमेण, अतिकालं-समयं, चिरेण, चिरात्, चिरकालेन-लात्; 'to be l.' वेलातिक्रमं कृ 8 U, चिर(रा)यति (D.); 'why are you l.' किमिति चिरायित त्वया; 'l. in life' परिणतवयसि, *See* above; 'too l. in the day' अतिपराह्णे; 'too l. in the evening' अतिसाये. 2 अकाले, असमये. -**ly,** 'of late,' *adv.* इदानींतने काले, नातिचिरात्प्राक्, आधुनिकसमये; अचिरं. -**ness,** *s.* कालातीतता, कालातिक्रमः; परिणामः, परिणति *f.* -**Later,** *a.* उत्तर, अपर, पर, उत्तरकालीन, पाश्चात्य. -*adv.* (on) उत्तरं, उत्तरोत्तरं, पश्चात्, उत्तर-पर-काले.

Latent, *a.* नि-,लीन, गूढ, छन्न, गुप्त, अदृष्ट, अप्रत्यक्ष, अप्रकाश, अप्रकट, अदृश्य, अंतर्हित, निभृत; 'a l. disease' धातुस्थः-शरीरांतर्गतः-रोगः.

Lateral. *a.* पार्श्वीय, पार्श्वस्थ, पार्श्विक (की *f.*). -**ly,** *adv.* पार्श्वभागे, पार्श्वतः, पार्श्वे.

Lath, *s.* सूक्ष्मकाष्ठं-दारु, तनुफलकः-कं.

Lathe, *s.* कुंदः-दं, भ्रमः-मि *f.*, चक्रं.

Lather, *s.* अंजनफेनः, मार्जनतैलफेनः.

Latifolious, *a.* पृथु-विशाल-पर्ण.

Latitude, *s.* अक्षः. 2 (Celestial) विक्षेपः. 3 विस्तारः, विस्तृति *f.*, प्रथिमन् *m.*, आयति *f.* 4 अनियंत्रणं, स्वातंत्र्यं, नियमोपेक्षा, नियमातिक्रमः, शैथिल्यं; 'degree of l.' अक्षांशः; 'l. of a planet' पतनं; 'parallel of l.' अक्षांशवृत्तं. -**Latitudinarian,** *a.* शिथिल, अनियंत्रण, निर्यंत्रण. -*s.* मतस्वातंत्र्यावलंबिन् *m.*, निर्बंधहीनः. -**ism,** *s.* मतशैथिल्यं, विचारस्वातंत्र्यं, अनियंत्रणं.

Latten, *s.* रीति *f.*, पित्तलं.

Latter, *a.* उत्तर, अपर, पर, अवर, अन्य, (*pron. a.*); पश्चिम, चरम, अंतिम; उत्तरोक्त, अपरोक्त; 'former and l.' पूर्वापरं; 'in the l. part of the day' पराह्णे. -**ly,** *adv.* अर्वाक्काले, अधुनातनकाले; *See* **Lately.**

Lattice, *s.* जालमार्गः, गवाक्षः, जालं, गवाक्षजालं, वातायनं; 'l.-work' जालकर्मन् *n.*

Laud, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U, कृत् 10, गुणं वर्ण् 10. -*s.* प्रशंसा, श्लाघा, स्तुति *f.*, गुण-वर्णना-कीर्तनं. -**able,** *a.* श्लाघ्य, स्तुत्य, प्रशस्य, श्लाघार्ह, प्रशंसार्ह, स्तवनोचित; *See* **Praise,-worthy.** -**ation,** *s.* प्रशंसनं, श्लाघनं. -**atory,** *a.* प्रशंसागर्भ, प्रशंसक, स्तुतिरूप, प्रशंसा-श्लाघा-स्तुति-मय (यी *f.*), प्रशंसाकर (री *f.*). -**er,** *s.* प्रशंसकः, स्तावकः.

Laugh, *v. i.* हस् 1 P, प्र-वि°; स्मि 1 A (l. gently); 'l. violently' उच्चैः हस्, अट्टहासं कृ 8 U; 'l. at' अव-उप-हस्, उपहासास्पदं मन् 4 A, अव-मन्; 'l. in the sleeves' अंतर्-निभृतं-हस्. -*s.*, -**ing,** -**Laughter,** *s.* हासः, हसनं, हास्यं, हसितं, वि-प्र°; स्मितं; 'a horse-l.' अट्टहासः, उच्चैर्हासः, प्र-अति-हासः; 'an inward l.' अंतर्हासः -**able,** *a.* हासकर (री *f.*), हास्यास्पदं, हास्य. -**er,** *s.* हासकः, हासिन् *m.* -**ing,** *a.* हास्यमुख (खी *f.*), स्मेरमुख, हास्यवदन; 'l.-stock' उपहासास्पदं, हास्यपात्रं. -**ingly,** *adv.* सहासं, विहस्य, सस्मितं.

Launch, *v. t.* (नावं जले) क्षिप् 6 P, मुच् 6 P or c.; प्रविश् c.; घट्ट c.; 'l. thy hundred-shafted bolt' मुंच शतशोऽशनिं (M. 5). 2 सहसा विसृज् 6 P or प्रक्षिप्, प्रास् 4 U. -*v. i.* जलं प्रविश् 6 P. -*s.* नौमोचनं or जलप्रवेशनं.

Laundress, Launder, *s.* रजकभार्या, निर्णेजकी. -**Launderer,** *s.* रजकः, निर्णेजकः.

Laundry, *s.* रजकगृहं, वस्त्रधावनशाला.

Laurel, *s.* नारलं (?); 'win l. s' ख्यातिं गम् 1 P, यशः अधिगम्; 'wear your l. s with modesty' लब्धेऽपि जये मा गर्वाध्मातो भूः; (भाग्येषु अनुत्सेकी भव S. 4).

Lava, *s.* आग्नेयोद्गारः.

Lave, *v. t.* क्षल् 10, धाव् 10; निज् 3 U; *See* Wash. **-atory,** *s.* धावनस्थानं. **-er,** *s.* धावन-प्रक्षालन-पात्रं, द्रोणि f. **-ment,** *s.* वस्ति *m. f.*

Lavish, *a.* अतित्यागिन्, अतिव्ययिन्, व्ययशील-पर, अपरिमितव्यय, बहुप्रद, मुक्तहस्त. 2 अमित, अपरिमित, अतिरिक्त, अत्यधिक, अति pr. **-***v. t.* अपरिमितं व्यय् 10 (व्यययति), मुक्तहस्तेन दा 3 U or विसृज् 6 P or त्यज् 1 P or वितॄ 1 P or विश्रण् 10 or अप-चि 5 U or वृष् 1 P or अपा-कॄ 6 P; विक्षिप् 6 P. **-er,** *s.* अतिव्ययिन् *m.*, मुक्तहस्तः, व्ययपरः. **-ly,** *adv.* अतिव्ययेन, मुक्तहस्तेन, अपरिमितं, अत्यंतं. **-ment,-ness,** *s.* अति-अपरिमित-व्ययः, महाव्ययः, अतित्यागः, अत्युत्सर्गः, मुक्तहस्तत्वं, बहुप्रदत्वं.

Law, *s.* धर्मः, स्मृति *f.*, व्यवहारः, आचारः; धर्म-स्मृति-व्यवहार-शास्त्रं. 2 विधिः, शासनं, व्यवस्था, नियमः, नि-आ-देशः, नियोगः, सूत्रं, राजाज्ञा, चोदना, व्यवस्था-शासन-पत्रं, मर्यादा, स्थिति *f.*, कार्याकार्यनियमः, विधिनिषेधनियमः. 3 न्यायः, नीति *f.*, धर्मानुसारः, व्यवहारविधिः; 'a code of l. s' धर्मसंहिता, धर्म-स्मृति-शास्त्रं; 'criminal l.' दंडनीतिः-विधिः; 'matter recognizable by l.' व्यवहारविषयः-पदं; 'versed in l.' स्मृतिशास्त्रज्ञ, व्यवहारपंडित; 'common l.' स्मृतिः; 'breaking a l.' व्यवस्थातिक्रमः; 'going to l.' राजसभां-व्यवहारासनं-गत्वा विवादप्रशमनं-निर्णयः; 'to go to l.' विवद् 1 A, व्यव-हृ 1 P; 'against the l.' स्मृतिविरुद्धं; 'l.-breaker' व्यवस्थाभेदिन्-लंघिन्, नियमातिक्रामिन्; 'l.-giver' स्मृति-शास्त्रकारः, व्यवस्थापकः, शास्तृ *m.*, विधि-न्याय-प्रवर्तकः; 'l.-suit' अर्थः, कार्यं, व्यवहारपदं; 'lay down a l.' व्यव-स्था c. (-स्थापयति). **-ful,** *a.* न्याय्य, शास्त्रविहित, शास्त्रोक्त, धर्म्य, यथान्याय, धर्मसंमत, धर्मशास्त्रानुरूप, शास्त्रसंमत, न्याययुक्त, व्यवहार-विधि-प्रोक्त, विध्यनुसारिन्, अनिषिद्ध, धर्माविरोधिन्; 'l. wife' धर्मपत्नी; 'l. means' धर्मोपायः, न्यायोपायः. **-fully,** *adv.* विध्यनुसारेण, न्यायतः, धर्मेण, धर्मतः, धर्मानुसारेण, स्मृतिशास्त्रानुरूपं, यथान्यायं. **-fulness,** *s.* न्याय्यता; धर्म्यता; धर्मानुसारः, धर्माविरोधः. **-less,** *a.* विध्यपेत, स्मृति-विधि-विरुद्ध, धर्म-न्याय-विरुद्ध, अन्याय्य, अधर्म्य. 2 (Of persons) अनियंत्रण, अनियत उच्छृंखल, स्वेच्छाचारिन्, स्वैरवृत्ति, अवश, कामचार, उद्दामवृत्ति; दुराचार, निर्मर्याद, अशिष्ट, आचार-धर्म-भ्रष्ट. **-lessly,** *adv.* अवशं, उच्छृंखलं, दुराचारवत्, धर्मविरोधेन, शास्त्रविरुद्धं. **-lessness,** *s.* कामवृत्ति *f.*, मर्यादातिक्रमः, अनाचारः, आचारभ्रष्टता, नियमातिक्रमः; स्वेच्छाचारः. **-Lawyer,** *s.* विधिज्ञः, न्यायनिपुणः, व्यवहारपंडितः, धर्मशास्त्रज्ञः, धर्मज्ञः, स्मृतिपारगः; अर्थिप्रत्यर्थिपक्षसमर्थकः.

Lawn, *s.* तृणभूमि *f.*, तृणावृता भूः, शाद्वलं स्थानं, सतृण-हरित-स्थलं. 2 क्षौमं, अंशुकं, दुकूलं.

Lax, *a.* शिथिल, श्लथ, स्रस्त, विगलित. 2 मृदु, कोमल, अतीक्ष्णदंड. 3 दुराचार, भ्रष्टचरित्र, धर्म-कर्म-भ्रष्ट; 'l. in bowels' मृदु-अगाढ-कोष्ठ. **-***s.* अतिसारः, प्रवाहिका. **-ative,** *a.* सारक, रेचक. **-***s.* सारकं. **-ity,-ness,** *s.* शैथिल्यं, अतीक्ष्णता; अनाचारः, मर्यादातिक्रमः; इंद्रियासंयमः, &c.

Lay, *v. t.* धा 3 U, नि-आ°, न्यस् 4 U, निविश् c., स्था c. (स्थापयति); सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, आरुह् c. (रोपयति); दा 3 U, धृ 1 P; क्रमेण स्था c. or नि-धा; प्रक्लृप् c., प्रयुज् 7 A, 10 (a plot, snare, &c.). 2 आ-स्तृ-स्तॄ 5, 9 U. 3 शम् c. (शमयति), प्र-उप-°; सांत्व् 10, स्थिरीकृ 8 U. 4 शी c.; निपत् c.; 'l. eggs' अंडमोक्षं कृ; अंडानि सू 2, 4 A; 'l. siege' रुध् 7 U, वि-ष्टंभ् 9 P; *See* Besiege; 'l. blame on' दोषं समारुह् c. or निक्षिप्; 'l. waste' उप-प्लु 1A, उपद्रु 1 P, उद्-ध्वंस् c., निर्जनीकृ; *See* Devastate; 'a sinful action, though done by others, is laid at his doors' पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते (Mr. 1); 'l. aside' अप-निर्-अस्, त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P; 'l. it aside for a while' मुहूर्तं तत् आस्तां-तिष्ठतु तावत्; (address &c.) उद्-वि-मुच् 6 P, अवहृ c., अवरुह् c.; 'l. hands on' परामृश् 6 P, धृष् c.; 'laid upon him his hand' तं हस्तेन पस्पर्श or परामृशत्; 'l. hold of' धृ, ग्रह् 9 U; *See* Catch; 'l. the dust' धूलिं संसिच् 6 P or आ-हन् 2 U; 'l. open or bare' विवृ 5 U, आविष्कृ; स्फुटीकृ, वि-अंज् 7 P or c., स्पष्टी-प्रकटी-कृ, प्रकाश् c. **-before,** उपनि-अस्, उपक्षिप्, पुरो-नि-धा, प्रसृ c., नि-आ-विद् c. **-by,** सं-,रक्ष् 1 P, संचि 5 U. **-down,** न्यस्, निक्षिप्, नि-धा, न्यासीकृ. 2 शी c., निविश् c. 3 विमुच्, परि-,त्यज्, वि-हा. 4 (Oneself) संविश् 6 P., शी 2 A. 5 प्र-णी 1 P, वि-धा (rules &c.); 'l. down arms' युद्धाद्विरम् 1 P, शरणं व्रज् 1 P, 'l. down life' प्राणान् त्यज्. **-in,** संग्रह्, संचि, संरक्ष्. **-on,** पत् c., प्र-युज्, सम्-ऋ c. **-out,** विनि-युज् 7A, 10, प्र-युज्,

व्यय् 10 (व्यययति). 2 परि-प्र-क्लृप् c., विन्यस् 4 U, विरच् 10, प्र-युज्, चिंत् 10; *See* **Contrive.** 3 प्रसृ c., विस्तॄ c., दीर्घीकृ; प्रकाश् c., प्रकटीकृ 'l. oneself out'; चेष्ट् 1 A, प्रयत् 1 A, उद्यम् 1 A. **-to,** आरुह् c., निक्षिप्; *See* **Ascribe;** 'l. to a ship' नौगतिं रुध् or स्तंभ्. **-up,** नि-धा, रक्ष्, संचि; 'to be laid up,' शय्याग्रस्त-*a.* भू 1 P, उत्थातुं अक्षम-*a.* भू; 'laid up with fever' ज्वरेणोत्थातुमक्षमः. **-Lay,** *s.* गानं, गीतं, काव्यं. 2 आस्तरः-रणं, फलकः-कं. **-*a.*** सामान्य, साधारण (णी *f.*), पुरोहितभिन्न. **-man,** *s.* गृहस्थः, सामान्य-साधारण-जनः, अदीक्षितः, प्राकृतः. **-Laical,** *a.* गृहस्थिन्, गार्हस्थिक (की *f.*), पुरोहितभिन्न, अदीक्षित. **-Laity,** *s.* गृहस्थ-सामान्य-जनवर्गः, प्राकृत-साधारण-जनाः, पुरोहितभिन्नवर्गः.

Layer, *s.* स्तरः; आस्तरः-रणं, फलकः-कं. 2 **Twig,** q. v.

Lazar, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कोठोपहतः, त्वग्रोगोपहतः; 'l.-house' कुष्ठिशाला, श्वित्र्यालयः.

Lazy, *a.* अलस, तंद्रिल, जड, मंद, मंथर, तंद्रालु, मंदगति, आलस्यशील, अनुद्योगिन्, उद्योगविमुख (खी *f.*), अव्यवसायशील; शीतक, अनुष्ण, तुंदपरिमृज. **-ly,** *adv.* अलसवत्, जडवत्, मंदं मंदं, जाड्येन. **-ness,** *s.* आलस्यं, मांद्यं, जाड्यं, जडता, तंद्रिका, तंद्रालुता, कार्यद्वेषः, अनुद्योगशीलता, उत्साहविमुखता, अलसशीलता.

Lea, *s.* *See* **Lawn** (1).

Lead, *s.* सीसं, सीसकं, नागं, योगेष्टं, वप्रं; 'red l.' सिंदूरं, नागसंभवं, रक्तचूर्णं, नागजं, नागगर्भं. **-s.** नायकत्वं, नेतृत्वं, अधिष्ठातृत्वं, मुख्यत्वं, अग्रगमनं-यानं, पुरःसरणं —*v. t.* नी 1 P, वह् 1 P, प्राप् c., गम् c. (गमयति) (all with two accusatives); आ-दा 3 A. 2 (Way) दृश् c., आ-निर्-दिश् 6 P. 3 अधि-ष्ठा 1 P, अध्यास् 2 A, प्रणी, आ-निर्-दिश्; पुरस्कृ 8 U; अग्रणीः-नायकः-अग्रेसरः-भू 1 P (with gen.); वसिष्ठाधिष्ठिता देव्यः (U. 1) 'led by Vasishtha' &c., दशरथस्य दारानधिष्ठाय (U. 4;) 'led by the demon' दानवं पुरस्कृत्य. 4 आकृष् 1 P, प्र-वि-लुभ् c., प्रवृत् c, प्रेर् c., प्रोत्सह् c, नी; मूढः परप्रत्ययनेयबुद्धिः (M. 1) 'has his mind led by the convictions of others.' 5 (Time) नी, गम् c., अतिवह् c., क्षै c. (क्षपयति), या c. (यापयति); 'led a dissolute life' विषयसुखनिरतो जीवितमत्यवाहयत्; 'l. ing a life above their station' स्वस्थानानुचितां-स्वस्थानातिरिक्तां-जीवयात्रां कल्पयंतः. —*v. i.* (On) अग्रे-पुरः-पुरतः-अग्रतः-भू or गम् 1 P or वृत् 1 A or स्था or चर् or सृ 1 P. 2 (To) (lit.) गम्, या 2 P; 'on the way l. ing to Chitrakûta' चित्रकूटयायिनि वर्त्मनि (U. 1). 3 (Cause) ex. by dat. of noun with or without भू, आवह्, उत्पद् c., जन् c. (जनयति); 'advice to fools l.s to their provocation' उपदेशो हि मूर्खाणां प्रकोपाय (भवति) (H. 3). **-ed,** सीसकयुक्त. **-en,** *a.* सीसकनिर्मित. **-er,** *s.* नायकः, नेतृ *m.*, मार्गदर्शकः, मार्गोपदेशकः (lit.); मुख्यः, मुखरः, अग्रणीः, प्रमुखः, अधिपः, ईश्वरः, पतिः, अध्यक्षः, अधिपतिः, अधिष्ठातृ *m.* 2 पुरोगः-गमः, अग्रगः, अग्र(ग्रे)सरः, पुरःसर, पुरोगामिन् *m.*; 'l. of an army' सेनानीः, चमूपतिः, योधाध्यक्षः, सेनानायकः; 'l. of a religious sect' गुरुः, आचार्यः. **-ership,** *s.* नायकत्वं, आधिपत्यं. **-ing,** *a.* अग्रग, पुरोगामिन्, पुरःसर, पुरोगम, प्राक्-अग्र-गामिन्. 2 अग्र, अग्र्य, मुख्य, उत्कृष्ट, प्रमुख, परम, उत्तम, प्रधान in comp. 3 (To) आवह, कर (री *f.*) in comp.; 'l. to happiness' कल्याणावह, कल्याणकर, कल्याणोदर्क. **-*s.*** नयः, नीति *f.*, नेतृत्वं; 'l.-strings.' आलंबनसूत्राणि; 'hold or keep in l.-string,' आत्माधीन-*a.* कृ, स्ववशं नी, नियम् 1 P. **-Led,** *a.* नीत, प्रेरित, अधिष्ठित, &c.; 'l. by' ex. by पुरःसर, पुरोगम, प्रमुख, आदि in comp.

Lead-wort, *s.* पाठिन् *m.*, चित्रकः, वह्निसंज्ञकः.

Leaf, *s.* पत्रं, पर्णं, छदः, दलः-लं, पलाशं, छदनं; (of a book) पत्रं; (of a door) कपा(वा)टः-टं-टी, अररं-री; 'fallen l.' प्रपर्णं; 'faded l.' शीर्णपर्णं; 'to strip off the leaves' निष्पत्रीकृ 8 U. **-less,** *a.* निष्पत्र, अपर्ण, निष्पर्ण, निर्दल, पत्र-पर्ण-दल-हीन. **-let,** *s.* पत्रकं, सूक्ष्म-लघु-पत्रं. **-y,** पर्णावृत, पर्णमय (यी *f.*), बहुपर्ण, बहुपत्र-दल, सपत्र, सपर्ण, पर्णिन्.

League, *s.* संधिः, साहित्यं, संघातः, ऐक्यं, संयोगः, संघट्टनं, अन्योन्योपकारप्रतिज्ञा. 2 गव्यूति *f.* —*v. i.* संधा 3 U, पक्षीय-*a.* भू 1 P, संहन्-संयुज्-pass., संमिल् 6 P, संधि कृ 8 U, संघट्ट् 1 A; 'l. ed with the enemy' शत्रुपक्षे स्थित. **-ed,** *a.* कृतसंधि, संधित, संहत, संघातवत्, संयुक्त, कृतसंसर्ग, संसृष्ट, मिलित; 'having l.' संभूय, मिलित्वा. **-er,** *s.* संगिन् *m.*, संसर्गिन् *m.*, सह-संभूय-कारिन् *m.*

Leak, *s.* छिद्रं, रंध्रं, संधिः. 2 धारा, स्रवः, परिस्यंदः, स्रवः. —*v. i.* (अलक्षितं) स्रु 1 P, स्यंद् 1 A; स्रु, री 4 A, क्षर् 1 P, गल् 1 P; आयुः परिस्रवति भिन्नघटादिवांभः (Bh. ii. 109) 'like water l. ing from a broken jar' &c. **-ing,** *s.* स्रवः, क्षरणं,

निस्यंदः, रयः. **-y,** *a.* छिद्रपूर्ण, स्रवणशील, सच्छिद्र, सरंध्र.

Lean, *a.* कृश, परि-, क्षाम-क्षीण, अवसन्न, तनु, क्षीणशरीर-मांस, कृशांग (गी *f.*); 'you are growing l.-er and l.-er day by day' अनुदिवसं परिहीयसेंऽगैः (S. 3); 'l. ness of body' शरीरसादः. **-s.** स्नायुः, वस्नसा. **-v.** *i.* अव-लंब् 1 A, आ-सं-श्रि 1 U; 'l. ing on a mango stick' अवलंब्य चूतयष्टिं; मदलेखया दत्तहस्तावलंबा (Ka 206) 'l. ing on M.'s arm.' **2** पक्षं आश्रि or अवलंब्, प्रवण-*a.* भू 1 P. **3** आ-अव-नम् 1 P, नम्रीभू, बहिर्लंब्, तिरः-तिर्यक् लंब्. **-v.** *t.* उप-धा 3 U, निविश् c., न्यस् 4 U; वामहस्तोपहितवदना (S. 4) 'l. ing her face on her left hand'; also ex. by (*v. i.*). **-ing,** *a.* आलंबिन्, संश्रित, आनत; प्रवण, बहिर्लंब, प्रलंब, वक्र. **-s.** प्रवणता, सं-आ-श्रयः, आलंबनं. **-ness,** *s.* कृशता, कार्श्यं, क्षीणता, क्षामता, अव-,सादः, शोषः, शरीरशोषणं.

Leap, *v. i.* प्लु 1 A, उत्-प्लु, वल्ग् 1 P; नृत् 4 P; 'l. down' अवतॄ 1 P, अवप्लु; 'l. up' उत्पत्, उत्प्लु; 'l. over' लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अति-इ 2 P. **-s.** प्लुति *f.*, प्लुतं, प्लवः, वल्गितं, झंपः, प्लवनं; 'quick (deer's) l.' हरिणप्लुतं; 'going by l.s' प्लुतगति, प्लवग. **-ing,** *s.* प्लवनं, वल्गितं, प्लुतिः; 'l. over a period' मंडूकप्लुतिः.

Learn, *v. t.* शिक्ष् 1 A, अधि-इ 2 A, पठ् 1 P, अधिगम् 1 P, अभ्यस् 4 U; अभ्यासेन विद्यां लभ् 1 A or प्राप् 5 P. **-v.** *i.* ज्ञा 1 U, अवगम्, विद् 2 P, बुध् 1 P, उपलभ्, श्रु 5 P, गृहीतार्थ-*a.* भू 1 P; *See* Know. **-ed,** *a.* विद्वस् (दुषी *f.*), विपश्चित्, ज्ञानिन्, विद्या-विशिष्ट-संपन्न-वत्, कृत-उपात्त-विद्य पंडित, बुध, प्रा(प्र)ज्ञ; ज्ञानवत्, व्युत्पन्न, बहुश्रुत, सूरि, विद्यावृद्ध, साक्षर. **2** अधीतिन्, विचक्षण, विज्ञ, कुशल, निपुण, प्रवीण, चतुर; कोविद, ज्ञ, विद् in comp. **3** (Of books &c.) पांडित्यस्य सूचक, ज्ञानस्य गमक; 'a l. man' पंडितः, विपश्चित्, सूरिः, बुधः, &c.; 'l. in law' स्मृतिज्ञ, न्यायविद्. **-edly,** *adv.* पंडितवत्, प्रज्ञवत्, सज्ञानं, निपुणतया, सकौशलं. **-er,** *s.* शिष्यः, छात्रः, अध्येतृ *m.*, विद्यार्थिन् *m.* **-ing,** *s.* विद्या, विद्वत्ता, विद्वत्त्वं, ज्ञानं, पांडित्यं, व्युत्पत्ति *f.*, प्राज्ञता, विद्यासंपद् *f.* **2** (Act) अध्ययनं, शिक्षणं, अभ्यासः, विद्यार्जनं, विद्याप्राप्ति *f.*, ज्ञानागमः. **3** शास्त्रं, विद्या; 'sacred l.' श्रुति *f.*, निगमज्ञानं; 'he affects great l.' पंडितंमन्यः, पंडितायते (D.).

Lease, *s.* पट्टः, पट्टोलिका. **-v.** *t.* आविक्षित-कालात् निरूपितमूल्येन दा 3 U or विसृज् 6 P.

Leasing, *s. See* Falsehood.

Leash, *s.* चर्मबंधः, चर्मरज्जु *f.* **2** त्रयं, त्रितयं.

Least, *a.* अणु, अल्प, स्तोक, अत्यल्प, अल्पिष्ठ, कनिष्ठ, स्तोकतम, अल्पतम, क्षोदिष्ठ; 'the l. sorrow' अणुरपि शोकः; 'the l. particle' लवः, लेशः, अणुः कणः. **-adv.** स्तोकं, अल्पिष्ठं, किंचित्, कियत्; 'in the l.' मनागपि, अल्पमपि, स्तोकांशेनापि, स्तोकमपि, लेशमपि, किमपि, किंचिदपि; 'at l.' ex. by अवर-*a.* in comp.; 'witnesses should be at l. three' त्र्यवराः साक्षिणो ज्ञेयाः (Y. II. 69); 'at l. 100 Rs.' शतावरा रूपकाः; oft. by तावत्, 'at l. once' सकृदपि तावत्.

Leather, *s.* परिष्कृतं चर्म; 'l.-bag' चर्मभस्त्रिका, चर्मप्रसेविका; 'l.-bottle' कुतू *f.*, 'a small l.-bottle' कुतुपः, 'l.-dresser' चर्मकृत्, चर्मकारः; 'l.-seller' चर्मविक्रयिन्. **-Leathern,** *a.* चर्मकृत-निर्मित, चर्ममय (यी *f.*), चर्म in comp.

Leave, *s.* अनुज्ञा-ज्ञानं, अनुमति *f.*, अनुमोदनं **2** आमंत्रणं, आप्रच्छनं; 'to take or ask l. of' आमंत्र् 10 A, आप्रच्छ् 6 A; *See* Adieu; 'to give l.' अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A. **-v.** *t.* त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P, रह् 1 P 10, परिहृ 1 P, वर्ज् 10, निर्-,मुच् 6 P. **2** निर्गम् 1 P, अपगम्, अप-इ-या 2 P, अपसृ 1P, अपक्रम् 1 U, 4 P, (all with abl.). **3** मृत्युपत्रेण दा 3 U; 'estate left (after death)' रिक्थं. **3** विरम् 1 P, निवृत् 1 A (with abl.); मुच्, त्यज्, अपास् 4 P; oft. ex. by स्था 1 P, आस् 2 A; 'l. it now'. तिष्ठतु-आस्तां तदधुना. **4** निक्षिप् 6 P, न्यस्, सम्-ऋ c. (अर्पयति); 'l. everything to him' सर्वं तदधीनं कुरु. **5** शिष् 7 P, or c., अव-परि°; उद्-वृत् c., 'nothing was left' न किमप्यवशिष्टं; 'to be left' शिष् pass.; 'we being left behind' अस्मास्ववहीनेषु (S. 2). **-v.** *i.* निर्गम्, अप-या, विरम्, &c. **-for,** प्र-स्था 1 A (with acc.). **-off,** विरम्, निवृत्, त्यज्; *See* above. 'the peacock left off dancing' परित्यक्तनर्तनो मयूरः (S.4). 'when it left off raining' शांते पानीयवर्षे ((H. 3). **-out,** वृज्, परित्यज्. **-Leavings,** *s.* शेषः-षं, परि-अव°; शिष्टं, अव-परि°, शेषभागः-खंडः, उद्वर्तः, उच्छिष्टं. **2** मलं; 'l. of food' शेषान्नं, भक्षित-भुक्त-शेषः-षं, भुक्तावशिष्टं, उच्छिष्टं, भुक्तोज्झितं; 'one who eats l.' शेषभोजिन्, उच्छिष्टाशनः.

Leaven, *s.* किण्वं, नग्नहुः, फारोत्तरः, मंडः-डं. -*v. t.* दुष् c. (दूषयति); एंड् c.

Leacher, *s.* लंपटः, कामासक्तः, कामुकः, स्त्रीपरः-लंपटः, सुरतार्थिन् *m.* -**ous**, *a.* कामुक, कामासक्त, सुरतार्थिन्, स्त्रीपर; *See* **Lustful.** -**ously**, *adv.* लंपटवत्, कामुकवत्. -**ousness**,-**y**, *s.* **Lust**, q. v.

Lection, *s.* पाठः. 2 पाठांतरं, पाठभेदः.

Lecture, *s.* पाठः, व्याख्यानं, शासनं, आख्यापनं; 'It is easy to read l. s to others' सुखमुपदिश्यते परस्य (Ka. 156) (*cf.* परोपदेशे पांडित्य). 2 वाग्दंडः, निर्भर्त्सनवाक्यं. -*v.* पठ् c., अधि-इ c. (अध्यापयति), शास् 2 P, उपदिश् 6 P. 2 निर्भर्त्स् 10 A, निंद् 1 P, गर्ह् 1, 10 A. -**er**, *s.* पाठकः, अध्यापकः, शिक्षकः, उपदेशकः, प्रवक्तृ *m.*, वादिन् *m.*, व्याख्यातृ *m.*

Ledge, *s.* कटकः-कं, कूटं. 2 शिला, शिलाफलकं. 3 फलकः-कं, आस्तरः. 4 आलि-ली *f.*, आवलि-ली *f.*

Ledger, *s.* (बृहत्) गणनापुस्तकं.

Lee, *s.* निर्वातस्थानं-देशः. 2 वाताभिमुखी दिक्. -**ward**, *adv.* अनुवातं, वातानुलोमं.

Leech, *s.* रक्तपा, जलौ(लू)का, जलौकसः (*f.* pl.); जलसर्पिणी, रक्तपायिनी, जलजंतुका. 2 भिषज् *m.*, वैद्यः, चिकित्सकः.

Leek, *s.* कंदः-दं.

Leer, *s.* कटाक्षः, दृष्टिविक्षेपः, दृक्पातः, अर्धवीक्षणं, साचिविलोकितं, अपांगदर्शनं. 2 कुस्मितं. -*v. t.* कटाक्षेण ईक्ष् 1 A or दृश् 1 P, साचि-तिर्यक्-विलोक् 1 A, 10. 2 कुस्मि 1 A. -**ing**, *a.* अपांगदर्शिन्, साचि-तिर्यक्-दृष्टि. 2 कुस्मेर.

Lees, *s.* मलं, किट्टं, उच्छिष्टं.

Left, *a.* वाम, सव्य, दक्षिणेतर; 'l.-handed' वामहस्त, सव्यसाचिन्; 'to the l.' वामेन, वामतः.

Leg, *s.* जंघा, प्रसृता, पादः; 'swelling of the l.' श्लीपदं; 'having a swelled l.' कुंभपादः-पदी; 'long-l. ed' दीर्घपाद्-द्, दीर्घजंघ. -**Legging**, *s.* जंघारक्षणं.

Legacy, *s.* उत्तरदानं, मृत्युलेखार्पितदानं.

Legal, *a.* धर्म्य, न्याय्य, स्मार्त (र्ती *f.*), व्यवहारानुरूप, न्यायानुसारिन्, शास्त्रविहित, शास्त्रोक्त, स्मृत्युक्त. धर्म-न्याय-अनिषिद्ध; *See* **Lawful.** 2 स्मृति, धर्म, व्यवहार, in comp.; 'l. proceeding' व्यवहारः; 'wrong l. opinion' अव्यवस्था; 'written l. opinion' पट्टोलिका. -**ity**, *s.* न्याय्यता, धर्म्यता, धर्म-शास्त्र-अनुसारः; 2 कर्ममार्गसेवा, कर्मनिष्ठा. -**ize**, *v. t.* व्यवस्था c. (स्थापयति), शास्त्रसंमत-*a.* कृ U, कृ with (*a.*). -**ly**, *adv.* धर्मेण, न्यायेन धर्मतः, न्यायतः; यथाधर्मं, यथान्यायं, धर्मानुसारेण.

Legate, *s.* दूतः, प्रणिधिः. -**Legation**, *s.* दूत-धर्मः-क्रिया, दौत्यं.

Legatee, *s.* मृतारिक्थभागिन् *m.*, उत्तराधिकारिन् *m.* -**Legator**, *s.* उत्तरदानकारिन् *m.*

Legend, *s.* कथा, उपाख्यानं, आख्यायिका, पुरावृत्त-पुराण-कथा, पुरावृत्तं, लोक-जन-कथा, इतिहासः, पुराणं. -**ary**, *a.* पौराणिक (की *f.*), पुराणोक्त, पुराणकथित. -*s.* ऐतिहासिकः, पुराणकथकः.

Leger-de-main, *s.* हस्तलाघवं-चापल्यं माया, कुहका-कं, इंद्रजालं.

Legible, *a.* व्यक्ताक्षर, सुवाच्य, निर्वाच्य, सुव्यक्त सुस्पष्ट, स्पष्टाक्षर. -**Legibly**, *adv.* सुस्पष्टं, व्यक्ताक्षरैः, सुव्यक्तं.

Legion, *s.* चमूः, सेना, वाहिनी; *See* **Force.** 2 सैन्य-दलं-गुल्मः-व्यूहः-समूहः. 3 चक्रं, निवहः; 'their name is a l.' अतिसंख्याः-संख्यातीताः-ते.

Legislate, *v. i.* व्यवस्थां वि-धा 3 U or कृ 8 U; विधीन् रच् 10 or प्रक्लृप् c. or स्था c. (स्थापयति), व्यवस्था c. -**ion**, *s.* विधिसंकल्पनं, व्यवस्था-नियम-विधानं, विधि-नियम-व्यवस्था. -**ive**, *a.* व्यवस्थापक, विधिकारिन्. -**or**, *s.* व्यवस्थापकः, शासितृ *m.*, शास्तृ *m.*, न्यायप्रवर्तकः, व्यवस्थाकारः. -**ure**, *s.* व्यवस्था-विधि-विधायिनी सभा.

Loop, *s.* शिक्यं, काचः. 2 पाशः; पुटः-टं. 3 छिद्रं, रंध्रं; 'suspended in a l.' काचित, शिक्यित; 'l.-hole' छिद्रं, रंध्रं, गवाक्षः, जालं; निर्गमः, निर्गमद्वारं, अपक्रमः; मुक्ति *f.*, मोक्षः.

Loose, *a.* शिथिल, प्र-,श्लथ, स्रस्त, विगलित, चलित, मुक्त 2 अबद्ध, उद्ग्रथित, उत्सूत्र, बंधनरहित-शून्य, उद्दाम, प्रमुक्त. 3 विरल, असंहत, अदृढसंधि. 4 अव्यवस्थित, अनियत, अनिर्णीत, संदिग्ध, असंक्षिप्त; अस्थिर. 5 असंबद्ध, निःसंग, निरन्वय. 6 उच्छृंखल, निर्मर्याद; अनवस्थ, दुर्वृत्त, व्यभिचारिन्, व्यसनिन्, दुराचार. 7 गर्ह्य, निंद्य, अश्लील; 'l. conduct' दुराचारः; व्यसनं, नीतिभ्रंशः, 'a l. man' लंपटः, व्यसनिन् *m.* 'a l. woman' रंधकी, पुंश्चली, भ्रष्टा; 'let l.' मुच् 6 P; *See* (*v.*); 'break l.' बंधनं भिद् or छिद् 7 P, बंधनात् भ्रंश् 1 A, 4 P. -*v. t.*, -en, *v. t.* शिथिलयति (D.), शिथिलीकृ 8 U, श्र(श्रं)थ्-श्लथ् 1 P, 10 (श्लथयति), स्रंस् c., श्लथीकृ. 2 मुच् 6 P or c., वि-निर्-उत्°; मोक्ष् 10, विसृज् 6 P or c., बंधनात् मुच्. 3 उद्-ग्रंथ् 9 P, उद्-अव-मुच्, वियुज् 7 A, 10, विश्लिष् c., विसंधा 3 U. -*v. i.* -en, शिथिलीभू 1 P, श्ल(श्र)थ् 1 A, स्रंस् 1 A, गल् 1 P, शिथिलायते (D.) -*adv.* -ly, *adv.* शिथिलं, श्लथं, अदृढं, विरलं, असंहतं, अनियतं; दुर्वृत्तवत्, निर्मर्यादं; l. hanging matted hair;' श्लथलंबिन्यः जटाः; 'hanging l.' स्रस्त. -ing, -ening, *s.* शिथिलीकरणं, मोचनं, मोक्षणं, मुक्ति *f.*, श्रथनं. -ness, *s.* शैथिल्यं, प्र-,श्लथः, स्रंसः, श्लथता, स्रस्तता, अदृढता, अनियतता, विरलता, व्यसनिता, दुराचारः, अनवस्था, लांपट्यं, व्यभिचारः; *See* **Laxity.**

Lop, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 P; *See* **Cut,** 2 आ-अव-लंब् c. -*v. i.* आ-अव-लंब् 1 A. -per, *s.* **Cutter,** q. v.

Lopsided, *a.* एकपार्श्वे पतयालु.

Loquacious, *a.* वावदूक, वाचाल-ट, मुखर; *See* **Garrulous.** -ly, *adv.* वाचालतया. -ness, -Loquacity, *s.* वावदूकता, वाचालता, बहुभाषित्वं, जल्पकता, मौखर्यं.

Lord, *s.* ईशः, प्रभुः, ईश्वरः, स्वामिन् *m.*, अधिपः, पतिः, ईशितृ *m.*, अधिभूः, नायकः, नेतृ *m.*, भर्तृ *m.*, नाथः, इंद्रः in comp.; राजन् *m.* परिवृढः, इभ्यः, धनिन् *m.* आढ्यः; 'to be l. of' प्र-भू 1 P, ईश् 2 A, (with gen.); *See* **Master**; 'supreme l.' सर्वेश्वरः, अधिराजः, नरेंद्रः, क्षितिपतिः, स्वर्गाधिपः, जगन्नाथः-नायकः, &c. 2 (Title of address) देवः, महाराजः, स्वामिन् *m.*, आर्यपुत्रः (by wives) भर्तृ *m.* (by servants &c.). 3 परमेश्वरः, भगवान्, प्रभुः, ईश्वरः. -*v. i.* (सदर्पं-सधर्षं) ईश् or शास् 2 P. -like, -ly, *a.* राजोचित, प्रभुयोग्य; राजसदृश (शी *f.*), राजार्ह, ईश्वरीय, ऐश्वर (री *f.*) 2 ओजस्विन्, दीप्तिमत्, तेजस्विन्, *See* **Majestic.** 3 धृष्ट, अवलिप्त, ऐश्वर्यमत्त, दृप्त, गर्वित, उत्सिक्त; *See* **Haughty.** -*adv.* सधर्षं, सदर्पं, उद्धतं, ऐश्वर्यमदेन. -ship, *s.* देवः, &c.; *See* above; 'his l.' तत्रभवान्; महाराजः; 'your l.' अत्रभवान्, देवः, &c. 2 प्रभुत्वं, स्वामित्वं, ऐश्वर्यं, अधिकारः. 3 राज्यं, विषयः.

Lore, *s.* विद्या, ज्ञानं; *See* **Learning.**

Loricate, *v. t.* कवचेन-पटलेन आस्तॄ 5 U or आच्छद् 10. -*a.* सकवच, पटलयुक्त.

Lorn, *a.* अनाथ, अशरण; *See* **Forlorn.**

Lose, *v. t.* अप-,हृ c., त्यज् 1 P, हा 3 P or c. (हापयति). 2 वियुज्-विहा-परिहा-pass., विनाकृ 8 U, (with instr.); भ्रंश् 1 A, 4 P, परि-प्र°, च्यु 1 A, प्र-वि-°, (with abl.); *See* **Deprived** also; 'he lost his life' प्राणैर्वियुक्तः, विगतासुर्बभूव, प्राणहीनः, प्राणैरहीयत; 'lost his realm' राज्याद्भ्रष्टः-च्युतः; 'l. s his friends' मित्रैर्वियुज्यते; 'he lost his wife' तत्पत्नी मृता, पत्न्या विरहितः. 3 (Destroy) नश् c., क्षि 1, 5 P or c., अप-चि 5 U, उच्छिद् 7 P, प्र-वि-ध्वंस् c. 4 (Not to find) ex. by नश् 4 P, प्रभ्रंश्; 'have you lost a camel' अपि युष्माकमुष्ट्रो नष्टः; 'the lost ring' नष्टमंगुलीयकं; 'l. the way' मार्गात् or पथः-भ्रंश् or च्यु or विचल् 1 P; 'he lost his way' प्रभ्रष्ट-नष्ट-पथः or उन्मार्गगामी अभूत्; 'lost his caste' जातेर्भ्रष्टः. 5 'l. (in battle &c.); पराजि-पराभू-pass. 'l. one's wits' बुद्धिहीन-*a.* भू 'to l. time' कालं व्यर्थं नी 1 P or विक्षिप् 6 P, कालं हृ 1 P or या c. (यापयति), कालहरणं-कालक्षेपं कृ 8 U, विलंब् 1 A; 'l. good name' चारित्र्यं-कीर्तिं कलंकयति or मलिनयति (D.) or दुष् c. (दूषयति); 'l. one's consciousness' मुह् 4 P, मुर्छ् 1 P, चेतनां-संज्ञां हा, नष्टचेतन-लुप्तसंज्ञ- *a.* भू; 'we don't l. anything (in this way)' न नः किंचित् छिद्यते (S. B. 345), नास्माकं किमपि हीयते; 'to l. oneself in' आसक्-

निरत- *a.* भू; *See* **Absorb.** **-er,** *s.* प्राप्तापायः, अपाय-हानि-सहः, पराजितः, लब्धहानिः; प्राप्तनाशः-क्षयः. **-Lost,** *a.* नष्ट, भ्रष्ट, च्युत, गत, वीत, हीन, त्यक्त, हृत, हारित, क्षीण, लुप्त; ‘ who has l. his office ’ च्युताधिकारः, अधिकारभ्रष्टः, ‘ who has l. wealth ’ अर्थहीनः, गतविभवः, नष्टार्थः; ‘ who has l. his way ’ पथभ्रष्टः, उन्मार्गप्रवृत्तः, दिङ्मूढः; ‘ who has l. everything ’ हृतसर्वस्वः; ‘ who has l. one eye ’ अक्ष्णा अंधः, एकाक्षिविकलः; ‘ l. to shame ’ त्यक्त-निरस्त-लज्ज, व्रीडाहीन, ‘ l. to sense of freedom ’ स्वातंत्र्यरसानभिज्ञ; ‘ l. in meditation ’ ध्यानपर-परायण-निष्ठ-मग्न, चिंतासक्त; ‘ the bone fell and was l. ’ अस्थि निपतितं नयनविषयातीतं च; ‘ to be l. ’ नश्, अंतर्-इ, तिरोधा pass., तिरोभू. **2** मोहित, मूढ, भ्रांत-चित्त-बुद्धि. **-Loss,** *s.* हानि *f.*, क्षयः, सं-उप-परिक्षयः, वि-,नाशः, अपायः, अपचयः, लोपः, भ्रंशः, च्युति *f.*, व्ययः, ध्वंसः, प्र-वि-ध्वंसः, वियोगः, अपहारः, अत्ययः, त्यागः, अलाभः, क्षति *f.* **2** पराजयः, पराभवः, भंगः; ‘ compensating l. ’ क्षतिपूरणं; ‘ profit and l. ’ लाभालाभौ; ‘ l. of time ’ कालहरणं-क्षेपः, विलंबः; ‘ l. of caste ’ जातिभ्रंशः; ‘ l. of army ’ सैन्यनाशः, बलव्यसनं; ‘ to be at a l. ’ मुह् 4 P; ‘ being at a l. what to do or say ’ किंकर्तव्यता-किंवक्तव्यता-मूढ.

Lot, *s.* अंशः, वि-,भागः, उद्धारः. **2** भाग्यं, दैवं, भागधेयं, दैवगति *f.*, दशा, भवितव्यता; *See* **Fate.** **3** गुटिका; ‘ fall to the l. of ’ आपत् 1 P, उपनम् 1 P, उप-स्था 1 U; आपतंति हि संसारपथमवतीर्णानामेते वृत्तांताः (Ka. 175); ‘ happiness will be your l. ’ त्वं सुखभाग् भविष्यसि, तव सुखमुपनमेत्.

Loth, *a.* *See* **Loath.**

Lotion, *s.* धावनं, धावनौषधं.

Lottery, *s.* गुटिकापातः; गुटिकपातेन निर्णयः.

Lotus, *s.* पद्मं, कमलं, नलिनं, अरविंदं, उत्पलं, कुवलयं, सरसिजं, अब्जं, अंभोजं, महोत्पलं, शतपत्रं, सहस्रपत्रं, कुशेशयं, पंकेरुहं, पंकजं, सरोरुहं, तामरसं, सारसं सरसीरुहं, पुष्करं, अंभोरुहं, बिसप्रसूनं, राजीवं, अंबुजं; ‘ white l. ’ पुंडरीकं, सितांभोजं; ‘ red l. ’ कोकनदं, रक्तोत्पलं; ‘ blue l. ’ इंदीवरं, नीलोत्पलं. **2** (The plant) नलिनी, कमलिनी, पद्मिनी, मृणालिनी, कुमुदिनी; ‘ l. stalk ’ नालं-लः-ली-ला; ‘ l. fibre or film ’ मृणालः-ली-लं, बिसं-शं; l. filament’ किंजल्कः, केश(स)रः-रं, ‘ l. root or bulb ’ करहाटः, शिफाकंदः, शालु(लू)कं; ‘ l. seed ’ कमलाक्षः, पद्मबीजं; ‘ seed vessel of l. ’ बीजकोशः, वराटकः; ‘ new leaf of l. ’ संवर्तिका, नवदलं; ‘an assemblage of l. es’ षंडः, खंडः, पद्मखंडः.

Loud, *a.* उच्च, तार, महत्, गुरु, उत्ताल; महास्वन गुरुस्वर, महाध्वनिकर (री *f.*), महा-बहु-घोष, महाशब्द, घोषण; ‘ a l. noise ’ तारस्वरः, उच्चैर्घोषः, महाशब्दः-स्वनः, प्रणादः तुमुलरवः. **-*adv.*, -ly,** *adv.* उच्चैः, तार-उच्च-स्वरेण, प्रोच्चैः, महाशब्देन, महास्वनेन; ‘ stil l. or ’ उच्चैस्तरां. **-ness,** *s.* उच्चता, महत्त्वं, उत्तालता, &c.

Lounge, *v. i.* उदास् 2 A, आलस्येन कालं क्षिप् 6 P or हृ 1 P, अलसीभू. **-er,** *s.* अलसजनः. कालक्षेपकः, उदासीनः, कार्यपुटः. **-ing,** *a.* अलस, मंद; *See* **Lazy;** ‘ l. gait’ मत्तेभगति *f.*-गमनं.

Louse, *s.* यूकः-का, केशकीटः; ‘ l.-egg ’ लिक्षा. **-y,** *a.* बहुयूक, यूकापूर्ण, यूकोपद्रुत, सयूक.

Lout, *s.* ग्राम्यजनः, वृषलः, ग्रामीणः, स्थूलजनः. **-ish,** *a.* ग्राम्य, स्थूल, अशिष्ट, असभ्य; स्थूल-बुद्धि-मति.

Louver, *s.* धूमरंध्रं, धूमपथः-निर्गमः.

Lovage, *s.* अजमोदा, उग्रगंधा, ब्रह्मदर्भा, यवा(मा)निका.

Love, *s.* प्रेमन् *m. n.*, अभिलाषः, स्नेहः, रागः, वात्सल्यं, अनुरागः; प्रणयः, भावः, प्रीति *f.*, प्रेम-प्रीति-स्नेह-भावः (all with loc.); ‘ l. for God ’ ईश्वरभक्ति *f.* **2** (Amorous) कामः, अनंगरागः, शृंगारः, शृंगारभावः, रति *f.*, रतिसुखं, मदनः. 3 (God of love) कामः, मदनः, स्मरः; *See* **Cupid.** **4** दया, अनुकंपा. **5** रुचि *f.*, अभिरुचिः, आसक्ति *f.*, व्यसनं, अभिनिवेशः, प्रीतिः. **6** (Darling) प्रियः-या, प्रियतमः-मा, दयितः-ता; ‘ to fall or be in l. with ’ स्निह् 4 P, अनुरंज् pass., भावं-अभिलाषं-बंध् 9 P or निविश् c., अनुरागवत्-बद्धभाव-मोहित- *a.* भू; ‘ l.-affected ’, ‘ l.-stricken ’, ‘ under the influence of l.’ अनंगतप्त-पीडित, कामार्त, कामवश, कामातुर, अनंगविधुर, मदनावस्थ, स्मराकुल, कामासक्त; ‘ to make l.’ विवाहार्थं प्रार्थ् 10 A or आराध् c.; ‘ gestures of l. ’ शृंगारचेष्टा, हावः, विलासः, विभ्रमः, लीला, भावः; ‘ l.-knot ’ प्रेमग्रंथिः-बंधः; ‘ l.-letter ’ अनंग-मदन-लेखः, मन्मथलेखः; l.-match ’ प्रेम-विवाह-संबंधः; ‘ l. quarrel ’ प्रणय-प्रेम-प्रीति-कलहः; प्रणयकोपः; ‘ l.-sick ’ कामार्त, कामातुर, कामपीडित, अनंगतप्त, विधुर, मदनविह्वल; ‘ l.-song ’ शृंगारगीतं; ‘ l.-tale ’ प्रेम-शृंगारकथा; ‘ l.-token ’ प्रीतिलक्षणं, प्रेमाभिज्ञानं. **-*v. t.*** कम् 10 A (amorously); प्री-अनुरंज्-आसंज्-pass.; gen. ex. by स्निह् (with loc.); बंध्, निविश् c. with (*s.*); ‘ the king l. s Sâgarikâ ’ नृपः सागरि

कार्या बद्धानुरागः, आसक्तचित्तः, कृतप्रणयः, &c. 2 रुच् 1 A, आनंद् 1 P, मुद् 1 A, तुष् 4 P (with instr.); ex. by प्रिय-*a.*; *See* **Fond, Like** ; ' I l. music ' संगीतप्रियोस्मि; ' l. knowledge ' विद्यासक्तचित्तो भव. **-able,** *a.* स्नेहार्ह, प्रिय. **-ed,** *a.* प्रिय, दयित, कांत, इष्ट, अभीप्सित, स्निग्ध, हृद्य, मनीषित. **-er,** *s.* (Amorous) कामुकः, कामिन् *m.*, कांतः, प्रियः, दयितः, वल्लभः, रमणः, नायकः, इष्टः, प्राणेशः, जीवितेशः. 2 प्रणयिन् *m.*, अनुरागिन् *m.*, निरतः, सेवी-प्रियः-in comp.; 'l. of knowledge' प्रियज्ञानः, ज्ञाननिरतः, ज्ञानेप्सुः; ' a l. of learned men' आगमवृद्धसेवी (R. vi. 41). **-ing,** *a.* प्रणयिन्, अनुरागवत्, सस्नेह, प्रणयवत्, प्रीतिमत्, वत्सल, अनुरक्त, अनुरागिन्, आसक्त, प्रिय, नि-,रत, सेविन् in comp; ' l. gambling ' द्यूतासक्त, द्यूतसेविन्; ' a l. husband ' अनुरागवान् पतिः; 'l. kindness' कृपा, दया, कारुण्यं, वात्सल्यं, प्रसादः, अनुग्रहः, स्नेहः, अनुकंपा. **-ingly,** *adv.* सप्रणयं, सस्नेहं, सानुरागं, स्नेहेन, वात्सल्यात्, प्रीतिपूर्वं. **-Lovely,** *a.* कांत, सुंदर (री *f.*), रुचिर, शोभन, सुभग, मनोज्ञ, मंजु, मंजुल, चारु, मनोरम, मनोहर, ललित, वाम, मुग्ध, कमनीय, अभिराम; *See* **Beautiful. -liness,** *s.* कांति *f.*, सौंदर्यं, शोभा, श्रीः, लावण्यं, सुभगता, चारुता; *See* **Beauty.**

Low, *a.* (Of place) नीच, निम्न, नत, नीचस्थ, अधःस्थ, अधस्तन (नी *f.*), अवाच्. 2 ह्रस्व, नीच, अल्पाकार, खर्व; अनुच्च, अतुंग. 3 नीच, अप-नि-कृष्ट, अधम, हीन, जघन्य, अवर, खल, क्षुद्र, अनार्य, याप्य, गर्ह्य, अश्लील, निंद्य, (language); *See* **Mean;** ' a l. man अपसदः, नीचः, पृथग्जनः; जाल्मः, दुर्वृत्तः. 4 (Voice) नीच, मंद्र, मंद, धीर, ग(गं) भीर. 5: (Price) स्वल्प, अल्प, मित, परिमित, अल्पमूल्य. 6 (L.-spirited) अवसन्न, खिन्न, उद्विग्न, म्लान, विषण्ण, विमनस्, दीन or उद्विग्न-मनस् or चेतस्; *See* **Dejected** 7 नम्र, विनीत, अनुद्धत, निरभिमान; *See* **Humble.** 8 निःसत्त्व, रूक्ष, असार, अपौष्टिक (की *f.*) (as food); ' of l. rank,' ' l.-born ' नीच, हीनजाति, अंत्यजातीय, नीचकुलज, हीनकुल, दुष्कुलीन, अधमजन्मन्, नीचवंशप्रसूत, हीनवर्ण. **-*adv.*** नीचैः, अनुच्चं, नीच in comp.; ' going l ' नीचग; ' l. bending grass ' नीचैः प्रणतानि तृणानि. 2 मंदं, मृदु, सौम्यं. 3 अधस्, अधोभागे, अधस्तात्. **-*v. i.*** रेभ् 1 A, नद् 1 P, नर्द् 1 P, गर्ज् 1 P, हंभारवं कृ 8 U. **-ing,** *s.* रेभणं, रेभितं, हंभा, हंभारवः. -*s.* हंभारवकारिन्, रेभमाण. **-ness,** *a.* नीचता, निम्नता, अधमता, अपकर्षः, हीनता, जघन्यता, गर्ह्यता, मंद्रता, गांभीर्यं, विषादः, अवसादः, उद्वेगः, दैन्यं, दौर्मनस्यं, ग्ला-म्ला-नि *f.*, &c. **-Lower,** *a.* अधर, अधरस्थ, अधस्तन, नीचस्थ, अधःस्थ, अवाच्, अधः in comp.; ' l. world ' अधोलोकः; ' l. garment ' अधोंशुकं; ' l. region ' अधःप्रदेशः; ' the l. classes ' हीन-अधम-जातीयाः, अवरवर्णाः, अंत्यजातीयाः. **-*v. t.*** न्यूनीकृ 8 U, ऊन् 10, ह्रस् *c.*, अल्पीकृ, लघूकृ, लघयति (D.), अपचि 5 U. 2 अपकृष् 1 P, अव-नम् *c.* (नमयति), भ्रंश् *c.*, गौरवं मानं-भंज् 7 P or हृ 1 P; *See* **Humble.** 3 अवहृ *c.*, अधः कृ, अधः-नि-पत् *c.* **-*v. i.*** न्यूनीभू 1 P, अल्पीभू, अपचि-क्षि-pass., ह्रस् 1 P. 2 नम्रीभू. 3 मलिनीभू, कलुषीभू, तमोवृत-मेघाच्छन्न-*a.* भू. 4 भ्रूभंगं कृ, भ्रुवौ संकुच् 1 P. **-*s.*** दुर्दिनं, मेघतिमिरं, तिमिरावृतत्वं, साभ्रता. 2 कालुष्यं, मुखमालिन्यं. **-ing,** *a.* तमोवृत, मेघाच्छन्न, साभ्र, दुर्दिनग्रस्त. 2 मलिन, कलुष. **-Lowly,** *a.* नम्र, विनत, सविनय, निरभिमान, अनहंकार, अनुद्धत, अगर्व, नम्रवृत्ति, दर्पहीन; *See* **Humble. -*adv.* -ly,** *adv.* सविनयं, विनयेन, नम्रतया, अनुद्धतं. **-ness,** *s.* विनयः, नम्रता, अनहंकारः, अगर्वः, अनभिमानः, नम्रवृत्ति *f.* **-Lowland,** *s.* निम्नदेशः-भूमि *f.*, नीचप्रदेशः, उपत्यका. **-er,** *s.* निम्नदेशीयः.

Loyal, *a.* भक्त, अनुरक्त, दृढभक्ति, भक्तियुक्त-मत्, सानुराग, आसक्त; ' l. to the king ' नृपानुरक्त, प्रभुभक्तिनिष्ठ, राजाज्ञानुवर्तिन्, नृपासक्त; ' a l. wife ' सती, साध्वी, पतिव्रता, एकपत्नी, सुचरित्रा, ' l. husband ' स्वदारनिरतः, भार्यानुरक्तः. **-ly,** *adv.* भक्तिपूर्वं, सानुरागं, दृढभक्तिपूर्वं, राजनिष्ठापूर्वं. **-ty,** *s.* भक्ति *f.*, अनुरागः, आसक्ति *f.*, प्रभु-स्वामिभक्तिः, राजभक्तिः-अनुरागः, दृढभक्तिः; राजनिष्ठा; (in a wife) पातिव्रत्यं, सतीत्वं, &c.

Lubber, *s.* ग्राम्यः, स्थूलजनः, स्थूलधीः-बुद्धिः **-ly,** *a.* स्थूल, अदक्ष. 2 स्थलीय.

Lubric, Lubricious, *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मेदुर. **-Lubricate,** *v. t.* अभ्यंज् 7 P, स्निग्धी कृ 8 U, स्नेहेन अंज्. **-ed,** *a.* अभ्यक्त, स्नेहाक्त. **-ion,** *s.* अभ्यंजनं, स्निग्धीकरणं. **-Lubricity,** *s.* स्निग्धता, चिक्कणता.

Lucent, *a.* *See* **Bright.**

Lucid, *a.* दीप्तिमत्, शोभन, सुप्रभ, तेजस्विन्, उज्ज्वल, देदीप्यमान; *See* **Bright.** 2 विशद, स्वच्छ, निर्मल, अ-वि-मल, प्रसन्न, शुद्ध. 3 व्यक्त, सुस्पष्ट, भिन्नार्थ, स्पष्टार्थ. 4 प्रसन्नचित्त; ' l. interval ' चित्तप्रसादः. **-ly,** *adv.* स्पष्टं, सुव्यक्तं, भिन्नार्थं; स्फुटं, विशदं. **-ness,** *s.* दीप्ति *f.*, कांति *f.*, शोभा, प्रभा, द्युति *f.*, 2 स्पष्टता, वैशद्यं, प्रसादः, वैमल्यं.

Lucifer, *s.* शुक्रः, भार्गवः; 'l. match' अग्निशलाका.

Luciferous, *a.* प्रकाशद, दीप्तिकर (री *f.*).

Luciform, *a.* तेजोमय (यी *f.*), प्रकाशविशिष्ट.

Luck, *s.* दैवं, भाग्यं, भागधेयं, विधिः, नियति *f.*, भवितव्यता, दैवयोगः; *See* **Fate**; 'good l.' सौभाग्यं, पुण्योदयः, भाग्योपचयः, 'bad or ill l.' दैवदुर्विपाकः-विपर्यासः-विपर्ययः, मंदभाग्यं, दौर्भाग्यं, दुर्दैवं, दुर्गति *f.*, अशुभं, अमंगलं. **-less**, *a.* दैवोपहत, मंदभाग्य, अधन्य, दुर्भाग्य, अभाग्य, भाग्य-दैव-हीन, दुर्दैवग्रस्त, हीनभाग्य. **-lessly**, *adv.* दुर्दैवात्, दुर्भाग्यात्. **-Lucky**, *a.* भाग्यवत्, धन्य, सौभाग्यवत्, पुण्यवत्, भाग्य-दैव-शालिन् 2 शुभ, कल्याण (णी *f.*), भद्र, मंगल, शिव. **-ily**, *adv.* दैवात्, दैवयोगात्, दिष्ट्या, दैव-भाग्य-वशात्, सौभाग्येन. **-iness**, *s.* सौभाग्यं, धन्यता, पुण्यवत्ता, &c.

Lucre, *s.* लाभः, आयः, आगमः, फलं, वृद्धि *f.*, अर्थः, फलोदयः, अर्थप्राप्ति *f.* **-Lucrative**, *a.* लाभद, लाभकर (री *f.*), अर्थद, फलावह. **-ly**, *adv.* लाभपूर्वं, सफलं.

Lucubrate, *v. i.* रात्रौ अधि-इ 2 A or अभ्यस् 4 U. **-ion**, *s.* रात्र्यध्ययनं, निशाभ्यासः.

Luculent, *a.* *See* **Lucid**.

Ludicrous, *a.* हास्य, हासकर (री *f.*), उप-अव-हास्य, असंगत. **-ly**, *adv.* असंगतं, हास्यरूपेण.

Lug, *v. t.* बलेन आकृष् 1 P or हृ 1 P.

Luggage, *s.* परिच्छदः, उपस्करः, यात्रासामग्री, वस्त्रपात्रसंभारः.

Lugubrious, *a.* शोकात्मक, दुःखात्मक, कारुणिक (की *f.*), दुःखावेदिन्.

Lukewarm, *a.* कोष्ण, कवोष्ण, मंदोष्ण, कदुष्ण, ईषदुष्ण, ईषत्तप्त. 2 उत्साहहीन, उदासीन, मंदोत्साह, निरुत्सुक, अतीक्ष्ण; मंदोद्योग, निरुत्साह. **-ly**, *adv.* ईषत्तापेन, कवोष्णं. 2 निरुत्साहं. **-ness**, *s.* कवोष्णता, ईषत्तापः. 2 निरुत्सुकता, मंदोत्साहः, औदासीन्यं, मंदोद्योगः, अनौत्सुक्यं.

Lull, *v. i.* शम् 4 P, प्र-उप°, निवृत् 1 A, विरम् 1 P, निर्वा 2 P, निगम् 1 P. **-v. t.** शम् c. (शमयति), सांत्व् 10; निवृत् c. 2 प्र-सद् c., लल् 19; 'l. to sleep' (गीतादिना) स्वप् c. **-s.** शांति *f.*, अक्षोभः, प्र-उप-शमः, निर्वातः, वायुनिवृत्ति *f.*-विरामः-विच्छेदः. **-er**, *s.* शमकः, शांतिदः. **-Lullaby**, *s.* स्वापगीतं.

Lumbago, *s.* कटिवेदना.

Lumber, *s.* भारः, निरर्थकद्रव्यं, निष्प्रयोजनद्रव्यं. **-v. i.** मंदं चल् 1 P. **-v. t.** संकॄ 6 P. संकुलीकृ 8 U.

Luminary, *s.* ज्योतिस् *n.*, प्रभावत् *m.*, ज्योतिष्मत् *m.*, तेजस् *n.*; *See* **Star**.

Luminous, *a.* तेजोमय (यी *f.*), सप्रकाश, तेजस्विन्, प्रभावत्, दीप्तिमत्, भासुर; 'self-l.' स्वयंप्रकाश. **-ly**, *adv.* तेजसा.

Lump, *s.* राशिः, संघः, गणः, समूहः, ओघः, वृंदं, संचयः, समाहारः; *See* **Multitude**. 2 पिंडः-डं, गंडः, घनः, स्थूलभागः-अंशः. 3 साकल्यं, समासः; 'in the l.' एकीकृत *a.* पिंडित *a.* साकल्येन; 'this is the meaning in the l.' एष पिंडितार्थः (M. 1.). **-v. t.** पिंडीकृ 8 U, राशीकृ, पुंजीकृ, एकीकृ, पिंड् 10. **-ish**, *a.* स्थूल; स्थूलबुद्धि. **-y**, *a.* सपिंड, पिंडित, पिंडीभूत.

Lunar, *a.* चांद्र (द्री *f.*), चांद्रमस (सी *f.*), सौम्य, ऐंदव (वी *f.*); gen. ex. by चंद्र-सोम- in comp.; 'l. month' चांद्रमासः; 'l. race' चंद्र-सोम-वंशः; 'l. day' तिथि *m. f.*; 'l. mansion' नक्षत्रं; 'l. eclipse' चंद्रोपरागः.

Lunated, *a.* अर्धचंद्राकार.

Lunatic, *a.* उन्मत्त, सोन्माद, वातुल, भ्रांतचित्त-मति-बुद्धि, विक्षिप्तचित्त, हत-नष्ट-बुद्धि; 'a l. asylum' वातुलालयः. **-Lunacy**, *s.* उन्मादः, बुद्धि-मति-भ्रंशः, चित्तविक्षेपः-विप्लवः, वातुलता, मति-बुद्धि-भ्रमः.

Lunch, Luncheon, *s.* उपहारः, लघ्वाहारः.

Lune, *s.* अर्धचंद्राकृतिः.

Lungs, *s.* तिलकं, क्लोमन् *n.*, क्लोमं, फुप्फुसः-सं.

Luniform, *a.* चंद्राकृति, चंद्राकार.

Lupine, *s.* द्विदलं, शमीधान्यं. **-a.** वृकसंबंधिन्, वृकसदृश.

Lurch, *v. i.* अप-सृ 1 P, निभृतं स्था 1 P, नि-ली 4 A. 2 **Disappoint, Steal**, q. v. **-er**, *s.* कौटिकः. 2 कौटिककुक्कुरः.

Lure, *v. t.* प्र-वि-लुभ् c., आकृष् 1 P, हृ 1 P, प्र-वृत् c., प्रोत्सह् c., प्रणुद् 6 P or c., मुह् c., प्रचुद् 10. 2 आमिषदर्शनेन आकृष्. **-s.** प्र-विलोभनं, आकर्षणं, प्रोत्साहनं. 2 आमिषं, आमिषदर्शनं.

Lurid, *a.* वि-, पांडु, मलिन, उग्रदर्शन, घोररूप, मलिनप्रभ, तमोवृत.

Lurk, *v. i.* निभृते-प्रच्छन्ने-स्था 1 P or वृत् 1 A, नि-ली 4 A, गुप् pass.; *See* **Conceal**. **-er**, *s.* निभृतस्थायिन् *m.* **-ing**, *s.* प्रच्छन्नवासः, गुप्ति *f.*, 'l.-place' निलयः, गुप्तिः, निभृत-गूढ-स्थानं.

Luscious, *a.* ललित, सुभग, अतिमधुर, कमनीय, सुस्वादु, सुमधुर, अतिमिष्ट-स्वादु. **-ly**, *adv.* अतिमधुरं, सुस्वादु. **-ness**, *s.* अतिमाधुर्यं, सुस्वादुता.

Lush, *a.* सरस, रसगर्भ.

Lust, *s.* कामः, कामानलः, मैथुनेच्छा, सुरतार्थिता, मदनः, व्यवायेच्छा, रताभिलाषः,

विषयसुखेच्छा, इंद्रियासक्ति *f.* 2 अतिस्पृहा-वांछा, लालसा, अतिलिप्सा, लोभः; वांछा, आकांक्षा, अभिलाषः. 3 दुर्वासना, कुवासना. -*v. i.* मैथुनं-सुरतं-इष् 6 P or अभिलष् 1, 4 P, रतार्थिन्-*a.* भू; better ex. by 'l.-ful.' 2 अत्यंतं इष् or वांछ् 1 P or स्पृह् 10 or कांक्ष् 1 P, गृध् 4 P, लुभ् 4 P. **-ful,** *a.* कामासक्त, कामांध, कामुक, कामिन्, इंद्रियवश विषयानिरत, इंद्रियसुखासक्त, कामार्त, कामातुर, कामग्रस्त, कामजित, कामाविष्ट, स्मरातुर, कामवृत्ति, रतार्थिन्, मैथुनार्थिन्, मैथुनेच्छु, व्यवायिन्, लंपट, स्त्रीलंपट-पर-व्यसनिन्, कामन, अभीक, अनुक. **-fully,** *adv.* सकामं, कामुक-लंपट-वत्.

Lusty, *a.* महाबल, सवीर्य, ससत्त्व, सबल, बल-वीर्य-वत्, मांसल, दृढांग (गी *f.*), दृढशरीर, वज्रदेह, पृथुशरीर, व्यूढोरस्क, अंसल, महाकाय. **-ly,** *adv.* सवीर्यं, ससत्त्वं, बलवत्, तेजसा, पौरुषेण. **-ness,** *s.* वीर्यं, सत्त्वं, मांसलता, दृढांगता, &c.

Lustral, *a.* पावन, पावक, शुद्धिकर (री *f.*); 'l. water' पावनोदक, शांत्युदकं. **-Lustrate,** *v. t.* पू 9 U, शुध् c. **-ion,** *s.* शुद्धि *f.*, शोधनं, पावनं, पवित्रीकरणं.

Lustre, *s.* द्युतिः, कांतिः, दीप्तिः, रुचिः, भास्, रुच्, शोभा, प्रभा, ओजस्विता (all *f.*), तेजस् *n.*, प्रकाशः, प्रतापः, उद्द्योतः. **-Lustrous,** *a.* सुप्रभ, उज्ज्वल, तेजस्विन्, शोभन, दीप्ति-कांति-मत्; *See* **Bright.**

Lustrum, *s.* वर्षपंचकं.

Lutarious, *a.* पंकस्थ, कर्दमवासिन्. 2 पांकिल, कार्दम (मी *f.*). 3 पंकवर्ण.

Lute, *s.* वीणा, वल्लकी, विपंची-चिका, तंत्रीः, परिवादिनी (seven-stringed); 'bow of a l.' कोणः, शारिकः, रणः; 'play on a l.' वीणां वद् c. **-Lutanist, Luter, Lutist,** *s.* वीणावादः-दकः, वैणिकः.

Luteous, Lutescent, *a.* पीतवर्ण.

Luxate, *v. t.* विसं-धा 3 U, अस्थिग्रंथिं भंज् 7 P or त्रुट् c. or विसं-धा. **-ed,** *a.* संधिच्युत-भ्रष्ट, संधि-विश्लिष्ट, त्रुटितसंधि. **-ion,** *s.* अस्थित्रोटनं-भंगः-विश्लेषः.

Luxury, *s.* विषयसुखं, सुखोपभोगः, सुखभोग-आसक्ति *f.*, विषयभोगः-सेवा, विलासः, विलासित्वं, सुखसेवा-आस्वादः. 2 सुखं, भोगः, सुखसाधनं, भोगसाधनं, सुखसाहित्यं. 3 स्वाद्वन्नं, भोजनविशेषः, उत्तमान्नं, विशिष्टभोजनं. **-iance, -iancy,** *s.* अति-वृद्धि-स्फीति *f.*, समृद्धि *f.*, वृद्धिबाहुल्यं, उद्रेकः. **-iant,** *a.* अतिवर्धिष्णु, अतिस्फीत, अतिसमृद्ध, सुप्रचुर, अत्यंत, अतिबहुल, उद्रिक्त, अतिरिक्त, अत्यधिक. **-iantly,** *adv.* अतिसमृद्ध्या, अतिप्राचुर्येण, बाहुल्येन, अतिबहुलं, अतिरिक्तं, अतिबहुशः. **-iate,** *v. i.* अत्यंतं वृध् or स्फाय् 1 A or ऋध् 4, 5 P or आ-प्यै 1 A, अतिवृद्धिं इ 1 P, अतिप्रचुरीभू 1 P. 2 अतिविलासेन वृत् 1 A or व्यव-हृ 1 A यथेच्छं सेव् 1 A or उपभुज् 7 A. **-ious,** *a.* विलासासक्त, विषयसेविन्, विषयासक्त, सुख-भोग-परायण, इंद्रियसुखनिरत, सुखास्वादतत्पर. 2 विलासयुक्त-मय (यी *f.*), सविलास, अतिसुखावह, सुखभोगकर (री *f.*), भोगानुकूल. **-iously,** *adv.* सविलासं, अतिसुखेन; सुखोपभोगपूर्वं, सुखासक्तवत्. **-iousness,** *s.* विलासित्वं &c.; *See* (*s.*).

Lye, *s.* क्षारोदकं, क्षारजलं.

Lymph, *s.* वसा, मेदस् *n.* 2 निर्झरः, उत्सः, [illegible] वाहः. **-Lymphatic,** *s.* मेदोवाहिनी.

Lynx, वनमार्जारः-बिडालः.

Lyre, *s.* वीणा, विपंची; *See* **Lute.** **-ic, -ical,** *a.* वैणिक (की *f.*). **-ist,** *s.* वैणिकः.

Lythrum, *s.* अग्निज्वाला, सुभिक्षा, धातकी, धातु(तृ)पुष्पिका.

M.

Macaw, *s.* वक्रतुंडः, शुकः, कीरः.

Mace, *s.* जातिपत्री, जाति-ती *f.*, जाति(ती)कोशं, जातिफलं-कोशं. 2 गदा; दंडः, यष्टि *m.* *f.*; वेत्रं, लगुडः, मुस(ष)लः-लं, मुद्गरः; 'm.-bearer' दंड-यष्टि-धरः, वेत्रधरः, गदाहस्तः पाणिः, यष्टिग्रहः, वेत्रपाणिः, दंडभृत्.

Macerate, *v. t.* जलेन आप्लु c., आर्द्रीकृ 8 U, सं-धा 3 U. **-ion,** *s.* संधानं, पाचनं आर्द्रीकरणं.

Machinate, *v. t.* मंत्र् 10 A, (उपायं) चिंत् 10, संप्र-धृ 10, परिक्लृप् c., युज् 10. 2 द्रुह् 4 P, कपटप्रबंधं रच् 10, गूढमंत्रणां कृ 8 U. **-ion,** *s.* कुकल्पना, कुमंत्रणा, कूटप्रबंधः, गूढप्रयोगः, कपटप्रबंधः, द्रोहचिंतनं, कल्पना, चिंतनं, योजना, विधानं. **-or,** *s.* कुमंत्रणाकृत् *m.*, कपटप्रबंधरचकः.

Machine, *s.* यंत्रं, साधनं, उपकरणं. ***-Machinery,*** *s.* यंत्राणि, यंत्रसामग्री, यंत्रसमुदायः. ***-Machinist,*** *s.* यंत्रकारः-विद्, यंत्रकलाज्ञः. ***-Mechanic,*** *s.* शिल्पिन् *m.*, शिल्पोपजीविन् *m.*—*a.* शिल्पकारः, कर्मकारः, कारुः, **-al,** —*a.* यंत्रं in comp., यंत्रसंबंधिन्, यांत्रिक यन्त्रविषय, यंत्र-शिल्प-विद्यासंबंधिन्, शिल्पविद्याकृत, यंत्रशास्त्रानुरूप; (का *f.*). 2 'm. art' शिल्पं, कला. 3 यंत्रतुल्य, यंत्र-

CC0. In Public Domain, Digitization by eGangotri

वत्, अप्रबोधयुक्त. 4 यंत्रविद्या-शिल्पविद्यानिपुण; शिल्पकारिन्. **-ally**, *adv*. यंत्रविद्यानुरूपं, शिल्पशास्त्रानुसारेण. 2 यंत्रवत्, अबुद्धिपूर्वं, अमति-अप्रबोध-पूर्वं. **-ian**, *s*. शिल्पशास्त्रज्ञः, यंत्रविद्याकुशलः. ***-Mechanics***, *s*. यंत्र-शिल्प-विद्या-शास्त्रं, यंत्रगतिशास्त्रं. ***-Mechanism***, *s*. यंत्ररचना, कला, युक्ति *f*.; यंत्रगति *f*, यंत्रव्यापारः. ***-Mechanist***, *s*. यंत्रकारः.

Macrocosm, *s*. विश्वं, त्रिभुवनं, अखिलं जगत्.

Macrology, *s*. अतिविस्तारः, दीर्घसूत्रता.

Macula, *s*. कलंकः, अंकः, लांछनं, लक्ष्मन् *n*. ***-Maculate***, *v. t*. कलंकयति-मलिनयति (D.), **-a.,-ed**, *a*. कलंकित, कलुषित, लांछित.

Mad, *a*. उन्मत्त, वातुल, सोन्माद, हत-नष्ट-भ्रष्टबुद्धि, हतज्ञान, भ्रांत-विक्षिप्त-चित्त; 'make m.' उन्मादं नी 1 P, उन्मद् c.; 'to go m.' उन्मद् 4 P. 2 (Of acts) बालिश, उन्मादयुक्त, असमीक्ष्यकृत, साहसिक (की *f*.); 'm.-brain,-brained' विक्षिप्तबुद्धि &c.; 'm.-cap' साहसिकः; 'm. with anger' संरब्ध, कोपाकुल, मदोद्धत; 'm.-house' वातुलालयः; 'a m. dog' अलर्कः; 'a. m.-man' वातुलः, उन्मत्तः. **-den**, *v. t*. उन्मद् c., वातुलीकृ 8 U, व्याकुल् c., उन्मत्तीकृ; 'm. ed with rage' क्रोधांध; 'm. ed with liquor' सुरापानमत्त. **-ing**, *a*. उन्मादक, उन्मादजनन (नी *f*.). **-ly**, *adv*. उन्मत्तवत्, उन्मादात्, सोन्मादं, वातुलवत्, चित्तविभ्रमेण, भ्रांतचेतसा. 2 साहसिकतया. **-ness**, *s*. उन्मादः, उन्मत्तता, वातुलता, मति-बुद्धि-भ्रमः, चित्तविप्लवः-विक्षेपः, मति-बुद्धि-भ्रंशः. 2 (Fig.) व्यामोहः, मूढता, साहसं.

Madam, *s*. आया, भाविनी, कुलजा; (in addresing) आर्ये, भवति.

Madder, *s*. मंजिष्ठा. विकसा-षा, जिंगी, समंगा, कालमेशि(षि)का, मंडूकपर्णी, मंडि(डी)री, भंडी, योजनवल्ली.

Madefy, *v. t*. क्लिद् c., आर्द्रीकृ 8 U.

Magazine, *s*. नानाविषयसंबद्धं पुस्तकं; 'a m. of arms' आयुधागारं, शस्त्रास्त्रागारं. 2 भांडागारं.

Maggot, *s*. कृमिः, कीटः. **-y**, *a*. कीटमय (यी *f*.), कीटपूर्ण.

Magic, *s*. इंद्रजालं, माया, अभिचारः, मंत्रयोगः, वशक्रिया, कुहका-कं, मंत्रः, कार्मणं, कुसृति *f*., मोहः, योगः. **-a.,-al**, *a*. ऐंद्रजालिक-आभिचारिक-मायिक-कौसृतिक-(की *f*.), मायामय (यी *f*.), मोहिन्, माया in comp. **-ally**, *adv*. इंद्रजालेन, मायया, अभिचारेण. **-ian**, *s*. ऐं(इं)द्रजालिकः, मायाविन् *m*., मायाकारः, मायिन् *m*. अभिचारिन् *m*. कुहकः, कुहकाजीविन् *m*. कौसृतिकः, योगिन् *m*., योगेश्वरः, सिद्धः; 'm.'s brush' पिच्छिका.

Magistrate, *s*. धर्माध्यक्षः, न्यायाध्यक्षः; *See* Judge. ***-Magistracy***, *s*. धर्माधिपत्यं, न्यायाधिकरणं, धर्माधिकारः. 2 धर्माध्यक्षगणः-समूहः. ***-Magisterial***, *a*. (*s*.) in comp., आधिकारिक (की *f*.). 2 प्रभुत्वविशिष्ट, आज्ञापक, सावलेप, दृप्त, प्रगल्भ. **-ly**, *adv*. शासनरूपेण; सदर्पं, सावलेपं.

Magnanimous, *a*. महात्मन्, महामनस्, महामनस्क, महानुभाव, उदार-धी-चेतस्-मति, उदार, महेच्छ, महाशय, उदारात्मन्. 2 (Of acts) अवदात, उदार, औदार्यपूर्ण. **-ly**, *adv*. औदार्येण, माहात्म्येन, महानुभावात्, उदारचेतसा. ***-Magnanimity***, *s*. माहात्म्यं, उदारात्मता, महात्मता, औदार्यं, महानुभावः, चित्तौदार्यं, उदारमतिता, महेच्छा, महाशयः.

Magnate, *s*. उत्कृष्टपदस्थः, उच्चपदस्थः, धुरंधरः, धुरीणः.

Magnet, *s*. अयस्कांतः, अयोमणिः, लोहकांतः, चुंबकः. **-ic**, **-ical**, *a*. आकर्षक, आकर्षणशील, लोहचुंबनशील; 'm. needle' अयस्कांतशलाका; 'm. attraction' आकर्षः-र्षणं. **-ically**, *adv*. आकर्षणद्वारेण. **-ism**, *s*. अयस्कांतगुणः, आकर्षणशक्ति *f*., लोहकांतधर्मः. **-ize**, *v. t*. आकर्षणशक्तिं दा 3 U or संक्रम् c. or संचर् c.

Magnificent, *Magnific*, *a*. शोभमान, तेजस्विन्, अतिशोभन, महाप्रभ, श्रीमत्, महातेजस्, महाप्रताप, विभूतिमत्, दैदीप्यमान. 2 (Palace &c.) विशाल, तुंग, उज्ज्वल. **-ly**, *adv*. अतितेजसा, सप्रतापं, विभूत्या, ऐश्वर्येण. ***-Magnificence***, *s*. महिमन् *m*., प्रतापः, श्रीः, शोभा, तेजस् *n*., अतिप्रतापः शोभा-प्रभा, ओजस्विता, महाप्रतापः, विभूति *f*., औज्ज्वल्यं, विभवः, ऐश्वर्यं.

Magniloquent, *a*. प्रौढ-प्रगल्भ-वाच्, दृप्तधृष्ट-वाच्. ***-Magniloquence***, *s*. प्रौढभाषणं, प्रगल्भोक्ति *f*., गर्वोक्तिः.

Magnify, *v. t*. वृध् c., उप-चि 5 U, स्फाय् c. (स्फाययति), अधिकीकृ 8 U; *See* **Increase**. 2 अत्यंतं वर्ण् 10, उत्-सं-कृत् 10. 3 अतिशयोक्त्या वृध् c. or विस्तृ c. **-er**, *s*. वर्धकः. 2 बृंहणयंत्रं. **-ing**, *a*. वर्धिन्, बृंहणकारिन्.

Magnitude, *s*. मानं, प्र-परि-माणं, आकारमानं, मात्रा in comp., इयत्ता; 'of the m. of an egg' अंडमात्र, अंडपरिमाण. 2 गुरुत्वं, महत्त्वं, बृहत्त्वं, वैपुल्यं, प्रथिमन् *m*., गरिमन् *m*., महिमन् *m*., पृथुता, विशालता.

Mag-pie, *s*. *See* **Jay**.

Maid, *Maiden*, *s*. कन्या, कुमारी, तरुणी, बालिका, युवतिः-ती, बाला, कन्यका, कुमारिका. 2 अनूढा, अपरिणीता, अविवाहिता, अदत्ता, अक्षत-अविद्ध-योनिः. 3 (M.-servant) दासी, चेटी, प्रेष्या, परिचारिका,

कर्मकरी. -a. कौमार (री f.), कन्याविषय. 2 अभिनव, अक्षतोपभोग, अक्षत, अखंड. -hood, s. कौमारं, तारुण्यं, कुमारीभावः-दशा. 2 अभिनवत्वं, अखंडता. -ly, -like, a. कन्यकोचित, कन्या-कुमारी-योग्य.

Mail, s. वर्मन् n., तनुत्रं, तनुत्राणं, कवचः-चं, उरश्छदः, दंशनं, कंकटकः, ज(जा)गरः; *See* **Armour**; 'm.-coat' कंचुकः, वारबाणः; 'having put on a m.-coat' आप्रति-मुक्त, अपिनद्ध, पिनद्ध. 2 पत्र-लेख्य-वाहनं. -ed, a. सकवच, कवचिन्, कवचधारिन्; कृतसन्नाह, वर्मित, सन्नद्ध, सज्ज, दंशित, व्यूढकंकट.

Maim, v. t. विकली-व्यंगी-कृ 8 U, हीनांगीकृ, विकलयति (D.). -s अंगवैकल्यं, हीनांगता, न्यूनावयवत्वं. -ed, a. विकलांग (गी f.), व्यंग, हीनांग, विकल, अंगविकल.

Main, a. मुख्य, प्रधान, प्रमुख, परम, अग्र्य, श्रेष्ठ, उत्कृष्ट, उत्तम, विशिष्ट, मूल in comp., मुख्यतम; 'm. matter' गुरुकार्यं, मुख्यं; 'm. door' सिंहद्वारं; 'm. stock' मूलधनं. -s. प्रधानभागः, प्रधानांशः, मुख्यांशः, बाहुल्यं, भूयिष्ठभागः. 2 महोदधिः, महार्णवः; *See* **Sea**. 3 बलं, शक्ति f., प्रभावः, सामर्थ्यं. 4 प्राधिभूतं, समाह्वयः; 'in the m.' बहुशः, बाहुल्येन, भूयिष्ठं, सामान्यतः; 'with might and m.' सर्वबलेन, प्रसभं, प्रसह्य; 'm.-land' मध्य-मूल-भूमि f., मुख्य-प्रधान द्वीपः-पं. -ly, adv. मुख्यशः, बहुशः, प्रधानतः, मुख्यांशेन, भूयिष्ठं, बहुतरं, सामान्यतः, विशेषेण, प्राधान्येन.

Maintain, v. t. ग्रह् 9 U, धृ 1 P, 10. 2 पा c. (पालयति), रक्ष् 1 P, भृ 1 P, 3 U आ-अव-लंब् 1 A, उत्तंभ् 9 P or c., संस्तंभ्, संधृ c., पुष् 1, 9 P or c., योगक्षेमं वह् 1 P, पालनं-पोषणं कृ 8 U. 3 प्रवृत् c., रक्ष्, न विच्छिद् 7 P or वि-रम् 1 P. 4 प्रति-पद् c., वद् 1 P, निर्वह् 1 P or c., समर्थ् 10, संस्तंभ्, दृढीकृ, अनु-पा c. (पालयति); *See* **Fulfil** also. 5 (As a theory) वद् 1 P; 'he who m. s that there is God' ईश्वरवादी; 'one who m. s the doctrine of atheism' नास्तिकमतवादी. 6 सनिश्चयं वद् 1 P, दृढोक्त्या प्रति-पद् c.; 'to m. oneself' जीवितं धृ, शरीरवृत्तिं कृ or निर्वृत् c.; *See* **Live (on)**. -or, s. पालकः, पोषकः, रक्षितृ m., आलंबिन्, भरः-धरः- in comp. -**Maintenance**, s. धारणं. 2 रक्षा, रक्षणं, भरणं, भृति f., आ-समा-लंबनं, पालनं, पोषणं, संवर्धनं. 3 जीविका, वृत्ति f., आ-उप-जीविका, आजीवः, प्राणयात्रा; *See* **Living**. 4 ग्रासाच्छादनं; अन्नवस्त्रं, अन्नाच्छादनं. 2 प्रतिपादनं, निर्वाहः.

Maize, s. शस्यं.

Majesty, s. राजश्रीः, राजप्रतापः-तेजस् n., राजमहिमन् m.-प्रभावः-गौरवं, प्रतापः, राजत्वं, तेजः, प्रभावः, ऐश्वर्यं, महिमन् m., वैभवं, विभूति f., गौरवं, महत्त्वं; 'your m.' देवः, महाराजः, देवपादाः, स्वामिन् m., श्रीमद्देवपादाः, प्रभुः, प्रभविष्णुः; (in addressing) देव, महाराज, &c. -ic, -ical, a. राजयोग्य, राजतुल्य, नृपोचित, राजतेजोमय (यी f.), राजश्रीमत्, राजप्रतापवत्, सानुभाव, सावष्टंभ, प्रतापवत्, ऐश्वर (री f.), विभूतिमत्, प्रभाववत्, ओजस्विन्; उन्नत, अतिप्रौढ, उज्ज्वल, उत्तुंग; *See* **Lofty** also; 'm. splendour' दीप्ति f.; 'm. dignity' अनुभावः, अवष्टंभः, ओजस्विता. -ically, adv. राजसदृशं, सावष्टंभं, सानुभावं, नृपोचितं, राजप्रतापेन-तेजसा-महिम्ना, सप्रतापं, सप्रभावं, ऐश्वर्येण, सगौरवं.

Major, a. अधिक, भूयस्, अधिकसंख्य. 2 मुख्य, प्रधान, प्रमुख, गुरु, वरीयस्, वर्षीयस्. -s. प्राप्तव्यवहारः, व्यवहारक्षमः-योग्यः, अतीत-त्यक्त-शैशवः. 2 गुल्माध्यक्षः, सैन्यदलाध्यक्षः. -**Majority**, s. बहु (pl.), बहुतरभागः, भूयिष्ठभागः, अधिकसंख्या; 'a m. of members have come' सभासदां मध्याद्बहवः समागताः; 'm. of votes' बहुमतं, मताधिक्यं. 2 व्यवहारः, व्यवहारक्षमता, व्यवहार्यदशा, वयस् n.; 'reached his m.' प्राप्तव्यवहारः, त्यक्तशैशवः; *See* **Grow up**.

Make, v. t. कृ 8 U, वि-धा 3 U, अनु-ष्ठा 1 P, आचर् 1 P. 2 (Create) निर्मा 3 A, 2 P, सृज् 6 P, घट् c., (घटयति), कृ, वि-धा, रच् 10, क्लृप् c., उत्पद् c., जन् c. (जनयति), साध् c., निः-सं-पद् c. 3 (Produce) उत्पद् c., जन् c., कृ; *See* **Cause**. 4 (Force) ex. by causal of roots; 'm. s me question you' प्रश्नकर्मणि मां नियोजयति (Ka. 134); *See* **Compel**. 5 निर्मा, घट् c.; gen. ex. by निर्मित, घटित, रूप, मय, आत्मक in comp.; also by भू 1 P, सं-पद् 4 A; '10 repeated 2 times m. s 20' द्विरावृत्ता दश विंशतिर्भवंति or संपद्यंते. 6 आप् 5 P, विद् 6 U, लभ् 1 A; *See* **Get**; 'm. amends for' क्षतिं पूर् 10, प्रतिफलं दा 3 U, प्रमृज् 2 P; निष्कृ; 'm. account of' मन् 4 A or c., गण् 10, अपेक्ष् 1 A; 'to m. the best of a bad matter' दोषमपि गुणत्वमापादयितुं; 'self-made man' स्वोद्यमलब्धप्रतिष्ठः; 'm. merry' हृष्-a. भू, उत्सवं कृ; 'm. much of' बहु मन्; 'm. light of' तृणाय मन् or गण्; लघूकृ, अव-ज्ञा 9 U; *See* **Contemn**; 'm. way' अंतरं दा; अप-सृ 1 P; अप-द्र-या 2 P; अपक्रम् 1 U, 4 P; 'm. free with' संकोचं त्यक्त्वा आचर् or व्यवह् 1 P; 'm. away with' नश् c., व्या-पद् c., हन् 2 P or c

(घातयति); *See* Kill; 'm. water' मूत्रोत्सर्गं कृ; 'm. good' पृ c. (पालयति), पूर् 10, वह् 1 P, रक्ष् 1 P (promise &c.); *See* **Fulfil** also; सं-पद् c., साध् 5 P or c.; (loss) पूर्, प्रतिविधा 3 U, प्रतिकृ, अपाकृ, शुध् c.; 'm. bold to say' प्रगल्भतया वद् 1 P or वचनसाहसं कृ. **-for,** अभि-या 2 P, प्रति-या, उपसृप्-उपगम् 1 P, अभि-उप-द्रु 1 P. 2 आपत् 1 P, क्लृप् 1 A. **-into,** निर्मा, वि-धा; 'gold is made into ornaments' सुवर्णस्यालंकाराः क्रियंते. **-of,** *See* **Make** (5) above; 'made of' मय (यी *f.*), घटित, निर्मित, आत्मक, रूप in comp.; or only by comp.; 'a pot made of gold' हेमनिर्मितं पात्रं, हेमपात्रं. 2 अवगम् 1 P; बुध् 1 P; 'not knowing what to m. of it' किं नु एतत्स्यादिति ज्ञातुमसमर्थाः. **-off,** पलाय् 1 A, अपक्रम्, अप-द्रु, अप-सृ-गम्-धाव् 1 P. **-out,** निरूप् 10, ज्ञा 9 U, अवगम्, ग्रह् 9 U, उपलभ् 1 A, विद् 2 P; *See* **Know.** 2 प्रति-पद् c., समर्थ् 10; प्रमाणीकृ, साध् c., निष्पद् c. **-over,** सम्-ऋ c. (अर्पयति), संक्रम् c., निक्षिप् 6 P, न्यस् 4 U, आयत्तीकृ. **-up,** समाहृ 1 P. संकल् 10, संभृ 1 P, 3 U, समा-नी 1 P, एकीकृ. 2 (A loss) पूर्, प्रतिवि-धा; 'you should m. up for your want of beauty by being good' त्वया अलावण्यदोषः सदाचरणेन प्रतिविधेयः. 3 (A quarrel) सं-धा, प्रशम् c., (प्रशमयसि विवादं S. 5). 4 निर्णी, साध्, निष्पद् c.; 'm. up one's mind' निर्णी, निश्चि 5 U; *See* **Determine;** 'm. up to' उपसृ, उपगम्; *See* **Approach.** **-*s*.** आकारः, आकृति *f.*, रूपं, विग्रहः, अंगं, वपुस् *n.*; 'handsomeness of m.' अंग-सौष्ठवं. **-er.** *s.* कारः, करः, कारिन्, कृत् in comp.; कर्तृ *m.*, निर्मातृ *m.* विधातृ *m.*, कल्पकः, रचकः, घटकः; 'm. of pots' कुंभकारः-कृत् &c. 2 **Creator,** q. v. 'man is the m. of his own fortune' लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयंति (H. 2). **-ing,** *s.* करणं, विधानं, रचनं, कल्पनं, निर्माणं, &c.

Maladdress, *s.* अपटुत्वं, अकौशलं.

Maladministration, *s.* कुशासनं, दुर्णयः, असम्यक् निर्वाहः.

Maladroit, *a.* अपटु, अकुशल.

Malady, *s.* रोगः, व्याधिः, आमयः, विकारः, रुजा, गदः; *See* **Disease.**

Mala fides, *adv.* सव्यलीकं. **-*s*.** विप्रलिप्सा, वंचनेच्छा.

Malaise, *s.* व्यग्रता, आकुलता, उद्विग्नता.

Malapert, *a.* अविनीत, धृष्ट, प्रगल्भ, प्रतिभानवत्, निर्लज्ज. **-ly,** *adv.* अविनयेन, धृष्टवत्, निर्लज्जं. **-ness,** *s.* अविनयः, धृष्टता, प्रागल्भ्यं, प्रतिभा-मानं.

Malapropos, *adv.* अस्थाने, अकाले, अनवसरे.

Malaria, *s.* पूतिवायुः, कुवातः.

Malcontent, *a.* or *s.* असंतुष्ट, अप-वि-रक्त, राजापरक्त, राजनीत्यसंतुष्ट.

Male, *s.* पुंस् *m.*, पुरुषः, नरः, नृ *m.*; 'm. and female' स्त्रीपुंसौ, स्त्रीपुरुषौ, युग्मं, मिथुनं, द्वंद्वं. **-*a*.** ex. by masc. gender; पुंजातीय; 'm. sparrow' चटकः; sometimes by पुरुष-पुं-नर- in comp.; 'm. tiger' पुंव्याघ्रः; 'm. cuckoo' पुंस्कोकिलः; 'm. attire' पुरुषवेशः;:; 'm. child' अपत्यं पुमान्, पुत्रः, सुतः, &c.; 'm. species' पुंजाति *f.*, पुरुषजातिः.

Malediction, *s.* शापः, आक्रोशः-शनं. **-*Maledictory*,** *a.* अभिशापक, आक्रोशगर्भ, अमंगलाशंसिन्.

Malefactor, *s.* पातकिन् *m.*, पापिन् *m.*, अपकारिन् *m.*, अपराधिन् *m.* पापकर्मन् *m.*, दुष्कृतिन् *m.* दोषभाक्, कृतागस् *m.*

Malefic, *a.* अपकारिन्.

Malevolent, *a.* अभिद्रुग्ध, द्रोहमति-बुद्धि, दुष्ट-भाव-मति-बुद्धि, दुरात्मन्, दुराशय, कुबुद्धि दुर्बुद्धि, मत्सरिन्, साभ्यसूय, पापाशय, अहितैषिन्, दुर्हृद्, दुःशील, अनिष्टार्थिन्. **-ly,** *adv.* द्रोहबुद्ध्या, दुष्टभावेन, साभ्यसूयं, अहितेच्छया. **-*Malevolence*,** *s.* द्रोह-अहित-बुद्धि *f.*, दुष्टभावः, कुभावः, कुबुद्धिः, द्रोहमति *f.*, द्रोहः, असूया, अभ्यसूया, दौरात्म्यं, मात्सर्यं, अहितेच्छा, अपकारेच्छा, पैशुन्यं.

Malfeasance, *s.* अपकारः, दुष्कर्मन् *n.*

Malformation, *s.* विकृति *f.* वैरूप्यं.

Malice, *s.* वि-, द्वेषः, वैरं, द्वेष-शत्रु-भावः, द्रोहः, दुष्टभावः, द्रोहमति-बुद्धि *f.*, मात्सर्यं, असूया, अहितेच्छा, पापाशयः, दौरात्म्यं, दौर्जन्यं, पैशुन्यं. **-*Malicious*,** *a.* वैर-द्वेष-पूर्वक, द्रोह or द्वेष-मूल or हेतुक. 2 अतिद्वेषिन्, द्रोहिन्, द्रोहमति-बुद्धि, दुष्टभाव-मति, द्रोहशील, अपकारेच्छु, पापात्मन्, दुरात्मन्, साभ्यसूय, मत्सरिन्, दुर्जन, खल, पिशुन; *See* **Malevolent.** **-ly,** *adv.* द्रोहबुद्ध्या, दौरात्म्येन, सद्वेषं, मात्सर्येण; 'm. intentioned' द्रोहबुद्धि &c. **-ness,** द्रोहमतित्वं, दुष्टशीलता; *See* (*s.*)

Malign, *v. t.* अपभाष् 1 A, परि-अप-वद् 1 U, अभिशंस् 1 P, कलंकयति (D.), वि-, द्विष् 2 U. **-*a*., -ant,** *a.* द्वेषबुद्धि, द्रोहपरायण, दुष्टबुद्धि, दुर्बुद्धि, दुराशय, नृशंस, दुर्मति; *See* **Malicious, Malevolent.** 2 (Star) अशुभ, दुष्ट, अनिष्ट, अमंगल. 3 उग्र, घोर, अतिदुष्ट, अरुंतुद, अतितिग्म. 4 असाध्य, दुःसाध्य, दुश्चिकित्स्य, मारात्मक, सान्निपातिक (की *f.*), काल in comp. **-ly, -antly,** *adv.* सद्रोहं, अशुभं. **-er,** *s.* अभिशंसकः, अपवादकः, पिशुनः. **-ity, -*Malignancy*,** *s.* द्रोहबुद्धि *f.*, द्वेषपरायणता, परमद्वेषः, भावदुष्टता, अतिपैशुन्यं;

See Malice. 2 उग्रता, तिग्मता, दुष्टता, 3 असाध्यता, मारात्मकता.

Malinger, *v. i.* शरीरास्वास्थ्यं अपदिश् 6 P.

Malison, *s.* *See* Curse.

Malkin, *s.* अशुद्धा, भ्रष्टा.

Mall, *s.* महामुद्गरः, घनः. 2 जनाकीर्णमार्गः, जनसामान्यपथः.

Malleable, *a.* उद्वर्तनीय, घनेन वर्धनीय, उद्वर्तनक्षम. **-Malleate**, *v. t.* मुद्गराघातेन उद्-वृत् c.

Mallet, *s.* मुद्गरः, द्रुघणः, घनः

Malodorous, *a.* दुर्गंधि.

Malpractice, *s.* दुराचारः, दुश्चरितं, कुचरितं, कुचेष्टितं.

Malt, *s.* यवपानीयबीजं: 'm.-drink' यवसुरा, यवजं, यवपानीयं; 'm.-house' यवसंधानगृहं.

Maltreat, *v. t.* अप्रियं आचर् 1 P or वृत् 1 A, नि-अप-विप्र-कृ 8 U, पीड् 10. **-ment**, *s.* अपकारः, निकारः, पीडा.

Malversation, *s.* दुराचरितं, शाठ्यं, धूर्तता; *See* Fraud.

Mamma, *s.* माता, अंबा, जननी; *See* Mother.

Mammal, *s.* सस्तन *a.* प्राणिन्. **-ia**, *s.* सस्तनाः प्राणिनः.

Mammiferous, *a.* सस्तन, स्तनविशिष्ट.

Mammiform, *a.* स्तनाकृति, कुचाकार.

Mammon, *s.* धनं, लक्ष्मीः, संपद् *f.*; (the god) कुबेरः. **-ist**, *a.* or *s.* धनपरायण, द्रव्यार्जनतत्पर. **-ism**, *s.* द्रव्यपरायणता.

Man, *s.* मनुष्यः, मानुषः, मनुजः, नरः, नृ *m.*, मानवः, पु(पू)रुषः, मर्त्यः, पुंस् *m.* 2 (As opposed to child) मानुषः, प्रौढवयस्कः, त्यक्तशैशवः, मानुष्यप्राप्तः, प्रौढः. 3 (As opposed to woman) पुरुषः, पुमान्, नरः. 4 (M.-kind) मनुष्याः, मानवाः, मनुष्यजाति *f.*, मर्त्याः, मानुष्यं, मानुषता, जनः, लोकः, मनुष्यजीव-लोकः. 5 (In chess) शा(सा)रः-रिः; 'an eminent m.' पुरुषसिंहः-व्याघ्रः, नरवरः-शार्दूलः-पुंगवः-ऋषभः; *See* Excellent; 'm.-eater' पुरुषादः, नृभुक्, नरभोजिन्; 'm.-hater' मनुष्यशत्रुः-द्रोही, मनुष्यद्वेषी; 'm. of war' बृहती युद्धनौः; 'm.-slaughter' मनुष्यवधः-घातः-हत्या, प्रमाथः; 'm.-stealing' मनुष्यापहारः. **-v. t.** पुरुषसनाथीकृ 8 U, सैन्यं निविश् c. **-ful, -ly**, *a.* पौरुष(षी *f.*), पौरुषेय (यी *f.*); शूर-वीर-योग्य, महावीर्य, विक्रांत, शूर, वीर्यवत्; पुरुष-नर- in comp.; 'm. deed' पुरुषकारः, पौरुषं 'm. office' पुरुषाधिकारः. **-fully**, *adv.* पुरुषवत्, सवीर्यं, सबलं, सपौरुषं, सविक्रमं, शूर-वीरवत्, निर्भयं. **-fulness, -liness**, *s.* पौरुषं, वीर्यं, पुरुषकारः, वि-परा-क्रमः, शौर्यं, साहसं. **-hood**, *s.* मनुष्यत्वं, मानुषता, मानुष्यं, पुरुषदशा-धर्मः-भावः. 2 पुंस्त्वं, पौरुषं, ओजस्-तेजस् *n.*, वीर्यं, ऊर्जस् *n.*, यौवनं, तारुण्यं, यौवनावस्था, तारुण्यदशा, प्रौढता, व्यवहारदशा; 'having reached the stage of m.' प्राप्तयौवनः, आरूढयौवनः. 4 वीर्यं, वि-परा-क्रमः, शौर्यं, पौरुषं.

Manacle, *s.* हस्तनिगडः-बंधनं-पाशः. **-v. t.** (हस्तौ) निगडेन बंध् 9 P or संयम् 1 A.

Manage, *v. t.* निर्वह् c., व्यव-स्था c. (स्थापयति), घट् c. (घटयति); सं-पद् c., वि-धा 3 U, प्र-वृत् c., कृ 8 U. 2 अधि-ष्ठा 1 P, अवेक्ष् 1 A; प्र-णी 1 P, शास् 2 P, नियम् 1 P, नियंत्र् 10; निग्रह् 9 P, वशीकृ, दम् c. (दमयति); *See* Control. 3 विनी, अनुशास्, शिक्ष् c. 4 परिमितं व्यय् 10 (व्यययति). **-v. i.** आचर् 1 P, वृत् 1 A, घट् 1 A, उपायं युज् 10 or चिंत् 10 or क्लृप् c., संवि-धा; *See* Arrange; यथा नौ प्रियसखी बंधुजनशोच्या न भवति तथा निर्वाहय (S. 3) 'so m. tuat &c.' **-able**, *a.* प्रणेय, विधेय, विनेय, वश्य आयत्त, शासनीय, सुकर. **-ed**, *a.* प्रणीत, विहित; नियत, नियंत्रित; प्रयुक्त, घटित; 'well.-m.' सुघटित, सुविहित, सुप्रयुक्त. **-er**, *s.* निर्वाहकः, प्रणेतृ *m.*, व्यवस्थापकः, अवेक्षकः, प्रवर्तकः, प्रयोजकः, संपादकः, घटकः, अधिकारिन् *m.* अधिकृतः, नायकः, अधिष्ठातृ *m.*, अध्यक्षः, चालकः; 'm. of public affairs' जनकार्याध्यक्षः, पौरकार्यावेक्षकः, जनकार्याधिकारी; 'm. of the treasury' कोशाध्यक्षः, द्रव्याधिकारी. 2 (Stage-m.) सूत्रधारः, स्थापकः. 3 परिमितव्ययिन् *m.* **-ing**, *a.* व्यवस्थापक, कार्याधिकारिन्, कार्यावेक्षक, चालक. **-ment**, *s.* प्रणयनं, नयः, नीति *f.*, निर्वाहः-हणं, घटनं, प्रवर्तनं, करणं, विधानं; अधिष्ठानं, अवेक्षा-क्षणं, व्यवस्थापनं, चालनं. 2 अधिकारः, अधिष्ठातृत्वं, शासनं, नियमनं, अध्यक्षता, विनियमः, नियंत्रणं, वशीकरणं. 3 उपायः, प्रयोगः, युक्ति *f.*, उपाय-कल्पना-प्रयोगः, संविधा; 'under his m. of affairs' तस्मिन् कार्याणि अवेक्षमाणे, कार्याध्यक्षे तस्मिन्.

Manakin, *See* Manikin.

Manciple, *s.* भोजनाधिकारिन् *m.*

Mandate, *s.* आज्ञा, शासनं, आ-नि-देशः, नियोगः, विधिः; 'written m.' आज्ञापत्रं, शासनपत्रं. **-ory**, *a.* आदेशक, आज्ञापक, शासक.

Mandible, *s.* हनु *m.* *f.*, चिबुकं, पीचं, कुंजः.

Mandrake, *s.* लक्ष्मणा, पुत्रदात्री, पुत्रदा.

Manducate, *v. t.* चर्व् 1 P.

Mane, *s* केश(स)रः; सटा (of a lion). **-ed**, *a.* केसरिन्.

Manege, *s.* अश्वदमनविद्या-शाला.

Manes, *s.* पितरः, स्वधा-श्राद्ध-भुजः; पिंडभाजः, पिंडाशाः (all pl.) पितृगणः-वर्गः-लोकः-जनः; 'offering oblations to the m.' पितृ-कर्म-कार्यं-क्रिया-यज्ञः-मेधः, श्राद्धकर्मक्रिया; 'oblations to the m.' पिंडः, स्वधा, कव्यं, श्राद्धं; 'gifts in honour of the m.' पितृदानं-तर्पणं; 'a day sacred to the m.' पितृतिथि *m. f.*

Mange, *s.* (पशूनां) सिध्मन् *m.*, पामा; *See* Itch.

Manger, *s.* द्रोणी, घासादनी, तृणभाजनं-पात्रं.

Mangle, *v. t.* व्यव-च्छिद् 7 P वि-दॄ 9 P, व्रश्च् 6 P, निकृत् 6 P, लवशः कृत् or खंड् 10 or छिद्. **-s.** वस्त्रमार्जनयंत्रं. **-ed**, *a.* छिन्नभिन्न, विक्षतांग (गी *f.*), व्यवच्छिन्न, क्षतविक्षत, लवशः कृत.

Mango, *s.* आम्रं, आम्रफलं; (tree) आम्रः, चूतः-तकः, रसालः; सहकारः (very fragrant); 'm.-blossom' चूतप्रसवः; 'm.-sprout' सहकारमंजरी.

Mania, *s.* उन्मादः, बुद्धिभ्रमः, *See* Madness. 2 महाव्यसनं, एकविषयासक्ति *f.* **-Maniac**, *a.* उन्मत्त, वातुल. **-s.** उन्मत्तः, वातुलः, *See* Mad.

Manifest, *a.* स्पष्ट, स्फुट, व्यक्त, प्रत्यक्ष, प्रकाश, प्रकट, सुव्यक्त-स्पष्ट-प्रकाश, परिस्फुट, अभिव्यक्त, प्रकटित, आविर्भूत; प्रादुर्भूत; 'to become m.' प्रादुर्भू 1 P, आविर्भू, प्रकटी-स्पष्टी-भू, प्रकाश् 1 A. **-v. t.**, 'make m.' प्रकाश् c., व्यंज् 7 P or c., स्पष्टीकृ 8 U, आविष्कृ, प्रकटी-प्रत्यक्षी-स्फुटी-कृ, विशदीकृ, प्रकटयति (D.), सूच्, दृश् 10, c.; आविर्भूतज्योतिषां ब्राह्मणानां (U. 4.) 'to whom the Supreme Light has m. ed itself.' **-ation**, *s.* आविष्करणं, प्रकाशनं, व्यंजनं. स्फुटीकरणं, &c. 2 व्यक्ति *f.*, प्रकाशता स्पष्टता, आविर्भाव., प्रादुर्भावः, प्रत्यक्षता अवभासः, प्राकट्यं. **-er**, *s.* प्रकाशकः, व्यंजकः. **-ly**, *adv.* व्यक्तं, स्पष्टं, स्फुटं, सुव्यक्तं, परिस्फुटं. **-ness**, *s.* व्यक्तता, स्पष्टता, &c. **-Manifesto**, *s.* प्रकाशन-घोषणा-पत्रं, ज्ञापन-प्रसिद्धि-पत्रं.

Manifold, *a.* *See* under **Many**.

Manikin, *s.* क्षुद्रनरः, माणवकः, मनुष्यकः.

Maniple, *s.* मुष्टि *m. f.* 2 लघुगुल्मः.

Manipulate, *v. t.* हस्ताभ्यां कृ 8 U or वि-धा 3 U; हस्तौ व्यापृ c. or चल् or विक्षिप् 6 P. **-ion**, *s.* हस्तव्यापारः, हस्तादिचालनं-विक्षेपः.

Manna, *s.* (Of bamboos) वंशरो(लो)चना, त्वक्क्षीरी, वंशजा, शुभ्रा, वंशक्षीरी, वैणवी.

Manner, *s.* प्रकारः, रीति *f.*, विधा, विधिः, रूपं, मार्गः, पर्यायः, क्रमः; पद्धति *f.*, सरणि-णी *f.*; 'in this m.' इत्थं, एवं, अनेन प्रकारेण, &c.; 'in that m.' 'in such a m.' तथा, तेन प्रकारेण, एवंविधं, तथाविधं, एवंरूपेण, &c.; 'in like m.' तथा, तथैव, एवमेव, तद्वत्. 2 (Kind) भेदः, विशेषः, प्रकारः. 3 आकारः, आकृति *f.*, रूपं, मुखचर्या, वदनाकृतिः. 4 (M. s) आचारः, आचरणं, वृत्ति *f.*, वृत्तं, वर्तनं, व्यवहारः, चर्या, रीतिः; नियमः, चरितं, शीलं, मार्गः, संप्रदायः, धारा, अभ्यासः (habitual m. s); 'good m. s' सदाचारः, सद्वर्तनं, विनयः, सुनीति *f.*, शिष्टाचारः, मर्यादा, सुशीलता, शिष्टता, सभ्यता, शिष्टसंप्रदायः; 'bad m. s' अमर्यादा, दुराचारः, अनीतिः; कुरीतिः; 'm. s of a country' देशाचारः, देशव्यवहारः; 'violation of good m. s' मर्यादा-विनय-अतिक्रमः. **-ed**, *a.* सुशील, शिष्टाचार, विनीत; 'ill-m.' अशिष्ट, असभ्य, दुःशील, दुर्मर्याद, अविनीत. **-ism**, *s.* एकरीतिसेवनं, एकरसत्वं. **-less**, *a.* अविनीत, दुराचार, अशिष्ट, अमर्याद. **-ly**, *a.* शिष्ट, विनीत, सभ्य, सुशील, सुजन, सदाचार, साधुवृत्त, शिष्टाचार. **-*adv.*** सविनयं, शिष्टवत्.

Manœuvre, *s.* यानप्रकारः, युद्धव्यपदेशः. 2 प्रयुक्ति *f.*, कौशलं, वैदग्ध्यं, उपायः, व्यपदेशः, माया, विदग्धप्रयोगः, कपटोपायः. **-v. t.** विदग्धोपायं रच् 10 or युज् 10, छलं-व्यपदेशं-कृ 8 U.

Manor, *s.* ग्रामाध्यक्षभूमि *f.*-स्थानं; 'lord of the m.' ग्रामेश्वरः, ग्रामणीः.

Mansion, *s.* हर्म्यं, सौधं, गृहं, मंदिरं, भवनं, गेहं, सदनं, निकेतनं, शाला, आयतनं; *See* **House**; 'lunar m.' नक्षत्रं, दक्षजा, विधुप्रिया.

Mantle, *s.* प्रावारः-रकः, अवगुंठनं, आवरणं, पिधानं. **-v. t.** आ-प्रा-वृ 5 U, समाकॄ 6 P, आ-च्छद् 10. **-v. i.** प्रवृत् 1 A, विस्तॄ-वितन् pass.; प्र-वि-सृप् 1 P. 2 उद्गम् 1 P, उत्प्लु, आविर्भू 1 P. 3 उत्सिच् pass., फेनायते (D.). 4 मुद् 1 A, आनंद् 1 P, उत्सवं कृ 8 U; *See* **Delight**.

Mantua, *s.* स्त्रीवस्त्रं-परिधानं.

Manual, *a.* हस्त्य, हस्त in comp.; 'm. art' शिल्पं, कला; 'm. dexterity' हस्तकौशलं-लाघवं; 'm. labour' व्रातं, आयासः; 'sign m' स्वाक्षरं, स्वहस्ताक्षरं. **-s.** लघुपुस्तकं, संक्षिप्तग्रंथः, सारसंग्रहः.

Manufacture, *s.* निर्माणं, विरचनं-ना, घटनं-ना, उत्पादनं, शिल्पकर्मन् *n.*, शिल्पनिर्माणं. 2 शिल्पनिर्मितं-द्रव्यं-वस्तु. **-v. t.** शिल्पेन निर्मा 3 A, 2 P, or क्लृप् c. or रच् 10 or वि-धा 3 U or कृ 8 U. **-al**, *a.* शिल्पिक (की *f.*). **-er**, *s.* शिल्पकारः, शिल्पिन् *m.*, शिल्पकः

–Manufactory, *s.* शिल्पशाला-गृहं, निर्माणशाला-गृहं.

Manumit, *v. t.* दास्यात् मुच् 6 P or c. or मोक्ष् 10. **–Manumission**, *s.* दास्यमोचनं, बंधनमोक्षः.

Manumotive, Manumotor, *a.* हस्तप्रेरित.

Manure, *s.* सारः, भूमिलेपः, पुरीषादि *n.* –*v. t.* पुरीषादिना लिप् 6 P, सारं नि-धा 3 U or निक्षिप् 6 P.

Manuscript, *s.* हस्तलेखः-लिखितं, लेख्यं, लिखितं. –*a.* लिखित, हस्तलिखित.

Many, *a.* बहु, बहुल, अनेक, भूयिष्ठ, प्रभूत, प्रचुर, बहुसंख्यक, भूयस्, विपुल, नैक-नाना- in comp.; 'of m. kinds' अनेक-नाना-विध; 'as m. as' 'so m.' यावत्-तावत्, यावत्संख्यक-तावत्संख्यक, यति-तति; 'how m.' कियत्, कति (pl.); 'of how m. kinds' कतिविध-*a.*; 'in m. places' बहुत्र, अनेकत्र; 'in m. ways' बहुधा, अनेकधा; 'how m times' कतिकृत्वः, कतिवारान्; 'm. times' बहुशः, भूयो भूयः, मुहुर्मुहुः, अनेकशः, अनेक-बहु-वारं, पुनः-पुनः, बहुकृत्वः; 'so m.' एतावत्, इयत् –*s.* समूहः, समवायः, संघातः; समाजः; 'the good of the m.' समाजहितं. In comp. ex. by बहु or नाना; बहुपर्ण, नानावर्ण, बहुजिह्व, &c. **–Manifold**, 'many-sided' *a.* नानाविध-प्रकारं, बहुगुण-रूप, अनेक, अनेक-नाना-रूप, विविध, बहुविध-प्रकार; नाना in comp. **–ly**, *adv.* बहुधा, अनेकधा, नानाविधं. **–ness**, *s.* बाहुल्यं, अनेकता.

Map, *s.* वर्णनं, देशालेख्यं, आलेख्यपत्रं. –*v. t.* (देशादीन्) अभिलिख् 6 P, वर्ण् 10, चित्र् 10.

Mar, *v. t.* हन् 2 P, वि-,नश् c., विलुप् 6 P or c., अपकृ 8 U, क्षण् 8 P, दुष् c (दूषयति); *See* **Spoil**,: 'without m. ring its beauty' लावण्यहानिं विना, रूपक्षतिं विना **–Marplot**, *s.* कार्यविघातकः, विघ्नकरः.

Marasmus, *s.* क्षयः, यक्ष्मन् *m.*, शोषः.

Maraud, *v. i.* लोप्त्रार्थं परिभ्रम् 1, 4 P or उपद्रु 1 P or उपप्लु 1 A. **–er**, *s.* उपद्रविन् *m.*, उपप्लवकारिन् *n.*, लुंठकः. **–ing**, *s* उपप्लवः, उपद्रवः, लोप्त्रार्थं परिभ्रमणं.

Marble, *s.* मर्मरोपलः, श्लक्ष्णः प्रस्तरः, मणिशिला, शिला, पाषाणः.

Marcescent, *a.* विशीर्यमाण.

March, *v. i.* प्र-या 2 P, प्र-गम् 1 P, प्र-संचल्-इ 1 P, व्रज् 1 P, प्र-स्था 1 A; *See* **Advance**, 'm. against' अभि-या, अभिनिर्-या, प्रति-गम्-व्रज्; संमुखं या; 'who m.-es slowly,' मंदगामी; 'who m. es fast' जंघालः, तरस्वी, जवनः, अतिजवः. –*v. t.* प्र-स्था c. (स्थापयति), प्र-या c. –*s.* फाल्गुनचैत्रं, पूर्वचैत्रः. 2 गमनं, यानं, यात्रा, संचारः, प्रसरणं, प्रयाणं, अभिनिर्याणं; 'at a distance which is some days' m.' दिवसकालगम्येऽध्वनि (Ka. 258) 'going by hasty (forced) m.-es' अविच्छिन्नैः प्रयाणकैर्गच्छन् (Ka. 340); 'difficult m.' दुर्गसंचारः, संक्रमः; 'm. ing with an army against the enemy' अभिषेणनं; 'a m.-ing army' प्रचक्रं, चलितं; 'a hostile m.' अभिक्रमः, आसारः. **–Marches**, *s.* देशसीमा-पर्यंतः.

Mare, *s.* वडवा, अश्वा, वामी, तुरगी, वाजिनी.

Margin, *s.* प्रांतः, धारः-रा, पर्यंतः, तटं, उपांतः, सीमा, परिसरः, उपकंठः, कच्छः. **–al**, *a.* प्रांतस्थ, प्रांतवर्तिन्.: **–ally**, *adv.* प्रांततः, अनुप्रांतं.

Marinate, *s.* संधितं, संधानं. –*v. t.* सं-धा 3 U उपस्कृ, 8 U.

Marine, *a.* सामुद्र (द्री *f.*), समुद्रीय, समुद्रविषयक, समुद्रज, समुद्र (Sea, q. v.) in comp.; 'm.-fight' नौयुद्धं, जलसंग्रामः. –*s.* नौयोधः, समुद्रीयसैनिकः. 2 युद्धनौसमूहः. 3 नाविकप्रकरणं विषयः.

Mariner, *s.* नाविकः, पोतवाहः, समुद्रयायिन्-गामिन् *m.*

Marionette, *s.* सूत्रचालिता-पुत्रिका or पुत्रलिका.

Marital, *a.* पति-स्वामि-विषय.

Maritime, *a.* समुद्रीय, समुद्र in comp. 2 नाविक (की *f.*), नाव्य. 3 समुद्रतीरस्थ.

Marjoram, *s.* समीरणः, मरुवकः, प्रस्थपुष्पः, फणिज्जकः, जंबीरः, पर्णासः, कठिंजरः, कुठेरकः.

Mark, *s.* लक्षणं. चिह्नं, अंकः, लिंगं, लांछनं, व्यंजनं, अभिज्ञानं. 2 कलंकः, लक्ष्मन् *n.*, अंकः, बिंदुः; 'm. on the body' सामुद्रं; 'whose distinctive m. is boldness' साहसलांछनः; 'freckly m.' जडुलः, कालकः, पिप्लुः, तिलकः; 'an interpreter of bodily m. s' सामुद्रिकः. 3 ले (रे) खा, अंकः. 4 लक्ष्यं, शरव्यं, वेध्यं, बाणलक्ष्यं; लक्षं; 'hitting the m.' लक्ष्यभेदः; 'hit the m.' लक्ष्यं भिद् 7 P or व्यध् 4 P; 'wide of the m.' अप्रस्तुत, अप्रास्ताविक (की *f.*). –*v. t.* अंक् 10 चिह्नयति-मुद्रयति (D.), लांछ् 1 P. 2 कलंकयति-मलिनयति (D.), मलिनीकलुषी-कृ 8 U. 3 लिख् 6 P, रेखाः लिख्. 4 लक्ष् 10, आ-उप-°; नि-ऋ-प्र-सं-अव-ईक्ष् 1 A. अव-धा 3 U; आलोच् 10, विमृश् 6 P; निरूप् 10; 'm. out' परिच्छिद् 7 P, सीमां निर्धृ 10 or निर्दिश् 6 P, लक्ष्, प्रांतरेखां लिख्. **–ed**, *a.* चिह्नित, मुद्रित, अंकित, कृत-लक्षण-लांछन, मुद्रांकित; 'an arm m. with the scar of the bow-string' मौर्वीकिणांकः भुजः

(S. 1.); -*Marksman*, *s.* लक्ष्यभेदिन्-वेधिन् *m.*, सुसंधानी, शराभ्यासकुशलः, धनुर्विद्.

Market, *s.* विपणि-णी *f.*, आपणः, निषद्या, पण्यवीथी, पण्यवीथिका, हट्टः, पण्य or विक्रयशाला or स्थानं, निगमः. 2 क्रयविक्रयः, विपणः. -*v. i.* पण् 1 A, व्यवहृ 1 P; 'm.-day' हट्टदिवसः; 'm. place' *See* (*s.*); 'm.-rate or-price' पण्यमूल्यं, अर्घबलाबलं; 'm.-town' मुख्यनगरं, कर्वटः. -able. *a.* पण्य, पण्यार्ह, क्रयविक्रययोग्य.

Marking-ink, *s.* अक्षय्यमसी.

Marl, *s.* चिक्कणमृत्तिका.

Marmalade, *s.* मिष्टान्नं, स्वादुफलं.

Marmorean, *a.* पाषाणनिर्मित.

Marmoset, *s.* क्षुद्रप्लवंगः वानरः.

Maroon, *a.* घनारुण, घनरक्त.

Marquee, *s.* पटवासः-मंडपः, उपकार्या, पटगृहं.

Marrow, *s.* मेदस् *n.*, मज्जा, वपा, वसा, अस्थि-स्नेह-सारः, अस्थिजं, स्निग्धा. 2 सारः-रं, गर्भः, मुख्यांशः; 'he has knocked the m. out in no time' अचिरादेव तेन सर्वस्य सारः निष्कृष्टः-गृहीतः. -less, *a.* मज्जा-मेदो-हीन, अ-निः-सार. -y, *a.* मेदस्विन्, सारवत्, ससार.

Marry, *v. t.* वि-उद्-वह् 1 P, परि-णी 1 P, उप-यम् 1 A, प्रति-परि-ग्रह् 9 P. 2 (Take for husband) (पतिं) विद् 6 U or लभ् 1 A or अधिगम् 1 P, वृ 5 U, 10 (वरयति), वृ 9 U, पत्या संयुज् pass. 3 (Give in marriage) विवाहं कृ c., पाणिं ग्रह् c., प्र-दा 3 U, पाणिग्रहणं सं-पद् c.; विवाहेन संयुज् 7 U, 10 or संबंध् 9 P, -*adv.* नूनं, खलु; *See* Indeed. -age, *s.* विवाहः, उद्वाहः, उपयमः, परिणयः, पाणिग्रहः-हणं, पाणिपीडनं, दारपरिग्रहः-अधिगमनं-क्रिया; 'give in m.' विवाहविधिना दा or प्रति-पद् c.; 'm.-contract' वाङ्निश्चयः; 'm.-price' शुल्कः-ल्कं; 'm.-gifts' यौतकं, औद्वाहिकं, पारिणाय्यं, सुदायः. 'm.-string' (विवाह-)कौतुकं, मंगलसूत्रं. -ageable, *a.* विवाहयोग्य, परिणेय, विवाहवयस्क, उद्वाहोचित. -ed, *a.* ऊढ, परिणीत, उपयत, कृतविवाह, जातोपयम, निविष्ट; 'a m. man' स्त्रीमान्, कुटुंबी, सभार्यः, कृतदारः, सपत्नीकः; 'a m. woman' सभर्तृका, पतिपत्नी, सधवा, सुवासिनी; 'twice m.' पुनर्भूः, दिधिषुः-षूः; 'one m. before his elder brother' परिवेत्तृ; 'the sin of such marriage' पारिवेद्यं.

Mars, *s.* मंगलः, भौमः, अंगारकः, भू-मही-सुतः, लोहितः, रुधिरः, कुजः, लोहितांगः. 2 कुमारः, कार्त्तिकेयः, गुहः, स्कंदः, शक्तिधरः, षडाननः, महासेनः, शरजन्मन् *m.*, सेनानीः, अग्निभूः, विशाखः, षाण्मातुरः.

Marsh, *s.* अनूपदेशः, कच्छः, कच्छभू-भूमि *f.*, सजल-जलाढ्य-भूमिः. -y, *a.* अनूप, आनूप (पी *f.*), जलाढ्य, जलपूर्ण, सजल, जलमय (यी *f.*).

Marshal, *s.* बलाध्यक्षः, संविधातृ *m.*, व्यवस्थापकः. -*v. t.* विन्यस् 4 U, वि-रच् 10, व्यूह् 1 U, क्रमेण रच् or स्था c. (स्थापयति). संवि धा 3 U.

Mart, *s.* क्रयविक्रयस्थानं, आपणः; *See* *Market.*

Martial, *a.* युद्ध-रण-विषयक, सांग्रामिक-सामरिक (की *f.*). 2 रणयोग्य, समरोचित. 3 रणप्रिय, समरासक्त, समरं-रण-कामः; 'm. music' रणवाद्यं.

Martinet, *s.* तीक्ष्ण or उग्र-दंडः or शासनः.

Martingal, *s.* तलिका, अधोबंधनं.

Martyr, *s.* स्वधर्मार्थं-स्वमतार्थं त्यक्तप्राणः or देहत्यागिन् *m.* or त्यक्तजीवितः; 'a blessed m.' सुगृहीतनामा &c. -dom, *s.* स्वधर्मार्थ-स्वमतरक्षणार्थं प्राण-जीवित-त्यागः or प्राणोत्सर्गः or देहन्यासः.

Marvel, *s.* कौतुकं, आश्चर्यं, विस्मयहेतुः, चमत्कारः, अद्भुतं, चित्रं, चित्र-अद्भुत-वस्तु *n.* -*v. i.* वि-स्मि 1 A, साश्चर्य-सविस्मय-*a.* भू 1 P, विस्मयेन आकुलीभू or अभिभू pass. -lous, *a.* अद्भुत, साश्चर्य, चित्र, आश्चर्यकर (री *f.*), विस्मयावह, आश्चर्य; 'a m. tale' चित्रा कथा; 'a m. deed' अद्भुतं कर्म. -lously, *adv.* अद्भुतं, चित्रं. -lousness, *s.* चित्रता, &c.

Mascot,-te, शुभवस्तु *n.*

Masculine, *a.* पौरुष(षी *f.*),पुंजातीय, अस्त्रैण, पुं-पुरुष- in comp. 2 पुरुषशील-स्वभाव,पुरुषप्रकृति; 'm. gender' पुंस्, पुंलिंगं; 'the word दार is plural and m. (of m. gender)' दाराः पुंभूम्नि; 'a m. woman' [illegible]. -ly, *adv.* पुंवत्, पुरुषवत्. -ness, *s.* पुंस्त्वं, पौरुषं.

Mash, *v. t.* संपिष् 7 P, सं-मृद् 9 P, क्षुद् 7 U, चूर्ण् 10. -*s.* संपेषः, संचूर्णनं, उत्पेषः

Mask, *s.* वर्णकः, वर्णिका, कपट-छद्म-मुखं. 2 छद्मन् *n.*, कपटः-टं, छलं, व्याजः, अप-व्यपदेशः. 3 कृत्रिम-छद्म-वेशः; 'to throw off the m.' (पूर्वनिगूढान्) निजमनोरथान् आविष्कृ 8 U or प्रकटीकृ. -*v. t.* छद्ममुखेन गुह् 1 U or प्रच्छद् 10; गुह्, अपवृ c., गुप् 1 P. -ed, *a.* छन्न-गुप्त-मुख (खी *f.*), सवर्णिक. 2 छद्मवेशिन्, कपटवेश; *See* Disguised, 3 गुप्त, छन्न, गूढ. -er, *s.* छद्मवेशिन् *m.*, कपटवेशिन् *m.*, &c.

Mason, *s.* लेपकः, लेपकारः, सुधाजीविन् *m.*, पलगंडः. **-ry**, *s.* सुधा-लेप-कर्मन् *n.*, इष्टकारचनं-निर्माणं.

Masquerade, *v. i.* छद्मवेशं धृ 10, विडंब् 10, कपटवेशं परि-धा 3 U. -*s.* छद्म-कपट-वेशधारणं, छद्मवेशक्रीडा, विडंबनक्रीडा. **-er**, *s.* छद्मवेशधारिन् *m.*, कपटवेशिन् *m.*

Mass, *s.* पिंडः, घनः, गंडः. 2 राशिः, नि-प्र-चयः, निकरः, समूहः, ओघः, पुंजः, संघः, गणः, समाहारः, निवहः; *See* Multitude, 'in m. es' संघशः, गणशः; 'in the m.' साकल्येन. **-ive, -y**, *a.* स्थूल, गुरु, स्थूलाकार, बृहत्, बृहत्-स्थूल-परिमाण, गुरुभार, सभार; पिंडित, पिंडाकार. **-iveness**, *s.* स्थूलता, गुरुत्वं, महत्त्वं, गुरुभारः.

Massacre, *v. t.* (क्रौर्येण) हन् 2 P, व्या-पद् c., सूद् 10, वि-शस् 1 P, प्रमथ् 9 P, निर्दल् c. (दलयति); *See* Kill. -*s.* संहारः, विशसनं, घातः, प्रमाथः, निषूदनं, प्रमापणं; *See* Killing.

Massage, *s* अंग-मर्दनं-संवाहनं.

Mast, *s.* कूपकः, कूपदंडः, गुणवृक्षकः.

Master, *s.* प्रभुः, ईश्वरः, ईशः, नाथः, स्वामिन् *m.*, अधिपः, अधिपतिः, भर्तृ *m.*, सेव्यः; *See* Lord, 'serving two m. s' उभय-वेतन, उभयस्वामिक; 'one's own m.' स्वतंत्र, स्वाधीन, अपरायत्त; 'to be m. of' ex. by (*s.*) or प्र-भू 1 P, ईश् 2 A (with gen.); 'I am not m. of myself' अप्रभुरस्मि आत्मनः (Ka. 36), न प्रभवास्म्यात्मन., गात्राणामनीशोस्मि संवृत्तः (S. 2). 2 अधिकारिन् *m.*, अध्यक्षः, अधिष्ठातृ अधिकृतः, अवेक्षकः, अधीशः, नायकः. पतिः, मुख्यः, अग्रणीः; 'm. of a family' कुलपतिः, कौटुंबिकः, कुटुंबिन् *m.* 'm of the horse' अश्वाध्यक्षः; 'm. of sports' नर्म-केलि-सचिवः. 3 शिक्षकः, गुरुः, अध्यापकः, आचार्यः, उपाध्यायः. 4 पंडितः, कुशलः, पारंगतः, निपुणः, व्युत्पन्नः, 'm.-hand' उत्तम-परम-कर्मकारः; 'm.-workman' मुख्यशिल्पिन् *m.*, कर्मकाराग्रणीः; 'm.-piece' अप्रतिमं-निरुपमं-कृत्यं, अत्युत्तमं-अत्युत्कृष्टं-कर्म 'm. stroke' वैदग्ध्य-चातुर्य-कर्म, अत्युत्तम-क्रिया. -*v. t.* अभ्यंतरीकृ 8 U, पारं गम् 1 P; 'who has m. ed all sciences' सकलशास्त्रपारंगतः. 2 वशीकृ, दम् c. (दमयति); परा-अभि-भू 1 P, जि 1 P. **-ly**, *a.* अनुपम, अप्रतिम, अत्युत्तम, अद्वितीय, अत्युत्कृष्ट, परम; अतुल, अतिकुशल-निपुण. -*adv.* अत्युत्कृष्टं, परमनिपुणतया. **-ship**, *s.* प्रभुत्वं, स्वामित्वं, आधिपत्यं, ऐश्वर्यं, प्राधान्यं, &c. **-y**, *s.* प्रभुत्वं, ऐश्वर्यं, आधिपत्यं, अधिकारः, अधिष्ठातृत्वं, स्वाम्यं. 2 उत्कर्षः, श्रेष्ठता, आधिक्यं, प्राधान्यं, मुख्यता. परम-उत्तम-श्रेष्ठ-पदं. 2 प्रावीण्यं, अतिनैपुण्यं, परमकौशलं-पाटवं, पारंगतता, प्रतिष्ठा; 'you have attained great m. over all sciences of arms' गतोसि सर्वास्त्रायुधविद्यासु परां प्रतिष्ठां (Ka. 77); 'to [illegible] m. over' अभि-भू, प्र-भू, ईश्, वशीकृ; *See* above.'

Masticate, *v. t.* चर्व् 1 P, 10, संदंश् 1 P. **-ion**, *s.* चर्वणं, दंशनं, दंतैर्निष्पेषणं. **-ory**, *a.* चर्वणोचित. -*s.* चर्व्यं.

Mat, *s.* कटः, किलिंजं, आस्तरणं, पादपाशी. -*v. t.* कटैः आस्तृ 5 U. 2 संग्रंथ् 9 P, संश्लिष् c., जटिलीकृ 8 U; 'm. ed hair' जटा, सटा, जूटकं, जटा-सटा-जूटः; 'having m. ed hair' जटिल, जटिन्.

Match, *s.* समः, समानः, तुल्यः, समान-तुल्य-बलः, तुल्यशक्तिः-पराक्रमः, प्रतिद्वंद्विन् *m.*; 'let us (two) make a m.' आवां प्रतिद्वंद्विनौ भवाव. 2 (One of a pair) यमः, यमकः-लं, युग्मकः, समान-सम-पक्षः. 3 विवाहः, विवाह-प्रेम-संबंधः-घटना-योगः; 'bringing together a m. of equal merits' समानयंस्तुल्यगुणं वधूवरं (S. 5.). 4 युद्धं; 'a m. of cocks &c.' प्राणिद्यूतं, समाह्वयः; 'boxing m.' मल्लक्रीडा-युद्धं, मुष्टीमुष्टि युद्धं. 5 अग्निशलाका; 'to be a m. for' ex. by अलं with dat.; दैत्येभ्यो हरिरलं (S.K.); 'one wrestler is a m. for another' अलं मल्लो मल्लाय, प्रभवति मल्लो मल्लाय; 'to be more than a m. for' अतीत्य-अतिक्रम्य-वृत् 1 A or स्था 1 P; अतीत्य हरितो हरींश्च वर्तंते वाजिनः (S. 1); or by अधिक-*a.* or अतिरिच्-विशिष्-pass., with abl.; सेनाशतेभ्योधिका बुद्धिः (Mu. 1). -*v. t.* तुल् 10 (तुलयति), तुल्यी-समी-कृ 8 U, उप-प्रति-मा 3 A; तुल्यतया घट् c. (घटयति) or समा-नी 1 P or संयुज् 7 U, 10. 2 समं दृश् c., प्रतिरूपं-उपमां-निर्दिश् 6 P; oft. ex. by तुल्य, सम (Equal, q. v.); 'it was a well-m. ed fight' तुल्यप्रतिद्वंद्वि बभूव युद्धं (R. vii. 37); 'palaces can m. you' प्रासादास्त्वां तुलयितुमलं (Me. 65); 'he will m. you in strength' बलविषये स त्वया तुलां समारोक्ष्यति. 3 तुल्यबलं-समयुद्ध or पुरस्कृ, प्रतियुध् c. 4 विवाहार्थं प्रति-पद् c. or प्र-दा 3 U, 1 P. परि-णी c., उद्वह् c. 5 सं-,युज्, समा-धा 3 U, अनुरूप-*a.* कृ. -*v. i.* युज् pass., उप-मा pass.. तुल्य-अनुरूप-*a.* भू; सदृशी-अनुगुणी-भू, संवद् 1 P. 2 संगम् 1 A, संमिल् 6 P, सं-इ 2 P, संगमनुव्रज् 1 P, संसृज् pass. 3 विवाहार्थं वृ-pass. **-ed**, *a.* तुल्यबल-शक्ति, समविक्रम; उपमित, &c. 2 विवाहित, कृतविवाह, कृतोपयम. **-less**, *a.* अतुल, निरुपम, अनुपम, अद्वितीय, अप्रतिरूप, अप्रतिम, अनुपमेय; अतुल्य, असदृश

(शी *f.*). -lessly, *adv.* अनुपमं, अप्रतिरूपं. -lessness, *s.* अनुपमता, &c.

Mate, *s.* सहायः, सहचरः, मित्रं, संगिन् *m.*, सखि *m.* 2 भर्तृ *m.* स्वामिन् *m.* पतिः; (female) सहचरी, सखी, पत्नी, वधूः, भार्या, प्रिया, दयिता; *See* Wife; 'an elephant's m.' वशा, करिणी, हस्तिनी 3 सहायः, सहकारिन् *m.*

Material &c., *See* under *Matter*.

Maternal, *a.* मातृक (की *f.*), मातृसंबंधिन्; मातृ-in comp.; 'm. uncle' मातुलः (लानी *f.*); 'm. affection' अपत्यस्नेहः, पुत्रप्रीति *f.*, वात्सल्यं; 'm. duty मातृधर्मः.

Mathematics, *s.* गणितं, गणितशास्त्रं-विद्या, संख्या-परिमाण-विद्या, गणनाविद्या. -*Mathematic*, -al, *a.* गणितविषयक, गणितसंबंधिन्. 2 गणितशास्त्रानुरूप. -ally, *adv.* गणितानुसारेण. -ian, *s* गणितविद्याज्ञः, गणितशास्त्रज्ञः-विद्, गणितज्ञ..

Matin, *a.* प्रातःकालीन, प्रातःकालिक (की *f.*), प्रगेतन (नी *f.*), प्रातर् in comp. -*s.* (M. s) प्रातरुपासना; प्रातःकृत्यं-कर्मन् *n.*

Matrice, *s.* गर्भाशयः, जरायुः. 2 मुद्राक्षरसंस्कारः.

Matricide, *s.* मातृहत्या-वधः-घातः. 2 मातृघातिन्-मातृहन् *m.*, मातृघ्नः, मातृघातकः.

Matriculate, *v. t.* संकारपूर्वं विद्यालयं प्रविश् c. -*s.* विद्यालयप्रविष्टः.

Matrimony, *s.* विवाहः, परिणयः, उपयमः, उद्वाहः; *See Marriage.* -ial, *a.* वैवाहिक-औद्वाहिक-(की *f.*); 'm. alliance' विवाहसंबंधः. -ially, *adv.* विवाहविध्यनुरूपं.

Matron, *s.* पुरंध्री, आर्या, प्रौढा, गृहिणी, गेहिनी, पुत्रिणी, सुतिनी, कुटुंबिनी, पुत्रवती. -ly, *a.* पुरंध्रीयोग्य, गृहिणीसदृश (शी *f.*); धीर, गंभीर, प्रौढ, आर्य, विनीत.

Matter, *s.* द्रव्यं, वस्तु *n.*, स्थूल or घन-द्रव्यं or वस्तु. भौतिकवस्तु, साकारद्रव्यं, मूर्ति *f.* 2 साधनं, प्रकृति *f.*, उपकरणं, कारणं, उपादानं. 3 द्रव्यं, वस्तु, पदार्थः; अर्थः, विषयः, प्रकरणं, पदं, आस्पदं, प्रस्तावः, प्रसंगः. 4 प्रयोजनं, हेतुः, कारणं, कार्यं, व्यापारः, अर्थः. 5 सारः, तत्त्वं, अर्थः, गुरुत्वं, गौरवं, महत्त्वं, प्रभावः. 6 पूयं, दूष्यं, क्षतजं, पूयरक्तं-शोणितं; 'm. in hand' प्रकृतं, प्रस्तुतं; 'm. of dispute' विवादवस्तु-विषयः-आस्पदं &c.; 'it is of no m.' यत्किञ्चित्करमेतत्, निरर्थकं; सूक्ष्मविचारस्याविषयः; 'an important m.' गुर्वर्थः; 'of no m.' निरर्थक, निःसार, अगुरु; 'what is the m. with her' किं तस्या वृत्तं, कस्तस्या वृत्तांतः. -*v. i.* Ex. by अर्थः, or by किं, कार्यं with instr.: 'what m. s it to me' किं मम तेन कार्यं, कोऽर्थः &c.; 'it m. s very little', 'it m. s not' लघ्वर्थमेतत्, नायं गरीयाननर्थः, 2 पूयपूर्ण-*a.* भू 1 P, पूयं उत्पद् c. -y, *a.* पूयपूर्ण-युक्त-गर्भ, सपूय. -*Material*. *a.* भूतात्मक, भौतिक (की *f.*), भूतमय (यी *f.*), आधि-पांच-भौतिक, मूर्त, द्रव्यमय, प्राकृतिक (की *f.*); घन, स्थूल, जड. 2 अपारमार्थिक (की *f.*), अनात्मीय. 3 सारवत्, ससार, वास्तविक (की *f.*). 4 गुरु, महत्, परमार्थ, गुर्वर्थ; आवश्यक (की *f.*), मुख्य, प्रधान, विशिष्ट; *See* **Principal**; m. world' भूतसृष्टि *f.*, स्थूलं जगत्; 'm. body' स्थूल-जड-देहः; भौतिकपिंडः; 'm. cause' प्रकृतिः, उपादानं, उपादानकारणं; 'proximity being not m.' सान्निधानस्य अकिंचित्करत्वात् (S. B. 141). -*s.* साधनं, उपकरणं, द्रव्यं, कारणं, उपादानं, प्रकृतिः, पदार्थः, साधनवस्तु; 'all m. s. सामग्री, सज्जा, संभारः, द्रव्य or उपकरण-सामग्री or संभारः; 'writing m. s.' लिपिसज्जा, लेखनसाधनानि; 'the m. of cloth' वस्त्रयोनिः-प्रकृतिः. -ism, *s.* लोकायतं, अनात्मवादः, चार्वाकमतं. -ist, *s.* लोकायतिकः, अनात्मवादिन् *m.*; विषयिन् *m.* -ity, *s.* भौतिकत्वं, मूर्तिमत्त्वं, &c. -ly, *adv.* अर्थतः, वस्तुतः, तत्त्वतः, परमार्थतः, सारतः, प्रकृतितः, प्रकृत्यैव.

Mattock, *s.* खनित्रं, टंकः, पाषाणदारणः.

Mattress, *s.* (मृदु-)आ-सं-स्तरः, शयनीयं, आस्तरणं, तूलिका.

Mature, *a.* पक्व, सु-परि-पक्व, परिणत, पक्वतामापन्न, पाकोन्मुख (खी *f.*), फलोन्मुख. 2 संपन्न, सं-परि-पूर्ण, प्रौढ, सिद्ध; 'm. deliberation' सुविचारः, प्रसमीक्ष्य-सुविमृश्य-विचारः, सुसमीक्षा, सुविमर्शः. -*v. t.* परिपाकं नी 1 P, परि-णम् c. (णमयति), पक्वतां-पाकं-उत्पद् c., पच् c.; सं-पद् c., साध् c., सिद्धीकृ 8 U, कठोरीकृ; कलाकलापालोचनकठोरमतिभिः (Ka. 7) 'whose mind was m.ed cy studying &c.' -*v. i.* पच् pass., परिणम् 1 P; पाकं-परिणामं-इ or या 2 P or गम् 1 P; कठोरी-प्रौढी-भू 1 P; परिणतप्रज्ञस्य कवेर्वाणी (U. 7) 'of m. ed intellect.' -ate, *v. t.* पच् c., परि-णम् c. -*v. i.* पच् pass., पक्वीभू, पूयपूर्ण-*a.* भू. -ation, *s.* पाकः, विपरि°, -परिणति *f.*, परिणामः. 2 सपूयत्वं, पूयस्रावः. -ative, *a.* पाकल, पाचन, पचिष्णु, पूयजनन (नी *f.*). -ity, -ness, *s.* पाकः, वि-परि°-, परिणामः, विपक्वता, परिणति *f.*, प्रौढ-पक्व-दशा, पक्व-परिणत-अवस्था, पक्वभावः, कठोरता, प्रौढता, सिद्धि *f.*, संपूर्णता. -ly, *adv.* सपरिणामं, सपाकं. 2 सुसमीक्ष्य, सुविमृश्य, सुविचार्य, सम्यगवधार्य. -*Maturescent*, *a.* आपक्व, परिणामोन्मुख.

Matutinal, **Matutine**, *a.* प्रातःकालिक-प्राभातिक-(की *f.*), प्रगेतन (नी *f.*); उषस्य, प्रातर् in comp.

Maudlin, *a.* आमत्त, मत्तप्राय-कल्प

Maugre, *adv.* *See* ' In spite of ' under **Spite.**

Maul, *s.* स्थूलमुद्गरः, घनः. *-v. t.* मुद्गरेण-लगुडेन प्र-हृ 1 P or तड् 10. 2 वि-रूप् 10, विकृ 8 U.

Mausoleum, *s.* चैत्यं, समाधिः.

Maw, *s.* उदरं, जठरः-रं.

Mawkish, *a.* अरस, नीरस, निःसत्व; बीभत्स, जुगुप्सावह.

Maxillar,-y, *a.* हनुसंबंधिन्, हनु in comp.

Maxim, *s.* सूत्रं, उक्ति *f.*, वचनं, वाक्यं, विधिः, तत्त्वं, नियमः, आ-नि-देशः, चोदना, कल्पः, सिद्धांतः; ' moral m. ' नीतिवाक्यं, सदुपदेशवचनं

Maximum, *s.* उत्तम-परम-संख्या.

May, *s.* Gen. ex. by Potential of verbs. 2 (Showing wish or blessing) ex. by Benedictive or Imperative; ' m. god Siva protect you ' पातु देवः शिवो वः; ' m I be satisfied ' कृतार्थो भूयासं. 3 (Liberty) gen. ex., by Pot.; *See* **Liberty.** 4 (Contingency) by Pot., with or without कदाचित्. *-s.* वैशाखज्येष्ठं.

Mayor, *s.* नगराध्यक्षः. पुराग्रणीः. **-Mayoralty,** *s.* पुराध्यक्षता, नगराधिकारः.

Maze, *s.* गहनं, कुटिलमार्गः, सुगहनस्थानं, दुर्निर्गमं स्थानं. 2 वक्रता, गहनता, कौटिल्यं, वैषम्यं. **-y,** *a.* गहन, दुर्निर्गम, कुटिल, जिह्म, अतिवक्र.

Mead, *s.* मधु, मधुपानीयं. 2 *Meadow*, q. v.

Meadow, *s.* क्षेत्रं, गोप्रचारः, केदारः. 2 स्थली, वनस्थली, शाद्वलं, यवसस्थानं; ' m. grass ' यवसं. **-y,** *a.* शाद्वल, यवसीय.

Meagre, *a.* क्षाम, कृश, क्षीण; *See* **Lean.** 2 असार, विरस, नीरसं, फल्गु, (style); वन्ध्यं, रूक्ष (soil). 3 अपूर्ण, स्वल्प, तनु, स्तोक. **-ly,** *adv.* कार्श्येन, स्वल्पं; ' m. attended ' तनुपरिवार. **-ness,** *s.* कृशता, क्षीणता, क्षामता, रूक्षता, तनुता, स्वल्पता, &c.

Meal, *s.* सक्तु (*m.* pl.), क्षोदः, चूर्णं, पिष्टं. 2 भोजनं, अशनं; आहारः, आहारविधिः; ' took his m. s ' आहारविधिमकरोत्, भोजनं निर्वर्तयामास, शरीरस्थितिं समपादयत् ' good m. ' सुभोजनं; ' morning m. ' प्रातराशः. **-y,** *a.* सचूर्ण, क्षोदमय (यी *f.*), 2 कोमल, मसृण, मृदु, चूर्णसदृश (शी *f.*): m. mouthed' मृदुभाषिन्, कोमलवाच्.

Mean, *a.* मध्य, मध्यपरिमाण-प्रमाण, मध्यम. 2 मध्य, मध्यम, मध्यस्थित, व्यवहित, मध्यवर्तिन्, अंतर्गत; ' in the m.-while ' ' in the m.-time ' अत्रांतरे. 3 नीच, अपनि-कृष्ट, अधम, जघन्य, कदर्य, कुत्सित, नि-, हीन, अनार्य, खल, दुष्ट, विवर्ण, पामर, प्राकृत, अपसद, क्षुल्लक, याप्य, अवम, अवद्य, गर्ह्य, लघु, कुपूय, खेट in comp., अपक्र, रेफ; तुच्छ, क्षुद्र, कृपण, दीन, (mind &c): (in birth) हीन-नीच-जाति, अंत्यजातीय, अकुलीन, कु or का in comp.; ' m.-spirited ' लघुचेतस्, क्षुद्रमानस, कृपणबुद्धि, कापुरुष, अधमवृत्ति. *-v. t.* उद्दिश् 6 P, इष् 6 P, अभिप्र-इ 2 P; oft. ex. by desid. forms, or by काम or मनस् in comp. with inf. ; ' now what do you m. to do ' अथ भवान् किं कर्तुमनाः or किं चिकीर्षति; *See* **Intend.** 2 गम् c. (गमयति), बुध् c., द्युत् c., अभि-धा 3 U, सूच् 10, निर्दिश्; gen. ex by वृत् 1 A with loc., or by loc. simply; by अर्थ, पर, वाचिन् in comp.; ज्योतिः-शब्दस्तेजसि वर्तते (S. B. 146); अत्र अपचितिशब्दः पूजार्थः-पूजापरः-पूजावाची &c.; ' a speech m. ing censure ' निंदापरं वचः; ' what is meant by telling a lie ' असत्यमिति यदुच्यते तेन किं गम्यते, or असत्यभाषणस्य कोर्थः; what can all this m.' कः प्रकारः, किमेतत् (Mal. 5), किं नु एतत्स्यात् (Mal. 1). *-s.* मध्यमपरिमाणं, मध्यता, मध्यं, समप्रमाणं, समपक्षः. 2 अंतरं, अभ्यंतरं, मध्यावधिः, अंतरालं. 3 परिमितता, अनतिक्रमः. 4 (Means) साधनं, उपकरणं, उपायः, करणं, द्वारं, योगः, गति *f.*, साहाय्यं, सामग्री, कारणं. हेतुः; oft. ex. by instr. 4 आयः, विभवः; द्रव्यं, धनं, सामर्थ्यं, शक्ति *f.*, धनागमः; ' don't live beyond your m. ' आयमर्यादां मातिक्राम, यथाविभवं-यथाशक्ति &c. व्ययं कुरु; 'having moderate m. ' नातिधन, अल्पविभव; ' by all m. ' सर्वथा, सर्वप्रकारेण, अवश्यं, नूनं, खलु, अवश्यमेव; ' by no m. ' न सर्वथा, न कथंचन, न कथंचित्; ' by any m. ' येन केन प्रकारेण, यथा कथंचित्, कथमपि, कथंचन, कथंचित्, कथं कथमपि; ' m. of subsistence ' जीवन-साधनं-उपायः-हेतुः; उपजीविका. **-ing,** *s.* अभिप्रायः, उद्देशः, आशयः, अर्थः, तात्पर्यं, भावः, आकूतं, इंगितं, आकांक्षा. 2 विवक्षा, विवक्षितं, अर्थः; ' the m. of a word ' पदार्थः; ' literal m.' अवयवार्थः, पदार्थः, शब्दार्थः; ' hidden m. मर्मन् *n.*, गूढार्थः; ' what is the m. of this laughter ' किंनिमित्तोयं हासः. *-a.* अर्थवत्, सार्थ, पूर्णार्थ, चरितार्थ, साकूत; ' casting at me a m. look ' साकूतं मां निर्वर्ण्य. **-ingless,** *a.* निरर्थक, अनर्थक, निष्कारण, अनिमित्त. **-ingly,** *adv.* सार्थं, साकूतं, सेंगितं. **-ly,** *adv.* कृपणवत्, अधमवत्, दीनं, &c.; सावज्ञं, सावमानं, लाघवेन; ' m, ' m. born ' हीनजाति, अधमवर्णः; ' m. attired ' कृपण-अनार्य-वेष. **-ness,** *s.* नीचता, अधमता, कदर्यता, कुत्सितता, &c.;

'm. of birth' अकुलीनता, अपकृष्टं जन्म.

Meander, *v. i.* वक्रं-कुटिलं-जिह्मं-गम् or सृप् 1 P or या 2 P; *See* **Wind.** -*v. t.* कुटिलीकृ 8 U. -*s.* वक्रता, जिह्मता, कौटिल्यं, वक्र-जिह्म-कुटिल-गति *f.*, सर्पगतिः. **-ing,** *a.* वक्र, कुटिल-जिह्म-सर्प-गति, विसर्पिन्, विषमगति.

Measles, *s.* मसूरिका.

Measure, *v. t.* मा 3 A, 2 P, प्र-परि-°; तुल् 10, मानं निरूप् 10 or ज्ञा 9 U. 2 गण् 10. 3 विभज् 1 U, परि-क्लृप् c.; *See* **Divide.** 3 लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अति इ 2 P. -*v. i.* Ex. by प्र-परि-माण, मात्र, मित. परिमित in comp. -*s.* मानं, प्र-परिमाणं, (fig. also); 'm. ing rod' मानदंडः; 'm. of capacity' प्रतीमानं, प्रस्थः. 2 वि-, भागः, अंशः. 3 प्रमाणं, पर्यंतः, मात्रा, मर्यादा, सीमा; 'in some m.' ईषत्. किंचित्, अल्पमात्रं; 'beyond m.' अतिमात्रं, नितांतं, अतीव, भृशं. 4 उपायः, प्रयोगः, साधनं, युक्ति *f.*, प्रवृत्ति *f.*, क्रिया, उपचारः; 'take m. s' उपायं प्रयुज् 7 A, 10 or आश्रि 1 U or अवलंब् 1 A, कार्ये प्रवृत् 1 A; 'mild m.' सान्त्व् *n.*, सामोपायः. 5 छंदस् *n.*, वृत्तं. 6 तालः, लयः; 'the steps are in m.' पादन्यासो लयमनुगतः (M. 2); 'the m. of a vowel' मात्रा; 'in musical m.' स्वरवद्ध-*a.* 7 अपवर्तः; 'having a common m.' सापवर्त. **-ed,** *a.* मित, परिमित; नियत, निबद्ध; *See* **Limited.** 2 सम, समान, धीर. **-er,** *s.* मापकः, माननिरूपकः. **-less,** *a* अमित, अपरिमाण. **-ment,** *s.* मापनं, मानं, प्र-परि-माणं, प्र-परि-मिति *f.*; 'rough m.' स्थूलमानं; 'accurate m.' सूक्ष्ममानं.

Meat, *s.* आमिषं, मांसं, मांसाहारः; 'butcher's m.' सौ(शौ)नं. 2 अन्नं, भोजनं, आहारः; खाद्यं; 'seller of m.' मांसिकः, सौ(शौ)निकः, वैतंसिकः, कौटिकः.

Mechanic, &c. *See* under ***Machine.***

Medal *s.* मुद्रा, कीर्तिमुद्रा, प्रतिष्ठामुद्रा. **-list,** *s.* मुद्राशास्त्रज्ञः. 2 लब्धकीर्तिमुद्रः.

Meddle, *v. i.* अव्यापारेषु व्यापारं कृ 8 U, (अन्यव्यापारेषु) व्यापृ 6 A, परकार्याणि निरूप् 10 or चर्च् 6 P, 10, पराधिकारचर्चां कृ, पराधिकारं प्रविश् 6 P. 2 व्यापृ, व्यापृत-*a.* भू. **-er,** *s.* पराधिकारचर्चकः, परकार्यनिरूपकः-व्यापारिन् *m.*, अन्यव्यापारचर्चकः. **-ing, -some,** *a.* पराधिकारनिरूपक, परकार्यचर्चाशील; better by (*v.*). -*s.*, **-someness,** *s.* परकार्यचर्चा, पराधिकारनिरूपणं-प्रवेशः; अव्यापारेषु व्यापारः, अन्याधिकारचर्चा-नियोगः-निरूपणं.

Medial, *a.* मध्य, *See* **Intermediate.**

Mediate, *v. i.* माध्यस्थ्यं कृ 8 U, मध्यस्थः भू 1 P, मध्ये वृत् 1 A or गम् 1 P, माध्यस्थ्येन सं-धा 3 U. -*a.* व्यवहित, मध्यवर्तिन्, मध्यस्थ, मध्यस्थित, अंतर्गत. **-ion,** *s.* माध्यस्थ्यं, मध्यस्थता. **-ly,** *adv.* माध्यस्थ्येन, अन्यद्वारेण-द्वारा. **-or,** *s.* मध्यस्थः, मध्यमपुरुषः, मध्यस्थितः. **-orship,** *s.* मध्यस्थाधिकारः, माध्यस्थ्यं.

Medicable, *a.* चिकित्स्य, उपक्रम्य, साध्य, उपचारसाध्य.

Medical, *a.* वैद्य (द्यी *f.*), औषधीय, वैद्यक-आयुर्वेद-संबंधिन्, वैद्यकविषय; 'm. science' आयुर्वेदः, वैद्यशास्त्रं; 'm. treatment' वैद्य-भेषज-उपचारः, औषध-भेषज-प्रयोगः; 'm. man' वैद्यः, भिषक्, चिकित्सकः. **-ly,** *adv.* वैद्यशास्त्रानुरूपं.

Medicament, *s.* ***Medicine.*** q. v.

Medicaster, *s.* छद्मवैद्यः, कूटचिकित्सकः.

Medicate, *v. t.* औषधैः मिश्र् 10 or संसृज् 6 P, औषधगुणान् दा 3 U or संक्रम् c. 2 औषधं दा; *See* **Cure.** **-ion,** *s.* औषधीयद्रव्यसंसर्गः-मिश्रणं.

Medicine, *s.* औषधं, भेषजं, अगदः, भैषज्यं, जायुः; 'administering of m.' औषधोपचारः, औषधोपक्रमः, भेषजप्रयोगः, चिकित्सा, रुक्प्रतिक्रिया, उपक्रमः, उपचारः, उपचर्या, वैद्यक्रिया-उपचारः-उपक्रमः. 2 (Science) आयुर्वेदः, वैद्यकं, वैद्यशास्त्रं. **-al,** *a.* औषधीय, भैषज (जी *f.*), रोगघ्न (घ्नी *f.*), रोगहर, रोगहारिन्. 2 औषधविषयक.

Medieval, *a.* मध्यमकालीन.

Mediocre, *a.* सामान्य, मध्यम, साधारण (णी *f.*), मध्यम or सामान्य-गुण or भाव. -*s.* सामान्यगुणः नरः. **-Mediocrity,** *s.* सामान्याः, मध्यमाः (pl.). 2 मध्यमता, सामान्यता, मध्यम or सामान्य-भावः or दशा.

Meditate, *v.* ध्यै 1 P, चिंत् 10, भू c., विमृश् 6 P, मनसा-विचर् c. or क्लृप् c. or वि-भू c., समा-धा 3 U, वितर्क् 10. 2 परि-सं-क्लृप् c., चिंत्, युज् 7 U, 10, मंत्र् 10 A; *See* **Intend.** **-ion,** *s.* ध्यानं, चिंता, विमर्शः, भावनं-ना, कल्पनं; (deep) अंतर्ध्यानं, समाधिः, आत्मैकाग्रता, प्रणिधानं, प्रसंख्यानं, (हरः प्रसंख्यानपरो बभूव K. III. 40); 'religious m.' योगः, समाधिः, समाधियोगः, &c.; 'deeply absorbed in m.' ध्यानपर-मग्न-निष्ठ, समाधिस्थ. **-ive,** *a.* चिंता-ध्यान-पर, चिंता-ध्यान-शील, समाधिस्थ, समाहित, सच्चिंत; 'by means of m. power' समाधियोगेन, प्रणिधानबलेन-योगात्, प्रणिधानतः.

Mediterranean, *a.* भूमध्यस्थ, भूवेष्टित मध्यदेशीय, मध्यदेशस्थ.

Medium, *s.* साधनं, द्वारं, द्वार् *f.* कारणं, निमित्तं, हेतुः, करणं, अंगं, योगः, मार्गः; 'through the m. of my friend' मन्मित्रद्वारेण-द्वारा; 'through the m. of air' आकाशमार्गेण. 2 मध्यमता, सामान्य-मध्य-पक्ष.

Medley, *s.* संकरः, सन्निपातः, प्र-सं-कीर्णकं, द्रव्यसंकुलं, नानाद्रव्यसंमिश्रणं-समूहः. -*a.* सं-प्र-कीर्ण, संकुल, संमिश्रित, संकरीकृत.

Medulla, *s.* मज्जा, मेदस् *n.* -**ry,** *a.* मज्जासंबंधिन्; मेदोमय (यी *f.*)

Meed, *s.* पारितोषिकं, प्रतिफलं.

Meek, *a.* विनीत, सविनय, नम्र-शील-वृत्ति, अनुद्धत, अगर्व, निरहंकार, सौम्य; *See* **Humble.** 2 दीन, कृपण. -**ly,** *adv.* सविनयं, नम्रतया, अनुद्धतं, नम्रचेतसा. 2 दीनवत् कृपणं. -**ness,** *s.* विनयः, सौम्यता, अगर्वः, अनौद्धत्यं, नम्रशीलता, दैन्यं, कार्पण्यं.

Meet, *v. t.* सं-इ 2 P, संगम् 1 A, आ-समा-सद् c., संमिल् 6 P, समा-उपा-गम् 1 P; oft. ex. by दृश् 1 P, नयनपथं-विषयं &c. या 2 P or गम्, प्रति-सं- अभि-मुखं या or गम् or प्राप् 5 P, अभि-सं-मुखीभू 1 P; 'I met a little cottage girl' उटजनिवासिनी काचिद्बालिका मम नयनविषयं याता or मया दृष्टा; 'they two met each other' परस्पराभिमुखं प्राप्तौ. 2 (with) आ-सद् c., अधि-गम्, प्राप्, लभ् 1 A, अभि-या-इ-गम्; *See* **Find, Get;** 'm. with calamities' संप्राप्नुवंति आपदः; 'm. s with death' मृत्युमभ्येति, निधनं याति, मरणमाप्नोति, विनाशं गच्छति &c.; 'not easy to m. with' दुर्लभ, दुष्प्राप, दुरासद, &c.; 'go out to m.' प्रत्युद्-या-व्रज्-गम्-इ; 'to rise to m.' प्रत्युत्था 1 P, अभ्युत्था. -*v. i.* संमिल्, सम्-इ, सन्नि-पत् 1 P, एकीभू, एकत्र मिल्; *See* **Assemble.** 2 (In battle) संयुध् 4 A, युद्धार्थं मिल्, युद्धं आरभ् 1 A, रणे अभि-युज् pass; 'the waters m.' आपः संप्लवंते, संगच्छंते, संभिद्यंते. -*a.* उक्त, उचित, योग्य, उपपन्न. *See* **Proper.** -**ly,** *adv.* योग्यं, उपपन्नं. -**ness,** *s.* औचित्यं, युक्तता. -**ing,** *s.* समागमः; संगति *f.*, संगः, संगमः, संमिलनं, संयोगः. 2 सभा, समाजः, मेला, मेलकः, सदस् *f. n.*, संसद् *f.*, परिषद् *f.*, लोक-जन-समूहः-संघः-समुदायः; गोष्ठी, आस्थानं-नी (m.-house); 'member of a m.' सभ्यः, सदस्यः, सभासद्. 3 संभेदः. व्यतिकरः, संगः-गमः.

Megalomania, *s.* अहं-भावः-कृति *f.*-मन्यता.

Megrim, *s.* शिरोवेदना, अर्धावभेदकं. 2 **Humour,** q. v.

Melancholy, *a.* विषण्ण, सविषाद, अवसन्न, खिन्न, उद्विग्न, दुर्मनस्, विमनस्, दीनमनस्क, चिंताशील, चिंताकुल; *See* **Dejected.** 2 सदा-नित्य-विषण्ण, खेदवृत्ति, विषादशील. 3 विषादात्मक, खेद-शोक-गर्भ; 'to be m.' अव-वि-सद् 1 P, म्लै 1 P, खिद् pass. -*s.* विषादः, अवसादः, खेदः, उद्वेगः, म्लानि *f.*, निर्वेदः, दैन्यं, चित्तोद्वेगः, वैमनस्यं, विषादवृत्ति *f.* -**ic,** *a.* सदाविषादिन्. -**ily,** *adv.* सविषादं, सोद्वेगं, &c.

Melee, *s.* रणसंकुलं, संकुलसंग्रामः.

Meliorate, *v.* *See* **Improve.**

Melliferous, *a.* मधुप्रद, मधुदायिन्.

Mellifluous, Mellifluent, *a.* मधुर, मधुमय (यी *f.*), मधुस्यंदिन्-स्राविन्. 2 मधुराक्षर, मधुरवाच्. -**ly,** *adv.* मधुरं. -**ness,** *s.* माधुर्यं, मधुप्रवाहः-स्रावः.

Mellow, *a.* पक्व, परिणत, पाकमृदु. 2 मृदु, कोमल, स्निग्ध, सुखस्पर्श; 'm. to the ear' मंजुल, मंजुस्वन, मधुर-कोमल-शब्द. -*v. i.* पच् pass., पक्वदशां या 2 P or प्राप् 5 P, म्रदूभू 1 P. -*v. t.* पच् 1 P or c.; मृदूकृ U; *See* **Mature.** -**ness,** *s.* पक्वता, परिपाकः, पक्वदशा, कोमलता, मार्दवं.

Melody, *s.* सुस्वरः, स्वरमाधुर्यं, कलता, माधुर्यं, सुश्राव्यता, श्रोत्राभिरामता, सुखश्रवता, स्वरानुपूर्व्यं, तालैक्यं; 'm. of song' गीतरागः. -**Melodious,** *a.* मधुर, सुखश्रव, सुश्राव्य, श्रुतिमनोहर, सुस्वर, सुस्वन, मंजुल, कल, श्रोत्राभिराम, श्रुति-श्रोत्र-सुख, मंजु-कल-स्वन, मधुरस्वर, मधुराक्षर. -**ly,** *adv.* मधुरं, कलं, सुस्वरेण. -**ness,** *s.* माधुर्यं, कलता, &c.

Melon, *a.* स्फुटिफलं, तरंबुजं, कालिंगं, सेडुः.

Melt, *v. i.* वि-ली 9 P, 4 A, वि-द्रु 1 P (fig. also), गल् 1 P, क्षर् 1 P, द्रवी-आर्द्री-भू 1 P. 2 दयार्द्रीभू, करुणया द्रु; 'his whole soul m. s with benevolence' अस्य सर्वात्मनि परहितबुद्धिर्निषिक्तेव, परोपकारपरवशः. -*v. t.* वि-ली c., वि-द्रु c., गल् c. 2 दयार्द्रीकृ 8 U, करुणार्द्रीकृ, वत्सलयति (D.); 'to be m. ed' आर्द्रीभू, आर्द्र-*a.* भू, द्रु, अभि-स्यंद् 1 A; 'his heart was m. ed with affection' तस्य हृदयं स्नेहार्द्रीभूतं, स्नेहेनाभ्यष्यंदत. -**er,** *s.* द्रावकः, विलयनकृत् *m.* -**ing,** *s.* द्रवः, द्रवणं, विलयनं, गलनं, क्षरणं. 2 द्रावणं, विलायनं.

Member, *s.* अंगं, अवयवः, गात्रं, प्रतीकः, उपघनः; 'Veda with all its m. s' सांगः वेदः. 2 (Of a discourse &c.) अंगं, प्रकरणं, खंडः-डं, देशः, परिच्छेदः, विभागः, अंशः; 'm. by m.' अवयवशः, भागशः; 'becoming a m.' अंगभूत. 3 (Of an assembly &c.) सभ्यः, सभासद्, सदस्यः, पारिषद्यः; 'm. of an association' गणाभ्यंतरः. 4 (Of a family) कुलावयवः, कुटुंबिन् *m.*; 'm. of a com-

pound ' पदं. -ed, *a.* अंगिन्, अवयविन्, अंग in comp. -ship, *s.* सभ्यपदं.

Membrane, *s.* त्वच् *f.*, तनुत्वक्, आवरणत्वक्, चर्मन् *n.* -ous, *a.* तनुत्वगावृत.

Memento, *s.* स्मरणं, स्मारकं.

Memoir, *s.* वृत्तं, चरित्रं, वृत्तांतः, इतिहासः; चरित्र-रचना-लिखनं.

Memory, *s.* स्मृति *f.*, स्मरणशक्ति *f.*, धारणा, स्मरणं, संस्मृति *f.*, संस्मरणं. 2 स्मार्तकालः, स्मृतिकालः; 'retentive m.' मेधा, धारणा, धारणावती धीः; 'having retentive m.' मेधाविन्, धारणावत्; 'commit to m.' कंठस्थ-*a.* कृ 8 U, हृदये-मनसि-चित्ते-कृ, अभ्यस् 4 U; 'committed to m.' कंठस्थ, हृदयस्थ; 'store in m.' हृदये नि-उप-धा 3 U or कृ, अवधृ 10; 'to remain only in m.' स्मृति-विषयतां-स्मृतिपथं-स्मर्तव्यशेषं-कथावशेषं-गम् 1 P or प्राप् 5 P; 'loss of m.' स्मृतिलोपः; 'time beyond m.' अस्मार्तकालः; 'within m.' स्मार्ते काले. -able, *a.* स्मर्तव्य, स्मरणार्ह; प्र-वि-ख्यात, प्रसिद्ध, सुविज्ञात. -**Memorandum,** *s.* स्मरणलेखः-पत्रं, स्मारकं पत्रं. -**Memorial,** *s.* स्मरणचिह्नं, स्मारकं, स्मारकं कृत्यं, स्मारकविषयः. 2 आवेदनपत्रं, अभ्यर्थनालेखः, विज्ञप्ति *f.*, विज्ञापनापत्रं. -*a.* स्मारक, अनुबोधक, स्मृतिकर (री *f.*). -ist, *s.* प्रार्थकः, अर्थिन् *m.*, प्रार्थयितृ *m.*, विज्ञप्तिकृत् *m.* -ize, *v. t.* वि-ज्ञा c. (ज्ञापयति), निवेदनपत्रेण प्रार्थ् 10 A.

Menace, *v.t.* तर्ज् 1 P, 10 A, भी c., भर्त्स् 10 A, भयं दृश् c.; *See* **Frighten.** -*s.* तर्जनं-ना, बिभीषिका, भर्त्सनं-ना, भयदर्शनं, अपकारगिर् *f.* -er, *s.* भर्त्सनकृत् *m.*, तर्जकः. -ing, *a.* भीषण, भयप्रद.

Menagerie, *s.* वि(वी)तंसः; पशुपक्षिसंग्रहः.

Mend, *v. t.* नवीकृ 8 U, सं-धा 3 U, समा-प्रतिसमा-धा, उद्धृ 1 P, (जीर्णं) सं-धा or साध् c. 2 शुध् c., प्रतिकृ; प्रमृज् 2 P or c. 3 प्रवृध् c., उत्कृष् 1 P, भद्रतरीकृ; *See* **Improve;** 'm. your pace' लघु लघु गच्छ. -*v. i.* वृद्धिं-उत्कर्षं-उन्नतिं-इ-या 2 P or गम् 1 P, भद्रतरीभू, सुस्थ-*a.* भू, वृध् 1 A. -er, *s.* संधातृ *m.*, उद्धर्तृ *m.* -ing, *s.* संधानं, समाधानं, उद्धारः, प्रतिकरणं.

Mendacious,-city, *See* **Liar, Lying,** under **Lie.**

Mendicant, *s.* भिक्षुः, भिक्षुकः, अर्थिन् *m.*, याचकः, भिक्षार्थिन् *m.*, भिक्षाशिन् *m.*, भैक्ष्यभुज् *m.*, वनीयकः, याचनकः, मार्गणः. 2 (Religious) परिव्राज् *m.*, परिव्राजकः, योगिन् *m.*, यतिः, संन्यासिन् *m.* -**Mendicancy,** -**Mendicity,** *s.* भैक्ष्यं, भिक्षा, भिक्षाशित्वं, भिक्षावृत्ति *f.*, भैक्ष्याजीवः, याचना, याच्ञा, याचकवृत्तिः, प्रव्रज्या.

Menial, *s.* भृत्यः प्रेष्यः, दासजनः, चेटः-टी, गृहदासः-सी, किंकरः, अपकृष्टः; परिजनः, दासवर्गः, भृत्यवर्गः (m. s). -*a.* (*s.*) in comp.; व्रातीन, अपकृष्ट; *See* **Mean;** 'm. duties' दासकर्मन्, व्रातं, नीचकर्म.

Meniscus, *s.* अर्धचंद्राकारः काचः.

Menology, *s.* मासपंजिका.

Menses, *s.* ऋतुः, आर्तवं, पुष्पं, रजस् *n.*, कला; 'first appearance of m.' रजोदर्शनं.

Menstrual, *a.* मासिक (की *f.*), मास्य, मासीय, प्रातिमासिक; 'm. time' ऋतुः, ऋतुकालः; 'm. discharge' रजस् *n.*, पुष्पं, ऋतुः. -**Menstruate,** *v. i.* रजस्वला-ऋतुमती-भू 1 P. -ion, *s.* ऋतुस्रावः. -**Menstruous,** *a.* आर्तव (वी *f.*), ऋतु in comp. 2 रजस्वला, ऋतुमती, पुष्पवती, स्त्रीधर्मिणी, अविः, आत्रेयी; मलिनी, उदक्या, अस्पर्शा.

Menstruum, *s.* द्रावणं, विद्रावकरसः.

Mensurable, *a.* प्रमेय, माप्य.

Mensurate. *v t.* मा 3 A, 2 P; *See* **Measure.** -ion, *s.* प्र-परि-माणं, मापनं, मिति *f.*

Mental, *a.* मानसिक (की *f.*), मानस (सी *f.*), मनःस्थ, चित्तगत, चित्तज, मनोभव; gen. by मनस् or चित्त in comp.; 'm. distress' मनस्तापः. -ly, *adv.* मनसा, बुद्ध्या.

Mention, *v. t.* कथ् 10, आ-ख्या 2 P, नि-आ-विद् c., शंस् 1 P, अभि-धा 3 U, उदीर् c., उच्चर् c., कृत् 10, वच् 2 P, निर्दिश् 6 P; स्मृ 1 P, (as precepts); 'will be m. ed further on' अग्रतो वक्ष्यते 'm. by name' नाम ग्रह् 9 U; 'not to m.' ex by का कथा, का गणना (with loc.), आस्तां-तिष्ठतु-तावत्, followed by अपि; 'not to m. embodied beings (heated by affliction) even red-hot iron softens down (after a time)' अभितप्तमयोपि मार्दवं भजते कैव कथा शरीरिषु (R. vii. 43); का वा गणना सचेतनेषु अपगतचेतनान्यपि संघट्टयितुमलं मदनः (Ka. 157); तिष्ठन्तु तावत्सेवापरा राजानः प्रजा अपि पृष्ठतो लगन्ति (Ka. 260). -*s.* अभिधानं, कथनं, आख्यानं, आ-नि-वेदनं, उच्चारणं, कीर्तनं, निर्देशः; नामग्रहणं-निर्देशः. -ed, *a.* कथित, उक्त, निर्दिष्ट, कीर्तित, स्मृत, &c.; 'above-m.' प्रागुक्त; 'about to be m.' वक्ष्यमाण.

Mentor, *s.* उपदेशकः, उपदेष्टृ *m.*

Mephitic,-al, *a.* पूतिगंधि, दुर्गंधमय (यी *f.*), प्राणहर, मारात्मक, जीवितापह.

Mercantile, *See* under **Merchant.**

Mercenary, *a.* अर्थपरवश, लाभपरायण, लाभार्थिन्, धनलुब्ध, लाभवृत्ति-बुद्धि, स्वार्थपर

स्वार्थापेक्षक; 'from m. motives ' लाभेच्छया, लाभेच्छया, स्वार्थापेक्षया. 2 भृतक, वैतनिक (की *f.*), भृति-भरण्य-भुज्, वेतनार्थिन्. -*s.* भृतकः, भृति-भरण्य-भुज् *m.*, वैतनिकः, वेतनार्थिन् *m.* **-ly,** *adv.* लाभदृष्ट्या, लाभापेक्षया, भृतकवत्, स्वार्थबुद्ध्या. **-ness,** *s.* लाभदृष्टि *f.*-अपेक्षा-बुद्धि *f.*, धनलाभलोभः, स्वार्थवेतन-अपेक्षा.

Mercer, *s.* कौशेयोर्णवस्त्रवाणिज् *m.* **-y.** *s.* कौशेयवस्त्रव्यवहारः.

Merchant, *s.* वणिज् *m.*, वाणिजः, आपणिकः, नैगमः, सार्थवाहः, पण्याजीवः, क्रयविक्रयिकः, वैदेहकः, सार्थिकः, व्यवहारिन् *m.*, वाणिज्योपजीविन् *m.* श्रेष्ठिन् *m.*; 'm.'s business, वाणिज्यं, वणिक्क्रिया; ' m. 's exchange' श्रेष्ठिचत्वरं; ' voyaging or seafaring m.' सांयात्रिकः, पोतवणिज्; 'company of m.s' सार्थः, निगमः. **-able,** *a.* पण्य, पण्यार्ह. **-Merchandise** *s.* वाणिज्यं, व्यवहारः, क्रयविक्रयौ (du.) 2 पण्यं, भांडानि, पण्यद्रव्याणि, वाणिजद्रव्यं-भांडं-पण्यं. ***-Mercantile,*** *a.* वाणिज (जी *f.*), वाणिज्यिक (की *f.*), वाणिज्यसंबंधिन्.

Mercury, *s.* पारदः, चपलः, रसः, सूतः, पारतः; 'white sublimate of m.' रसकर्पूरः; ' sulphuret of m.' कज्जली. 2 बुधः, रौहिणेयः, सौम्यः. **-al,** *a.* पारदात्मक, पारदमय (यी *f.*), सपारद. 2 चपल, लघुशरीर, मोत्साह, तेजस्विन्. 3 द्रव्यपरायण, धूर्त.

Mercy, *s.* दया, कृपा, करुणा, अनुकंपा, अनुक्रोशः, कारुण्यं, घृणा, दया, कृपाशीलता, दयालुता. क्षमाशीलता, दया-कृपा-बुद्धि *f.* 2 प्रसादः, अनुग्रहः. 3 क्षमा तितिक्षा 'fountain of m.' करुणाकरः, दयासागरः; दयानिधिः; ' an object of m. ' कृपापात्रं-भाजनं, अनुकंप्य, अनुग्राह्य, तपस्विन्; ' to show m. ' दय् 1 A (with gen.), अनुकंप् 1 A (with acc.), दयां कृ 8 U (with loc.); ' m., Oh king ' क्षमस्व राजन्. **-ful,** *a.* दयालु, कृपालु, कृपा-दया-करुणा-शील, करुणार्द्र, दयार्द्र, अनुकंपिन्, सदय, सकरुण, सानुक्रोश, क्षमाशील; वत्सल, दयाबुद्धि-दृष्टि; *See* Kind. **-fully,** *adv.* सदयं, सकरुणं, सानुकंपं, दयया, करुणया, सानुक्रोशं. **-fulness,** *s.* दया, कृपा, घृणा, दयाशीलता, अनुकंपा, वात्सल्यं; *See* (*s.*). **-less,** *a.* निर्दय, निष्करुण, निर्घृण, अकरुण, कठोर, निष्कृप, निष्ठुर, नृशंस. **-lessly,** *adv.* निर्दयं, निष्कृपं, निर्घृणं, निष्ठुरं.

Mere, *a.* केवल, शुद्ध; gen. ex. by एव, or मात्र in comp.; ' by m. touch ' स्पर्शमात्रेण; ' a m. fool ' मूर्ख एव, केवलमूर्खः. -*s.* सरस् *n.*, ह्रदः; *See* Lake. 2 पर्यंतः, सीमा; *See* Boundary. **-ly** *adv.* केवलं, एव, मात्र in comp.; 'by m. advising' उपदेशमात्रात्, उपदेशादेव, &c

Meretricious, *a.* कृत्रिमशोभामय (यी *f.*), बाह्यरुचिर, कृत्रिमरागवत्, मिथ्याशोभन. 2 पण्यांगनीय, वेश्यासंबंधिन्. **-ly,** *adv.* मिथ्याशोभया.

Merge, *v. i.* नि-,मस्ज् 6 P, अव-गाह् 1 A (lit); निपा-ग्रस्-pass., प्र-वि-ली 4 A, वि-लुप् pass., नश् 4 P, (fig.); ' one fault m. s in a collection of good qualities' एको हि दोषो गुणसंनिपाते निमज्जति (K. I. 3). -*v. t.* मस्ज् c., (मज्जयति), अवगाह् c. 2 नश् c., वि-लुप् 6 P or c., ग्रस् 1 A, नि-पा 1 P, प्र-वि-ली c. ***-Mersion,*** *s.* मज्जनं, अवगाहः-हनं.

Meridian, *s* मध्याह्नः, दिनमध्यं, मध्याह्नकालः-समयः. 2 खमध्यं; ' distance from the first m. ' रेखांतरं; ' the sun is on the m. ' नभसो मध्यमलंकरोति भानुः 3 परा कोटिः-काष्ठा, उत्कर्षः. -*a.* माध्याह्निक (की *f.*). 2 खमध्यसंबंधिन्. 3 उत्तम, परम; oft ex. by परा कोटिः, परा काष्ठा.

Meridional, *a.* दक्षिणदेशीय; दाक्षिणाभिमुख (खी *f.*).

Merit, *s.* गुणः, योग्यता, पात्रता, उत्कर्षः, श्रेष्ठता, विशिष्टता, विशेषः, गुणोत्कर्षः, गुणवत्ता. 2 (M. s) गुणागुणौ, गुणदोषौ, धर्माधर्मौ. 3 पुण्यं, धर्मः, सुकृतं, श्रेयस् *n.*, वृषः; 'acquired by m.' पुण्यार्जित; 'efficacy of m. ' पुण्यप्रतापः-प्रभावः; ' one possessing many m. s' पुण्यनिधिः-राशिः-सागरः, पुण्यात्मा. -*v. t.* अर्ह् 1 P, अर्ह्-योग्य-in comp.; *See* Deserve; ' m. ing censure ' निंद्य, गर्हणीय, निंदापात्रं. **-ed,** *a.* युक्त, उचित, योग्य; *See* Proper. ***-Meritorious,*** *a.* प्रशस्य, श्लाघ्य, प्रशस्त, श्लाघार्ह, प्रशंसार्ह. 2 गुणिन्, गुणवत्, गुणसंपन्न, गुणोपेत, गुणान्वित. 3 पुण्यवत्, पुण्यशील, पुण्यात्मन्, पुण्यात्मक, पुण्यशालिन्; पुण्य, पुण्यरूप, अवदात (deed): ' a m. deed ' पुण्यं, धर्मः, सुकृतं, अवदातं कर्म. **-ly,** *adv.* श्लाघ्यतया, प्रशस्यं. **-ness,** *s.* गुणवत्ता, पात्रता, योग्यता, &c.

Mermaid, *s.* मत्स्यांगना, मत्स्यस्त्री.

Merry, *a.* प्र-,हृष्ट, सानंद, सोल्लास, प्रोत्फुल्ल, प्रमुदित, प्रहृष्टचित्त; आनंद-उल्लास-हास्यवृत्ति, प्रसन्नवदन, विलासिन्, विनोदिन्, विनोदक; परिहासशील. 2 हास्यकर (री *f.*), विनोदक; ' to make m. ' उत्सवं कृ 8 U; ' to be m.' उल्लस् 1 P, मुद् 1 A; *See* Delight. ' m.-andrew ' भंडः, वैहासिकः, विदूषकः. ' m.-making ' आनंदोत्सवः, उत्सवकरणं. **-ly,** *adv.* सहर्षं, सोल्लासं, सानंदं, हृष्टमनसा. **-ment,** *s.* प्र-,हर्षः, उल्लासः, प्र-,मोदः, आनंदः, आह्लादः; हास्यं, परिहासः, उत्सवः, कौतु विलासः; विनोदः; लीला, खेला,

'what is said in m.' हास्यार्थेनोदः; नर्मालापः, विनोदोक्ति *f.* -ness, *s.* हृष्टता, सानंदता, आनंदवृत्ति *f.*

Meru, *s.* मेरुः, सुमेरुः, हेमाद्रिः, रत्नसानुः, सुरालयः.

Mesentery, *s.* अंत्रपेशी.

Mesh, *s.* जालरंध्रं-छिद्रं-अंतरं. -*v. t.* जाले पत् c. or बंध् 9 P. -y, *a.* जालरूप, जालाकार.

Meslin, *s.* मिश्रधान्यं, धान्यमिश्रणं. -*a.* मिश्रधान्यकृत.

Mess, *s.* अन्नं, अन्नपात्रं. 2 गणान्नं, सहभोजनं; सहभोजिनः, पंक्तिभोजिनः (pl.); सहभोजिपंक्ति *f.*- गणः, गणान्नपंक्तिः. 3 संकरः, प्र-सं-कीर्णकं, सन्निपातः, संमिश्रणं, संकुलं; 'm.-mate' सह-पंक्ति-भोजिन् *m.* -*v. i.* सह-एकत्र-भुज् 7 A or अश् 9 P, पंक्तिभोजनं कृ 8 U. -*v. t.* संमिश्र् 10, संकॄ 6 P.

Message, *s.* संदेशः, वाचिकं, संदेशवाच् *f.*, वार्ता, शासनं; 'bearing a m.' दौत्यं, दूत्यं, प्रेष्यभावः; 'sending on a m.' प्रतिशासनं. -***Messenger,*** *s.* दूतः, संदेश-वार्ता-हरः, वार्तायनः, आ-ख्यायकः, निसृष्टार्थः, प्रेष्यः; वैवधिकः; 'female m.' दूति-ती-तिका; 'who will go as a m.' कः प्रयास्यति दौत्येन.

Messuage, *s.* वासगृहं, गृहवाटिका.

Metacarpus, *s.* करभः, पीलुः.

Metachronism, *s.* न्यूनकालनिरूपणं.

Metal, *s.* धातुः, लोहः-हं, तैजसं; 'base m.' कुप्यं; 'fused m.' रसधातुः, धातुरसः 'inferior m.' उपधातुः. -lic, -lical, *a.* धातुसंबंधिन्. 2 धातुमय (यी *f.*), धातुरूप, लौह (ही *f.*), धातु-लोह- in comp. -list, *s.* धातुज्ञः, धातुकर्मकारः. -***Metalliferous,*** *a.* धातुप्रद. -***Metalliform,*** *a.* धातुसदृश (शी *f.*). -***Metallography,*** *s.* धातुशास्त्रं-विद्या. -***Metallurgy,*** *s.* धातुशोधनं.

Metamorphose, *v. t.* रूपं परिणम् c. or परिवृत् c., रूपांतरं दा 3 U or ग्रह् c.; *See* Change. -ed, *a.* परिणतरूप-शरीर-आकार. -***Metamorphosis,*** *s.* रूपपरिणामः-परिवृत्ति *f.*-भेदः, रूपांतरं, रूप-शरीर-विकारः.

Metaphor. *s.* रूपकं, लक्षणा, आरोपः, उपचारः. 2 दृष्टांतः, निदर्शनं. -ic, -ical, *a.* औपचारिक-लाक्षणिक (की *f.*), सरूपक, आरोपित; 'm. use' उपचारः. -ically, *adv.* लक्षणया, उपचारेण, सारोपं; 'to use m.' उपचर् 1 P; *See* Figuratively.

Metaphysic,-al, *a.* आन्वीक्षिक-आध्यात्मिक (की *f.*), आत्मविषय, आत्मज्ञानपर. -ally, *adv.* आत्मविद्यानुसारेण. -ian, *s.* आन्वीक्षिकीज्ञः. -***Metaphysics,*** *s.* आन्वीक्षिकी, आत्म-अध्यात्म-विद्या, आत्मविषयकं ज्ञानं, आत्मतत्त्वविद्या-शास्त्रं

Metastasis, *s.* रोगस्थलांतरं

Metatarsus, *s.* प्रपदं.

Metathesis, *s.* अक्षर-वर्ण-विपर्यासः-व्यत्यासः-व्यत्ययः.

Mete, *v. t.* परि-,मा 3 A, 2 P; *See* Measure.

Metempsychosis, *s.* पुनर्जन्मन् *n.*, अन्यजन्म, जन्मांतरं, देहांतरप्राप्ति *f.*

Meteor, *s.* उल्का, उत्पातः. -ic, *a.* उल्कोद्भव, उल्कोत्पन्न. -ous, *a.* उल्काधर्मक. -***Meteorology,*** *s.* अंतरीक्षविद्या, वायु-नभो-विद्या.

Meter, *s.* मापकः.

Methinks, *v. imp.* मन्ये, तर्कयामि, शंके; ध्रुवं.

Method, *s.* रीति *f.*, प्रकारः, मार्गः, विधा, विधिः; पद्धति *f.*; *See* Manner. 2 व्यवस्था, क्रमः, अनुक्रमः, पर्यायः, आनुपूर्वी-र्व्यं, परिपाटि-टी *f.*, आवृत् *f.*, परंपरा; व्यवस्थया रचनं-ना, व्यूहनं, विन्यासः, संविधानं, क्रमेण स्थापनं, नियमः. -ical, *a.* व्यवस्थित, यथाक्रम, सक्रम, अनुपूर्व, सूत्रित, यथापर्याय. 2 (Of persons) क्रमानुसारिन्, क्रमानुगत, क्रम-नियम-शील. -ically, *adv.* यथाक्रमं, अनुपूर्वशः, आनुपूर्व्येण, क्रमेण, क्रमशः, पर्यायेण, अनुक्रमेण, यथानियमं. -icalness, *s.* व्यवस्था, क्रमशीलता, &c. -ism, *s.* नियमनिष्ठा. -ist, *s.* नियम-कर्म-निष्ठः. -ize, *v. t.* व्यव-स्था c. (स्थापयति), क्रमेण स्था c. or वि-धा 3 U or विरच् 10 or विन्यस् 4 U.

Meticulous, *a.* साशंक. 2 अतिसावधान; अत्यवहित.

Metre, *s.* छंदस् *n.*, वृत्तं. -***Metrical,*** *a.* छंदोबद्ध, वृत्तात्मक, छांदस (सी *f.*), छंदोरूप, पद्यरूप, पद्यात्मक.

Metronome, *s.* तालमापनी.

Metropolis, *s.* राजधानी. -***Metropolitan,*** *a.* राजधानीय.

Mettle, *s.* तेजस् *n.*, सत्त्वं, उत्साहः, वीर्यं, ओजस् *n.*, प्रभावः, पौरुषं, ऊर्जस् *n.* -ed, -some, 'of great m.' 'high-m.ed' *a.* तेजस्विन्, महा-उरु-सत्त्व, परमोत्साह, ओजस्विन्, वीर्यवत्, सपौरुष.

Mew, *s.* पंजरं, वीतंसः. 2 बंधनं, निरोधः, बंधनागारं, गुप्ति *f.* -*v. t.* पंजरे निरुध् 7 U or बंध् 9 P. -*v. i.* पक्षान् पत् c. or मुच् c.

Mewl, *v. i.* (शिशुवत्) क्रंद् 1 P, रुद् 2 P, आक्रुश् 1 P.

Mews, *s.* अश्वगोष्ठं, अश्वशाला.

Miasm,-a, *s.* पूतिबाष्पः, मारात्मकः वायुः.

Mica, *s.* अभ्रकं.

Mickle, *a.* बहु, बहुल.

Microbe, *s.* सूक्ष्मजंतु *m.*

Micro-cosm, *s.* सूक्ष्मं जगत्.

Microscope, *s.* सूक्ष्मदर्शनयंत्रं.

Micturition, *s.* मूत्रोत्सर्गेच्छा.

Mid, *a.* मध्य, मध्यम; अर्ध, in comp.; 'm.-course' अर्धमार्गः, अर्धपथः; 'm.-day'

मध्याह्नः; (*a.*) माध्यंदिन (नी *f.*), माध्याह्निक (की *f.*); 'm.-heaven' खमध्यः; 'm.-land' मध्यदेशीय, देशमध्यवर्तिन्; 'm.-night' मध्यरात्रः, अर्धरात्रः, रात्रिमध्यं, निशीथः; 'm.-summer' निदाघमध्यं; 'm.-way' अर्धपथः-मार्गः; (*adv.*) अर्धमार्गे, मार्गमध्ये; 'm.-wife' सूतिका; साविका, प्रसवकारिणी; 'm.-wifery' प्रसवकार्यकरणं, सूतिकर्मन् *n.*, गर्भमोचनविद्या; 'm.-winter' शिशिरमध्यं. **-*Middle*,** *s.* मध्यं, मध्यभागः-देशः-स्थानं-स्थलं; अभ्यंतरं, गर्भः, अंतरं, in comp.; 'in the m. of the ocean' मध्येसमुद्रं; 'in the m. of the house' गृहाभ्यंतरे, गृहगर्भे; 'going in the m.' मध्यग. **-*a.*** मध्य, मध्यम, मध्यस्थ, मध्यवर्तिन्, मध्यस्थित; 'the m. classes' मध्यमजातीयाः, मध्यमवर्णाः; 'm.-aged' मध्यमवयस्क, गतयौवन; 'm. finger' मध्यमा, कर्णिका; 'm.-man' मध्यस्थः, [illegible]. **-ing,** *a.* मध्य, मध्यम, मध्यपरिमाण. 2 मध्यमपदस्थ, मध्यमगुण, सामान्य, साधारण (णी *f.*). **-*Midst*,** *s.* मध्यं; *See* **Middle**; 'in the m.' मध्ये; 'from their m.' तेषां मध्यात्; 'in the m. of this talk' एवं वदत्स्वेव; 'in the m. of calamities' विपद्ग्रस्त-*a.*, दुःखमग्न-*a.*

Midden, *s.* अवकरनिकरः.

Mien, *s.* आकारः, रूपं, आकृति *f.*, वदनाकारः, वदनाकृतिः, मुखच्छाया; 'with a dejected m.' खिन्न-म्लान-वदन.

Might, *s.* बल, शक्ति *f.*, सामर्थ्यं, तेजस् *n.*, शौर्यं, वि-परा-क्रमः, प्रभावः; *See* **Strength**; 'with all one's m.' यथाशक्ति, यावच्छक्यं. **-*Mighty*,** *a.* प्रबल, शक्तिमत्, बलवत्, ओजस्विन्, ऊर्जस्वल, विक्रांत, बलिन्; उरुविक्रम; *See* **Strong.** 2 महत्, विशाल, प्रतापवत्, महौजस्, विभूतिमत्; 'm. lord' महेश्वरः, अधीश्वरः. **-ily,** *adv.* बलेन, विक्रमेण, शौर्येण. 2 अतीव, अत्यंतं, बलवत्, भृशं, अतिमात्रं. **-iness,** *s.* सामर्थ्यं, प्रभावः, वीर्यं; *See* (*s.*)

Migrate, *v. i.* निर्गम्: 1 P, भ्रम् 1, 4 P, देशांतरं-स्थानांतरं-गम् or अधि-वस् 1 P or अध्यास् 2 A. **-ion,** *s.* भ्रमणं, पर्यटनं, देशांतरगमनं. **-ory,** *a.* देशभ्रमण-पर्यटन-शील.

Milch-cow, *s.* क्षीरिणी, पयस्वती, दुग्धवती, पीनोध्नी.

Mild, *a.* मृदु, कोमल, सौम्य, अप्रखर, अचंड, अनुग्र, अपरुष, सुकुमार, शांत, अतीक्ष्ण, अतीव्र. 2 सदय, कृपालु, दयालु, दयार्द्र, क्षमाशील, अतीक्ष्ण, अतीव्र, अतीक्ष्णदंड, मृदुस्वभाव, सौम्यवृत्ति, मृदुभाव, सामोपायिन्; *See* **Innocent** also; 'm. means' सामन् *n.*, सान्त्वोपचारः, सामोपायः; 'm. speech' सांत्ववादः, मृदुभाषणं. **-ly,** *adv.* मृदु, कोमलं, अनुग्रं, अपरुषं, अतीव्रं, मार्दवेन, साम्ना, सामोपायेन, सामोपचारैः. **-ness,** *s.* मार्दवं, मृदुता, कोमलता, सौम्यता, अतीक्ष्णता, शांति *f.* 2 प्रकृतिमृदुता, मृदुता, मृदुकोमल-स्वभावः; कृपालुता, सदयता, सौम्यवृत्ति *f.*, दयालुता, कृपाशीलता; क्षमा, साम.

Mile, *s.* अर्धक्रोशः; '3 m. s' सार्धक्रोशः; '4 m. s' क्रोशद्वयं.

***Militant*,** *a.* युद्धप्रवृत्त, रणोद्यत, युद्धोद्युक्त.

Military*,** *a.* सांग्रामिक-सामरिक-आयुधिक (की *f.*), क्षात्र (त्री *f.*), युद्ध in comp. 2 युद्धप्रवृत्त, योधिन्, शस्त्रोपजीविन्, शस्त्रभृत्, आयुधजीविन्; 'm. preparation' युद्धसामग्री; 'm. profession or life' आयुध-शस्त्र-वृत्तिं *f.*, सैनिकवृत्तिः, शस्त्राजीवः; 'm. caste' क्षत्रियजातिः; 'a man of the m. class' क्षत्रः-त्रं, क्षत्रियः, राजन्यः, विराट्., बाहुजः, मूर्धाभिषिक्तः; 'a woman of the m. class' क्षत्रिया-याणी; 'm. man' योधः, वीरः, सैनिकः; 'm. duty' क्षात्रधर्मः, क्षत्रिय-क्षत्र-धर्मः; 'm. science' युद्धशास्त्रं, सांग्रामिकं, शस्त्रास्त्रविद्या, आयुध-रण-विद्या. **-*s. सैन्यं, सैनिकवर्गः, क्षत्रगणः.

***Militate*,** *v. i.* वि-प्रति-रुध् 7 U, विरुद्ध-प्रतिकूल-*a.* भू 1 P.

***Militia*,** *s.* देशरक्षिणः, रक्षकयोधाः (pl.).

Milk, *s.* पयस् *n.*, दुग्धं, क्षीरं, स्तन्यं; गोदुग्धं, गोरसः, गव्यं (cow's m.); 'fresh m.' पीयूषः-षं; 'made of m.' पयस्य; 'coagulated m.' दधि, क्षीरजं; 'giving much m.' बहुदुग्धा; 'm. livered' कातर, क्लीवहृदय, भीरु; 'm.-maid' गोपकन्या, आभीरी, गोदोहिनी; गोपी, गोपिका; 'm.-man' दोग्धृ *m.*, दोहकः, गोपः, आभीरः, गोधुक्; 'm.-pail,-pan' दुग्ध or क्षीर-पात्रं-भांडं-भाजनं; दोहनी; 'm -porridge' क्षैरेयी; 'm.-sop' कापुरुषः, भीरुः; 'm.-woman' गोपी, आभीरी, दोहिनी. **-*v. t.*** दुह् 2 U (with two acc.), दुग्धं निष्कृष् 1 P or दुह् c. **-er,** *s.* दोग्धृ *m.* दोहकः, दुह् *m.* **-y,** *s.* क्षीरिन्, पयस्य, पायस (सी *f.*); (*s.*) in comp.; 'm. ocean' क्षीर-दुग्ध-सागरः. 2 क्षीरोपम, दुग्धतुल्य 3 क्षीरद, दुग्धप्रद, बहुदुग्ध; 'm.-way' वियद्गंगा; *See* **Galaxy.** 4 भीरु, कातर, साम्य; *See* **Mild.**

Mill, *s.* चक्रं, पेषणी, पेषणयंत्रं-चक्रं. **-*v. t.*** पिष् 7 P, चूर्ण् 10. 2 मुष्टिना तड् 10 or प्रह् 1 P. **-er,** *s.* पेषकः, पेषणोपजीविन् *m.*

***Millennium*, Millenary,** *s.* सहस्रवर्षं, सहस्रसंवत्सरं. **-*Millennial*, -*Millenarian*,** *a.* सहस्रवर्षीय-ण, सहस्रवार्षिक (की *f.*).

***Millesimal*,** *a.* सहस्रतम (मी *f.*), सहस्रांशात्मक.

***Millet*,** *s.* अणुः, प्रियंगुः.

Milliner, *s.* स्त्रीवस्त्रकृत्, स्त्रीवसनकारिणी. **-y**, *s.* स्त्रीपरिच्छदः-सज्जा, स्त्रीवस्त्रसामग्री.

Million, *s.* नियुतं, दशलक्षं; 'ten m.' कोटि *f.*; 'hundred m.' अर्बुदः. **-ary**, *a.* नियुतीय. **-th**, *a.* नियुततम (मी *f.*). **-Millionaire**, *s.* कोटीश्वरः, लक्षाधीशः.

Milt, *s.* *See Spleen.*

Mime, *s.* नटः, नर्तकः, कुशीलवः, चारणः, रंगाजीवः. 2 भंडः, विदूषकः, वैहासिकः. **-Mimic**, (**-al**), *a.* अनुकरण-शील-स्वभाव, अनुकारिन्, विडंबनकारिन्. 2 विडंबन-अनुकरण-रूप. **-s.** भंडः, वैहासिकः, विदूषकः. 2 अनुकारिन् *m.* **-v. t.** (उपहासपूर्वं) अनुकृ 8 U, विडंब् 10. **-ker**, *s.* अनुकारिन् *m.*, विडंबनकृत्. **-ry**, *s.* सोपहासं अनुकरणं or विडंबनं; अनुकारः, विडंबनं.

Mimosa, *s.* नमस्कारी, गंडकारी-ली, समंगा, खदिरा, लज्जालुः.

Minaret, *s.* शिखरं, शृंगं प्रासाद-भवन-शिखरं.

Minatory, *a.* तर्जक, भयंकर, भीषण.

Mince, *v. t.* खंडशः-सूक्ष्मलवशः-कृत् 6 P or छिद् 7 P or खंड 10, शकलीकृ 8 U; 'do not m. matters' यथावृत्तं सर्वं साकल्येन निवेदय, सर्वं संपूर्णं प्रकाशय; 'm. ed meat' छिन्नमांसं. **-v. i.** ललितगत्या चल्-र् 1 P or गम् 1 P, भिन्नगत्या गम्. 2 भिन्नस्वरेण वद् 1 P. **-ingly**, *adv.* खंडशः, लवशः; भिन्नगत्या, भिन्नस्वरेण.

Mind, *s.* मनस् *n.*, मानसं, चित्तं, चेतस् *n.*, बुद्धि *f.*, मति *f.*, धीः; प्रज्ञा, बोधः; *See* Intellect. 2 हृदयं, हृद् *n.*, अंतःकरणं, चित्तं, मनः, चेतः, अंतरं. 3 मतिः, बुद्धिः, मतं; कामः, इच्छा, वांछा, रुचि *f.*, मनोरथः, वासना, भावः, ईप्सितं, अभिलाषः. 4 अभिप्रायः; उद्देशः, संकल्पः, अभिमतं, मतिः, बुद्धिः, मतं. 5 स्मरणं, स्मृति *f.*, स्मरणशक्ति *f.*, अनुबोधः; 'to give the m. to' भावं-मनो-निविश् c. or बंध् 9 P or आ-नि-धा 3 U, आसक्त-निविष्ट-चित्त-*a.* भू; *See* under Set; 'out of one's m.' भ्रांत-अव्यवस्थित-बुद्धि (*a.*); 'fixed in the m.' चित्तनिहितं; 'of low m.' कृपण-नीच-बुद्धि; 'working of the m.' चित्त or मनो-व्यापारः or वृत्ति *f.*, मनश्चेष्टा, चेतोविकारः; 'according to one's m.' यथाकामं, यथेष्टं, यथेप्सितं, यथारुचि; 'have a m. to ask' प्रष्टुमनाः-कामः; 'to cross the m.' मनसि उद्-इ 2 P or उद्भू 1 P, बुद्धौ संजन् 4 A; *See* Occur; 'call to m.' स्मृ 1 P, सं-अनु-°, अनुचिंत् 10; 'put in m.' स्मृ c., अनु-उद्-बुध् c.; 'of one m.' एकचित्त-*a.*; 'being of one m.' एकचित्तीभूयं; 'change of m.' बुद्धि-मति-भेदः; 'flashing across the m.' स्फुरणं, सहसा आविर्भावः. **-v. t.** मन् 4 A, गण् 10, [illegible] 6 A, अव-अप-ईक्ष् 1 A, आलोच् 10, अव-धा 3 U, चित्ते-मनसि-कृ 8 U, अवधृ 10, मनो दा 3 U. 2 सेव् 1 A, भज् 1 U, अनु-ष्ठा 1 P, अनुरुध् 4 A, अनुवि-धा 3 U. 3 रक्ष् 1 P, पा c. (पालयति); 'never m. the first question, answer the second' आस्तां-तिष्ठतु-तावत् प्रथमः प्रश्नः, द्वितीयस्य उत्तरं देहि; 'never m.' अगुर्वर्थमेतत्; *See* Matter. **-ed**, *a.* प्रवृत्त, प्रवण, शील, मनस्, मनस्क in comp.; 'worldly-m.' संसारासक्तचित्त; धीरमनस्क, &c. **-ful**, *a.* सावधान, अवहित, जागरूक, अवहितचित्त. 2 कृतादर, मन्यमान, अवेक्षक. 3 अवधारयत्, स्मरत्, चित्ते कुर्वत्; 'to be m. of' स्मृ. **-fully**, *adv.* सावधानं, सादरं, अवेक्षया. **-fulness**, *s.* अवधानं, अवेक्षा. **-less**, *a.* अनवधान, प्रमत्त, अनवेक्षक, निरपेक्ष. 2 नष्टस्मृति-बुद्धि; बुद्धिहीन.

Mine, *a.* मदीय, मामकीन, मामक (मिका *f.*), मत् in comp. **-s.** आकरः, ख(खा)नि-नी *f.*, उत्पत्तिस्थानं; 'm. for jewels' मणिभूमि *f.*, रत्नाकरः, (fig.) आकरः, निधिः, राशिः. 2 संधिः, सुरंगा, खानिकं, कुल्या. **-v. t.** खन् 1 P, आ-नि-°, अधस्तात् खन्, ऊर्वीं भिद् 7 P or वि-दॄ 9 P, सुरंगां कृ. **-er**, *s.* खनकः, खातकः, आखनिकः, खनितृ *m.* 2 सुरंगाकारः, सौरंगिकः. **-Mineral**, *s.* धातुः, खनिजं, आकरजं वस्तु. **-a.** धातुसंबंधिन्, धातु in comp. 2 खनिज, आकरज, आकरोद्भव. 3 धातुमय (यी *f.*), धातुरूप. 4 धातुसंसृष्ट, धातुधर्मोपेत. **-ogy**, *s.* धातुविद्या, धातुपरीक्षणविद्या-शास्त्रं. **-ogist**, *s.* धातुविद्याज्ञः.

Mingle, *v. t.* मिश्र् 10, वि-सं-व्या-°, संयुज् 7 U, 10, संसृज् 6 P, संपृच् 2 A, 7 P, संकॄ 6 P, संमिल् c., मिश्रीकृ 8 U, एकीकृ; उत्कंठासाधारणं परितोषमनुभवामि (S. 4) 'I experience pleasure m. ed with regret.' **-v. i.** संमिल् 6 P, मिश्री-एकी-भू 1 P; संकॄ-संसृज्-pass. **-ed**, *a.* मिश्रित, संपृक्त, संसृष्ट, सं-,मिश्र, संकीर्ण. **-ment**, *s.* संमिश्रणं, संसर्गः.

Miniature, *a.* सूक्ष्माकार, सूक्ष्म. **-s.** Ex. by ह्रस्व or सूक्ष्म; 'world in m.' ह्रस्वमानेन विश्वं.

Minikin, *s.* सूचिका. 2 **Minion**, q. v.

Minim, *s.* बिंदु *m.* **-um**, *s.* अल्पिष्ठा-अत्यल्पा-संख्या.

Minion, *s.* वल्लभः, प्रियः, नृप-राज-वल्लभः; *See* Favourite.

Minister, *s.* सचिवः, मंत्रिन् *m.*, अमात्यः, प्रकृतिपुरुषः, धुर्यः, धूर्वहः, धुरीणः, धुरंधरः, महामात्रः, राजसचिवः, राजामात्यः. 2 नियोगिन् *m.*, नियुक्तः, नियोज्यः, कर्मकरः, अधिकृतः. 3 उपाध्यायः, आचार्यः, पुरोहितः. 4 राजदूतः, राजप्रतिनिधिः; 'prime m.' प्रधान-

मुख्य-मंत्री, प्रधानसचिवः; ' m. of counsel ' धीसचिवः, अमात्यः; ' m. for ordinary affairs ' कर्मसचिवः. -*v.* सेव् 1 A, परि-उप-चर् 1 P, उपास् 2 A, उपस्था 1 U, श्रु desid. (शुश्रूषते). 2 (उपकरणद्रव्याणि) परिक्लृप् c., संभृ 1 P, उपपद् c., उप-स्था c. (स्थापयति). 3 (to) सं-पद् 4 A; क्लृप् 1 A; *See* **Tend.** **-ial,** *a.* मंत्रिसंबंधिन्, नियोगसंबंधिन्, उपचारपर, सेवक, अनुवर्तिन्, gen. ex. by (*s.*) in comp.; ' m. duties ' सचिवकार्याणि. **-*Ministration,*** *s.* मंत्राधिकारः, साचिव्यं. 2 उपचारः, उपासना, सेवा, शुश्रूषा, उपकारः. 3 उपाध्यायवृत्ति *f.* **-*Ministry,*** **(Ministership),** *s.* साहाय्यं, द्वारं, कर्तृत्वं, कारणत्वं. 2 साचिव्यं, मंत्रित्वं, मंत्राधिकारः, अमात्य-साचिव्य-पदवी. 3 नियोगः, अधिकारः, नियोगिपदं. 4 सचिवमंडलं, मंत्रिगणः-मंडलं-वर्गः, मंत्रिणः, अमात्याः, सचिवाः, राज्यधूर्वहाः. 5 पौरोहित्यं, उपाध्यायपदं.

Minium, *s.* *See* ' red lead ' under **Lead.**

Minor, *a.* स्वल्पतर, अल्पीयस्, कनीयस्, न्यून, अवर. 2 अप्रधान, गौण (णी *f.*), अमुख्य. 3 क्षुद्र, लघु, लघ्वर्थ, अगुरु; gen. ex. by उप pr.; ' m. portion ' उपविभागः, उपांगं; उपदेवता, उपग्रहः, उपधर्मः, &c.; ' m. consideration ' लघ्वर्थः-अगुरुः-क्षुद्रः-विचारः. -*s.* अप्राप्तव्यवहारः, अप्राप्तवयस्कः, व्यवहारायोग्यः, अप्राप्तव्यवहारदशः, बालः. **-ity,** *s.* बालदशा, बाल्यं, बालावस्था, अप्राप्तव्यवहारता; बाल-शिशु-भावः. 2 न्यून-अल्प-पक्षः-संख्या, स्तोकसंख्या; ' being in the m. ' न्यूनपक्षाश्रितः.

Minotaur, *s.* नृवृषः, नरवृषभः.

Minstrel, *s.* मा(म)गधः, वैतालिकः, बंदिन् *m.*; स्तुतिपाठकः, मधुकः, संगीतकुशलः-निपुणः; 'celestial m. ' गंधर्वः, चारणः. **-sy,** *s.* संगीतं, गीतवादनं, गांधर्वं, गंधर्व-मागध-वृत्ति *f.*

Mint, *s.* टंकशाला, मुद्रांकनशाला; (fig.) खनि *f.*; *See* **Mine;** ' m.-master ' टंकाध्यक्षः, टंकपतिः, रूप्याध्यक्षः, नैष्किकः. -*v. t.* मुद्राद्वि अंक् 10. 2 Forge, Invent, q. v. **-age,** *s.* मुद्रांकनं. 2 मुद्रा, मुद्रितरूप्यं.

Minus, *a.* न्यून, ऊन in comp.; ' m. a cubit ' हस्तन्यून. 2 ऋणं, क्षयः; oft. ex. by विमुख, वर्जित, ऊन in comp.; '10 m.1' एकविंशुता दश; ' 100 m. 1 ' एकोनशतं, एकहान्या शतं.

Minute, *s.* क्षणः, पलं, निमि(मे)षः. 2 कला. 3 लेखः, लिखितं. -*v. t.* लिख् 6 P, स्मरणार्थं लिख्. -*a.* सूक्ष्म, अणु, अत्यल्प, अतिसूक्ष्म, अल्पिष्ठ, क्षुद्र, प्रतनु. 2 निपुण, सावधान, सूक्ष्म. 3 सूक्ष्मदृष्टि, सूक्ष्मदर्शिन्; ' after m. inquiries ' निपुणं अन्विष्य; 'm. description of a woman ' तरुणीपृथगवयववर्णनं or -प्रत्यवयववर्णनं. **-ly,** *adv.* सूक्ष्मं, लवशः, अणुशः; स्निग्धं, निपुणं, सूक्ष्मदृष्ट्या; ' while m. looking at the ring ' अंगुलीयकं स्निग्धं निध्यायंती (M. 1). **-ness,** *s.* सूक्ष्मता, अत्यल्पता, अतितनुता, &c. **-*Minutiæ,*** *s.* सूक्ष्मावयवाः, परमाणवः.

Minx, *s.* धृष्टा, अविनीता, बंधकी, भ्रष्टा, असती.

Miracle, *s.* अद्भुतं, अलौकिकक्रिया-कर्मन् *n.* अद्भुतं-लोकोत्तरं-कर्म, आश्चर्यं; चमत्कारः, अतिमानुषं कर्म, दैवं कर्म. **-*Miraculous,*** *a.* अद्भुत, लोकोत्तर, आश्चर्यभूत, आश्चर्य, अमानुष (षी *f.*), अतिमर्त्य, दिव्य, अपौरुषेय (यी *f.*). 2 अद्भुतशक्तिसंपन्न; 'm. weapon' दिव्यास्त्रं. **-ly,** *adv.* अद्भुततया, दिव्यशक्त्या.

Mirage, *s.* मृगतृष्णा-तृष्णिका, मरीचिका, मृगजलं.

Mire, *s.* पंकः, कर्दमः, जंबालः-लं, मलः-लं; ' get into the m. ' संकटे निक्षिप् pass. or पत् 1 P. -*v. t.* पंकेन दुष् c. (दूषयति) or लिप् 6 P. **-y,** *a.* पंकिल, सकर्दम, सपंक, समल, कलुष, पंकक्लिन्न, पंकदूषित.

Mirror, *s.* दर्पणः, आदर्शः, मुकुरः, आत्मदर्शः. 2 (Fig.) आदर्शः, प्रतिमा. -*v. t.* **Reflect,** q. v.

Mirth, *s.* हास्यं, प्र-,मोदः, उल्लासः, आनंदः, कौतुकं, परिहासः; *See* **Merriment.** **-ful,** *a.* हृष्ट, उल्लसित, आनंदित, प्रमुदित; *See* **Merry.**

Misacceptation, *s.* अन्यथा-विपरीत-ग्रहणं.

Misadventure, *s.* *See* **Calamity.**

Misanthropy, *s.* नर-जन-द्वेषः, विश्वशत्रुता, सर्वलोकद्वेषः. **-ic, -ical,** *a.* नर-जन-द्वेषिन्, विश्ववैरिन्-द्वेषिन्. **-ist,** *s.* जन-नर-द्वेषी-शत्रुः, सर्वलोकशत्रुः, विश्वशत्रुः.

Misapply, *v. t.* अन्यथा-मिथ्या विनि-प्र-युज् 7 A, 10 or व्यय् 10 or निक्षिप् 6 P. **-ication,** *s.* दुर्विनियोगः, कुव्ययः, अपव्ययः.

Misapprehend, *v. t.* अन्यथा-मिथ्या-ग्रह् 9 U or बुध् 1 P, विपरीतं उपलभ् 1 A. **-*Misapprehension,*** *s.* अन्यथा or विपरीत-ग्रहणं or बोधः, भ्रमः, मिथ्यामति *f.*

Mis-appropriate, *v. t.* अपहृ 1 P. 2 अस्थाने युज् 7 P.

Misbecome, *v. t.* न युज् pass. or उप-पद् 4 A.

Misbegot, *a.* विजात, कुजन्मन्.

Misbehave, *v. i.* असम्यक्-अयुक्तं आचर् 1 P or वृत् 1 A. **-ed,** *a.* दुर्वृत्त, दुःशील, दुश्चेष्टित, दुराचार. **-*Misbehaviour,*** *s.*

अविनयः, दुर्वृत्तता, दुराचारः, कुचेष्टितं, अनार्यवृत्ति *f.*

Misbelieve,-belief, *See* **Distrust.**

Miscalculate, *v. t.* अन्यथा-मिथ्या-गण् 10. -**ion,** *s.* मिथ्यागणनं, कुगणना.

Miscall, *v. t.* मिथ्या अभि-धा 3 U or आ-ख्या 2 P.

Miscarry, *v. i.* गर्भः स्रु 1 P or पत् 1 P or च्यु 1 A (with gen. of woman); च्युतगर्भा भू 1 P. 2 न सिध् 4 P, विफलीभू, मोघी-वृथा-भू, प्रतिहन्-भंज्- pass. -**iage,** *s.* गर्भस्रावः-पातः-पतनं-च्युति *f.* 2 आसिद्धि *f.*, वैफल्यं, भंगः; अशुभफलं, दुर्गति *f.* 3 दुराचारः, कुनीति *f.*, अविनयः; 'to cause m.' गर्भं स्रु c. or पत् c.

Miscellaneous, *a.* सं-प्र-कीर्ण, नानाविध, नानाजातीय, विविधप्रकार, नाना-भिन्न-जातीय, विविध. -**ly,** *adv.* संकीर्णं. -**Miscellany,** *s.* संकरः, प्रकीर्णकं, नानाद्रव्य or नानाविषय-संग्रहः or संनिपातः, संकीर्णवस्तु-समुदायः-संग्रहः.

Mischance, *s.* *See* **Calamity.**

Mischief, *s.* अपकारः, हानि *f.*, हिंसा, क्षति *f.*, नाशः, अपायः, ध्वंसः, दोषः, बाधा, अहितं, अनर्थः, अनिष्टं, अरिष्टं; 'm. to crops' शस्यहिंसा. 2 कुचेष्टितं, पापं, दुराचारः, कुचेष्टा; 'm.-maker' दुर्जनः, दुर्वृत्तः, पिशुनः, कर्णेजपः, उपजापकः, कुव्यापारिन्, कुचेष्टः; 'm.-making' दौर्जन्यं, पैशुन्यं, कुचेष्टा, दुर्वृत्तिः, कुनीति *f.* -**Mischievous,** *a.* घातुक, हिंसक, हिंसात्मक, अपकार-हिंसा-शील, हिंसारुचि, अपकारिन्, अहितकारिन्, दुष्ट, पाप, दुर्बुद्धि, दुष्टमति. 2 कुचेष्टित, कुचेष्टाप्रिय, दुर्गुणिन्, दुश्चेष्टित; 'm. trick' कुचेष्टितं; 'a m. person' लोककंटकः, कुचेष्टाप्रियः. -**ly,** *adv.* दुष्टबुद्ध्या, सापकारं, क्षतिपूर्वं, हिंसया. -**ness,** *s.* हिंस्रता, अपकारशीलता, हिंसारुचि *f.*, दुष्टबुद्धि *f.*, पापात्मता.

Miscomputation, *s.* मिथ्यागणना.

Misconceive, *v. t.* मिथ्या ग्रह् 9 U, अन्यथा बुध् 1 P or उपलभ् 1 A or अवगम् 1 P. -**Misconception,** *s* मिथ्या-मति-बुद्धि *f.*, मिथ्या or अन्यथा-ग्रहणं or बोधः, विपरीतार्थबोधः, भ्रमः.

Misconduct, *v. t.* असम्यक् निर्वह् c. or प्र-णी 1 P or प्रवृत् c. 2 (Oneself) असम्यक् आचर् 1 P or वृत् 1 A. -*s.* दुर्णयः. असम्यक् निर्वाहः. 2 दुराचारः, दुश्चेष्टितं, कुचरितं, कुचर्या, अविनयः, मर्यादातिक्रमः, कुकृत्यं.

Misconjecture, *v.t.* मिथ्या तर्क् 10 or ऊह् 1 A. -*s.* मिथ्यातर्कः, मिथ्यानुमानं.

Misconstrue, *v. t.* मिथ्या-अन्यथा-अर्थं बुध् 1 P or ग्रह् 9 U, मिथ्या युज् 10 or अर्थं व्या-ख्या 2 P. -**Misconstruction,** *s.* अन्यथार्थबोधः, विपरीत-मिथ्या-ग्रहणं- बोधः.

Miscreant, *s.* पापः, खंडितवृत्तः, खलः, नरापसदः, पापिष्ठः, दुरात्मन् *m.*, दुर्वृत्तः, जाल्मः; *See* **Villain.** 2 नास्तिकः, मिथ्यादृष्टिः.

Misdeed, *s.* दुष्कृतं, अपक्रिया, कुकर्मन् *n.* कुकृत्यं-क्रिया, दुष्कृति *f.*, अपचारः, कुचरितं, पापं.

Misdemean, *v. i.* *See* **Misbehave.**

Misdirect, *v. t.* विमार्गं दृश् c. or दिश् 6 P, विपथं दिश्. 2 'Address' (wrongly), q. v. -**ion,** *s.* विमार्गदर्शनं; मिथ्योपदेशः.

Misdoer, *s.* पापः, पापकर्मन् *m.*, पापकृत् *m.*, कुकर्मा. -**Misdoing,** *s.* **Misdeed,** q. v.

Misemploy, *v. t.* अन्यथा विनि-युज् 7 A, 10 or व्यापृ c. -**ment,** *s.* असद्व्ययः, कुविनियोगः, अपव्ययः.

Miser, *s.* कृपणः, कदर्यः, क्षुद्रः, मितंपचः, किंपचानः, दृढ-बद्ध-मुष्टिः, अदानशीलः, दानशत्रुः-विमुखः. -**ly,** *a.* कृपण, कदर्य, क्षुद्र, बद्ध-दृढ-मुष्टि, दानविमुख (खी *f.*), अदानशील, मितंपच, स्वल्पव्ययिन्, व्ययविमुख, अनुदार.

Misery, *s.* दुःखं, विपद्-आपद् *f.*, व्यसनं, दैन्यं, निःस्वता, विपत्ति *f.*, दुर्गति *f.*, दुर्दशा, कृच्छ्रं, अनिष्टं, कष्टं, अनर्थः. 2 अतिदुःखं, गाढशोकः, दैन्यं, आनिर्वृति *f.*, क्लेशः, अतिव्यथा-बाधा-वेदना, परि-सं-तापः. -**Miserable,** *a.* दुःखित, दुःखान्वित, अतिदुःखार्त, अनिर्वृत, निरानंद, कष्टप्राय, अतिक्लेशार्त, वि-आ-पन्न, आपद्-विपद्-ग्रस्त, दुर्गत, मंदभाग्य, दैवोपहत, दुर्भाग्य, दुःखापन्न, दुर्दशापन्न; 'a m. man' तपास्विन् *m.*, नरहतकः. 2 कृपण, दीन, तुच्छ, गर्हणीय, गर्ह्य, कुत्सित, निंद्य, नि-अप-कृष्ट, अधम, क्षुद्र; *See* **Mean.**

Misfeasance, *s.* अतिक्रमः, विकर्मन् *n.*

Misfortune, *s.* मंदभाग्यं, दुर्दैवं, दुर्भाग्यं, दुर्जातं. 2 अनर्थः, अनिष्टं, व्यसनं, आ-वि-पद् *f.*, कृच्छ्रं, दुःखं, अत्याहितं, कष्टं, दुर्गति-विपत्ति-*f.*, अपायः, अनिष्टपातः; 'm. s never come single' रंध्रोपनिपातिनोऽनर्थाः (S. 6), छिद्रेष्वनर्था बहुलीभवंति. 3 अलक्ष्मीः, निर्ऋति *f.*

Misgive, *v. t.* Ex. by वि-आ-शंक् 1 A, न प्रति-इ or विश्वस् 2 P, विकल्प् 1 A, वेप् 1 A, *See* **Doubt;** 'my mind m. s me' उदेति मे मनसि शंका, शंकते-वेपते मे हृदयं. -**ing,** *s.* शंका, आ-वि-°, संदेहः, संशयः, विकल्पः, अप्रत्ययः, अविश्वासः.

Misgotten, *a* अन्यायार्जित.

Misgovern, *v. t.* असम्यक् शास् 2 P or पा c. (पालयति) or ईश् 2 A. -**ment,** *s.* कुशासनं, असम्यक् पालनं.

Misguide, *v. t.* अपथे पत् c., विमार्गेण-कुपथेन-नी 1 P or प्रवृत् c., विमार्गं दृश् c. -ed, *a.* उन्मार्गप्रवृत्त, मार्गभ्रष्ट, सत्पथभ्रष्ट, कुमंत्रित, दुर्विनीत, अपथगामिन्.

Mishap, *s. See* **Misfortune**

Misinform, *v. t.* अन्यथा नि-विद् c., मिथ्या कथ् 10 or वि-ज्ञा c. (ज्ञापयति), मृषा बुध् c.

Misinterpret, *v. t. See* **Misconstrue.**

Misjudge, *v. i.* मिथ्या-अन्यथा-विचर् c.

Mislay, *v. t.* अस्थाने नि-धा 3 U or रक्ष् 1 P, नश् c.; *See* **Lose.**

Mislead, *v. t.* प्र-तॄ c., वंच् 10; *See* **Cheat;** विमार्गेण-उत्पथं-नी 1 P or गम् c. (गमयति), भ्रम् c. (भ्रमयति), मुह् c., भ्रमं-भ्रांतिं-उत्पद् c., विमार्गं दृश् c. or उपदिश् 6 P, अन्यथा उपदिश्. -ing, *a.* भ्रमकारिन्, मोहं-भ्रांति-जनन (नी *f.*). **-Misled**, *a.* विमार्ग or उन्मार्गगामिन् or प्रवृत्त, भ्रांत, सत्पथभ्रष्ट, कुमार्ग-गामिन्-प्रवृत्त, भ्रांतबुद्धि.

Mislike, *v. t. See* **Dislike.**

Mismanage, *v. t.* असम्यक् निर्वह् c. or प्र-णी 1 P or प्रवृत् c. -ment, *s.* दुर्निर्वाहः, कुप्रणयनं, कुनीति *f.*, अव्यवस्था, दुर्णयः.

Misname, *v. t.* नामांतरेण-अन्यथा अभि-धा 3 U, मिथ्यानाम कृ 8 U.

Misnomer, *s.* मिथ्यानामन् *n.*, मिथ्या or अन्यथा-संज्ञा or नाम, अचरितार्था संज्ञा, असंगतं-अननुरूपं नाम.

Misogamy, *s.* विवाहद्वेषः-निंदा. -ist, *s.* विवाहद्वेषिन् *m.* [षिन् *m.*

Misogyny, *s.* स्त्रीद्वेषः-निंदा. -ist, *s.* स्त्रीद्वे-

Misplace, *v. t.* अस्थाने नि-धा 3 U or निविश् c. or निक्षिप् 6 P or कृ 8 U, असम्यक् प्र-विनि-युज् 7 A, 10.

Misprint, *s.* अशुद्धं, मुद्रणदोषः.

Mispronounce, *v. t.* अशुद्धं उच्चर् c.

Misproportion, *v. t. See* **Disproportion.**

Misquote, *v. t.* अन्यथा-अयथार्थं-उद्धृ 1 P or अव-तॄ c. -ation, *s.* अयथार्थं अवतरणं.

Misreport, *v. t.* मिथ्या-अन्यथा-निविद् c. or कथ् 10 or आ-ख्या 2 P. -*s.* अन्यथा-निवेदनं, मृषाकथनं, अयथार्थाख्यानं.

Misrepresent, *v. t.* मिथ्या कथ् 10 or वर्ण् 10, असत्यं निविद् c. or ख्या 2 P, अर्थं साचीकृ 8 U or परिवृत् c. -ation, *s.* मिथ्याकथनं-निवेदनं, मिथ्या-अन्यथा-मृषा-वादः -वर्णनं, असत्यकथनं-वर्णनं.

Misrule, *s.* कुशासनं, दुर्णीति *f.*, असम्यक् पालनं-शासनं.

Miss, *s.* (As a prefixing title) ex. by भर्तृदारिका, कुमारी. 2 भ्रमः, दोषः, अपराधः, भ्रंशः. 3 हानि *f.*, अभावः, विरहः, नाशः, लोपः; *See* **Loss.** -*v. i.* मोघी-विफली-भू 1 P, न सिध् 4 P; 'never-m. ing arrow' अमोघः बाणः. 2 भ्रम् 1, 4 P, प्रमद् 4 P, स्खल् 1 P. 3 चट् 1 A: *Se* below. -*v. t.* भ्रंश् 1 A, 4 P, च्यु, विचल् 1 P (with abl.), हृ pass. (with instr.); *See* **Lose;** 'he m. ed the mark in shooting' स लक्ष्यच्युतसायकः; निमित्तादपराद्धेषुः; 'm. ed his way' मार्गाद् भ्रष्टः &c. 2 न आप् 5 P or विद् 6 U or लभ् 1 A, (Get q. v.). 3 क्षिप् 6 P, हा 3 P, त्यज् 1 P, अपास् 4 U, विसृज् 6 P; 'you have m. ed a splendid opportunity' शोभनावसरस्त्वया क्षिप्तः, न गृहीतः, त्यक्तः. 4 (Feel the absence of) अभावं ज्ञा 9 U or वि-भू c., न्यून-*a.* मन् 4 A; उत्कंठ् 1 A, उत्तम् 4 P, उत्सुकायते (D.); 'I m. him very much' तस्य बलवदुत्कंठे, तस्यासन्निधानात् नितरां दुःखितोस्मि, तद्दर्शनाय उत्ताम्यामि, तद्विरहविधुरः &c. -ing, *a.* नष्ट, भ्रष्ट, स्थानभ्रष्ट-च्युत,-तिरोहित, अदृष्ट; 'one man is m.' एको नर ऊनो दृश्यते. 2 उत्सुक, उत्कंठित, उत्कलिकाकुल.

Mis-shaped,-shapen, *a.* वि-अप-कु-रूप, कदाकार, विकृताकार.

Missile, *s.* अस्त्रं, शस्त्रं, प्रहरणं, आयुधं, क्षेपणिः. 2 चक्रं. -*a.* क्षेपणीय.

Mission, *s.* दौत्यं, प्रेरणं, प्रेषणं; 'sending on a m.' प्रतिशासनं. 2 नियुक्त or प्रेरित गणः or जनसमूहः, नियोगिवर्गः. -ary, *s.* धर्मार्थं प्रेरितः, धर्मप्रसारार्थं नियुक्तः or प्रेषितः.

Missive, *s.* संदेशः, वाचिकं; *See Message.* 2 वार्ता-संदेश-हरः. -*a.* मुक्त, क्षिप्त, अस्त. 2 प्रेरित, प्रेषित, नियुक्त.

Mis-spell, *v. t.* अक्षराणि पर्यस् 4 U, अन्यथा लिख् 6 P. -ing, *s.* अक्षरविपर्यासः-व्यत्ययः.

Mis-spend, *v. t.* वि-क्षिप् 6 P, अपात्रे-अस्थाने-व्यय् 10 (व्यययति) or प्र-विनि-युज् 7 A, 10, असद्व्ययं कृ 8 U,

Mis-state, *v. t.* मिथ्या-अयथातथ-अन्यथा-कथ् 10 or नि-आ-विद् c. or ख्या 2 P. -ment, *s.* अन्यथा-निवेदनं-विज्ञप्ति *f.*, मिथ्याकथनं-वादः.

Mist, *s.* कुहा, कुज्झटि-टी-टिका *f.*, कुहेलिका, धूमि(मि)का, खबाष्पः, तुषारः. -y, *a.* कुहाच्छन्न, धूमिकावृत, तुषारवृत. 2 गहन, असुगम, अस्पष्ट; *See* **Faint.**

Mistake, *s.* भ्रमः, भ्रांति *f.*, व्या-,मोहः, मति-भ्रमः, मिथ्या-मति *f.*-बुद्धि *f.* 2 प्रमादः; दोषः, स्खलितं; 'm. in calling names' गोत्र-स्खलितं. -*v. t.* अन्यथा-मिथ्या-ग्रह् 9 U or मन् 4 A or बुध् 1 P, मिथ्या ज्ञा 9 U, भ्रांत्या-संदेहेन-मन्, संदिह् 2 U; gen. ex. by बुद्धिः, धीः in comp. or by *s.* (1); 'why do you strike me, m. ing me for Siva' पुरारातिभ्रांत्या मां किं प्रहरसि; फेनपटले: व्याघ्रधिया-बुद्ध्या तस्मात् पलायते;

संदेहिततूलराशिभिः (Ka. 23); 'which were m. on for heaps of cotton'. केतकशिखासंदिग्धमुग्धेंदुवः (Mal. 1) 'the lovely moon being m. on for a Ketaka point.' —*v. i.* भ्रम् 1, 4 P, मुह् 4 P, प्र-मद् 4 P, स्खल् 1 P, अपराध् 4, 5 P; 'you m. in this opinion' अयं तवाभिप्रायः भ्रम एव, भ्रांतः. **—able,** *a.* संदिग्ध; 'in no m. terms' असंदिग्धवचोभिः. **—en,** *a.* भ्रांत, प्रमादिन्, मूढ, संदिग्ध. 2 अयथार्थ, अशुद्ध, मृषा-मिथ्या-अन्यथा-in comp.; 'a m. opinion' मतिभ्रमः, मिथ्यामतिः.

Mister, *s.* आर्यः, श्री pr.

Mis-timed, *a.* *See* Late.

Mistle-toe, *s.* वृक्षाश्रया, तरुरोहिणी.

Mistress, *s.* गृहिणी, गेहिनी, गृहस्वामिनी, कुटुंबिनी; स्वामिनी, अधिष्ठात्री, शासित्री, अध्यक्षा, सेव्या, ईश्वरी, भट्टिनी (of servants). 2 अध्यापिका, आचार्या, उपदेशिका, अध्यापयित्री, उपाध्याया-यी. 3 उपस्त्री, उपपत्नी, भुजिष्या, अवरुद्धा. 4 प्रिया, प्रियतमा, वल्लभा, कांता दयिता, रमणी, कामिनी, प्रमदा. 5 कुशला, निपुणा.

Mistrust, *v. t.* न विश्वस् or प्रति-इ 2 P, शंक् 1 A. —*s.* अविश्वासः, अप्रत्ययः, आ-परि-शंका, अप्रतीति *f.* **—ful,** *a.* अविश्वासिन्, अप्रत्ययिन् *m.* शंका-अश्रद्धा-शील, साशंक, आशंकित, शंकिन्, संदेहिन्. **—fully,** *adv.* साशंकं, अविश्वासेन. **—fulness,** *s.* अप्रतीतिः, आशंका

Misunderstand, *v. t.* मिथ्या-अन्यथा समर्थ् 10 or क्लृप् c. or मन् 4 A or ग्रह् 9 U or सं-भू c. or उपलभ् 1 A. or अवगम् 1 P or बुध् 1 P; 'don't m. me' अलमन्यथा गृहीत्वा (M. 1), अलमस्मानन्यथा संभाव्य (S. 1). **—ing,** *s.* मिथ्या or अन्यथा-ग्रहणं or संभावनं, मिथ्यामति *f.*-बोधः, अयथार्थबोधः, भ्रमः. 2 वैमत्यं, मतिभेदः, विसंवादः, द्वैधं, वि-असं-मति *f.*

Misuse, *v. t.* मिथ्या-असम्यक् प्र-विनि-उप-युज् 7 A, 10, अनुचितं-अस्थाने व्यापृ c. or व्यव-हृ c., अप-व्यय् 10 (व्यययति). —*s.*, **—age,** *s.* कुप्रयोगः, असत्प्रयोगः, कु or असम्यग्-व्यापारः or व्यवहारः, अन्यथोपयोगः, असद्विनियोगः, अपव्ययः.

Mite, *s.* अणुः, लवः, कणः, लेशः, कणिका, अल्पमात्रा. 2 धनलवः-लेशः, अत्यल्पं धनं, काकिणी, कपर्दिका.

Mithridate, *s.* विषनाशनं, विषघ्नं.

Mitigate, *v. t.* शम् c. (शमयति), प्र-उप-°, लघू-कृ 8 U, लघयति (D.), न्यूनीकृ, अल्पीकृ; नि-वृत् 1 P or c.; *See* Moderate; 'to be m. ed' शम् 4 P, लघूभू 1 P. **—ion,** *s.* शमः, शमनं, शांति *f.*, प्र-उप-°, लघूकरणं, न्यूनता. **—ive, —Mitigant,** *a.* शमक, शांतिद, शांतिकर (री *f.*).

Mix, *v. t.* मिश्र् 10, सं-आ-वि-°, संयुज् 7 U, 10, सं-यु 2 P; संसृज् 6 P, संपृच् 2 A, 7 P, प्रक्षिप् 6 P, एकीकृ 8 U, एकत्र कृ, संमिल् c. 2 संकृ 6 P, संकुलीकृ. —*v. i.* मिश्रीभू 1 P, संमिल् 6 P, संकृ-संयुज्-संसृज्-pass.; संयोगं-संसर्गं-इ-या 2 P or गम् 1 P, संगम् 1 A, संगमनुव्रज् 1 P, सं-सृ. **—ed,** *a.* मिश्रित, संयुक्त, संसृष्ट, संपृक्त, संयुत, व्या-सं-मिश्र, समवेत, संबद्ध. **—ing, —ture,** *s.* मिश्रणं, संयोगः, संसर्गः, संपर्कः. 2 मिश्रता, संयुक्तता, संसृष्टता,: संकीर्णता. 3 संकरः, संनिपातः, नानाद्रव्य-संमिश्रद्रव्य-समुदायः, मिश्रद्रव्यं, मिश्रं.

Mixen, *s.* विड्-पुरीष-राशिः.

Mizzen-mast, *s.* पाश्चिमकूपकः.

Mizzle, *s.* तुषारवर्षः, शीकरासारः

Mnemonic, *a.* स्मृतिसहायभूत, स्मरणोपकारिन्. —*s.* (M.s) स्मरणविद्या.

Moan, *v. i.* दीर्घं रु 2 P or निश्वस् 2 P, सशब्दं आक्रंद् 1 P or आक्रुश् 1 P or विलप् 1 P, आर्तरवं मुच् 6 P; *See* Groan, Lament. —*s.* आर्तनादः-रवः, दीर्घनिश्वासः-रवः, क्रंदितं, विलपनं, परिदेवनं. **—ful,** *a.* विलापकारिन्, परिदेविन्. **—fully,** *adv.* सनिश्वासं, सविलापं.

Moat, *s.* परिखा, प्रतिकूपः, खातकं, उपकुल्या. **—ed,** *a.* परिखान्वित.

Mob, *s.* प्राकृतजनाः, जनसमूहः, अप्रबुद्धजनगणः, लोक or जन-संघः or संकुलं, जनता, बहुजन-मेलकः, पृथग्जनाः, नीच-अधम-जनाः.

Mobile, *a.* अस्थिर, चंचल, चपल, चरिष्णु, गतियोग्य, जंगम. **—Mobility,** *s.* Mob, q. v. 2 अस्थिरता, चांचल्यं, गतिक्षमता.

Mock, *v. t.* विडंब् 10, अव-उप-हस् 1 P: सोपहासं अनुकृ 8 U. 2 गर्ह् 1, 10 A, अव-ज्ञा 9 U, अवक्षिप् 6 P, अवमन् 4 A, अवहासास्पदं मन् ; *See* Contemn. 3 वंच् 10, मुह् c., विप्र-लभ् 1 A, मुह् c.; *See* Cheat. —*a.* कृत्रिम, कृतक, कपट-व्याज in comp.; 'm. fight' कृत्रिमयुद्धं, व्याजयुद्धं. **—er,** *s.* उप-अव-हासकः, अवक्षेपकः, विडंबनकृत् *m.* **—ery, —ing,** *s.* उप-अव-हासः, अवज्ञा, विडंबनं, अवक्षेपः, गर्हणं, तिरस्कारः, अवमानः. 2 उपहासपात्रं-आस्पदं-भूमि *f.*-पदं, अवहासस्थानं-विषयः, तिरस्कारपदं-विषयः. 3 वंचनं-ना, व्याजः, कपटं, छलं, विडंबना; विडंबनहेतुः; अनर्थकारंभः, वृथोद्यमः, वृथाप्रयत्नः, निष्फलचेष्टा. **—ingly,** *adv.* सोपहासं, सावहासं, सतिरस्कारं.

Mode, *s.* रीति *f.*, प्रकारः, मार्गः, पद्धति *f.*, विधिः, वृत्ति *f.*, कल्पः, क्रमः, विधा, in comp.; *See* Manner. 2 रूपं, आकारः, आकृति *f.* 3 आचारः, व्यवहारः, प्रचारः, रीतिः, सं-

प्रदायः. 4 सभ्य-शिष्ट-मार्गः, व्यवहारः, शिष्टाचारः. 5 चातुर्यं, अर्थः. 6 रागः, रागिणी. -al, *a.* रूपविषयक. -ish, *a.* शिष्टाचारानुरूप, सभ्यरीत्यनुसारिन्; *See* **Fashionable.**

Model, *s.* आदर्शः, प्रतिरूपं, प्रतिमा-मानं, उपमा-मानं; 'a m. prince' आदर्शः सर्वनृपाणां. 2 संस्कारः, संस्थानं, आकारः, आकृति *f.* -*v. t.* संस्कृ 8 U, रूप् 10, सरूप-*a.* कृ; तक्ष् 1, 5 P; क्लृप् c.

Moderate, *a.* परि-,मित, समर्याद, नि-सं-यत, अल्प, सावधिक. 2 नियतवृत्ति, मर्यादानतिक्रामिन्; 'm. in expenses' मितव्ययिन्, अल्पव्यय; 'm. in desires' अलुब्ध, अल्पसंतुष्ट, अल्पाकांक्षिन्; 'm. in eating' मिताहार, मिताशन, स्वल्पाहार; 'm. in speech' मितवाच्-भाषिन्. 2 (Middling) मध्यम, सामान्य, अनति-नाति- in comp.; 'trees of a m. height' नातितुंगा वृक्षाः. -*v. t.* शम् c. (शमयति), प्र-उप-°, लघयति (D.), लघूकृ 8 U, न्यूनी-अल्पी-कृ, नियम् 1 P or c.; छायाद्रुमैर्नियमितार्कमयूखतापः (S. 4) 'the heat of the sun's rays being m. ed by shady trees.' 2 नि-सं-यम्, निग्रह् 9 P, संहृ 1 P, आ-वृ 5 U. -*v. i.* शम् 4 P, निवृत् 1 A, विगम् 1 P, अल्पी-लघू-भू 1 P. -ion, *s.* लघूकरणं, प्रशमनं. 2 संयमः, निग्रहः, दमः, अनतिक्रमः, मर्यादानतिक्रमः, परि-,मितता-त्वं. 3 समता, समवृत्ति *f.*, समभावः, क्षमा, क्षांति *f*; 'm. in desires' अलोभः, अल्पसंतोषः, अल्पाकांक्षा. -ly, *adv.* परिमितं, समर्यादं, नियतं, स्वल्पं; ईषत्, आ, मंद, नाति, अनति in comp.; 'm. heated' ईषत्तप्त, मंदोष्ण, कोष्ण, &c.; 'm. sharp' अनतितीव्र. -or, *s.* नियंतृ *m.*, मध्यस्थः.

Modern, *a.* आधुनिक (की *f.*), अधुनातन-इदानींतन-(नी *f.*), अर्वाचीन, अप्राचीन, अपुराण, नूतन, नव, नवीन, नूतनकालीन. -ness, *s.* नूतनता, अप्राचीनत्वं. -Moderns, *s.* अधुनातनाः, आधुनिकाः (pl.).

Modest, *a.* विनीत, लज्जावत्, लज्जाशील, सलज्ज, सव्रीड, शालीन, विनयवत्, सत्रप, ह्रीमत्, लज्जा-त्रपा-व्रीडा-अन्वित or युक्त, सविनय, अप्रगल्भ, अधृष्ट. 2 (not proud) अगर्व, नम्र, निरभिमान, निरहंकार, सविनय, अनुद्धत, विनत, नम्रशील. 3 अव्यभिचारिन्, साधुशील, सद्वृत्त. 4 परि-, मित, अल्पपरिमाण. -ly, *adv.* सविनयं, सव्रीडं, सलज्जं, सत्रपं, अगर्वं, अनुद्धतं, निरभिमानं. -y, *s.* विनयः, शालीनता, लज्जा, ह्रीः, व्रीडा, त्रपा, लज्जाशीलता, अप्रागल्भ्यं, अधार्ष्ट्यं, मर्यादा, विनीतता. 2 नम्रता, अगर्वः, अनहंकारः, निरभिमानता, अनौद्धत्यं, नम्रशीलता, विनयः. 3 अव्यभिचारः, सद्वृत्ति *f.* 4 परिमितता.

Modicum, *s.* अल्पांशः, अल्पभागः, लवः, लेशः, किञ्चित्, किञ्चन.

Modify, *v. t.* रूपं परिवृत् c. or परिणम् c. (-णमयति), विकृ 8 U or c.; रूपांतर-रूपभेदं-कृ or वि-धा 3 U. 2 नियम् 1 P, संहृ 1 P, शम् c.; *See* **Limit, Moderate.** -ied, *a.* विकृत, विकृतरूप, परिणतरूप, नियमित. -ication, *s.* रूपांतरविधानं, रूपपरिवर्तनं. 2 विकारः, विकृति *f.*, परिणामः, परिवृत्ति *f.*, रूपांतरं, रूपभेदः, विशेषः. 3 भेदः, विभेदः, विशेषः.

Modulate, *v. t.* स्वरलयं उत्पद् c., स्वरानुपूर्व्यं कृ 8 U. 2 स्वरभेदं कृ. -ion, *s.* संक्रमः, परिवर्तनं; 'm. of voice' स्वरसंक्रमः (Mr. 3). 2 स्वरभेदः-लयः-अनुक्रमः; स्वरानुपूर्व्यं. 3 **Melody,** q. v.

Moiety, *s.* अर्धः-र्धं, अर्धभागः-अंशः.

Moil, *v. t.* **Dirty,** q. v.-*v. i.* व्रातं कृ 8 U, देहायासेन श्रम् 4 P.

Moist, *a.* आर्द्र, क्लिन्न, सरस, उन्न, उत्त, सद्रव, सिक्त, जलार्द्र, तिमित; 'to be m.' क्लिद् 4 P, स्तिम् 4 P. -en, *v. t.* क्लिद् c., आर्द्रीकृ 8 U, सिच् 6 P, उंद् 7 P, उक्ष् 1 P. -ening, *s.* क्लेदनं, उक्षणं, उंदनं. -ness, *s.* आर्द्रता, क्लिन्नता, सरसता. -ure, *s.* क्लेदः, तेमः, स्तेमः, रसः, सजलता, आर्द्रता, क्लिन्नता; oft. ex. by जलं.

Molar, *s.* दंष्ट्रा, चर्वणदंतः.

Molasses, *s.* गुडः, इक्षुसारः, मत्स्यंडी-डिका, फाणितं.

Mold, *s.* *See* **Mould.**

Mole, *s.* तिलकः, जडुलः, कालकः, पिप्लुः. 2 वप्रः-प्रं, सेतुः, चयः, पिंडलः, आलि *f.* 3 छुछुंदरी, गंधमुखी, दीर्घतुंडी, दिवांधिका; 'm.-eyed' सूक्ष्मनयन; 'm.-bill' वल्मीकः-कं, वामलूरः, कृमिशैलः, कूलकः, स्यमीकः; 'he makes mountains of m.-hills' तिले तालं पश्यति.

Molecule, *s.* अणुः, परमाणुः, कणः.

Moles, *s.* व्यंगं.

Molest, *v. t.* बाध् 1 A, अर्द् 1 P or c., पीड् 10, उपद्रु 1 P, आ-यस् c., उपरुध् 7 U; *See* **Harass.** -ation, *s.* बाधा, पीडा, उपद्रवः, आयासः, क्लेशः. -er, *s.* उत्पीडकः, बाधकः, आयासकः.

Mollient, *a.* मृदुकारिन्, शमक, शांतिद.

Mollify, *v. t.* शम् c. (शमयति), प्र-उप-°, सांत्व् 10, मृदूकृ 8 U, लघूकृ.

Molten, *a.* विलीन; *See* **Liquid.**

Moment, *s.* क्षणः, मुहूर्तः, निमि(मे)षः, पलं; 'pleasant for the m.' आपातरमणीय; 'but for a m.' क्षणमात्रं; 'this very m.' अत्र अस्मिन्नेव क्षणे; 'the m. he is here' तस्मिन्नागतमात्रे or आगत एव; 'for the present m.' आपाततः; 'in a m.' क्षणात्.

क्षणेन, निमेषमात्रात्, एकपदे; 'auspicious m.' शुभमुहूर्तः, लग्नं; *See* **Instant** also. 2 गुरुत्वं, महत्त्वं, प्रभावः, गौरवं, महिमन् *m.*; *See* **Importance**; 'of little m.' अगुरुक, अकिंचित्कर (री *f.*), लघ्वर्थ, क्षुद्र. **-ary,** *a.* क्षणिक, क्षणस्थायिन्, अचिर, अस्थायिन्; क्षण, निमेष in comp.; 'm. flash' अचिरप्रभा; क्षणद्युति *f.*; 'm. obstacle' क्षणविघ्नः. **-ous,** *a.* गुरु, गुरुप्रभाव, अलघु; *See* **Important.**

Momentum, *s.* जवः, वेगः, आ-सं-वेगः.

Monachism, *s.* मठवासः, संसारत्यागः, आरण्यकवृत्ति *f.*

Monad, *s.* अभेद्य-अच्छेद्य-वस्तु *n.*

Monarch, *s.* राजन् *m.*, ईशः, ईश्वरः, पतिः, अधिपः, अधीशः, स्वामिन् *m.*; *See* **Lord;** 'm. of the herd' यूथपतिः-पालः. 2 अधीश्वरः, नृपः, नृपालः, भूपतिः; *See* **King. -al, -ic, -ical,** *a.* राजकीय, राजयोग्य, राज in comp. 2 एकप्रभुक, एकराजायत्त, सम्राडधीन. **-y,** *s.* एकराजशासनं, एकराजतंत्रं, एकराजाधिपत्यं. 2 राज्यं, विषयः, राष्ट्रं.

Monastery, *s.* विहारः, मठः, आश्रमः, मुनिवासः, वानप्रस्थाश्रमः. **-*Monastic,* -ical,** *a.* विहारिक, आश्रमिक (की *f.*), वैखानस (सी *f.*); 'm. vow' वैखानसं व्रतं.

Monday, *s.* सोमवारः-वासरः, इंदुवासरः.

Monetary, *a.* द्रव्यसंबंधिन्, मौद्रिक (की *f.*).

Money, *s.* धनं, अर्थः, वित्तं, द्रव्यं, विभवः, वसु *n.*; *See* **Wealth.** 2 मुद्रा, निष्कः-ष्कं, नाणकं, टंककः; 'm.-bag' कोशः-षः, मुद्राकोषः; 'm.-changer' मुद्रापरिवर्तकः; 'm.-lender' कुसीदिकः, वार्धुषिकः, वृद्ध्याजीवः, वार्धुषिः; उत्तमर्णः. **-ed,** *a.* धनिन्, धनिक, धनसंपन्न, धनाढ्य. **-less,** *a.* धनहीन, निर्धन, निःस्व, गतविभव, परिक्षीण; *See* **Poor.**

Monger, *s.* व्यापारिन् *m.*, व्यवहारिन् *m*, क्रयविक्रयिकः, वणिज् *m.*

Mongoose, *s.* *See* '**Mungoose.**'

Mongrel, *a.* संकीर्ण, संकरजातीय, संकरज.

Monism, *s.* अद्वैतवादः.

Monitor, *s.* शासकः, बोधकः, उपदेशकः, शिक्षकः. 2 उपगुरुः. **-y,-*Monitive,*** *a.* प्रबोधक, उपदेशक, शिक्षक, उपदेशरूप.

Monk, *s.* यतिः, संन्यासिन् *m.*, मुनिः, योगिन् *m.*, मठवासिन् *m.*, तपस्विन् *m.*, वानप्रस्थः. **-ish,** *a.* मुनिसंबंधिन्, यतिसदृश (शी *f.*).

Monkey, *s.* वानरः, कपिः, मर्कटः, प्लवं(व)गः, शाखामृगः, वलीमुखः, कीशः, वनौकस् *m.*; 'm.-like' कापेय (यी *f.*).

Monochord, *s.* एकतंत्रीवाद्यं.

Monochromatic, *a.* एकवर्ण-रंग.

Monochronic, *a.* समकालीन, वर्तमान.

Monocrat, *s.* अधीश्वरः, अनायत्तशासनः.

Monocular, *a.* एकाक्ष (क्षी *f.*), एकनयन, काण. 2 एकनेत्रोपयुक्त.

Monogamy, *s.* सकृद्विवाहः, एकपत्नीव्रतं, एकस्त्रीविवाहः. **-ist,** *s.* एकपत्नीकः, एकस्त्रीकः.

Monologue, *s.* आत्म-स्व-गतभाषणं.

Monomachy, *s.* द्वंद्वं, नियुद्धं, द्वंद्वयुद्धं.

Monomania, *s.* एकविषयासक्ति *f.*, एकविषयोन्मादः. **-*Moromaniac,*** *a.* एकविषयोन्मत्त.

Monopetalous, *a.* एकदलविशिष्ट.

Monoplane, *s.* एकतलं विमानं.

Monopoly, *s.* एकाधिकारः, अनन्यसाधारणः अधिकारः, एकव्यापारः-व्यवसायः. **-ist, -izer,** *s.* पूर्वक्रयिन् *m.*, सर्वग्राहकः. **-ize,** *v. t.* (सर्वं) पूर्वं क्री 9 U; (सर्वं) स्वायत्तीकृ 8 U, आत्मसात्कृ, अनन्यसाधारणं आत्माधीनीकृ, असामान्येन भुज् 7 A or जुष् 6 A.

Monosyllable, *s.* एकाक्षरं. **-*Monosyllabic,*** *a.* एकाक्षर, एकाच्; 'm. roots' एकाचो धातवः.

Monotheist, *s.* अद्वैतवादिन् *m.* **-*Monotheism,*** *s.* अद्वैतं, अद्वैतवादः.

Monotony, *s.* एकस्वरः-स्वनः, स्वराभेदः, एकस्वरसंतानः, स्वरसमता, स्वरभेदाभावः. 2 एक-सम-समान-रूपता, विशेषाभावः, एकव्यापारसंतति *f.* **-ous,** *a.* एकस्वर-तान-स्वन, सम-अभिन्न-स्वर. 2 एक-सम-समान-रूप, एकप्रकार, निर्विकार, निर्विशेषं. **-ously,** *adv.* एकस्वरेण, समरूपेण, निर्विकारं. **-ousness,** *s.* *See* (*s.*) above.

Monsoon, *s.* वर्षाः (*f.* pl.), वर्षाकालः-समयः, प्रावृष् *f.*, मेघकालः, पर्जन्यकालः.

Monster, *s.* राक्षसः, क्रूर-घोर-कर्मन् *m.* 2 राक्षस-विकट-भीम-शरीरः-विग्रहः, बृहत्परिमाणः, विकटाकारः; *See* **Giant.** 3 अद्भुतं, अपूर्ववस्तु *n.*, अपरूपं, विरूपविषयः; 'm.'s in the form of men' मानवराक्षसाः; 'm. s of the deep' मकरादयः, यादांसि. **-*Monstrous,*** *a.* अद्भुत, विलक्षण, अपूर्व, सृष्टिक्रमबाह्य. 2 अप-वि-रूप, विकृताकृति. 3 राक्षसरूप, घोरदर्शन, विकट-भीम-कराल-रूप-शरीर, अतिमहत्, घोररूप, घोराकृति, विकटाकार, भीम-उग्र-रौद्र-दर्शन. 4 (Of acts) दारुण, घोर, अतिबीभत्स, विकट. **-ly,** *adv.* अद्भुतं, विकटं, दारुणं, उत्कटं, भृशं, अतीव, अत्यंतं, अतिशयेन; *See* **Exceedingly. -ness, -Monstrosity,** *s.* अद्भुतता, घोरता, दारुणता, &c.

Month, *s.* मासः; 'half a m.' पक्षः; 'bright half of the m.' शुक्ल-शुद्ध-सित-पक्षः, पूर्वपक्षः; 'dark half' कृष्ण-उत्तर-तमिस्र-पक्षः, बहुलः, तमिस्रः; 'a m. old' मासजात. **-ly,**

a. मासिक (की *f.*), मास्य, प्रातिमासिक; 'half-m.' पाक्षिक (की *f.*); 'm. allowance' मासिकं. -*adv.* मासे मासे, प्रतिमासं.

Monument, *s.* कीर्ति-यशः-स्तंभः, स्मारकचिह्नं. 2 चैत्यं, समाधिः; स्तूपः. **-al,** *a.* स्मरणार्थक, स्मरणकारिन्. 2 चैत्यसंबंधिन्.

Mood, *s.* भावः, वृत्ति *f.*, प्रकृति *f.*, अवस्था, दशा, चित्तवृत्तिः, मनोभावः; 'an angry m.' कोपवृत्तिः. 2 वाच्यं, अर्थः. **-y,** *a.* रुष्ट, क्रुद्ध, वक्रभाव, उदासीन, उदासीनवृत्ति, चित्तोद्विग्न, विषण्ण,उद्विग्न,दीनमनस्क. 2 स्वच्छंद, स्वैरिन्; *See* **Humorsome,**

Moon, *s.* चंद्रः, शशिन् *m.*, इंदुः, सोमः,विधुः, चंद्रमस् *m.*, निशाकरः, रजनि(नी)करः, ग्लौः, शशधरः, शशांकः, मृगांकः, हिमांशुः, सुधांशुः, शुभ्रांशुः, ओषधीशः, ओषधीपतिः, कुमुदबांधवः, द्विजराजः, कलानिधिः-नाथः, अब्जः, जैवातृकः, नक्षत्रेशः, क्षपाकरः; and comp. of पतिः, ईशः, नाथः, पः, with words for 'Night,' 'Star,' or of 'Ray' with 'Cold' or 'Nectar,' q. v.; क्षपानाथः, शीतकरः, तारानाथः, उडुपः; 'orb of the m.' बिंबः-बं, मंडलं; 'digit of the m.' कला, रे(ले)खा; 'full m.' पूर्णिमा, पौर्णमासी; 'new m.' अमा, अमाव(वा)सी, अमाव(वा)स्या, दर्शः, सूर्येन्दुसंगमः; 'm.-beam' चंद्रपादः, शशिकरः-रश्मिः, सुधांशुः, (Ray, q. v.); 'm.-light' कौमुदी, चंद्रिका, ज्योत्स्ना, चंद्र-शशि-प्रभा, चंद्रातपः; (*a.*) ज्योत्स्नावत्, ज्योत्स्नायुक्त, चंद्रप्रकाशित; 'enjoys m.-light evenings' ज्योत्स्नावतो निर्विशति प्रदोषान् (R. VI. 34); 'm. plant' सोमलता, सोमवल्ली-वल्लरी, ब्राह्मी, मत्स्याक्षी; 'm.-shine' चंद्रप्रभा-द्युति-कांति *f.*; 'm.-stone' चंद्रकांतः, सोमकांतः, चंद्रमणिः; 'm.-struck' विक्षिप्त-भ्रांत-बुद्धि, विप्लुत-हत-मति. **-less,** *a.* हत-नष्ट-चंद्र, चंद्रहीन. **-y,** *a.* चंद्रतुल्य.

Moor, *v. t.* रज्ज्वा बंध् 9 P or गतिं रुध् 7 U. -*s.* 'm.-land' कच्छः, कच्छ-अनूप-भूः. **-ish,-y,** *a.* आनूप (पी *f.*), कच्छ, in comp; अनूप.

Moot, *v. t.* विचर् c., परीक्ष् 1 A, वि-तर्क् 10; *See* **Discuss.** 2 उपक्षिप् 6 P, उपन्यस् 4 U; 'm.-case', 'm.-point' विचारविषयः-पदं-आस्पदं-स्थानं, संदिग्ध-विवादविषयः.

Mop, *s.* संमार्जनी, शोधनी. 2 बालिका, तरुणी. -*v. t.* मृज् 2 P or c., शुध् c.

Mope, *v. i.* वि-अव-सद् 1 P, म्लै 1 P, दुर्मनायते (D.), विषण्णीभू 1 P. **-ing,-ish,** *a.* विषण्ण, अवसन्न, उद्विग्न, दुर्मनायमान, विषण्णवदन; *See* **Deject,-ed.**

Moppet, *s.* वस्त्रपांचालिका, पटपुत्रिका.

Moral, *a.* साधु, साधुवृत्त, सदाचार, धार्मिकसात्त्विक- (की *f.*); नीतिमत्, नयानुसारिन्, धर्म्य, पुण्य, न्यायानुसारिन्, धर्मानुरूप, न्याय्य; gen. ex. by सत्, नीति, नय in comp., 'm. instruction' नयोपदेशः, नीति *f.*; 'm. lessons' नीतिपाठाः; sometimes by चित्त, मानस in comp.; 'm. freedom' चित्तस्वातंत्र्यं; 'm. advancement' मानसोन्नति *f.*; 'm. science' नीतिशास्त्रं; 'm. duties' शाश्वतधर्मः, सदाचारः. 2 नियमाधीन. 3 अनुमान-युक्ति-सिद्ध. -*s.* तात्पर्यं, अभिप्रायः, भावार्थः, तात्पर्यार्थः. **-ist,** *s.* नीतिशास्त्रज्ञः, नीतिज्ञः, नयज्ञः; नीत्युपदेशकः, नीतिविद्, सदसद्विवेचकः. **-ity,** *s.* नीतिः, नयः; नीति or नय विद्या or शास्त्रं, सद्व्यवहारशास्त्रं, सदसद्विवेकः-विचारः. 2 धर्मानुष्ठानं, साधुवृत्तं, पुण्यशीलता, सदाचारः, सु-सत्-चरितं, धर्मवृत्ति *f.* 3 न्याय्यता, धर्म्यता, धर्मन्याय-अनुसारः. **-ize,** *v. t.* धर्मोपदेशास्पदीकृ 8 U. -*v. i.* नीत्युपदेशं दा 3 U or लिख् 6 P. **-ly,** *adv.* नीतिशास्त्रानुरूपं, नयतः, नीत्या, धर्मेण, धर्मतः, न्यायेन, न्यायतः. 2 युक्त्या, मनसा, अनुमानेन. -*Morals,* *s.* नीतिः, नीतिशास्त्रं-विद्या. 2 आचारः, आचरणं, वृत्तिः, चरितं, वृत्तं, व्यवहारः, रीति *f.*; 'good m.' सुशीलं, सदाचारः, साधुवृत्तं, विनयः, साधु-सु-सत्-चरितं.

Morass, *s.* कच्छः, अनूपः, अनूपभूः.

Morbid, *a.* दूषित, उद्भ्रांत, विकृत, अस्वस्थ, असुस्थ, रोगाक्रांत, व्याधित.

Morbific, *a.* रोग-व्याधि-कर (री *f.*), रोगद.

Morbose, *a.* रोगजनित, व्याध्युद्भव.

Mordacious, *a.* दंशक. -*Mordacity,* *s.* दंशकता, दंशनं.

Mordant, *a.* उग्र, अरुंतुद, तीक्ष्ण, निंदागर्भ.

More, *a.* अधिक, भूयस्, अधिकतर; उत्तर, अतिरिक्त, पर, अन्य; oft. ex. by तर or ईयस् affixed; 'm. in strengh' बलीयस्, प्रबलतर; 'something m.' किंचिदन्यदपि; 'what m.' किमपरं, किमन्यत्; 'after m. than three years' समधिकाद्वर्षत्रयात्; 'm. or less' न्यूनाधिक; 'for m. than 1,000 years' परः सहस्राः शरदः. -*s.* अधिकं, आधिक्यं, अतिरेकः, अतिशयः; oft. ex. by अपरं, अन्यत्; *See* above; 'm. or less' न्यूनातिरेकः, न्यूनाधिक्यं; 'no m. of solicitation' अलं-कृतं-अतिप्रार्थनया; 'what m.' किमन्यत्; किंबहुना. -*adv.* (With adj.) ex. by अधिक in comp.; अधिकमनोज्ञ; or gen. by compar. degree in तर or ईयस्. 2 (With verbs) by अधिकं, अधिकतरं, अतःपरं, पुनः, भूयः; 'm. and m.' उत्तरोत्तरं, अधिकाधिकं; 'no m.' न अतः-इतः-परं or ऊर्ध्वं; अलं, कृतं; *See* **Enough;**

'how much m.' किं पुनः, किमुत. -**Moreover**, *adv.* अन्यच्च, अपरं-अपि-च, किंच, परं, अपि तु, अपि.

Morganatic, *a.* अनुलोम (विवाहः).

Moribund, *a.* मृतकल्प-प्राय, मुमूर्षु.

Moringa, *s.* सो(सौ-शो-शौ)भाजनं, शिग्रुः, तीक्ष्णगंधकः, अ(आ)क्षीवः, मोचकः.

Morion, *s.* शिरस्कं, शिरस्त्राणं, शीर्षकं.

Morn, Morning, *s.* वि-प्र-भातं, प्रत्यु(त्यू)षः-षस् *n.*, उषा, उषस् *f.*, व्युष्टं, कल्यं, अरुणोदयः, प्रातर् *ind.*, अहर्मुखं, प्रभात or उषः-कालः or समयः. 2 (Opposed to afternoon) पूर्वाह्णः, प्राह्णः; 'it is broad m.' सुप्रभाता रजनी; 'in the m. प्रातः, प्रातःकाले, प्रभाते, प्रत्यूषे, व्युष्टं, प्रगे; 'I bid you good m.' 'good m. to you' शुभस्ते प्रातःकालः (भूयात्); 'early in the m.' सुप्रातः, महति प्रत्यूषे, अतिप्रगे, प्रातरेव. -*a.* प्रातः-उषः-कालीन, प्राभातिक, औषिक (की *f.*), उषस्य, प्रभातीय; gen. ex. by प्रातर् or (*s.*) in comp.; 'm. breeze' विभातवायुः; 'm. devotion' प्रातरुपासना; 'm. star' प्रभाततारा; 'm. twilight' प्रातःसंध्या.

Morose, *a.* कर्कश-कटु-वक्र-स्वभाव-प्रकृति, वाम or वक्र-भाव or शील, रूक्षस्वभाव, सदावक्र, प्रतीप, उदासीन, दुःशील, उदासवृत्ति. -**ly**, *adv.* वक्रभावेन, कर्कशभावात्, स्वभावरौक्ष्येण. -**ness**, *s.* कर्कशता, रूक्षता, वामता, वक्रता, स्वभावकटुता, वक्रशीलता, प्रतीपता, औदासीन्यं.

Morrow, *s.* पर or उत्तर-दिवसः or दिनं; 'on the m.' श्वः, परेद्युः, परेद्यवि, कल्ये, उत्तरेद्युः.

Morsel, *s.* कवलः, ग्रासः, पिंडः. 2 खंडः, लवः, शकलः-लं, क्षुद्रभागः.

Morsure, *s.* दंशनं.

Mortal, *s.* मर्त्यः, मनुष्यः, मर्त्यधर्मन्, जन्मिन्, प्राणिन् शरीरिन्, देहिन्, all *m.*, देह-तनु-भृत्, मृत्युवशः; *See* **Man**. -*a.* मर्त्य, मर्त्यधर्मन्, मरणशील, मृत्युवश, नश्वर, नाश-मरण-अधीन, मरण-काल-आयत्त, अनित्य, विनाशिन्; 'men are m.' मनुष्या मर्त्यधर्माणः. 2 प्राणहर (री *f.*), जीवितापह, प्राणांतक, मारात्मक, मर्मभेदिन्, अंतकर (री *f.*), प्राणापह, प्राणघ्न (घ्नी *f.*), मरणावह. 3 मर्त्य, मानुष (षी *f.*), मनुष्यधर्मन्; *See* **Human**. 4 अत्यंतदारुण, अतिक्लेशक; 'm. enemy' आमरणांतवैरिन् *m.*, दृढ-बद्ध-वैरः. -**ity**, *s.* मर्त्यता, मरणशीलता, मृत्युवशता, मृत्यु-मरण-धर्मः, कालधर्मः, नश्वरता, अनित्यता. 2 मृत्यु, मरणं, नाशः, जीवितनाशः 3 मानुष्यं, मानुषता -**ly**, *adv.* सप्राणनाशं, ex. by *a.*; 'he was m. wounded' तस्य प्राणहरा व्रणाः संजाताः, भिन्नमर्माऽभूत्.

Mortar, *s.* उलू(दू)खलं; 'm. and pestle' उलूखलमुसले. 2 लेपः, सुधा, चूर्णलेपः.

Mortgage, *s.* आधिः, क्षेत्र-स्थावर-आधिः, भूमिनिक्षेपः, बंधकः, न्यासः. -*v. t.* आ-धा 3 U, आधीकृ 8 U, बंधे दा 3 U, (स्थावरधनं) न्यासीकृ. -**ee**, *s.* आधिग्राहकः, आधि-बंधक-न्यास-ग्राहिन् *m.* -**or**, *s.* आधातृ *m.*, निक्षेप्तृ *m.*

Mortiferous, *a.* मरणावह; *See* **Mortal**.

Mortify, *v. t.* अभिभू 1 P, अवमन् c., अपकृष् 1 P, मानं-गर्वं-भंज् 7 P, खंड् 10; *See* **Humble**. 2 निग्रह् 9 P, सं-नि-यम् 1 P, दम् c. (दमयति), वशीकृ 8 U, आवृ 5 U, जि 1 P. 3 क्लिश् 9 P, सं-परि-तप् c., आयस् c.; *See* **Afflict**. 4 चैतन्यं नश् c. or हृ c. -*v. i.* नश् 4 P. चैतन्यं नश् c. 2 तप् 4 A, तपस्तप् or चर् 1 P, तपस्यति (D.). -**ed**, *a.* अभिभूत, खंडित, आत्त-हृत-भग्न-गर्व, खंडितमान, भग्न-दर्प-मान. 2 दांत, वशीकृत, जित; 'whose passions are m.' जितेंद्रियः, वशिन् *m.*, दांतः, वीतकामः, वीतरागः, निःस्पृहः. 3 क्लिष्ट; सव्यथ, पीडित. 4 नष्ट-चैतन्य-मांस, कोथीभूत. -**ication**, *s.* अभिभवः, अवमानः, अपकर्षः, मान or दर्प-भंगः or खंडनं, मानहानि *f.* 2 दमः, निग्रहः, संयमः-मनं, जयः, इंद्रियदमः-जयः; कामविरक्ति *f.*, विषयविमुखता, वैराग्यं. 3 तपश्चर्या, तपस्या, कृच्छ्रं. 4 दुःखं, क्लेशः, आयासः, व्यथा. 5 आशाभंगः-नाशः, मनोभंगः. 6 मांसपाकः, मांसकोथः, चैतन्यनाशः. -**ing**, *a.* मानध्वंसिन्, दर्पहारिन्, व्यथावह; क्लेशकर, (री *f.*), संतापक.

Mortise, *s.* काष्ठसंधिः, दारुसीवनं, दारु-काष्ठ-च्छिद्रं. -*v. t.* काष्ठद्वयं सं-धा 3 U.

Mortmain, *s.* अन्यादेयभोगः.

Mortuary, *s.* श्मशानं, परेतभूमि *f.*-वासः.

Mosaic, *a.* नानावर्ण (विध) प्रस्तरखचित, 'm. work' *s.* चित्रकर्मन् *n.*

Mosque, *s.* यावनधर्ममंदिरं, यवनीयं देवतायतनं.

Mosquito, *s.* मशः. मशकः.

Moss, *s.* शैव(वा)लः, शेव(वा)लः-लं, जलनीली-लिका, 'm.-grown' रूढशैवल, शैवलावृत. -**y**, *a.* शैवलवत्, शैवलिन्.

Most, *a.* भूयिष्ठ, अधिकतम, बहु (pl.); प्रायेण सर्व; 'm. people think so' प्रायेण सर्वे (बहवः) एवं मन्यंते. 2 निरतिशय, अत्यधिक, परम, उत्तम; 'for the m. part' भूयिष्ठं, प्रायः, प्रायेण, बहुशः. -*s.* भूयिष्ठ परम-भागः, बहुतम-अधिक-भागः, प्रायः, सर्वभागः; बहुतरभागः; 'm. of the spot is green' प्रायशः सा स्थली हरिद्वर्णा; 'to the m. of one's power' यावच्छक्तितः, यावच्छक्यं -*adv.* भूयिष्ठं, परमं, अत्यंतं, अतीव, सु-अति-अत्यंत-in comp.; gen. ex. by super-

lative of adj. 2 अधिकं, सर्वाधिकं (with verbs). -ly, *adv.* प्रायः, प्रायेण, प्रायशः, भूयसा, बहुशः, बहुधा, सामान्यतः, साधारणतः; gen. ex. by भूयिष्ठ affixed to adj.; 'an assembly m. composed of learned men' अभिरूपभूयिष्ठा परिषद् (S. 1).

Mote, *s.* बिंदुः, अणुः, लवः, अणुरेणुः, परमाणुः, कणिकाः 'the m. thou seest in the eyes of others, but not the beam in thine own' खलः सर्षपमात्राणि परिच्छिद्राणि पश्यति । आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति.

Moth, *s.* शलभः, पतंगः, कीटः.

Mother, *s.* मातृ *f.*, जननी, अंबा, जनयित्री, प्रसूः, प्रसवित्री, जनी, प्रसाविनी; 'm. of offspring' पुत्रवती, सुतिनी, अपत्यवती; 'm.-in-law' श्वश्रूः; 'm. of a hero' वीरसूः-माता, वीरप्रसवा; 'born of a different m.' भिन्नोदर, अन्योदर्य, असोदर. -hood, *a.* मातृत्वं, जननीत्वं, मातृभावः-धर्मः. -less, *a.* अमातृकं, हीन-मृत-मातृक. -ly, *a.* मातृसदृश (शी *f.*), मातृ-संनिभ-अनुरूप-योग्य, मातृ in comp. -*adv.* मातृवत्, मातृभावेन, मातृस्थाने भूत्वा.

Motile, *a.* चल, जंगम.

Motion, *s.* गति *f.*, गमनं, चलनं, सर्पणं, चरणं. 2 चेष्टा, व्यापारः, अंगविक्षेपः; 'to set in m.' ईर् c., आ-धू 5, 9 U, 6 P, कंप् c. 3 क्षोभः; वेगः, सं-आ-वेगः, मनोविकारः, मनोवृत्तिः-वेगः, भावः, वासना, कल्पना. 4 प्रेरणं-णा, प्रोत्साहनं, प्रचोदना. 5 उपन्यासः, उपक्षेपः, कार्योपक्षेपः, सूचना. 6 रेकः, रेचनं-ना, उच्चारः. -*v. i.* संज्ञां दा 3 U or कृ 8 U, संकेतं दा. -less, *a.* निश्चल, निश्चेष्ट, अचल, अचेष्ट, गतिहीन-शून्य, निष्कंप, अस्पंद, स्तब्ध, स्थिर.

Motive, *a.* चालक, प्रेरक, प्रवर्तक, हेतुक in comp., कारणीभूत. -*s.* हेतुः, कारणं, निमित्तं, प्रयोजनं, कार्यं, अर्थः, निदानं, निबंधनं, प्रवर्तकं, प्रवृत्ति-निमित्तं-हेतुः; 'without m. s' निष्कारणं, अनिमित्तं, अहेतुकं, निष्प्रयोजनं, अकस्मात्.

Motley, *a.* चित्रविचित्र, नानाविध-वर्ण, बहुप्रकार, विविध.

Motor, *s.* चालकः, प्रेरकः.

Mottle, *v. t.* चित्र् 10, कर्बुरीकृ 8 U. -ed, *a.* चित्रित, कर्बुरित, कल्माषित.

Motto, *s.* वाक्यं, वचनं, आदर्शवाक्यं.

Mould, *s.* संस्कारः, आकारः, आकृति *f.*, संस्थानं, रूपं; मूर्ति *f.* 2 मृद् *f.*, मृत्तिका; मृद्चूर्णं. 3 प्रकृति *f.*, कारणं. -*v. t.* संस्कृ 8 U, क्लृप् c., आकारं-रूपं-दा 3 U, प्रवृत् c., रच् 10, रूप् 10. -y, *a.* मलिन, मलावृत, समल, कलंकमय (यी *f.*).

Moulder, *v. i.* विशॄ pass., जॄ 4 P, र्णीभू 1 P, अव-सद् 1 P, शनैः नश् 4 P, क्षि pass.

Moult, *v. i.* पक्षान् पत् c. or मुच् 6 P c. -ed, *a.* मुक्त or पतित-पक्ष or पर्ण. -in *s.* पक्ष or पर्ण-पतनं or गलनं.

Mound, *s.* वप्रः-प्रं, चयः, सतुः, आलि *f.*, डलः. 2 मृद्राशिः, मृत्तिकाचयः, क्षुद्रपर्व वामलूरः, नाकुः, वल्मीकः-कं.

Mount, *v. t.* आ-अधि-रुह् 1 P, अधि 1 U, 4 P. 2 आरुह् c. (रोपयति), उर्ध्वं c. (गमयति), उच्चीकृ 8 U, निविश् c. खच् 10 (खचयति); *See* Inlay. -c. (अश्वं, रथं, &c.) आ-अभि-रुह्, अधिक अध्यास् 2 A. 2 उर्ध्वं गम् 1 P or चल् 1 -ed, *a.* आरूढ, आरोपित; 'a m. soldi हयारूढः सैनिकः, सादिन् *m.* -ing, आरोहः-हणं, आरोपणं.

Mount, Mountain, *s.* पर्वतः, अद्रिः, गिरि शैलः, नगः, अचलः, महीध्रः, अहार्यः, ध गोत्रः, ग्रावन्, शिलोच्चयः, सानुमत्, शि रिन्; and comp. of भृत् or धर wi 'Earth,' q. v : क्ष्माभृत्, महीधरः, क्षितिभ &c.; 'western m.' अस्तः, अस्ताचल चरमक्ष्माभृत्; 'eastern m.' उदयः, उद गिरिः-पर्वतः; 'hill near a m.' पादः, प्रत्यं पर्वतः; 'to make m. s out of trifles' अणुमपि पर्वतीकृ 8 U, तिलं तालं दृश् 1 P -*a.* पर्वतीय, शैल (ली *f.*), (*s.*) in comp -eer, *s.* पर्वत &c. -निवासिन् *m.*, शैला -ous, *a.* शैलमय (यी *f.*), नगमय, सपर्व पर्वतीय. 2 (Huge) पर्वतप्रमाण.

Mountebank, *s.* मिथ्या-छद्म-वैद्यः, कू चिकित्सकः.

Mourn, *v.* अनु-,शुच् 1 P, विलप् 1 P, परि देव् 1 A, परिदिव् 10 A, रुद् 2 P, आक्रं 1 P, आक्रुश् 1 P. *See* Lament. -er, परिदेवकः, विलापिन् *m.*, शोचकः, विलपन कृत्. -ful, *a.* शोकार्थक, शोक-दुःख-गर्भ, दुः खावेदिन्. 2 शोकावह, शोकप्रद, दुःखद, दुः खावह, शोच्य, शोकार्ह 3 (Of persons शोकार्त, शोकाकुल, सशोक, खिन्न, दुःखि खेदयुक्त-आन्वित, उद्विग्नमनस्, विमन विषण्ण, समन्यु. -fully, *adv.* सशोकं, खेदं, सदुःखं, सोद्वेगं. -fulness, *s.* शोक दुःखं, उद्वेगः. -ing, *s.* शोकः, खेदः, विला परिदेवनं, दुःखं, उद्वेगः, आ-,क्रंदनं, रोद *See* Grief. 2 अशौचं; 'one should in m. for 10 days' दशदिनमशौचं ध रयेत्; 'm.-dress' अमंगलवेषः, शोकद्यो तको वेषः.

Mouse, *s.* मूष (षि) कः, आखुः, उंदुरुः, बिले शयः, खनकः; 'small kind of mice गिरिका, बालमूषिका.

Moustache, *See* Mustache.

Mouth, *s.* मुखं (in all senses); दरीमुखं, घटमुखं, नदीमुखं, &c.; वक्त्रं, वदनं, आननं, आस्यं; तुंडं, लपनं (of animate beings only); 'corner of the m.' सृक्वन् *n.*, सृक्कं, ओष्ठप्रांतः; 'rinsing the m.' आचमनं; 'stop the m.' वाचं स्तंभ् 9 P or c. 2 छिद्रं, रंध्रं, द्वारं, मुखं; 'm.-piece' मुखनाली; मुखं (fig.). -*v.* सगर्व-उद्धतं-वद् 1 P. 2 चर्व् 1 P, 10; ग्रस् 1 A, भक्ष् 10. **-ful**, *s.* ग्रासः, कवलः, पिंडः, गंडूषः (of water). **-less.** *a.* मुखहीन, निरानन.

Move, *v. i.* चल्-र् 1 P, सृप् 1 P, प्र-वि-°, सृ 1 P, गम् 1 P, या 2 P, इ 1 P. 2 भ्रम 1, 4 P, परिवृत् 1 A. 3 स्थानांतरं-गृहांतरं गम् or या. 4 चेष्ट् 1 A, यत् 1 A; 'm. on' प्र-सृ, प्र-गम्, प्र-या, प्र-स्था 1 A; 'm. about' परिभ्रम्, इतस्ततः गम्; 'm. off' अप-या, अपक्रम् 1 U, 4 P, अप-सृ-गम्; 'don't m. even a step further' अस्मात्स्थानात्पदात्पदमपि न गंतव्यं (Ka. 147). -*v. t.* चल् c., प्र-वि-सं°, प्र-सृ c., ईर् c. 2 परि-,भ्रम् c. (भ्रमयति); स्थानांतरं गम् c. (गमयति). 2 कृष् 1 P, प्रेर् c., प्रवृत् c.; प्रोत्सह् c., नुद् 6 P or c., प्रचुद् 10, चेष्ट् c., उद्-प्र-युज् 10. 3 दयां-करुणां-उत्पद् c., हृदयं स्पृश् 6 P or आर्द्रीकृ 8 U, द्रु c., उपहन् 2 P; आक्षुभ् c. 4 उपन्यस् 4 U, उप-क्षिप् 6 P, उप-स्था c. (स्थापयति); 'to be m.-ed' आर्द्रीभू 1 P, (करुणया) द्रु 1 P or द्रवीभू; *See* **Melt, Affect**; 'he appears to be m.-ed' द्रवीभूत इव लक्ष्यते; 'let my presence m. (you)' मामवलोक्यापि तावत्करुणार्द्रा भवत; 'she was m-ed to tears' तथा द्रवीभूता यथा अश्रूणि व्यमुंचत्; 'he was deeply m. ed by what I said' मम वचसा तस्य चेतसि दृढं पदं चक्रे; 'm. ed with grief' शोकोपहत, दुःखाभिभूत, शोकस्पृष्ट; 'm. a chess-man' शारिं परिणी 1 P. -*s.* गमनं, चलनं, सरणं &c.; 'm. at chess' परि(री)णायः. **-able**, *a.* चल, चर, जंगम, चरिष्णु, चलन-गमन-शील-क्षम, अस्थावर; 'm. and im-m. world' चराचरं विश्वं, अखिलं जगत्. **-ables**, *s.* चरद्रव्याणि, अस्थावरद्रव्यजातं. **-ed**, *a.* चलित, प्रेरित, &c.; 'gently m.' वेल्लित, प्रेंखित, आधूत, चलित, आकंपित, धुत. **-er**, चालकः, चलनः. 2 उपक्षेपकः, उपन्यासकृत् *m.* 3 प्रवर्तकः, प्रयोजकः, प्रेरकः. **-ing**, *a.* चर, चल, जंगम. 2 चलत्; गामिन्, यायिन्, विसर्पिन्, in comp. 3 हृदयस्पृश्, हृदयग्राहिन्, मर्मस्पृश्-भिद्, हृदयंगम, दयावह, करुणात्मक, हृदयद्राविन्. **-ingly**, *adv.* हृदयग्राहितया, हृदयंगमं. **-ment**, *s.* चलनं, सरणं, यानं, गति *f.*, स्थानांतरगमनं. 2 व्यापारः, चेष्टा, क्रिया, कृति *f.*, चेष्टितं, प्रवृत्ति *f.*; 'graceful m.' विलासः, विभ्रमः; *See* under **Graceful.** 3 चालनं, भ्रमणं; 'circular m.' मंडलभ्रमणं. 4 क्षोभः, कंपः. 5 ग्रामः, मूर्छना.

Mow, *v. t.* (दात्रेण) छिद् 7 P, लू 9 P, दो 4 P, कृत् 6 P. -*s.* तृण-धान्य-राशिः, तृणोत्करः, धान्यचयः. **-er**, *s.* लावकः, तृणच्छिद् *m.* **-ing**, *s.* तृणच्छेदः, तृणकर्तनं.

Much, *a.* बहु, बहुल, प्रचुर, भूरि, विपुल, प्रगाढ, अत्यंत, निर्भर, महत्, अत्यर्थ, अतिरिक्त, उत्कट, अतिमात्र, नितांत, प्राज्य, पुरु, अदभ्र; gen. ex. by सु, अति pr., अतिशय in comp. -*s.* बहु *n.* or in comp., बाहुल्यं, बहुभागः, भूयिष्ठं, भूयिष्ठभागः; 'talking m.' बहुभाषिन्; 'as m. as' तावत्-यावत्; 'as m. as may lie in one's power' यथाशक्ति, यावच्छक्यं; 'how m.' कियत्; 'so m.', 'this m.' इयत्, एतावत्; तावत् (as correlative of यावत्); 'that m.' तावत्, 'm. more', 'm. less' किमुत, किमु, किंपुनः. -*adv.* बहु, भृशं, अत्यंतं, भूरि, गाढं, निर्भरं, नितांतं, अतिमात्रं, सु-नितरां, बलवत्, अति-सु- pr.; *See* **Exceedingly.**

Mucilage, *s.* मेदस् *n.*, वसा, वपा. 2 श्लेष्मन् *m.*, चिक्कणवस्तु. **-Mucilaginous**, *a.* चिक्कण, स्निग्ध. 2 श्लेष्मल-ण.

Muck, *s.* पुरीषं; *See* **Dung.** 2 मलं, कर्दमः, कल्कं, अमेध्यं, कलुषं; 'm.-heap, or-hill' मलराशिः-संचयः, अवकरनिकरः; 'm.-sweat' अतिस्वेदः, अत्यंतघर्मः, 'm.-worm' पंकजः, कीटः. -*v. t.* मलेन लिप् 6 P. **-y**, *a.* मलिन, समल, पंकिल, अमेध्य.

Mucus, *s.* श्लेष्मन् *m.*, मलं, इंद्रियमलं; 'm. of the nose' सिंघाणं, सिंहाणं-नं, नासामलं; 'm. of the throat' कफः, श्लेष्मा; 'm. of the bowels' आमः; 'm. of the urethra' पुष्पं, ऋतुः. **-Mucous, -Muculent**, *a.* चिक्कण; श्लेष्मण-ल, कफसगुण. 2 श्लेष्म-कफ-कर (री *f.*).

Mud, *s.* पंकः-कं, कर्दमः, जंबालः-लं, शादः, निषद्वरः. **-dy**, *a.* पंकिल, सपंक, पंकदूषित सकर्दम, मलिन, समल, मलीमस; 'm.-headed' स्थूल-जड-बुद्धि, मृत्पिंडबुद्धि. **-Muddle**, *v.t.* पंकिलयति-कलुषयति-आविलयति (D.), दुष् c. (दूषयति), मलिनीकृ 8 U, आविलीकृ. 2 (Fig.) आकुलयति (D.), आकुलीकृ, ईषत् मुह् c or मद् c.

Muff, *s.* लोममयं हस्तत्राणं. 2 मूढः, मंदधीः.

Muffle, *v. t.* (वस्त्रेण) अवगुंठ् 10, परि-आ-वेष्ट् 1 A or c., आच्छद् 10, अवरुध् 7 U, बंध् 9 P, प्रावृ 5 U; *See* **Cover.** **-er**, *s.* आच्छादनं, अवगुंठनं, मुखाच्छादनं.

Mug, *s.* पानपात्रं-भाजनं, कंसः, जलपात्रं-भाजनं.

Muggy, Muggish, *a.* क्लिन्न, क्लिन्ननिर्वात.

Mulberry, *s.* तू(नू)दः, यूपः, क्रमुकः, ब्रह्मण्यः, ब्रह्मदारु *n.*

Mulct, *s.* दंडः, अर्थ-धन-दंडः. -*v. t.* दंड् 10, दंडं दा c. (दापयति).

Mule, *s.* अश्वतरः, वेश(स)रः, वेगसरः; *See* **Donkey** also; 'm.-driver (muleteer)' वेसरपालः, अश्वतरपालः.

Mullebrity, *s.* स्त्रीभावः, स्त्रीत्वं, नारीत्वं.

Mull, *v. t.* वास् 10, धू c.

Muller, *s.* शिला, शिलापट्टः, पेषणशिला, पेषणि-णी *f.*

Mulligrubs, *s.* अंत्रशूलं-वेदना.

Multangular, *a.* बहुकोण, अनेकास्र.

Multifarious, *a.* विविध, बहुप्रकार-विध, नाना-विध-प्रकार, नाना-बहु-रूप, अनेक, बहु.

Multiform, *a.* बहु or नाना-रूप, नाना or बहुप्रकार or विध. **-ity,** *s.* बहुविधता, अनेकरूपता, नानारूपत्वं.

Multilateral, *a.* अनेकभुज-पार्श्व.

Multilineal, *a.* बहुरेख.

Multiparous, *a.* बहुप्रसव, बह्वपत्य, बहुप्रज.

Multiped, *a.* बहुपद.

Multiple, *s.* आधारः.

Multiplicity, *s.* बाहुल्यं, अनेकत्वं, प्राचुर्यं, प्रभूतत्वं; 'm. of business' अनेककार्यव्यापृतत्वं, कार्यवैविध्यं.

Multiply, *v. t.* गुणयति (D.), हन् 2 P or c. (घातयति), आ-नि-°, पूर् 10; 'm. ing 4 by 3 we get 12' त्रिगुणिताः-त्रिभिराहताः-चत्वारः द्वादश संपद्यंते; त्रिघ्नेषु चतुर्षु द्वादश फलं. 2 वृध् c., उप-चि 5 U, बहुली-प्रचुरी-कृ 8 U. -*v. i.* वृध् 1 A, स्फाय् 1 A, प्र-उप-चि pass., बहुली-भू 1 P; *See* **Increase.** 2 अपत्यानि उत्पद् c., संततिं जन् c. (जनयति). **-ed,** *a.* गुणित, हत, गुण-घ्न- in comp. 2 वर्धित, वर्धितसंख्य. **-ier, -icator,** *s.* गुणकः, गुणकांकः. **-ication,** गुणनं, हननं, आघातः, अभ्यासः; 'cross m.' वज्राभ्यासः, वज्राघातः; 'duodecimal m.' गोमूत्रिका. 2 वर्धनं, वृद्धि *f.*, उपचयः. **-icative,** *a.* गुणक. **-Multiplicand,** *s.* गुण्यः, गुण्यांकः.

Multipotent, *a.* बहुकार्यक्षम.

Multiradiate, *a.* बहुकिरण.

Multisonous, *a.* बहुस्वन-ध्वनि-नाद.

Multitude, *s.* समूहः, समुच्चयः, गणः, निवहः, संघातः, समुदा(द)यः, समाहारः, ओघः, प्र-नि-सं-चयः, स्तोमः, निकरः, समवायः, चयः, संहति *f.*, कदंबकं, वृंदं, संग्रहः, समाजः, व्यूहः, संदोहः, विसरः, व्रजः, व्रातः, वारः, निकुरंबं; वर्गः (of similar things); संघः, सार्थः (of animals); कुलं, यूथः-थं (of lower animals); समजः (of beasts); निकायः; पुंजः, राशिः, उत्करः, कूटः-टं (of corn &c.); जालं, मंडलं, पूगः, ग्रामः in comp. 2 जन or लोक-संमर्दः-निवहः-संघः, जनमेलकः, जनता, लोकग्रामः. 3 बाहुल्यं, बहुत्वं.

Multitudinous, *a.* बहु, बहुल, प्रचुर; *See* **Many.**

Multiversant, *a.* बहुरूपधारिन्.

Multocular, *a.* बहुनेत्र-लोचन.

Mum, *a.* निःशब्द, अनालाप. -*interj.* तूष्णीं भव, निःशब्दो भव, वाचं यच्छ.

Mumble, *v.* अस्पष्टं वद् 1 P or उच्चर् c., अव्यक्तं उदीर् c., नीचैः वद्, जप् 1 P. **-ingly,** *adv.* अस्पष्टवाचा, अव्यक्तगिरा.

Mummer, *s.* दांभिकः, छद्मवेशिन् *m.* **-y,** *s.* विडंबनं-ना, माया, छलं, व्याजः, छद्मवेशः, भंडता; *See* **Trick.**

Mummy, *s.* रक्षितं मृतशरीरं.

Mump, *v.* अस्पष्टं वद् 1 P or उच्चर् c., 2 चर्व् 1 P, 10. 3 **Cheat,** q. v.

Munch, *v. t.* चर्व् 1 P, 10.

Mundane, *a.* सांसारिक-लौकिक-ऐहिक-ऐहलौकिक- (की *f.*); 'm. existence' संसारः, भवः, संसृति *f.*, लोक-जीव-यात्रा.

Mungoose, *s.* नकुलः, बभ्रुः, अंगूषः.

Municipal, *a.* नगरीय, नगर-पुर- in comp. **-ity,** *s.* नगरपालिका, ग्रामावेक्षिका.

Munificent, *a.* उदार, वदान्य, दानशौंड, दान-त्याग-शील. **-ly,** *adv.* उदारवत्, सौदार्यं. **-Munificence,** *s.* औदार्यं, वदान्यता, अतित्यागः, दानशौंडता; *See* **Generous,-ness.**

Muniment, *s.* दुर्गं, कोटः.

Munition, *s.* युद्धसामग्री-सज्जा.

Mural, *a.* भित्ति-प्राकार-संबंधिन्.

Murder, *s.* (सद्वेषं) वधः, हत्या, घातः, हननं, सूदनं, हिंसा. -*v. t.* हन् 2 P or c. (घातयति), व्यापद् c. **-er,** *s.* घातकः, हंतृ *m.*, हन् in comp., वधकारिन् *m.*, वधोद्यतः, मारकः. **-ous,** *a.* हंतुकाम, जिघांसु, हिंसाबुद्धि, वधोद्यत, वधैषिन्. 2 निठुर, दारुण, अतिघोर. 3 घातक, प्राणांतक, जीवितनाशिन्. 4 मारात्मक, आत्ययिक (की *f.*).

Murk,-y, *See* **Dark.**

Murmur, *s.* मंदध्वनिः-रवः, मर्मरध्वनिः, कलरवः-स्वनः-रुतं, कलकलः गुंजितं, गंभीरनादः; 'm. of applause' प्रणादः. 2 अंतर्-गूढ-विलापः, असंतोषध्वनिः. -*v. i.* असंतोषेण-सविषादं-सनिर्वेदं-विलप् 1 P or परि-देव् 1 A or परिदिव् 10 A 2 गुंज् 1 P; कलं-मंदं-गंभीरं-रु 2 P. 3 जप् 1 P, नीचैः वद् 1 P. **-er,** *s.* असंतुष्टजनः, सदाविलापिन् *m.*

Murrain, *s.* मारी, महामारी.

Muscle, *s.* स्नायु *f.*; मांसपेशी, स्नसा, वस्नसा, पेशी, शिरा. 2 शंबूकः. **-Muscular.**

-Musculous, *a.* स्नायुसंबंधिन्. 2 मांसल, दृढांग (गी *f.*), उपचितगात्र.

Muse, *v. i.* ध्यै 1 P, चिंत् 10, विमृश् 6 P, विचर् c., *See* Meditate. -*s.* ध्यानं, चिंता. 2 वाग्देवी, सरस्वती, विद्याधिष्ठात्री, विद्यादेवता. -**ful**, *a.* चिंता or ध्यान-पर-शील-निष्ठ.

Museum, *s.* कौतुकागारं, दुर्लभवस्तुसंग्रहः.

Mushroom, *s.* छत्रं, छत्रकः; *See* Fungus. -*a.* अचिरस्थायिन्, क्षणध्वंसिन्, उत्पद्य विलीयमान.

Music, *s.* गीतं, संगीतं, संगीत or वाद्य-विद्या or शास्त्रं (science of m). 2 (Melody) तालैक्यं, स्वरानुपूर्व्यं, सुस्वनः-स्वरः, माधुर्यं; तौर्यं, वाद्यघोषः; 'vocal m.' संगीतं; 'instrumental m.' वादनं; 'set to m.' स्वर-ताल-बद्ध; 'm.-room' संगीतशाला; 'fond of m.' नादलुब्ध. -**al**, *a.* संगीतविषयक, गानीय, (*s.*) in comp. 2 सुस्वर, सुश्राव्य; *See* Melodious. 3 संगीत-गान-प्रिय, नादप्रिय-लुब्ध-आसक्त, वादनशील-आसक्त; 'm. entertainment' गानोत्सवः; 'm. instrument' वादित्रं, वाद्यं; 'm. glasses' जलतरंगः. -**ally**, *adv.* सुस्वरं, संगीत शास्त्रानुरूपं. -**ian**, *s.* गायकः, गातृ *m.*, गाथकः. 2 वादकः, वादित्रकुशलः, संगीतज्ञः, सुस्वराभिज्ञः.

Musk, *s.* कस्तूरी, कस्तूरिका, मृगनाभिः, मृगमदः, नाभि *m.-f.*, गंधधूलि *f.*, वातामोदा, अंडजा; 'm.-deer' गंधमृगः, कस्तूरीमृगः; 'm.-rat' गंधमूषकः, गंधाखुः. -**y**, *a.* कस्तूरीयुक्त, मृगनाभिगंधि, कस्तूरीवासित.

Musket, *s.* आग्नेयनालि-ली *f.* गुलिकाप्रक्षेपिणी.

Muslin, *a.* सूक्ष्मवस्त्रं, सूक्ष्मांशुकं, अंशुकं.

Must, *v.* ex. by pot. pass. part. with or without अवश्यं, नियतं, नूनं; 'I m. worship god' (अवश्यं) मयेश्वरः पूजनीयः, 'he m. have now come home' अधुना तेन गृहमागतेन भवितव्यं; oft. by अर्ह् 1 P; 'he m. be honoured' मानमर्हत्येव; 'it m. be so' एवं खलु तत्स्यात्, एवं नाम. -*s.* द्राक्षारसः. -*v. i.* विरसीभू 1 P. -**y**, *a.* विरस, निःसार; दुर्गंध.

Mustaches, Mustachio, *s.* श्मश्रु *n.*, गुंफः, ओष्ठलोमन् *n.*

Mustard, *s.* सर्षपः, तं(तु)तुभः, कदंबकः; 'black m.' कृष्णिका, राजिका, क्षवः, क्षुता(धा)भिजननः, आसुरी, राजसर्षपः; 'white m.' सिद्धार्थः-र्थकः.

Muster, *v. t.* संग्रह् 9 P, समा-हृ 1 P, समानी 1 P, सं-ऊह् 1 U; समाह्वे 1 P, एकीकृ 8 U, संगम् c., (गमयति). 2 (सैनिकान्) परिसं-ख्या 2 P or परिगण् 10. एकत्र समानी. -*v. i.* सं-इ 2 P, संमिल् 6 P, संगम् 1 A; *See* Assemble; 'm.-roll' नामावलि-ली *f.*, परिसंख्या, परिगणना.

Mutable, *a.* विकारवत्, अस्थिर, परिवर्तनीय, विकारशील, अनियत, अनवस्थित, अस्थायिन्, व्ययिन्. 2 लोल, चंचल, तरल; *See* Fickle. -**ness**, -**Mutability**, *s.* अस्थैर्यं, व्ययिता, विकारशीलता, परिवृत्तिक्षमता, अनवस्थिति *f.* 2 लौल्यं, चांचल्यं, तरलता. -**Mutation**, *s.* परिणामः, विकृति *f.*, विकारः, विक्रिया, स्थिति-अवस्था-भेदः.

Mute, *a.* मूक, जड, जडवाच्, वाक्शून्य, अवाच्, वाणीहीन, निःशब्द, मुद्रितमुख; 'm. with wonder' आश्चर्यजडीकृत. -*s.* मूकजनः, मूकः. 2 पक्षिपुरीषं. -**ly**, *adv.* निःशब्दं, मूकवत्, जडवत्. -**ness**, *s.* मूकता, जाड्यं, वागभावः, वाक्स्तंभः, मौन-मूक-भावः.

Mutilate, *v. t.* व्यंगीकृ 8 U, विकलीकृ; (अंगानि) खंड् 10, व्यव-च्छिद् 7 P, कृत् 6 P. -**ed**, *a.* विकलांग (गी *f.*), क्षतविक्षत, छिन्नभिन्न, खंडितांग, खंडितविग्रह, नष्टेंद्रिय. -**ion**, *s.* व्यंगीकरणं, व्यवच्छेदः-दनं, खंडनं, अंगकर्तनं. 2 न्यूनांगता, व्यंगता, वैकल्यं.

Mutiny, *s.* सैन्यद्रोहः- अपरागः-विरक्ति *f.*- क्षोभः- प्रकोपः, संक्षोभः, व्युत्थानं; 'let him raise a m. in Jambudwipa' जंबुद्वीपे कोपं जनयतु (H. 3). -*v. i.* अभि-द्रुह् 4 P, प्रकोपं दृश् c., विरागं दृश् c., क्षुभ् 4 P, व्युत्था 1 P, शासनं लंघ् 1 A, 10. -**eer**, *s.* प्रकोपकारिन्, आज्ञालंघिन्, अभि-वि-द्रोहिन्, द्रोह-क्षोभ-कारिन् all *m.* -**ous**, *a.* अंतःप्रकोपकर (री *f.*), आज्ञालंघिन्, क्षोभ-प्रकोपकारिन्; प्रतीप, अवश, अनायत्त, दुःशास्य.

Mutter, *v.* अस्फुटं-अस्पष्टं वद् 1 P or जल्प् 1 P, अव्यक्तं उच्चर् c., नीचैः वद्; 'm. prayers' जप् 1 P. 2 गर्ज् 1 P, स्तन् 1 P, गंभीरं स्वन् 1 P. -*s.* -**ing**, *s.* अस्पष्टोच्चारणं, अव्यक्तभाषणं, उपांशुवादः-भाषितं. 2 जपः, जाप्यं, स्वाध्यायः. 3 गर्जितं, स्तनितं, निर्घोषः. -**er**, *s.* अस्फुटवादिन् *m.*, उपांशुवादिन् *m.* -**ingly**, *adv.* उपांशु, नीचैः, अस्पष्टं, अव्यक्तं.

Mutton, *s.* मेषमांसं, आविमांसं.

Mutual, *a.* परस्पर, अन्योन्य, मिथः, इतरेतर, in comp.; 'm. help' अन्योन्यसाहाय्यं; oft. by प्रति pr.; 'm. obligation' प्रत्युपकारः; प्रतिघातः, प्रत्यभियोगः, &c. -**ity**, *s.* परस्परयोगः-भावः-संबंधः व्यतिकरः, अन्योन्याश्रयः, व्यतिहारः. -**ly**, *adv.* परस्परं, अन्योन्यं, मिथः, इतरेतरं (*a*) in comp

Muzzle, *s.* घोणा. 2 मुखं, प्रवेशः; छिद्रं, द्वारं. 3 मुखबंधनी-रोधनी. -*v. t.* मुखं बंध् 9 P or रुध् 7 U

Myography, *s.* स्नायुवर्णनं.

Myope, *s.* अल्पदृश् *m.*, अदीर्घदृष्टिः.

Myriad, *s.* अयुतं, दशसहस्रं.

Myrmidon, *s.* परिचरः, क्रूरपरिचरः.

Myrobalan, *s.* आमलकः-की-कं, तिष्यफला, अमृता, वयस्था; (beleric m.) विभीतकः-की-कं, अक्षः, तुषः, कर्षफलः, भूतावासः, कलिद्रुमः; 'yellow m.' अव्यथा, अभया, पथ्या, कायस्था, पूतना, अमृता, हरीतकी, हैमवती, चेतकी, श्रेयसी, शिवा.

Myrrh, *s.* बोलः, गंधरसः, रसगंधः, प्राणः, पिंडः, गोपरसः, गोपः, रसः, गोसः.

Mystery, *s.* रहस्यं, नि-,गूढं, गुह्यं, गूढार्थः, गूढतत्त्वं, गहनवस्तु-विषयः. **-ious,** *a.* निः-, गूढ, गहन, रहस्य, गुह्य, गुप्त, गूढार्थ, गुप्तार्थ, दुर्ज्ञेय, दुर्बोध, अव्यक्त, अस्पष्ट; 'm. are the ways of Fate' कर्मणो गहना गतिः; 'a m. person' अव्यक्तकर्मा पुरुषः, गूढचरित्रो नरः. **-iously,** *adv.* [illegible], गूढं. **-iousness,** *s.* गूढता, गहनता, दुर्बोधता.

Mystic,-al, *a.* गूढ, गुप्त, गहन; *See* **Mysterious. -ally,** *adv.* गूढं, गहनं. **-ism,-ness.** *s.* गूढता, गहनता. **-*Mystify*,** *v. t.* गहनीकृ 8 U, गूढीकृ.

Myth, Mythe, *s.* पुराणं, पुरावृत्तं, पुराण-पुरावृत्त-कथा, पुरावृत्ताख्यानं, पौराणिकी कथा. 2 कल्पितकथा, कूटार्थकथा. **-ic,-ical,** *a.* पौराणिक (की *f.*), पुराणकथित-उक्त. 2 काल्पनिक (की *f.*), कूटार्थ. **-*Mythology*,** *s.* पुराणं, इतिहासः, पुराणशास्त्रं, देवताख्यानं. **-ical,** *s.* पौराणिक-ऐतिहासिक -(की *f.*); *See* above. **-ist,** *s.* पुराविद् *m.*, पुराणविद्, इतिहासज्ञः.

N.

Nab, *v. t.* अकस्मात् धृ 1 P or ग्रह् 9 U.

Nacre, Naker, *s.* मुक्तास्फोटः, शुक्तिपुटं.

Nadir, *s.* अधोबिंदुः.

Nag, *s.* अश्वकः, घोटकः; *See* **Horse. -*v. t.*** क्लिश् 9 P, अर्द् 1 P.

Naiad, *s.* जलदेवता, अप्सरस् *f.*

Nail, *s.* नखः-खं, नखरः-रं, कररुहः, पुनर्भवः, पुनर्नवः; 'to fight tooth and n.' अत्यावेशेन (नखानखि) विवद् 1 A or युध् 4 A. 2 कीलकः, कीलः, शंकुः, लोहकीलः,-शंकुः. *-v. t.* कील् 10, (सा नश्चेतसि कीलितेव Mal. 5), कीलैः बंध् 9 P; 'n. ed to the spot' तत्स्थानकीलित.

Naive, *a.* सरल, दक्षिण, निर्व्याज, निर्व्यलीक, ऋजु, सरलमति, सुजन; *See* **Frank. -ly,** *adv.* निर्व्याजं, अमायया, सारल्येन. **-Naivete,** *s.* सारल्यं, दाक्षिण्यं, सौजन्यं, अमाया, अव्याजः, आर्जवं, निर्व्याजता.

Naked, *a.* नग्न, विवस्त्र, निर् or अ-वस्त्र or वसन, विवसन, विवासस्, अपरिच्छन्न, दिग्वासस्, दिगंबर, वस्त्र or वसन-हीन-रहित-शून्य; विवृत, अनावृत, अनाच्छादित. 2 असज्ज, असंबद्ध, अभूषित. 3 केवल, अनावृत, शुद्ध, मात्र in comp. 4 स्पष्ट, सुप्रकाश, स्फुट; 'by the n. eye' नेत्रमात्रेण; 'a n. woman' नग्ना, कोटवी; 'he would not have left me n. to my enemies' शत्रुप्रहारवशं-शत्रुवशायत्तं-मां नाकरिष्यत्. **-ly,** *adv.* नग्नवत्, अपरिच्छन्नं; केवलं, स्पष्टं. **-ness,** *s.* नग्नता, नग्नभावः; अनावृतत्वं.

Name, *s.* नामन् *n.*, नामधेयं; अभिधा, अभिधानं, आख्या, संज्ञा, अभिधेयं, आह्वयः, आह्वा, उपाधिः, लक्षणं, व्यपदेशः; 'do you know them by n.' अपि ज्ञायंते ते नामधेयतः; 'I shall ask his mother's n.' अस्य मातरं नामतः पृच्छेयं (S. 7); 'call by n.' नाम ग्रह् 9 U, संबुध् c., नाम्ना आह्वे 1 P; 'calling by n.' नामग्रहः-हणं, संबोधनं; 'he calls me by my n.' नामग्राहं मामाह्वयति: 'family n.' उपनाम, कुलनाम; 'in one's n.' वचनेन, वचनात्; 'say to the king in my n.' वाच्यस्त्वया मद्वचनात्स राजा (R. xiv. 61); 'what is the n. of the sage' किंनामधेयोसौ मुनिः; 'in the n. of' (in oaths) साक्षीकृत्य. 2 प्रतिष्ठा, कीर्ति-ख्याति-प्रसिद्धि-विश्रुति-*f.*, प्र-,वि-,ख्यातिः, यशस् *n.*; 'who has made a n.' लब्धप्रतिष्ठः; 'good n.' सुकीर्तिः, सुख्यातिः; 'bad n.' अप-अ-कीर्तिः, दुष्कीर्तिः, अप्रतिष्ठा. *-v. t.* अभि-धा 3 U, आह्वे 1 P, आ-ख्या 2 P, आ-प्र-चक्ष् 2 A, उदाहृ 1 P, व्यप-दिश् 6 P, संज्ञां-नाम-कृ 8 U (with gen.); *See* **Call;** 'hence his father n. ed his son Aja after the Creator' अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार (R. v. 36). 2 नाम्ना निर्दिश् 6 P or उदा-व्या-हृ, नामतः कथ् 10 or वच् 2 P or ब्रू 2 U or कृत् 10, नाम ग्रह्; *See* **Tell** also. **-ed,** 'by name' *a.* अभिहित, ख्यात, संज्ञित, कीर्तित, उदाहृत, व्यपदिष्ट gen. ex. by नाम *ind.*, or by (*s.*) in comp. ;' a son n. Râma ' रामनामा or रामो नाम or रामसंज्ञः पुत्रः. 2 नामधारिन्, कृत्-लब्ध-प्राप्त-नामन्. **-ing,** *s.* नामकरणं, नामनिर्देशः-ग्रहणं. **-less,** *a.* अनामक, नामहीन, अप्रसिद्ध. **-ly,** *adv.* यथा, नाम; ex. by तद्यथा, (विरक्तानां द्विविधं प्रतिविधानं तद्यथा अनुग्रहो निग्रहश्च Mu. 3). **-Namesake,** *s.* एक-सम-नामकः, एकनामधारिन् *m.*, सनामन् *m.*

Nap, *s* अल्प-स्वल्प-निद्रा, अदीर्घनिद्रा. 2 रो(लो)मन् *n.* 3 गंडः. **-v.** *i.*, 'take a n.' अल्पकालमात्रं स्वप् 2 P. **-less,** *a.* लोमहीन. **-py,** *a.* लोमश, लोममय (यी *f.*). 2 निद्रालु. 3 स्वाप or निद्रा-कारिन् or आवह.

Nape, . मन्या, घाटा, अवटुः, कृकाटिका.

Napkin, *s.* मुख-वदन-मार्जनवस्त्रं, नक्तकः.

Narcotic, *a.* निद्रा or स्वाप-कारिन् or जनन (नी *f.*). **-s.** निद्रावहं औषधं, निद्रौषधं.

Nard, *s.* जटिला, जटामांसी, तपस्विनी, लोमशा, मिशी (षी).

Narrate, *v. t.* वर्ण् 10, परि-कृत् 10, कथ् 10, आख्या 2 P, नि-आ-विद् c., अभि-धा 3 U, व्याहृ 1 P, वद् 1 P, चक्ष् 2 A; *See* **Tell.** **-ion,** *s.* कीर्तनं, कथनं, वर्णनं, आख्यानं, निवेदनं. 2 कथा; *See* below. **-ive,** *s.* कथा, आ-उपा-ख्यानं, आख्यायिका, वृत्तांतः, चरित्रं, कथाप्रबंधः; इतिहासः. **-a.** कथासंबंधिन्, कथा in comp., विवरणविषयक. **-or,** *s.* निवेदकः, कथकः.

Narrow, *a.* अविस्तृत, अविस्तीर्ण, सं-नि-रुद्ध, संकट, संबाध, संकु(को)चित, संवृत, अपृथु, अविपुल, अनायत, निरायत, अल्पपरिमाण, आवेतन. 2 अल्प, परि-,मित, संयत, नियत, निबद्ध; *See* **Limited;** 'a n. pass' संकटं, संबाधः, संकटमार्गः. 3 (Fig.) क्षुद्र, अल्प, लघु, कृपण, अनुदार; 'of n. views', 'n. minded' क्षुद्रमनस्, लघुचेतस्, कृपणबुद्धि-धी-मति-चेतस्, अनुदारशील. 4 सूक्ष्म, अतिसूक्ष्म, निपुण, सुविशुद्ध. **-v.** *t.* संक्षिप् 6 P, संकुच् 1 P, संबाध् 1 A, संहृ 1 P, संवृ 5 U, आकुंच् c., परि-मा 3 A, 2 P, सं-नि-यम् 1 P; *See* **Limit.** **-v.** *i.* Pass. of roots above. **-ly,** *adv.* अविस्तृत, संकटं, संबाधं, अनायतं. 2 कृच्छ्रेण, कथमपि, कष्टेन, ईषदूनं; by कल्प-प्राय- in comp; 'he n. escaped being foiled' जितप्रायः-कल्पः. 3 सूक्ष्मं, निपुण. **-ness.** *s.* अविस्तृति *f.*, संकोचः, अल्पविस्तारः, अल्पावकाशः, मितता, कार्पण्यं, दैन्यं, अनुदारता, &c.

Nasal, *a.* अनुनासिक (की *f.*), नस्य, नासिक्य, सानुस्वार. **-s.** अनुनासिकं.

Nascent, *a.* प्रादुर्भवत्; वर्धिष्णु.

Nasty, *a.* मलिन, अशुद्ध, समल, अपवित्र, अमेध्य; कुत्सित, गर्हित, अश्लील. **-ily,** *adv.* मलिनं, कुत्सितं. **-iness,** *s.* मालिन्यं, मलं, गर्ह्यता, अपवित्रता.

Natal, *a.* जन्म in comp.; 'n. country' जन्मभूः.

Natant, *a.* तरत्, प्लवत्.

Nation, *s.* राष्ट्रं, जनपदः, देशः, विषयः; (people) लोकः, जनाः, प्रजाः, जनता, जनः, लोकः, देशजनः-लोकः, देशवासिनः. **-al,** *a.* देशीय, दैशिक (की *f.*), देश्य, राष्ट्रीय, देश in comp.; 'n. custom' देशाचारः; 'n. law' देशधर्मः; 'n. calamity' उत्पातः, जनपदोद्ध्वंसः. 2 देशाभिमानिन्. 3 सामान्य. साधारण (णी *f.*), सर्वजनीन; *See* **General.** **-ality,** *s.* स्वदेशाभिमानः. 2 देशीयता, देशोद्भवता. **-ally,** *adv.* सामान्यतः, जातितः.

Native, *a.* देशज, देशीय, देशोद्भव, स्वदेशोत्पन्न. 2 सहज, अकृत्रिम, नैसर्गिक (की *f.*), स्वभावज; *See* **Natural.** 3 जन्मप्राप्त, जन्मसिद्ध, जन्म-स्व in comp.; 'n. country' जन्मभूमि *f.* -देशः, स्वविषयः-राष्ट्रं; 'n. place' जन्मस्थानं, उत्पत्तिस्थानं. **-s.** देशवासिन् *m.*, देशजः, देशोद्भवः, देशीयजनः-लोकः. **-ity,** *s.* उत्पत्ति *f.*, संभवः, उद्भवः, जनि *f.* 2 जन्मपत्रिका, जातकं; 'cast one's n.' जातकं निरूप् 10; 'star at one's n.' जन्मनक्षत्रं; 'name given at one's n.' जन्मनाम.

Natron, *s.* सर्जि *f.*, सर्जिका, सर्जिकाक्षारः, कापोतः, सुखवर्चकः.

Natty, *a.* शोभन, परिमृष्ट, सुरेख, विनीत.

Nature, *s.* सृष्टि *f.*, जगत् *n.*, भूमंडलं, विश्वं, ब्रह्मांडं, सर्गः. 2 मार्गः, रीति *f.*, क्रमः, विधिः, नियमः, धर्मः, सृष्टिक्रमः. 3 प्रकृति *f.*, माया, शक्ति *f.*, निर्मात्री देवता, आदिशक्तिः-माया, प्रधानं (according to Sānkhyas). 4 प्रकारः, रूपं, जाति *f.*, रीतिः, विधा, in comp. 5 भावः, प्रकृतिः, स्वभावः, निसर्गः, धर्मः, तत्त्वं, सत्त्वं, गुणः, प्रकृति-निसर्ग-जाति-स्वभावः संसिद्धि *f.*, स्वरूपं, स्वधर्मः; शीलं. 6 स्वभाव or प्रकृति-गुणः or धर्मः; 'properties of n.' गुणत्रयं (सत्त्वं, रजः, तमः); 'good n.' सद्भावः, सुशीलं, सौजन्यं; 'of this n.' एवंविध; 'by n.' प्रकृत्या, जात्या, जन्मतः, स्वभावतः; 'blind by n.' जन्मांध, जात्यंध, जनुषांध; 'functions of n.' देह-शरीर-धर्मः. **-ed,** *a.* स्वभाव, शील, प्रकृति in comp. **-Natural,** *a.* स्वाभाविक-नैसर्गिक-सांसिद्धिक-प्राकृतिक-साहजिक-औत्पत्तिक- (की *f.*), सहज, स्वभाव-निसर्ग-ज, स्वभाव-प्रकृति-सिद्ध, स्व, निज, अंतर्भव, अंतर्जात, प्रकृतिस्थ; 'n. enemy' जातशत्रुः, सहजारिः; 'n. enmity' शाश्वतिकः विरोधः; oft. ex. by (*s.*); स्वभाव एवैष परोपकारिणाम् (S. 5) 'it is n. with the benevolent.' 2 योग्य, यथामार्ग-न्याय, युक्त, उचित. 3 स्वभावानुगत, अनुलोम, प्रकृत्यनुसारिन्, स्वभावयोग्य. 4 अकृत्रिम, अकृतक, अयत्नकृत, अयत्ननिर्मित; 'n. cavity' देवखातं; 'n. loveliness' अव्याजसौंदर्यं. 5 अक्लिष्ट, अयत्नकृत, सुलभ 6 (Child) गूढज, अनौरस (सी *f.*), जारज, उपस्त्रीजात, विजात; *See* **Illegitimate.** 7 सत्य, यथार्थ, सरल, अकृत्रिम, प्रकृत. 8 यथाकाल; 'n.

death ' यथाकालं मरणं; 'n. day' सावनदिनं; 'n. form' स्वरूपं; ' n. disposition ' स्वभावः, जन्मस्वभावः; 'n. history' जडाजडशास्त्रं, स्थावरजंगमशास्त्रं; 'n. philosophy' पदार्थविज्ञानं; ' n. to ' सुलभ; ' levity n. to mortals' मानुषतासुलभो लघिमा (Ka. 134). -s. मूढः, मूर्खः, जडः. -ist, s. पदार्थशास्त्रज्ञः, पदार्थविज्ञानिन् *m.* -ize, *v. t.* अभ्यस् 4 U; *See* **Familiarize.** 2 देशीय-*a.* कृ 8 U. ly, *adv.* प्रकृत्या, निसर्गेण, स्वभावतः, स्वभावेन, निसर्गतः, जात्या, (s.) in comp; 'n. charming ' निसर्गमधुर, प्रकृतिसुभग, अव्याजसुंदर-मनोहर, *&c.* 2 यथाक्रमं, अनुलोमं, सृष्टिक्रमानुसारेण. 3 अकृत्रिमं, आक्लिष्टं, अयत्नतः, सहजशक्त्या-गत्या. 4 स्वतः, स्वयं, अंतःप्रवृत्त्या, अबलात्, सहजावबोधेन. 5 अवश्यं, निर्विवादं, नियतं, अनायासेनैव; नूनं, खलु. -ness, *s.* सहजत्वं, अकृतकता, याथार्थ्यं, &c.

Naught, *s.* न किमपि, न किंचित्-किंचन. 2 शून्यं, खं; ' set at n. ' अव-ज्ञा 9 U, तृणीकृ 8 U; *See* **Contemn, Defy.** -*adv.* न किमपि, न किंचिदपि, न ईषदपि-स्तोकमपि. -*a.* असार, निर्गुण.

Naughty, *a.* दुष्ट, उपद्राविन्, दुर्वृत्त, प्रतीप, अविनेय, अवश्य, हिंसाशील, अपकारप्रिय; *See* **Mischievous.**-ily, *adv.* प्रतीपं, दुष्टभावेन. -iness, *s.* दुर्वृत्तता, प्रतीपता.

Naumachy, *s.* नौयुद्धं.

Nausea, *s.* वमनं, उत्क्लेदः, वमनेच्छा. 2 वैकृतं, बीभत्सः, कुत्सा, घृणा, निर्वेदः. -**Nauseate,** *v. i.* वम् desid. (विवमिषति). -*v. t.*, Abhor, q. v. -**Nauseous,** *a.* बीभत्सावह, बीभत्स, निर्वेदप्रद, गर्हित, कुत्सित. 2 वमनोत्पादिन्.

Nautic,-al, *a.* नाविक (की *f.*), नौ in comp.

Naval, *a.* समुद्र in comp., नाव्य, नाविक. 2 नौकात्मक, नौरूप.

Nave, *s.* नाभि-भी *f.*, पिंडि-डी *f.*, पिंडिका. 2 (देवालयस्य) मध्यभागः.

Navel, *s.* नाभि-भी *f.*, तुंदः-दि-दी *f.*, तुंदिका, उदरावर्तः; ' hollow of the n ' नाभ्यावर्तः; ' having a protuberant n. ' तुंदिन्. तुंदिल-भ, तुंदवत्; 'n.-string' नालः, नाभिनालः.

Navigable, *a.* नाव्य, नौतार्य, नौगम्य.

Navigate, *v.* नावा तॄ 1 P or प्लु 1 A or गम् 1 P or भ्रम् 1, 4 P. 2 (A ship) चल् c., वह् c., नी 1 P, प्रेर् c. -ion, *s.* नावा तरणं-गमनं-पर्यटनं, नौयात्रा, नौभ्रमणं-गमनं, समुद्रयानं-यात्रा. 2 नौवाहनं-चालनं-नयनं. 3 नाविकाविद्या, नौकागमनविद्या-शास्त्रं. -or, *s.* नाविकः, समुद्रयायिन् *m.* 2 नौवाहः, नौनायकः.

Navy, *s.* (युद्ध-) नौसमूहः-साधनं, पोतावलि *f.*, नौकासमूहः.

Nay, *adv.* न, नहि; ' n. more ' नेदमेव, अन्यच्च, अन्यदपि, पुनः, न केवलं इदं; ' say n. ' Deny, q. v.

Neap, *a.* नीच, निम्न.

Near, *prep.* समीपं-पे (with gen.), आरात् (with abl.), समया, निकषा (with acc.), उप in comp.; (with verbs) ex. by उप, आ, अभि, प्रति. -*a.* आसन्न, प्रत्यासन्न, संनिहित, समीप, निकट, समीप-निकट-स्थ, उपांत, अंतिक, समीप-निकट-वर्तिन्, उपकंठ संनिकृष्ट, सविध, अभ्यास-श, सदेश, सवेश, अभ्यर्ण, अभ्यग्र, सनीड, समर्याद, अदूर; ' quite n. ' संसक्त, अव्यवहित, अपदांतर; ' very n. ' नेदिष्ठ, अंतिकतम. 2 दृढसंबद्ध-संसक्त, परिचित. 3 स्वार्थसंबंधिन्. 4 कृपण, अल्पव्ययिन्; (relation) निकट, आसन्न; ' who is n. her delivery ' आसन्नप्रसवा; 'n. his death' आसन्नमृत्युः. -*adv.* समीपं-पे, अंतिकं-के, निकटं-टे, अभितः, उपांते, आरात्, निकषा, अदूरं-रे, संनिधौ, सकाशे, उप in comp.; ' n. at one 's side' पार्श्वे, पार्श्वतः. 2 Nearly, *See* below. -*v. t.* उप-गम् 1 P, उपसृ 1 P, समीपं-गम्; *See* **Approach.** -ly, *adv.* प्रायः, प्रायेण, प्रायशः, ईषदूनं, कल्प-प्राय-भूयिष्ठ-उप-in comp.; ' n. like Kumara ' कुमारकल्पः; ' n. dead ' मृतप्राय-कल्प; ' n. five years old ' पंचवर्षदेशीय; ' n. four ' उपचतुर. 2 दृढं, गाढं, ' n. connected ' दृढसंबद्ध. -ness, *s.* आसन्नता, नैकट्यं, संनिधिः अभ्यासः, संनिकर्षः, सामीप्यं. 2 दृढसंसर्गः संबंधः संसक्ति *f.*, परिचयः. 3 कार्पण्यं, दैन्यं.

Neat, *a.* शुद्ध, शोभन, परिष्कृत, विनीत, परिमृष्ट, सुरेख. 2 कुशल, प्रवीण. 3 गोजातीय; ' n.- herd ' गोपालः. -ly, *adv.* विनीतं, शुद्धतया, शोभनप्रकारेण. -ness, *s.* शुद्धता, परिष्कारः, परिपाटि-टी *f.*

Nebula, *s.* शुक्लं, शुक्लपटलं.

Nebulous, *a.* मेघावृत, मेघाच्छन्न; *See* **Cloudy.**

Necessary, *a.* अवश्य, अवश्यंभाविन्, अपरिहार्य, अवश्यकरणीय, अवश्यक, आवश्यक (की *f.*), भवितव्य, भाव्य, अनिवार्य. 2 अपेक्षित, आकांक्षित. 3 विधि-दैव-वश, दैवाधीन; 'the n. result of acts ' कार्य-कर्म-वशः; oft. ex by pot. pass. part. or अर्ह् 1 P. -s. शौचकूपः. -ian, *s.* दैववादिन् *m.*; दैवपरः; *See* **Fatalist.** -ies, *s.* अवश्यवस्तूनि; ' n. of life ' द्रव्यसंभारः, उपकरणसामग्री; अन्नोदकं, अन्नाच्छादनं. -ily, *adv.* अवश्यं, नूनं, खलु, अवश्यं-नियतं-एव.

Necessity, *s.* अवश्यंभाविता, अनन्यगतित्वं, आवश्यकत्वं, अवश्यकता, नियतत्वं, अवश्यकर्तव्यता, कार्यवशः, 2 दैन्यं, दीनता, दुर्गति *f.*, दारिद्र्यं, आपद्दशा. 3 प्रयोजनं,

हेतुः, कारणं, अर्थः, निमित्तं, कार्यं; अपेक्षा, आकांक्षा. 4 भवितव्यता, नियति *f.*, दैवं, विधिः, दैवाधीनता. **-ate,** *v. t.* अवश्यीकृ 8 U; also ex. by अवश्यं; 'your insolence n. s your dismissal ' दुःसत्वात्त्वमवश्यं (स्वाधिकारात्) दूरीकर्तव्यः. 2 प्रवृत् c., अवश्यं कृ c.; *See* **Compel.** **-ous,** *a.* दुर्गत, दीन, दरिद्र.

Neck, *s.* ग्रीवा, गलः, कंठः, कंधरा-रः, शिरोधरा, शिरोधिः; 'back of the n.' अवटुः, घाटा, कृकाटिका; 'n. of a pitcher' पात्रकंठः; 'seize by the n. and turn out' अर्धचंद्रं दत्वा निःसृ c.; 'n.-cloth' 'n.-kerchief' ग्रीवावस्त्रं, गलावगुंठनं, ग्रैवेयकं; 'n.-lace, हारः, माला, सूत्रं, ग्रैवं, ग्रैवेयकं, कंठमाला-भूषा-आभरणं; 'n.-lace of jewels' मणिमाला, रत्नावलि-ली *f.*; 'n.-lace of pearls' मुक्तावलिः; मुक्तालता, मौक्तिकसरः; 'n.-lace of gold' कनकसूत्रं.

Necrology, *s.* मृतजनवृत्तांतः.

Necromancy, *s.* प्रेतसिद्धि *f.*, पिशाचविद्या, भूतविद्या, याज्ञः; *See Magic,* **-ian.**

Nectar, *s.* अमृतं, सुधा, पी(पे)यूषं, सुधा-अमृत-रसः; 'n. of flowers' मधु *n.*, पुष्पासवः, पुष्परसः, मकरंदः, मरंदः. **-ean, -eous,-ine,** *a.* अमृतोपम, सुधातुल्य, अमृत-सुधा-मय (यी *f.*).

Need, *s.* प्रयोजनं, कार्यं, अर्थः, उपयोगः, or ex. by किं (with instr.) कारणं, निमित्तं, हेतुः, अपेक्षा, आकांक्षा; 'rich persons have n. of (even) a starw' तृणेन कार्यं भवतीश्वराणां (P. I. 1); 'according to n. यथाकार्यं, प्रयोजनवशात्. 2 व्यसनं, आपद् *f.*, कृच्छ्रं, कष्टं, दुर्गति *f.*, दुःखं, दारिद्र्यं, क्लेशः, संकटसमयः; 'times of n.' आपत्समयः; 'a friend in n. is a friend indeed' स सुहृद् व्यसने यः स्यात्. **-***v. t.* अपेक्ष् 1 A, आकांक्ष् 1 P; प्रार्थ् 10 A, इष् 6 P; oft. ex. by (*s.*); 'he n. s help' तस्य साहाय्येन प्रयोजनं. 2 (Must) ex. by अवश्यं or by अर्ह् 1 P, or pot. pass. part.; 'you n. not come to me' मां प्रत्यागमनं न तेऽवश्यकं. **-ful,** *a.* अपेक्षित, अपेक्षणीय, अवश्यक आकांक्षित **-less,** *a.* निरर्थक, निष्प्रयोजन, निरपेक्ष, नि-अ-कारणं, अहेतुक. **-lessly,** *adv.* निरर्थकं, निष्प्रयोजनं, व्यर्थं,हेतुं विना **-lessness,** *s.* अकारणं, कारणाभावः. **-y,** *a* दरिद्र, दीन,निःस्व, अकिंचन, दुर्गत; *See* **Poor.** **-Needs,** *adv.* अवश्यं (एव), नूनं, खलु.

Needle, *s.* सूचि-ची *f.*, सेवनी; 'the eye of a n.' सूचिरंध्रं-छिद्रं; 'a magnetic n.' लोहमणिशलाका; 'n.-maker' सूचिकारः; 'n.-woman' सूचिका; 'n.-work' सूचिकर्मन् *n.* सूत्रकर्मन् *n.*

Nefarious, *a.* अतिघोर, अतिदुष्ट, निंद्य, दारुण, दुष्टतम, पापिष्ठ, महा-अति-पातकिन्. **-ly,** *adv.* अतिघोरं, अतिदुष्टतया. **-ness,** *s.* अतिघोरता, पापिष्ठता.

Negative, *a.* अस्वीकारार्थक, निषेधार्थक, नास्तिगर्भ, निषेधद्योतिन्. अभावरूप, अकरणरूप, अभावात्मक; 'n. quantity'- क्षयराशिः. **-***s.* नञ्, निषेधार्थक-अस्वीकारार्थ; क-शब्दः. 2 नास्ति-अभाव-पक्षः, निषेधवाक्यं 'two n.s make one affirmative द्वौ नञौ प्रकृतार्थं गमयतः; 'to reply in the n.' नेति वद् 1 P. **-***v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, प्रत्या-ख्या 2 P, निरस् 4 U, अपलप् 1 P; *See* **Confute, Reject.** **-ly,** *adv.* नेति, नास्तीति, सनिषेधं, अस्वीकारेण. **-Negation,** *s.* प्रत्याख्यानं, प्रत्यादेशः, निषेधः, अस्वीकारः, अपलापः. 2 अभावः.

Neglect, *v. t.* उपेक्ष् 1 A, न अनुष्ठा 1 P or आचर् 1 P, वि-स्मृ 1 P, प्र-मद् 4 P (with abl.), न अव-धा 3 U or श्रु 5 P (words); प्रमादतः त्यज् 1 P; 'n. ed his duty' स्वाधिकारात्प्रमत्तः (Me. 1). 2 अतिचर्, अतिवृत् 1 A, अति-व्यति-क्रम् 1 U, 4 P, उत्,-लंघ् 1 A, 10; त्यज्, हा 3 P, अपास् 4 U. 3 अव-ज्ञा 9 U, अव-मन् 4 A, अवगण् 10, अव-धीर् 10, तिरस्कृ 8 U, न गण् or आदृ 6 A; *See* **Contemn.** **-***s.* **Negligence,** *s.* उपेक्षा, अनपे(वे)क्षा, प्रमादः, अनवधानं, विस्मरण, असावधानत्व 2 त्यागः, अननुष्ठानं, लोपः, अति-व्यति-क्रमः, अतिपातः, लंघनं, उपात्ययः, उत्सर्जनं. 3 अवज्ञा, अवमानः, अनादरः, अवधीरणं-णा. **-ful, -Negligent,** *a.* उपेक्षक, मंदादर, निरपेक्ष, अनवधान, प्रमत्त, अनवहित, असावधान, प्रमादिन्. **-fully,** *adv.* सोपेक्षं, निरपेक्षं, उपेक्षया, मंदादरं, अनवहितं, असावधानं, प्रमादतः, प्रमादेन, सप्रमादं, प्रमत्तवत्, असमीक्ष्य.

Negotiate, *v. i.* व्यवहृ 1 P, पण् 1 A. 2 संधये संवद् 1 P. **-***v. t.* संवि-धा 3 U, व्यवहारेण सं-धा. 2 वि-क्री 9 A. **-ion,** *s.* पणनं, व्यवहारः. 2 संधिक्रमः, सामन् *n.*, शमनं, मध्यस्थाश्रयः. **-or,** *s.* व्यवहारिन् *m.*, पणिकः, व्यवहर्तृ *m.* 2 मध्यस्थः, संधि-साम-विद् *m.* सामकुशलः.

Negro, *s.* श्यामदेहः, कृष्णांगः.

Neigh, *v. i.* हेष्-ह्रेष्-रेष् 1 A. **-***s.*, **-ing,** *s* हे(ह्रे)षा, हेषारवः, हेषितं, अश्वनादः स्वनः.

Neighbour, *s.* प्रतिवेशिन् *m.*, प्रतिवेशः-श्यः, प्रतिवासिन् *m.* प्रातिवेशिकः, निकट or समीप-

स्थः-वर्तिन् *m.* वासिन् *m.*, सामंतः; 'next door n.' प्रातिवेश्यः, अनंतरवासी. -*a* प्रतिवासिन्, समीपस्थ, &c. -*v. t.* निकटे स्था 1 P or वृत् 1 A or वस् 1 P; *See* **Border.** **-hood,** *s.* संनिधिः, उपकंठः, सांनिध्यं, सामीप्यं, संनिकर्षः, उपांतः-तं, नैकट्यं, अभ्यासः. 2 समीप-संनिहित-देशः, सामंतं, प्रतिवेशः, अधिवासः. 3 समीप-निकट-वासिनः, प्रातिवेश्याः, प्रतिवासिनः, (pl.). **-ing,** *a.* समीप-निकट-वर्तिन्, समीप-निकट-स्थ, सामंत, संनिहित, उपांत, आसन्न; *See* **Near.** **-ly,** *a.* प्रतिवासयोग्य; उपकारशील, हित.

Neither, **(nor)** *a., conj.* न-न वा, न च न च, (न च न परिच्छितो न चाप्यगम्यः M. 1), or simply न-न, (मा-मा, with Imperative). 2 एक, एकतर, अन्यतर with न, or by उभौ.

Neogamist, *s.* नवोढः-ढा, नवभार्या, नवपतिः.

Neology, *s.* नूतनन्यायः-मतं. 2 नूतनशब्दाश्रयः. **-ist,** *s.* नूतनमताश्रयिन् *m.* नूतनन्यायसेविन् *m.*

Neophyte, *s.* नवशिष्यः-छात्रः, अनभ्यस्तः, प्राथमकल्पिकः, अपरिचितः.

Nepenthe, *s.* दुःखशमनं.

Nephew, *s.* भ्रात्रीयः, भ्रातृव्यः-जः, भ्रातृपुत्रः-सुतः. 2 (Sister's son) भागिनेयः, स्वस्रीयः, भगिनी or स्वसृ-पुत्रः or सुतः.

Nephritic,-al, *a.* वृक्कसंबंधिन् 2 वृक्करोगहर.

Nepotism, *s.* ज्ञात्यतिस्नेहः, कुलपक्षपातः.

Nereid, *s.* जल-समुद्र-देवता.

Nerve, *s.* शिरा, वस्नसा, स्नसा; धमनि-नी *f.*, मज्जा-ज्ञान-तंतुः. 2 बलं, वीर्यं, तेजस्-ओजस् *n.*, शरीरदृढता. 3 धैर्यं, धृति *f.*, मनःस्थैर्यं **-*v. t.*** बलं-धैर्यं दा 3 U or वृध् c. **-less,** *a.* निर्बल, दुर्बल, शक्तिहीन. **-ous,** *a.* शिराल; मज्जातंतुगत. 2 ओजस्विन्, सबल, वीर्यवत्, ऊर्जस्वल, सुदृढ, धीर. 3 क्षिप्रक्षोभ, कंप-वेपन-शील, धैर्यहीन. **-ously,** *adv.* सवीर्यं, सबलं. 2 सकंपं, धैर्यं विना. **-ousness,** *s.* वीर्यं, ओजस् *n.* ऊर्जस् *n.* बलं. 2 स्नायुविकारः, कंपशीलता, अधृतिः.

Nescience, *s.* *See* **Ignorance.**

Nest, *s.* नीडः-डं, कुलायः, निलयः, पक्षिस्थानं-गृहं. 2 गृहं, स्थानं, आधारः, आशयः; 'find a mare's n.' शशविषाणं आसद् c. or लभ् 1 A. **-Nestle,** *v. i.* (पक्षिवत्) नीडं आश्रि 1 U or अधि-शी 2 A, सुखेन शी or संविश् 6 P or नि-ली 4 A. -*v. t.* पुष् 1, 4, 9 P or c, पा c. (पालयति). **-ing,** *s.* नीडस्थः पक्षिशावः.

Net, *s.* जालं, पाशः, बंधनं-नी, पाशबंधः, वि(वी)तंसः; 'n. for deer' वागुरा, मृगबंधनी, मृगजालं; 'n. for fish' आनायः, जालं; 'n.-work' जाल-सूत्र-कर्मन् *n.* 2 कूटयंत्रं, उन्माथः. -*a.* शुद्ध, अशेष, निरुद्धार, अभग्न, अखंड, अन्यून. -*v. t.* जाले बंध् 9 P or ग्रह् 9 U. 2 जालीकृ 8 U.

Nether, *a.* अधस् in comp.; अधर, अवर, अधःस्थ, अधोभव, अधस्तन (नी *f.*); 'n. world' अधोलोकः; 'n. garment' अधोवासः. **-most,** *a.* अवरतम.

Nettle, *s.* पीतपर्णी. -*v. t.* सं-परि-तप् c., प्रकुप् c., रुष् c.; *See* **Enrage, Excite.**

Neural, *a.* वस्नसा-शिरा-संबंधिन् **-gia,** *s.* वातशूलं.

Neurology, *s.* शिरावर्णनं.

Neurotomy, *s.* शिराच्छेदविद्या.

Neuter, *a.* नपुंसक, क्लीब, तृतीय(या)-प्रकृति, षंढ; 'n. gender' क्लीबं, नपुंसकं; *See* below. **-Neutral,** *a.* मध्यस्थ, तटस्थ, उदासीन, अपक्षपातिन्, समदृष्टि, समभाव, उभयसामान्य, अपक्षपात; *See* **Indifferent.** -*s.* तटस्थः, उभयसामान्यः. **-ity,** *s.* माध्यस्थ्यं ताटस्थ्यं, अपक्षपातः, औदासीन्यं, उभयसाम्यं, समभावः, समदृष्टि *f.* **-ly,** *adv.* औदासीन्येन, उभयसामान्यं, समभावेन. **-Neutralize,** *v. t.* विशिष्ट-गुणान् नश् c., दुर्बलीकृ 8 U, बलं-शक्तिं-नश् c. 2 उदासीनीकृ. **-ation,** *s.* विशिष्टगुणनाशः-शनं, विशेषधर्मलोपः, दुर्बलीकरणं. 2 उदासीनीकरणं. **-ed,** *a.* नष्ट-गुण-शक्ति-बल.

Never, *adv.* न कदाचित्, न कदापि, न कदाचन, न जातु, न कर्हिचित्; 'n.-fading' अजर; 'n.-failing' अमोघ, अक्षय्य; 'n. more' न भूयः, नेतःपरं, न पुनः.

Nevertheless, *conj.* तथापि, किंतु, पुनः, परंतु, परं.

New, *a.* नव, नवीन, अभिनव, नूतन, प्रत्यग्र (of flowers &c.). 2 आधुनिक (की *f.*), इदानींतन-अधुनातन-(नी *f.*), अर्वाचीन. 3 अपूर्व अभूत-अदृष्ट-पूर्व, अश्रुतपूर्व. 4 अनभ्यस्त, अपरिचित, अविज्ञानिन्; 'n. comer' आगंतुकः, नवागतः; 'n.-born' नवोत्पन्न, सद्योजात; 'n.-fangled' 'n. fashioned' नवघटित, नवकल्पित-सृष्ट; 'n. year's day' वर्षप्रतिपद् *f.* **-ly,** *adv.* नवं, प्रत्यग्रं, सद्यः, नूतनं, नव in comp.; 'n. married wife' नवोढा, नवपाणिग्रहणा वधूः; 'n. ripe (blown)' प्रत्यग्रविकासित. **-ness,** *s.* नवीनता, अपूर्वता. 2 नूतनारीतिः, नवाचारः.

News, *s.* वार्ता, वृत्तांतः, प्रवृत्ति *f.*, उदंतः, समाचारः, वृत्तं. 2 संवादः, जनवादः-श्रुति *f.*, लोकप्रवादः, किंवदंती; 'good n.' भद्रं, शुभं, शुभवार्ता; 'ill n.' अशुभं, अशुभ-वार्ता; 'ill n. travels fast' अशुभवार्ता सत्वरं बहुलीभवति; 'n.-monger' वार्तावृत्तिः, वार्तायनः, वार्तावहनवृत्तिः, 'n. paper' वार्ता-समाचार-पत्रं, वृत्तपत्रं.

Newt, *s.* क्षुद्रगोधा.

Next, *a.* (Of time) आगामिन्; 'on Monday n.' आगामिनि सोमवासरे. 2

अनतर, अव्यवहित, अव्यवधान, संसक्त, निरंतराल; 'n. to the skin' शरीरसंसक्त. 3 सन्निहित;पार्श्वस्थ,अंतिक,समीप or निकट- स्थ or वर्तिन्; *See* Near; oft. ex. by पर, अन्य, अंतरं in comp.; 'n. born' अनंतर- ज; 'in the absence of the first, the n. and so on' पूर्वाभावे परः परः; 'on the n. day' पराह्ने, परेद्युः; 'the n. world' परलोकः, लोकांतरं; 'n. door to' अदूर, ईषद्दून (with abl.); कल्प in comp.; 'in the n. world' अमुत्र, परत्र; 'n. moment' क्षणांतरं; 'n. but one' एकांतरं. -*adv.* अनंतरं, परं, परतः (with abl); ततः, तदनंतरं, अथ, परस्तात्, ततः-परं-ऊर्ध्वं; 'what n.' ततः किं, ततस्ततः.

Nexus, *s* बंधः, संधिः.

Nib, *s.* चंचु *f.*, तुंडं. 2 अग्रं, आणि *f.*, अग्र- भागः. **-bed,** *a.* साग्र, आणिमत्.

Nibble, *v. t.* (अल्पाल्पं) दंश् 1 P, अवकृत् 6 P, चर्व् 1 P, 10; क्रमशः-अल्पाल्पशः-खाद् 1 P or कृत् or भक्ष् 10. 2 छिद्रं अन्विष् 4 P, दोषं ग्रह् 9 U, असूयति (D.) (with dat.).

Nice, *a.* ललित, शोभन, सु in comp., सुभग, रम्य, रमणीय, रुचिर, मनोहर, साधु. 2 स्वादु, सुरस, मिष्ट, आस्वादवत्, रुचिर, रुचिकर. 3 सूक्ष्मदृष्टि-दर्शिन्, कुशाग्रबुद्धि. 4 सूक्ष्म, अति- सूक्ष्म, सुपरिशुद्ध, सम्यच्. 5 अस्थूल, सूक्ष्म, विरल (cloth). 6 कोमल, मृदु, पेलव, सुकुमार. 7 अतिसूक्ष्म, अतिनिपुण. **-ly,** *adv.* सुष्ठु, सु pr., ललितं, शोभनं, सम्यक्. 2 सूक्ष्मं, सूक्ष्मत्वेन. **-ness,-ty,** *s.* लालित्यं, रम्यता, स्वादुता, सौरस्यं; सूक्ष्मदृष्टि *f.*, सूक्ष्म- दर्शिता, कुशाग्रमतित्वं, सूक्ष्मता; युक्ति *f.*, नीति *f.*

Niche, *s.* (प्रतिमा-) आधारः, निकेतनं, स्थानं.

Nick, *s.* ग्रंथिः; अवच्छेदः. 2 शुभ-अनुकूल- समयः, युक्त-उचित-कालः, शुभयोगः-कालः- लग्नं. **-*v. t.*** अवच्छिद् 7 P. 2 शुभलग्ने आसद् c.

Nickname, *s.* संज्ञा, उपाधिः, उपाधिनामन् *n.* **-*v. t.*** उपाधिं दा 3 U.

Nictate, *v. i.* निमिष् 6 P; नि-मील् 1 P. **-ion,** *s.* निमेषः; निमीलनं.

Nidification, *s.* नीडकरणं, कुलायरचनं.

Niece, *s.* भ्रातृकन्या-सुता, भ्रात्रीया. 2 (Sister's daughter) भागिनेयी, स्वस्रीया.

Niggard, *s.* कृपणः, क्षुद्रः, कदर्यः. **-*a.*, -ly,** *a.* कृपण, क्षुद्र, कदर्य, त्यागविमुख (खी *f.*), बद्धमुष्टि. **-ly,** *adv.* कृपणवत्, अल्पव्ययेन. **-ness,** *s.* कार्पण्यं, कदर्यता; *See* Miser, &c.

Niggle, *v. i.* कालापव्ययं. कृ 8 U.

Nigh, *a.*, *adv.* *See* Near.

Night, *s.* रात्रि-त्री, रजनिः-नी, क्षपा, निशा, विभावरी, श(शा)र्वरी, यामिनी, त्रियामा, निशीथिनी, क्षणदा, तमस्विनी, तमिः-मी-स्रा, (all *f.*): 'a dark n.' तमिस्रा, तामसी; 'moonlight n.' ज्योत्स्नी, ज्योतिष्मती; 'by n.', 'at n.' रात्रौ, निशि, नक्तं, दोषा; 'number of n.s' गणरात्रं; 'beginning of n.' प्रदोषः, रजनीमुखं, निशामुखं; 'n. and day' रात्रिंदिवं, नक्तंदिवं; 'a n. and 2days' पक्षिणी; 'sitting up at n.' रात्रि- जागरः; 'n.-attack' सौप्तिकं, सौप्तिकाक्रमः; 'n.-blindness' रात्र्यंधता; 'n.-dress' रात्रिवेशः; 'n.-fall' प्रदोषः, निशा-रजनी- मुखं, संध्याकालः, रात्रियोगः; 'n.-hag' रात्रिचरा, रात्र्यटा; 'n.-man' खल-मल-पूः; 'n. mare' दुःस्वप्नः, कुस्वप्नः; 'n.-shade' निदिग्धिका, स्पृशी, व्याघ्री, बृहती, कंटका- रिका, प्रचोदनी, कुली, क्षुद्रा, दुःस्पर्शा, राष्ट्रीका; 'n.-wandering' निशाचर, रात्रि(त्रिं)चर; 'n.-watch' नगररक्षिणः (pl.); यामः, प्रहरः. **-ly,** *a.* नैश (शी *f.*), दोषातन (नी *f.*), (*s.*) in comp.; 'n. watch' रात्रिजागरणं. **-*adv.*** रात्रौ, निशि, नक्तं. 2 प्रतिरात्रं, निशिनिशि, रात्रौ रात्रौ.

Nightingale, *s.* प्रियगीतः, बुल्बुलः.

Nihil, *s.* शून्यं, अभावः. **-ism,** *s.* शून्यवादः. **-ist,** *s.* शून्यवादिन् *m.* **-ity,** *s.* अभावः, शून्यता.

Nimble, *a.* चपल, लघु, लघुगति, लघुशरीर, चपलदेह, क्षिप्र-चपल-गति; 'n.-footed' लघुपाद्; 'n.-handed' लघुहस्त; 'n.- witted' चपल-शीघ्र-बुद्धि. **-ness,** *s.* लघुता, देहचापल्यं, चापल्यं, क्षिप्रता. **-Nimbly,** *adv.* लघु, लघु-द्रुत-गत्या, चपल- तया, द्रुतं.

Nine, *a.*, *s.* नवन्; 'n.-fold' नवगुण. **-Ninth,** *a.* नवम (मी *f.*); 'n.ly' 'in the n. place' नवमस्थानं. **-Nineteen,** *a.*, *s.* नवदशन्, ऊनविंशति *f.*; 'n.-th' नवदश (शी *f.*). **-Ninety,** *a.*, *s.* नवति *f.*

Ninny, *s.* अल्पधीः, मूर्खः, जडः.

Nip, *v. t.* नि-,कृत् 6 P, अवछिद् 7 P. 2 संदंश् 1 P, चर्व् 1 P, 10. 3 पीड् 10, अर्द् 1 P or c. 4 नश् c., उच्छिद्, विशू 6 P or c.; म्लानीकृ 8 U; 'n. in the bud' कलिकावस्थायां एव नश् c., जातमात्रं हन् 2 P or प्रशमं नी 1 P, (जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् P. III. 1). **-*s.*,** **-ping,** *s.* निकृंतनं, अवच्छेदः. 2 हिमार्ती- करणं. **-ped,** *a.* छिन्न, पीडित, &c. 3 हिमार्त, हिमपीडित. **-Nippers,** *s.* संदंशः- शकः, कंकमुखं.

Nipple, *s.* चूचुकः-कं, स्तन-कुच-अग्रं, स्तन- मुखं.

CC0. In Public Domain, Digitization by eGangotri

Nit, *s.* लिक्षा, यूकांडं. **-ty,** *a.* लिक्षापूर्ण.

Nitre, *s.* यवक्षारः, यवाग्रजः, पाक्यः. **-ous,-y,** *a.* यवक्षारमय (यी *f.*).

Nitrogen, *s.* निर्गुणवायु *m.*

No, *adv.* न, नो, नहि; ' n, n. ' मा मैवं. **-a.** (Before nouns) ex. by न; अ, अन्, निर् pr.; हीन, शून्य, रहित in comp., ' n. one ' न कोऽपि न कश्चन; ' n.-body ' न काश्चित्, न काचन; ' having n. issue ' अनपत्य, वंशहीन, &c.

Noble, *a.* कुलीन, अभिजात, आर्य, अभिजनवत्, महाकुल, सत्कुलजात, सद्वंशज, कुल-ज or जात, कुलप्रसूत, वंशविशुद्ध 2 (N.-minded) उदार, महात्मन्, महामनस्, उदात्त, उदार-धी-मति, महानुभाव, महाशय, महेच्छ. 3 महत्, धीर, श्रेष्ठ, उत्कृष्ट, विशिष्ट, उत्तम, महाभाग, उन्नत, प्रमुख, प्रशस्त, वि-प्र-ख्यात, प्रतिपत्तिमत्, सुप्रतिष्ठ, कीर्तिमत्, यशस्विन्; श्रीमत्, महाप्रताप, महातेजस्, तेजस्विन्, ओजस्विन्; *See* **Majestic** also; oft. ex. by ऋषभः, सिंहः, व्याघ्रः, पुंगवः, शार्दूलः in comp.; *See,* **Excellent;** ' n.-looking ' धीरदर्शन; महानुभावाकृति; ' n. in reason ' उदात्तधी ' n. animal ' उदात्तसत्त्वं; ' n. nature ' सत्त्वं. **-s.,** ' N.-man ' शिष्टजनः, कुलीनः, कुलीन-उत्कृष्ट-पदस्थः, आर्यजनः, अभिजनवत् *m.* **-ness,** *s.* महत्त्वं, महिमन् *m.*, उत्कर्षः, उन्नति *f.*, श्रेष्ठता &c.; प्रतापः, वैभवं; *See* below. **-Nobly,** *adv.* कुलीनवत्, आभिजात्येन; ' n. born ' कुलोत्पन्न; *See* (*a.*). 2 औदार्येण, उदारतया, माहात्म्येन, उदारचेतसा, उदात्तं, धीरं. 3 सप्रतापं, अतितेजसा, महाविभूत्या, ऐश्वर्येण. **-Nobility,** *s.* कुलीनता, आर्यता, आभिजात्यं, कुलोत्कर्षः, सद्वंशता. 2 औदार्य, माहात्म्यं, महानुभावः, उदारधीः; महाशयः, महिमन् *m.* 3 महत्त्वं, महिमा, उत्कर्षः, विशिष्टता, श्रेष्ठत्वं, प्रकर्षः, उन्नतिः, प्रतिपत्ति *f.*, प्रतिष्ठा, प्र-नि-ख्याति *f.* 4 प्रतापः, ऐश्वर्यं, विभूति *f.*, ओजस्-तेजस् *n.*, धीरता, श्रीः. 5 शिष्ट-कुलीन-जनः, कुलीनलोकाः-जनाः. **-Noblesse,** *s.* कुलीनजनाः, कुलीनजनसमाजः.

Nocent, *a.* *See* **Mischievous.**

Noctavagant, *a.* रात्रिचर.

Nocturnal, *a.* *See* **Nightly.**

Nod, *s.* शिरःकंपः-चालनं, शिरःसंज्ञा-संकेतः. 2 शिरः-मस्तक-प्रणामः. **-v.** (मस्तकं, शिरः) चल् c.: ' Mâlati n. s her head ' मालती मूर्धानं चालयति (Mal. 8); शिरसा संकेतं-संज्ञां कृ 8 U or दा 3 U; ' n. consent ' शिरःकंपेन अनुमन् 4 A or अनुमतिं सूच् 10. 2 (शिरः) प्र-आ-वि-अव-नम् c. (नमयति).

Nodated, *a.* ग्रंथिल, ग्रंथिमत्.

Noddle, *s.* *See* **Head.**

Noddy, *s.* *See* **Idiot.**

Node, *s.* पातः: 2 अस्थिगुल्मः, गंडः, पिंडः.

Nodose, *a.* ग्रंथिल, ग्रंथिमत्.

Nodule, *s.* घनः, पिंडः; शर्करा, लोष्टः.

Noise, *s.* नि-,नादः, ध्वनिः, शब्दः, नि-,स्वनः, घोषः, महा-उच्च-स्वरः, उत्क्रोशः, वि-,रावः, रवः, निर्ह्रादः; ' rattling n. ' रणितं, रणत्कारः; 'jingling n.' क्वणः, क्वणनं, क्वणितं, ' loud n. ' कलकलः, कोलाहलः, तुमुलं, महाशब्दः-स्वनः-घोषः. 2 जनरवः-प्रवादः-श्रुति *f.*: ' make n. ' नद् 1 P, ध्वन् 1 P, वि-,रु 2 P, रण् 1 P, शब्दायते (D.), कोलाहलं-कलकलं-कृ 8 U; ' shallow water makes great n. ' अर्धो घटो घोषमुपैति नूनं. **-v. t.** घुष् 10, उत्-वि-°, प्रकाश् c., प्र-, ख्या c. (ख्यापयति), प्रकटीकृ. **-ful,** *a.* सशब्द; *See* **Noisy** below. **-less,** *a.* निःशब्द, नीरव, निर्घोष. **-lessly,** *adv.* निःशब्दं, नीरवं. **-Noisy,** *a.* महाशब्द-स्वन-नाद, तुमुल-महाशब्द-कोलाहल-कारिन्, मुखर, घोषण, घोषकारिन्, घोषकर (री *f.*). बहु-महा-घोष; बद्ध-कृत-कलकल. 2 निनादपूरित, कलकलव्याप्त, मुखर, सशब्द, नादित, सं-नि-र्ह्रादिन्. **-ily,** *adv.* उच्चैः-स्वरेण, महाशब्देन. **-iness,** *s.* महाशब्दः-ध्वनिः.

Noisome, *a.* दुर्गंध, पूतिगंधि, कुत्सित, दुष्ट, समल. 2 मारक, मारात्मक, क्षयकर (री *f.*), नाशावह, घातुक, बाधक. **-ness,** *s.* दुर्गंधः, पूति *f.*, उग्रगंधता.

Nomad,-ic, *a.* पशुचारणोपजीविन्; अस्थिरवास.

Nome, *s.* प्र-,देशः, देशभागः.

Nomenclature, *s.* परिभाषा, पारिभाषिकशब्दसंग्रहः.

Nominal, *a.* नामसंबंधिन्, नामविषयक. 2 शाब्द (ब्दी *f.*), शाब्दिक-वाचनिक-(की *f.*). 3 नाममात्र, नामधारिन्-भृत्, नाममात्रधारिन्, शब्द-नाम-in comp.; ' I am but a n. lord of the earth ' ननु शब्दपतिः क्षितेरहं (R. VIII. 52); ' n. verb ' नामधातुः. **-ly,** *adv.* शब्द-नाम-मात्रेण, नामत एव, शब्दतः.

Nominate, *v. t.* नाम-संज्ञां-कृ 8 U, नाम निर्दिश् 6 P; *See* **Call, Name.** 2 (To an office) नियुज् 7 A, 10 or प्रति-ष्ठा c. (-ष्ठापयति). **-ion,** *s.* नियोगः, नियोजनं, प्रतिष्ठापनं. **-ive,** *s.* कर्तृ *m.*, कर्तृवाचकः, प्रथमा विभक्तिः. **-or,** *s.* नियोजकः **-Nominee,** *s.* नियुक्तः, अधिकृतः.

Non, (a prefix) Ex. by अ, अन्; ' n.-acceptance' अपरिग्रहः, अस्वीकारः; 'n.-appearance, n.-attendance' अनुपस्थिति *f.* असंनिधानं, अदर्शनं, अविद्यमानता; ' n.-attainment ' अप्राप्ति *f.*, अलाभः; ' n. attention ' अनवधानं, प्रमादः; ' n.-chalant' निरुत्सुक, अनपे(वे)क्ष, उदासीन, निःस्पृह;

'n.-compliance' अननुरोधः, अननुवर्तनं, विरोधः; 'n.-conductor' अवाहकः, अनायकः; 'n.-conformist' अननुरोधिन् *m.*, अननुवर्तिन्; सामान्यधर्मविरोधिन् *m.* मतांतरग्राहिन् *m.* 'n.-comformity' अननुरोधः, मतांतरग्रहणं; 'n.-descript' अवर्णित, अकृतलक्षण; 'n. resistance' अप्रतीकारः; &c. &c.

Nonage, *s.* बाल्यं, बाल्यदशा; *See* Minority.

Nonagenarian, *s.* नवतिवर्षीयः.

Nonagon, *s.* नवकोणाकृति *f.*

Nonce, *s.* अवसरः, कालः; 'for the n.' अस्मिन्समये.

Nonchalance, *s.* औदासीन्यं, अनपेक्षा.

Nondescript, *a.* विचित्र, अपरूप, विलक्षण

None, *a.* न कश्चित्, न कोपि, न कश्चन, न काचित्, &c.; oft. ex. by न with other words; 'n. other' नान्य, नेतर; 'n. but' एव; with compar. adj.) न किमपि, न ईषदपि, न मनागपि, न स्तोकमपि.

Nonentity, *s.* अभावः, असंभवः, असत्ता, असद्भावः, शून्यता. 2 शून्यं, अवस्तु *n.*; 'he is a n. in the kingdom' राज्ये अकिंचित्करः सः.

None-such, *s.* निरुपमं or अद्वितीयं वस्तु *n.*

Nonfeasance, *s.* अकर्मन् *n.*

Nonpareil, *a.* अप्रतिम, अनुपम, अद्वितीय.

Nonplus, *v. i.* कुंठ् 10, वि-,मुह् c., आकुलीकृ 8 U, निरुत्तरीकृ. -*s* कुंठता, वि-,मोहः, निरुत्तरता, अगति *f.*, निरुपायता. **-ed,** *a.* कुंठित, निरुपाय, गतिहीन, अगतिक, मूढ, निरुत्तर.

Nonsense, *s.* असंबद्ध-अनर्थक-वाक्यं-वचनं-भाषणं, मृषाकथा-आलापः, प्रलापः, जल्पितं, असत्यं, अयाथार्थ्यं, अनर्थकं; 'to talk n.' प्रलप् 1 P, प्रजल्प् 1 P, असंबद्धं भाष् 1 A; 'talking n.' असंबद्धप्रलापिन्, वाचाल, जल्पक. **-Nonsensical,** *a.* असंबद्ध, असंगत, अनर्थक, निरर्थक, मृषार्थक, अयथार्थ. **-ly,** *adv.* अनर्थकं, असंबद्धं, असंगतं, मृषा, वृथा. **-ness,** *s.* असंबद्धता, &c.

Nonsuited, *a.* नष्ट-हीन-वाद, अवसन्न,: अर्थाद् हीन; 'to be n.' अवसद् 1 P, अर्थाद्-वादाद् हा pass.

Noodle, *s.* मूढः, मूर्खः, अल्पधीः, जडमतिः.

Nook, *s.* कोणः, अस्रः; विविक्तस्थानं.

Noon, *s.* (N.-time) मध्याह्नः, मध्यदिनं, मध्याह्नकालः. -*a.* माध्याह्निक (की *f.*), माध्यंदिन (नी *f.*).

Noose, *s.* पाशः, वागुरा, बंधनं; *See* Snare; 'n. for the neck' कंठपाशः. -*v. t.* पाशेन बंध् 9 P, पाशे ग्रह् 9 U or पत् c.

Nor, *conj.* न च, न वा; *See* Neither.

Norm, *s.* आदर्शः, निदर्शनं. 2 विधिः, नियमः, सूत्रं. **-al,** *a.* यथाक्रमं, वैधिक (की *f.*). 2 विद्यारंभशिक्षक.

North, *s.* उत्तरा, उदीची, उत्तरदिश्-दिशा, उत्तराशा, कौबेरी; 'to the n.' उत्तरे (with abl.), उत्तरतः (with gen.); 'facing the n.' उदङ्मुख-*a.* (खी *f.*). -*a.*, -erly, -ern, *a.* उत्तर, उदीचीन, उत्तरस्थ, उदीच्य, उदच्; 'in a n. direction' उत्तरेण (with acc. or gen.); 'n.-east' उत्तरपूर्वा, पूर्वोत्तरा, ऐशानी, प्रागुत्तरा, प्रागुदीची; (*a.*,-erly,-ern), प्रागुत्तर, पूर्वोत्तर, प्रागुदीचीन; पूर्वोत्तरस्थ; 'n.-pole' 'n.-star' ध्रुवः; 'n.-west' उत्तरपश्चिमा, वायवी; (*a.*,-erly,-ern) वायव, वायुदिक्स्थ. **-ward,** *a.* उत्तर, उत्तरदिक्स्थ. **-wards,** *adv.* उत्तराभिमुखं, उत्तरतः, उत्तरेण, उत्तरदिशि.

Nose, *s.* नासा, नासिका, घ्राणं, घोणा, नसा, नस्या, गंधवहा, गंधज्ञा; 'led by the n.' नस्योत, नस्तित; (fig.) यथेच्छं कृष्ट, स्वेच्छया नीत; 'aquiline n.' शुकनासा; 'having a sharp n.' खरणस्, खरणस; 'having a hoof-like n.' खुरणस्, खुरणस; 'having a flat n.' नतनासिक; *See* under **Flat**; 'having a prominent n.' प्रलंबघोण, घोणोन्नत; 'breathing through the n.' नासिकंधम; 'n.-string' नास्यं; 'n.-cut' छिन्ननास; 'n.-gay' कुसुमस्तबकः, पुष्पगुच्छः, गुच्छः, गुत्सः; 'n.-ring' नासाभरणं. **-less,** *a.* अ-वि-नासिक, विग्र, विख्र, विख्य, गतनासिक. **-Nostril,** *s.* नासारंध्रं-विवरं-छिद्रं-पुटं-बिलं.

Nosology, *s.* रोगनिदानशास्त्रं.

Nostrum, *s.* गुप्तौषधं.

Not, *adv.* न, नो, न हि. 2 (Prohibitive) मा; oft. by अलं with instr. or gerund; 'do n. fear' अलं भयेन, मा भैषीः; 'do n. boast much' अलमलं बहु विकत्थ्य (M. 1); 'do n. do so', 'do n. say so' मा मा एवं; (rather angrily) मा तावत्. 3 (Privative) अ, निर्, अन्, वि pr.

Notch, *s.* छेदः, दंतः, भंगः; 'n. of a bow' अटनि-नी *f.* -*v. t.* अव-,छिद् 7 P, दंतुरी-भंगुरी-कृ 8 U. **-ed,** *a.* दंतुर, भंगुर, दंतुरित.

Note, *s.* लिंगं, लक्षणं, चिह्नं, अंकः; अभिज्ञानं. 2 स्मरणचिह्नं, स्मरणं. 3 टीका, व्याख्या, भाष्यं, टिप्पनी, वृत्ति *f.*; 'edited with n. s' टिप्पनीसमवेतं प्रकाशितं (पुस्तकं). 4 स्वरः, क्वणः; 'a wrong n.' अप-वि-स्वरः; 'high n.' तारः, तारस्वरः; 'cracked n.' काकस्वरः; 'key-n' वादिन् *m.*; (the seven n. s being निषादः, ऋषभः, गांधारः, षड्जः, मध्यमः, धैवतः, पंचमः); 'sweet n.' काकली; 'sweet indistinct n.' कलः; 'deep n.' मंद्रः; 'continued n.' एकतालः. 5 ख्याति *f.*, कीर्ति *f.*, यशस् *n.*, प्रतिष्ठा. 'of n.' विश्रुत, लब्धकीर्ति-प्रतिष्ठ. 6

वि-,रुतं, रावः, नादः, स्वनः, शब्दः, ध्वनिः. 7 अवेक्षा, अवधानं, मनोयोगः, अभिनिवेशः; 'take n. of' अवेक्ष् 1 A, अव-धा 3 U, मनसि-चित्ते-कृ 8 U, अवधृ 10. 8 पत्रं, पत्रकं, लेखः, लेख्यं; 'n.-book' स्मरण-अंकन-पुस्तकं; 'n.-worthy' स्मरणीय, स्मरणार्ह, अवेक्षणीय. *-v. t.* निर्वर्ण् 10, आलक्ष् 10, निरूप् 10, अवेक्ष्, आलोच् 10, आलोक् 1A, 10. 2 लिख् 6 P, (लेख्ये) आरुह् c. (रोपयति), (पत्रे) निविश् c. 3 अंक् 10, चिह्नयति (D.). **-able,** *a.* स्मरणीय, स्मरणार्ह, स्मर्तव्य. 2 विशिष्ट, उत्कृष्ट, परम; ख्यात, प्रसिद्ध, विशेष in comp.; 'a n. guest' अतिथिविशेषः. *-s.* कुलीन-विशिष्ट-जनः, आर्यः; *See* Noble. **-ably,** *adv.* प्रसिद्धं, विशेषेण, विशेषतः. **-ary,** *s.* लेखकः, लिपिकारः, लिपिजीविन् *m.* **-ation,** अंकनं, अंकविद्या. **-ed,** *a.* लक्षित, निरूपित, लिखित, पत्रारूढ. 2 प्र-वि-ख्यात, सुविश्रुत, प्रसिद्ध, लब्धप्रतिष्ठ, प्रथित.

Nothing, *s.* अभावः, शून्यं, असत् *n.*, अवस्तु *n.*, असत्त्वं. 2 न किंचित्, न किमपि, न स्तोकमपि. 3 अल्प-लघु-विषयः, अल्पार्थः, अगुर्वर्थः; 'for n.' अकारणं, अनिमित्तं, वृथा, मुधा, निरर्थकं; 'good for n.' व्यर्थ, निरर्थक, अकिंचित्कर (री *f.*); 'n. but' नान्यत् किमपि (with abl.). *-adv.* न मनागपि, न किंचिदपि, न स्तोकमपि, न मनाक्, न किमपि. **-ness,** *s.* अभावः, शून्यता.

Notice, *v. t.* लक्ष् 10, सं-आ-°, निरूप् 10, आलोक् 1 A, 10, प्र-अव-निर्-परि-ईक्ष् 1 A, दृश् 1 P, निर्वर्ण् 10. 2 मनो दा 3 U, अव-धा 3 U, सावधान *-a.* भू 1 P. 3 अभि-धा, निर्दिश् 6 P, उद्दिश्, कथ् 10, वर्ण्. 4 संभू c., आदृ 6 A, संमन् c., सत्कृ 8 U. *-s.* आलोकनं, निरूपणं, अवेक्षा-क्षणं, परीक्षा-क्षणं. 2 निर्देशः, उल्लेखः, अभिधानं, उद्देशः, कथनं, वर्णनं. 3 अवेक्षा; मनोयोगः, अवधानं, चित्ताभिनिवेशः, विचारः, गणना; 'take n. of' आदृ, अवेक्ष्, विचर् c., आलोच् 10; *See* Consider. 4 सूचना, निवेदनं, बोधनं, बोधः. 5 विज्ञापना, विज्ञप्ति *f.*, घोषणं-णा, ख्यापना; 'written n.' घोषण-विज्ञप्ति-प्रसिद्धि-पत्रं. 6 आदरः, सत्कारः, संभावना, संमानः.

Notify, *v. t.* वि-,ज्ञा c. (ज्ञापयति), बुध् c., प्रकाश् c., सूच् 10, घुष् 10, प्र-ख्या c., (ख्यापयति), नि-आ-विद् c., कृत् 10. **-ication,** *s.* विज्ञापनं-ना, विज्ञप्ति *f.*, घोषणा, सूचनं-ना, ख्यापनं.

Notion, *s.* मति *f.*, बुद्धि *f.*, बोधः, मनोगतं, मतं, कल्पना, भावः, अभिप्रायः, भावना, आशयः, वासना; 'under the n. that' इति बुद्ध्या. **-al,** *a.* मनः-सृष्ट, मनोगत, मनःकल्पित, संकल्पज; *See* Ideal.

Notorious, *a.* प्रसिद्ध, प्र-वि-ख्यात, प्रथित, विश्रुत, विज्ञात, लोकप्रसिद्ध-विश्रुत, लौकिक (की *f.*); 'a n. report' सार्वलौकिकः प्रवादः. 2 दुर्नामन्, कुख्यातिमत्, ख्यातगर्हण, कुप्रसिद्ध; 'a n. thief' सर्वविज्ञातः चौरः; 'to become n.' बहुलीभू 1 P, प्रकटीभू, सर्वप्रकाशतां गम् 1 P. **-ly,** *adv.* सुप्रसिद्धं, प्रकटं, ख्यातगर्हणं. **-ness,-Notoriety,** *s.* प्र-वि-ख्याति *f.*, प्रकाशता, प्रसिद्धि *f.*, विश्रुति *f.*, प्रथा. 2 दुर्नामन् *n.*, कुकीर्ति *f.*, वाच्यता, अपकीर्तिः.

Notwithstanding, *part.* तथापि, तदपि, एवं सत्यपि; gen. ex. by gen. or loc. abs. or by अनादृत्य (with acc.); 'n. his teacher's presence' विद्यमानेपि गुरौ; *See* 'In spite of' under Spite.

Nought, *s.* *See* Naught.

Noun, *s.* नामन् *n.*, विशेष्यं, सुप्, वाचकः.

Nourish, *v. t.* परि-, पुष् 1, 4, 9 P or c., संवृध् c., परि-,पा c. (पालयति), सं-,भृ 1, 3 U; (अन्नादिना) आप्यै c., बृंह् c., वृध् c., संतृप् c. **-er,** *s.* पालयितृ *m.*, संवर्धकः. **-ing,** *a.* पुष्टिकर (री *f.*), पुष्टिद, पौष्टिक (की *f.*). **-ment,** *s.* पोषणं, पुष्टि *f.*, पालनं, संवर्धनं, भरणं, अन्नदानं. 2 आहारः, भोजनं, भक्ष्यं, अन्नं, पौष्टिकं, जीवनसाधनं.

Novel, *a.* नव, नूतन, नवीन, अपूर्व, अदृष्ट-अश्रुत-पूर्व, अद्भुत; *See* New. *-s.* कल्पित-कथा, आख्यायिका, प्रबंधकल्पना, कूटार्थ-कथा. **-ist,** *s.* आख्यायिकाकारः. **-ty,** *s.* पूर्वता, नवता, नूतनता. 2 अदृष्टपूर्वं वस्तु, कौतुकं, अद्भुतं.

November, *s.* कार्तिकमार्गशीर्षं.

Novennial, *a.* नववर्षीय.

Novercal, *a.* वैमात्रेय, वैमातृक (की *f.*), विमातृयोग्य.

Novice, *s.* शैक्षः, प्राथमकल्पिकः, नवशिष्यः छात्रः, अनभ्यस्तः, अलब्धकौशलः. **-Novitiate,** *s.* नवशिष्यता, अनभ्यासः, विद्यार्थ-नवच्छात्रदशा. 2 नवाभ्यासकालः, भावावधिः.

Now, *adv.* अधुना, इदानीं, संप्रति, सांप्रतं, प्रस्तुत-वर्तमान-काले, इहसमये. 2 अथ, अथातः, अतःपरं, अतः; 'n.-n.' क्वचित्-क्वचित्, कदाचित्-कदाचित्, अंतरा-अंतरा, (अंतरा पितृसकामंतरा मातृसंबंधमालापं कुर्वन् Ka. 118); 'n. and then' काले काले, कदाचित्, कदापि; 'till n.' अद्य यावत्; 'from n.' अद्यारभ्य, अद्य प्रभृति, अतःपरं; 'just n.' अधुनैव, अचिरात्, इदानीमेव; 'n.-a-days' एषु दिवसेषु, संप्रति, अधुनातनकाले; 'n.-a-days people' इदानींतना-आधुनिका-जनाः.

No-wise, *adv.* न सर्वथा, न कथमपि.

Noxious, *a.* हिंस्र, उपद्रविन्, हिंसक, दुष्ट, हिंसालु, घातुक, अपकारिन्, हिंसात्मक, अहित-अनिष्ट-कारिन्; *See* Harmful.

Nozzle, *s.* नासाग्रं, प्रोथः, नस्तः; अग्रं, अग्रभागः.

Nubile, *a.* *See* Marriageable.

Nubilous, *a.* मेघावृत, अभ्राच्छन्न; *See* Cloudy.

Nucleus, *s.* बीजं, गर्भः; संचयास्पदं.

Nude, *a.* नग्न, विवस्त्र; *See* Naked. -ation *s.* विवस्त्रीकरणं. -ity, *s.* नग्नता

Nudge, *v. t.* कूर्परेण चल् c.

Nugatory, *a.* व्यर्थ, मोघ, निरर्थक, निष्फल, विफल, निष्प्रभाव, अप्रमाण, आनिष्पन्न.

Nugget, *s.* पिंडः, घनः.

Nuisance, *s.* उत्पातः, कंटकः, (of persons); बाधा, पीडा, पीडा-क्लेश-हेतुः; 'public n.' लोककंटकः; 'family n.' कुलाधिः, गृहोत्पातः.

Null, *a.* मोघ, व्यर्थ, निष्फल, विफल, निर्बल, निष्प्रभाव, अनिष्पन्न, लुप्त, वृथा-मुधा in comp. -ify, *v. t.* मोघी-विफली- कृ 8 U, लुप् 6 P or c., खंड् 10. -ity, *s.* मोघता, व्यर्थता, वैफल्यं. 2 अभावः, शून्यता.

Nulla, *s.* प्रणाली.

Numb, *a.* जड, सुप्त, स्तब्ध, अस्पंद, अचेतन, चैतन्य-रहित, स्तब्धगति; 'n. with cold' शीताकुल. -*v. t.* जडीकृ 8 U, जडयति (D.), चैतन्यं हृ 1 P or स्तंभ् 9 P or c. -ness, *s.* जाड्यं, स्तंभः, जडिमन् *m.*, स्वापः, त्वक्सुप्ति *f.*, चैतन्यनाशः-स्तंभः.

Number, *s.* संख्या, राशिः. 2 संख्या, गणना, परिमाणं. 3 गणः, समूहः, निवहः, संघः; *See* Multitude; oft. ex. by बहु, बहुल, प्रचुर, अनेक, or जनः in comp.; 'a n. of young women' युवतिजनः, तरुणीगणः; 'in n. s' संघशः, गणशः, बहुशः, अनेकशः; 'a whole n.' अभिन्नं. 4 अंकः. 5 छंदस् *n.*, पद्यं, कविता. 6 वचनं; 'science of n.' गणितं, व्यक्तगणितं, अंकविद्या; '100 in n.' शतं, शतसंख्यक. -*v. t.* सं-परिसंख्या 2 P, गण् 10, संकल् 10 (कलयति). 2 अंक् 10, अंकं लिख् 6 P or स्था c. (स्थापयति); oft. ex. by संख्या in comp.; 'the enemy's force n. ed 500' पंचशतसंख्यं शत्रुसैन्यं. -er, *s.* गणकः, संख्याकृत् *m.* -ing, *s.* गणनं-ना, संख्यानं. -less, *a.* असंख्य, संख्यातीत, गणनातीत, अगण्य, असंख्यात.

Numbles, *s.* मृगांत्राणि.

Numeral, *s.* संख्या, अंकः -*a.* संख्यात्मक, संख्यावाचक-विषय, संख्या in comp. -ly, *adv.* यथासंख्यं.

Numerary, *a.* नियतसंख्यक.

Numeration, *s.* संख्यानं, गणना.

Numerator, *s.* अंशः, लवः.

Numerical, *a.* संख्या in comp.; 'n. superiority' संख्याधिक्य-उत्कर्षः. -ly, *adv.* संख्यामपेक्ष्य-उद्दिश्य, यथासंख्यं.

Numerous, *a.* बहु. बहुसंख्य, बहुल, भूरि, अनेक, प्रचुर, नैक; *See* Many. -ly, *adv.* बहुशः, बाहुल्येन, अनेकशः.

Numismatics, *s.* मुद्राविद्या.

Numskull, *s.* *See* Idiot, Fool.

Nun, *s.* परिव्राजिका, तपस्विनी, मठवासिनी, ब्रह्मचारिणी, तपोनिष्ठा. -nery, *s.* विहारः, मठः.

Nuncio, *s.* धर्माध्यक्षदूतः.

Nuncupative, *a.* शाब्दिक, वाचिक, अलिखित.

Nuptial, *a.* वैवाहिक-औद्वाहिक (की *f.*), वैवाह (ही *f.*), विवाह-परिणय- in comp.; 'n. ceremony' परिणयविधिः, विवाहक्रिया; 'n. gift' यौतकं. औद्वाहिकं, पारिणाय्यं; 'n. s' विवाहः, उद्वाहः. परिणयः, पाणिग्रहणं.

Nurse, *s.* धात्री, उपमातृ *f.*, मातृका, अंकपाली. 2 परिचारिका, उपचारिका, रुग्णपालिका. 3 पालकः, पोषकः. -*v. t.* (रोगिणं) उपचर् 1 P, सेव् 1 A, परि-पा c. (पालयति; यत्नादुपचर्यतामसौ (S. 3) 'let her be carefully n. ed.' 2 पा c. (पालयति), पुष् 1, 4, 9 P, वृध् c., लल् 10; *See* Nourish. 3 दुग्धं पा c. (पाययति), स्तन्यं दा 3 U or धे c. (धापयति). -ery, *s.* पालन-पोषण-स्थानं; बालगृहं-स्थानं; 'n. song' शिशुगीतं; 'n. man' पुष्पाजीविन् *m.* -ing, *s.* उपचारः, सेवा. 2 पालनं, पोषणं, लालनं. -ling, *s.* स्तनंधयः, स्तनपः, बालः, शिशुः.

Nurture, *v. t.* विनी 1 P, शिक्ष् c., उपदिश् 6 P. 2 पा c. (पालयति), पुष् 1, 4, 9 P or c., वृध् c.; *See* Nourish. -*s.* आहारः, भक्ष्यं. 2 शिक्षणं, विनयः, उपदेशः. 3 पोषणं, पालनं, वर्धनं.

Nut, *s.* फलं; बीजं, गर्भः (internal contents); 'cocoa-n.' नारिकेलफलं; 'n. crackers' संदंशः-शकः; 'n-meg' जाति(ती)फलं, पुटकं; 'n.-shell' बीजकवचः-पुटं. -arian, *s.* फल-आहारिन्-उपजीविन् *m.*

Nutant, *a.* प्रणतशिरस्. -Nutation, *s.* शिरःकंपः.

Nutrition, *s.* पोषणं, पालनं, पुष्टि *f.*, आप्यायनं.

Nutriment, *s.* आहारः, पुष्टिदं अन्नं.

Nutritious,-Nutritive, *a.* पुष्टिकर (री *f.*), पुष्टिद, पौष्टिक (की *f.*), पोषक, धातु-बल-वर्धन (नी *f.*).

Nux vomica, *s.* वरस्वरा

Nuzzle, *v. i.* नासां अवनम् c. (नमयति).

Nymph, *s.* अप्सरस् *f.*, अप्सरा, स्वर्गस्त्री; देवता in comp.; 'wood-n.' वनदेवता; 'sea-n.' जलदेवता.

Nymphomania, *s.* उत्कटा, सुरतेच्छा.

O.

O, Oh, *interj.* हे, भोः, अयि, अये, अरे; हा, अहह (sorrow). 2 अहो (joy and surprise), हंत, अहो, बत. 3 आः (anger &c.). 4 आ, आं; 'oh for' ex. by अपि नाम; 'oh for a lodge in a wilderness' अपि नाम विपिने निवासं लभेय; 'oh that' *See* **Would.**

Oaf, *s. See* **Fool.**

Oak, *s.* सिंदूरः.

Oakum, *s.* खंडितरज्जु *f.*

Oar, *s.* क्षे(क्षि)पणि-णी *f.*, नौ-नौका-दंडः. —*v. t.* क्षेपण्या चल् c. or वह् c.; *See* **Row.** —**Oarsman,** *s.* नौदंडधरः.

Oasis, *s.* (मरुमध्ये) शाद्वलस्थलं, रम्यस्थानं.

Oath, *s.* शपथः, अभिशापः, वचनं, प्रतिज्ञा, समयः; 'bind by an o.' शप् c.; 'to take an o.' शप् 1, 4 U, शपथं शप्; 'with an o.' सशपथं, शपथपूर्वं.

Obdurate, *a.* अनम्य, कठिन, कठिनहृदय-चित्त, अनुतापविमुख (खी *f.*), दुराग्रह; *See* **Hard.** —**Obduracy,** *s.* चित्तकाठिन्यं, कठोरहृदयता, अनुतापविमुखता; काठिन्यं, कठोरता.

Obeisance, *s.* नमस्कारः; प्रणामः, प्रणति *f.*, वंदनं, प्रणिपातः, नमस्या; अभिवादनं; 'prostrate o.' साष्टांगप्रणामः-नमस्कारः, अष्टांगपातः; 'to make an o.' प्रणम् 1 P, प्रणिपत् 1 P, नमस्कृ 8 U, अभिवद् c.

Obelisk, *s.* सूच्याकारः स्तंभः.

Obese, *a.* पीन, पीवर, स्थूल; *See* **Fat.**

Obey, *v. t.* (Orders) कृ 8 U, अनु-ष्ठा 1 P, अनुवृत् 1 A, अनुवि-धा 3 U, पा c. (पालयति); अनुरुध् 4 A, मन् c., प्रतिग्रह् 9 P, अभ्युप-इ 2 P or गम् 1 P; (persons) वचनं श्रु 5 P, शासने स्था, आज्ञां-वचनं-अनुवृत्, यथादिष्टं वि-धा; श्रु desid. (शुश्रूषते), उपचर् 1 P, सेव् 1 A, उपास् 2 A, आज्ञां कृ or अनुरुध् &c. —**Obedient,** *a.* आज्ञानुवर्तिन्, आज्ञाकर (री *f.*), आज्ञाविधायिन्, अनुविधायिन्, अनुरोधिन्, आज्ञा-निदेश-कारिन्. आज्ञापर, विधेय, विनयग्राहिन्, वचने स्थित, आश्रव, वश्य, प्रणेय, वशानुग, शुश्रूषु, आज्ञावचनग्राहिन्-सेविन्, आज्ञाधीन; 'o. to one's parent' पितृवश्य, पितृवचनपर. —**ly,** *adv.* आज्ञानुसारेण, यथाज्ञं, यथादिष्टं, निदेशानुरोधेन. —**Obedience,** *s.* आज्ञानुवर्तनं-अनुरोधः-अनुसारः-अनुसरणं-करणं-पालनं-सेवनं-धारणं, वश्यता, अनुविधायित्वं, शुश्रूषा, आज्ञाकरत्वं, आज्ञापरता, अनुवर्तनं, अनुरोधः.

Obit, *s. See* '**Death.**' —**uary,** *a.* मृत्युसंबंधिन्. —*s.* मृत्युलेखः.

Object, *s.* द्रव्यं, वस्तु *n.*, अर्थः, विषयः, इंद्रियार्थः; 'visible o.' चक्षुर्विषयः; (fig.) पात्रं, पदं, स्थानं, आस्पदं, भाजनं, भूमि *f.*, विषयः; 'o. of confidence' विश्वासास्पदं, विश्वासभूमिः; 'the sole o. of my affection' स्नेहस्यैकायनीभूता (M. 2); 'o. of dispute' विवादविषयः, व्यवहारास्पदं. 2 अर्थः, फलं, हेतुः; (desired o.) अभीष्टं, इष्टं, समीहितं, कांक्षितं, ईप्सितं, कामः, मनोरथः; *See* **Desire.** 3 निमित्तं, कारणं, प्रयोजनं, कार्यं. 4 अभिप्रायः, आशयः, तात्पर्यं, उद्देशः, लक्ष्यं; 'with what o. in view' किमपेक्ष्य फलं, केन हेतुना, किमुद्दिश्य, किंनिमित्तं, किमर्थं; 'accomplishment of one's o.' कृतार्थता, चरितार्थता, इष्टसिद्धि *f.*, फलप्राप्ति *f.*; 'highest o.' परमार्थः; 'o. of hearing' श्रुतिविषयः. 5 कर्मन् *n.*; 'a root governing two o.s' द्विकर्मकः धातुः. —*v.* वि-प्रति-रुध् 7 U, बाध् 1 A, खंड् 10, निरस् 4 U, अधरीकृ 8 U, अपवद् 1 A, न अनुमन् 4 A or अनुमुद् 1 A, दोषं ग्रह् 9 U, 'the sage will not o. to this' नात्र दोषं ग्रहीष्यति कुलपतिः (S. 3); निप्रति-षिध् 1 P, (तदेष सर्गः न भवद्भिः प्रतिषेधनीयः R. xiv. 42); in discussions gen. ex. by ननु, इति चेत् or कथं तर्हि, followed by उच्यते or अत्रोच्यते (we reply); प्रत्यव-स्था 1 A, वितंड् 1 A. —**ion,** *s.* बाधः-धा, अपवादः, विरोधः, आक्षेपः, दोषः, आपत्ति *f.*, कक्षा, उद्ग्राहः, विरुद्धहेतुः, विप्रतिषेधः, प्रत्यवायः, प्रतिबंधः, पर्युदासः; 'making an o.' दोषग्रहणं, विरोधोपन्यासः; 'settling an o.' समाप्रतिसमा-धानं, आक्षेपपरिहारः. —**ionable,** *a.* बाध्य, सबाध, सदोष, निषेधार्ह, वर्ज्य, परिहार्य, आशंकनीय. —**ive,** *a.* विषयाश्रित, पदार्थनिष्ठ, कर्मविषयक. —**or,** *s.* बाधकः, अपवादकः.

Objuration, *s.* शपथः.

Objurgate, *v. t.* निंद् 1 P, भर्त्स् 10 A, तिरस्कृ 8 U, उपालभ् 1 A, आ-अधि-क्षिप् 6 P. —**ion,** *s.* निंदा, भर्त्सनं-ना, उपालंभः, आक्षेपः, धिक्कारः; *See* **Censure.** —**ory,** *a.* निंदक, निंदार्थक.

Oblation, s. बलिः, उपहारः, उपायनं; हव्यं, हवनं, हुतं, आहुति *f.*, इष्टि *f.*, यागः, निर्वपणं; ' o. of eatables ' नैवेद्यं; ' o. to all deities ' वैश्वदेवः; ' to make o. s to fire ' हु 3 P.

Obligate, *v. t. See* Oblige, below.

Oblige, *v. t.* Ex: by causal of verbs, gen. with बलेन or बलात्; प्रयुज् 10, प्रवृत् c.; *See* **Compel.** 2 नियमपूर्वं-सप्रतिज्ञं बंध् 9 P. 3 अनुग्रह् 9 P, उपकृ 8 U, उपकारेण बंध्, हितं-प्रसादं-उपकारं कृ; ' I am much o. ed to you for this reward' एतेन पारितोषिकदानेन भवता सुतरामुपकृतोस्मि-अनुगृहीतोस्मि; ' I am much o. ed ' अनुगृहीतोस्मि, महानयं प्रसादः. **-ation,** *s.* अवश्यकता, कर्तव्यता, भारः, ऋणं, बंधः, धर्मः; ' free from the o. s of debt ' ऋणमुक्त, मुक्तर्ण, अनृण; religions o. ' व्रतं, नियमः, चोदना, विधिः. 2 संविद् *f.*, समयः, प्रतिज्ञा, नियमः, अभ्युपगमः, संधा, सं-आ-श्रवः. 3 अनुग्रहः, उपकारः, उपकृति *f.*-तं, हितं; प्रियं; ' under o. ' उपकृत-अनुगृहीत-*a.*; ' my o. s to you are immense ' तव मयि उपकाराः संख्यातीताः; ' to lay under o. s ' उपकृ; *See* (*v.*). **-atory,** *a.* अवश्यक आवश्यक (की *f.*), अपरिहार्य, अवश्यकर्तव्य; oft. ex. by अवश्यं; *See* under **Compel.**-**ing** *a.* अनुग्रह-उपकार-शील, उपकारिन्, अनुग्राहिन्, हित-उपकार-बुद्धि, सुशील, दाक्षिण, अनुकूल, सुजन. **-ingly,** *adv.* दाक्षिण्येन, सुजनतया, सानुग्रहं, सुशीलवत्. **-ingness,** *s.* उपकार-अनुग्रह-शीलं, सौजन्यं.

Oblique, *a.* वक्र, कुटिल, जिह्म, असरल, तिर्यच्, अनृजु, विषम; ' o. speech ' वक्रोक्ति *f.*, भंगि-गी *f.*, उपरोधवचनं; ' o. case' अप्रधानकारकं. **-ly,** *adv.* वक्रं, कुटिलं, तिर्यक्, तिरः, साचि, जिह्मं.-**ness,** *s.* वक्रता, कौटिल्यं, अनृजुता, वैषम्यं; ' o. of sight ' वक्रदृष्टि *f.*, दृष्टिवक्रता; ' o. of conduct' विमार्ग-उत्पथ-गमनं, असदाचारः, सत्पथभ्रंशः-त्यागः.

Obliterate, *v. t.* वि-,लुप् 6 P or c., प्र-परि-अव-मृज् 2 P or c., व्यामृश् 6 P or c., विनश् c., उच्छिद् 7 P, उन्मूल् 10. **-ion,** *s.* लोपः, मार्जनं, व्यामर्शः, उच्छेदः.

Oblivion, *s.* अ-वि-स्मृति *f.*, अ-वि-स्मरणं; ' to bury into o. ' विस्मृ 1 P. 2 दोषविस्मरणं. **-Oblivious,** *a.* स्मृतिहर (री *f.*), विस्मारक, विस्मृतिकर (री *f.*). 2 विस्मरणशील.

Oblong, *a.* दीर्घाकार, आयत, दीर्घचतुरस्र. **-s.** आयतः.

Obloquy, *s.* निंदा, परि(री)वादः, अपवादः; वाच्यता, भर्त्सना, गर्हा; *See* **Censure, Calumny.**

Obnoxious, *a.* वश, अधीन, आयत्त, योग्य, अर्ह; पात्रं, आस्पदं, विषयः in comp.; ex. by pot. pass. part.; *See* **Liable,** **Apt.** 2 गर्हित, द्वेष्य, द्वेषणीय, गर्ह्य; अनिष्ट, अप्रिय, निंद्य, अप्रीतिकर (री *f.*). **-ly,** *adv.* अप्रियं, गर्ह्यतया. **-ness,** *s.* अधीनता, वशता, पात्रता. 2 द्वेष्यता, गर्ह्यता.

Obscene, *a.* अश्लील, ग्राम्य, अनक्षर, अवाच्य, गर्ह्य, कुत्सित, दुरुक्त, बीभत्स, अश्राव्य, विगात, व्रीडावह. 2 अशुभ, अभद्र, अमंगल, अलक्षण. **-ly,** *adv* अश्लीलं, अवाच्यं. **-ity, -ness,** *s.* अश्लीलता, अवाच्यता; ' o. of language ' दुरुक्ति *f.*, दुर्वाक्यं.

Obscure, *a.* तमोवृत, सांधकार, निष्प्रभ, मलिन, सतिमिर, निस्तेजस्, तमस्विन्. 2 अप्रसिद्ध, नातिविश्रुत, अविज्ञात, अख्यात, अल्पकीर्ति, लघुप्रतिष्ठ. 3 नि-,गूढ, दुर्बोध, क्लिष्ट, दुर्ज्ञेय, गहन, दुर्गम, विषम, अप्रकाश, अस्पष्ट, अस्फुट, गूढार्थ, अव्यक्त. **-v. t.** (तमसा) प्र-आ-च्छद् 10, आ-वृ 5 U, उप-रुध् 7 U, अंतरयति (D.), मलिनी-तिमिरी-कृ 8 U, मलिनयति-तिमिरयति- (D.), प्रभां-तेजः-हृ 1 P or क्षि 1, 5 P.; 'o. with clouds' मेघैः आच्छद् or आवृ 2 गहनी-कृ, गूढीकृ; ex. by (*a.*). 3 (Fig.) प्रत्या-दिश् 6 P, प्रत्या-ख्या 2 P, प्रच्छद्; *See* **Eclipse.** ' o. er of S'ri ' प्रत्यादेशः श्रियः (V. 1). **-ation,** *s.* मलिनीकरणं, कांति-प्रभा-हरणं. 2 तेजः or प्रभा-क्षयः or हानि *f.*, निष्प्रभता, सांधकारता. **-ed,** *a.* तमोवृत, नष्ट-क्षीण-मलिन-क्षत-प्रभ-कांति-प्रकाश, मलिन, निस्तेजस्, हतज्योतिस्. **-ity, -ness,** *s.* निष्प्रभता, तेजः or कांति-क्षयः or हानिः, तमस् *n.*, तमिस्रं, अंधकारः. 2 गूढता, गहनता, अस्फुटता, दुर्बोधता. 3 अप्रसिद्धि-अविख्याति-*f.*, अल्पप्रतिष्ठा-कीर्ति *f.* **-ly,** *adv.* निष्प्रभं, सतिमिरं, सांधकारं. 2 गूढं, दुर्बोधं, असुगमं, अस्पष्टं, अव्यक्तं.

Obsecrate, *v. t. See* **Entreat.**

Obsequies, *s.* उत्तरकार्य-क्रिया, अंत्यकृत्यं, प्रेत-कार्य-क्रिया; अंत्येष्टिक्रिया, और्ध्वदेहिकक्रिया, अंत्येष्टि *f.*, प्रेत-संस्कारः, पारलौकिकं. **-Obsequial,** *a.* और्ध्वदेहिक-और्ध्वदैहिक- (की *f.*), अंत्येष्टियोग्य; by (*s*) in comp.

Obsequious, *a.* छंदोनुवर्तिन्, अत्यनुवर्तिन्, अत्यनुरोधिन्, वशवर्तिन्, वशानुग, विनत, नम्र; *See* **Obedient.** **-ly,** *adv.* अत्यनुरोधात्, छंदोनुवर्तनेन. **-ness,** *s.* अत्यनुरोधः, अत्यनुवृत्ति *f.*, छंदोनुवर्तनं.

Overmuch, *a.* अतिमात्र, अत्यंत, अत्यधिक, एकांत, अतिरिक्त, अति pr. –*s.* आधिक्यं, अतिबाहुल्यं, अतिरेकः. –*adv.* अत्यंतं, अतिमात्रं, अति-सु pr.

Overnight, *adv.* अतीतरात्रौ, गतनिशायां.

Overpass, *v. t.* अतिचर् 1 P, अतिगम् 1 P.

Overpay, *v. t.* अधिकमूल्यं दा 3 U.

Overpeopled, *a.* अतिजनाकीर्ण.

Overplus, *s. See* **Surplus.**

Overpower, *v. t.* परा-अभि-भू 1 P, पराजि 1 A, आक्रम् 1 U, 4 P; *See* **Overcome.**

Overprize, Overrate, *v. t.* अधिकं मन् 4 A or c., अतिमूल्यं स्था c. (स्थापयति).

Overreach, *v. t.* प्र-तॄ c., वंच् 10, विप्र-लभ् 1 A. –ing, *s.* प्रतारणं-णा, वंचनं; *See* **Cheat.**

Override, *v. t.* अति-धाव् 1 P. 2 Overrule, q. v.

Overrule, *v. t.* अधः क्षिप् 6 P, निराकृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* **Reject.** 2 प्र-भू 1 P. ईश् 2 A (with gen.), अधिष्ठा 1 P, शास् 2 P, नियम् 1 P.

Overrun. *v. t.* उप-प्लु 1 A, आक्रम् 1 U, 4 P, उप-अभि-द्रु 1 P, व्याप् 5 P, आकॄ 6 P; *See* **Harass, Oppress.**

Oversee, *v. t.* अवेक्ष् 1 A, अधि-ष्ठा 1 P. –er, *s.* अवेक्षकः, अधिष्ठातृ *m.*, अध्यक्षः, अधिकृतः, अधिकारिन् *m.*

Overset, *v. t.* वि-,पर्यस् 4 U, परिवृत् c.; अधरीकृ 8 U, निपत् c., अधः क्षिप् 6 P. –*v. i.* परिवृत् 1 A नि-पत् 1 P.

Overshadow, *v. t.* आ-,छद् 10, छायया आवृ 5 U.

Overshoot, *v. t.* लक्ष्यं अतिक्रम् 1 U, 4 P, लक्ष्याद् भ्रंश् 1 A, 4 P or च्यु 1 A.

Oversight, *s.* अनवेक्षा, प्रमादः, भ्रमः; भ्रांति *f.*, स्खलितं, दृष्टिदोषः.

Oversleep, *v. i.* अति-दीर्घ-स्वप् 2 P.

Overspread, *v. t.* आच्छद् 10, आ-वृ 5 U, आस्तॄ 5 U, आस्तॄ 9 U, पूर् 10, आक्रम् 1 U, 4 P, आ-सं-कॄ 6 P, वि-अव-तन् 8 U, व्याप् 5 P. –*a.* आच्छन्न, आच्छादित, आवृत, आस्तीर्ण, आक्रांत, आकीर्ण, व्याप्त, पूरित, पूर्ण.

Overstate, *v. t.* अतिशयेन वच् 2 P; *See* **Exaggerate.**

Overstep, *v. t.* अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10.

Overstock, *v. t.* अति-पूर् 10 or संग्रह् 9 P or उपक्लृप् c., प्र-सं-चि 5 U. -*s.* अतिसंचयः-संग्रहः-संभारः.

Overstrain, *v. i.* अत्यंतं यत् 1 A or उद्यम् 1 A.

Overstrung, *a.* अत्यंतं आतत

Overt, *a.* प्रकाश, स्फुट, व्यक्त, स्पष्ट, अगूढ, प्रकट, प्रत्यक्ष. **-ly.** *adv.* प्रकाशं, स्पष्टं, प्रत्यक्षं, प्रकटं. **-ness,** *s.* स्फुटता, व्यक्तता.

Overtake, *v. t.* आ-सद् c., (पूर्वप्रस्थितं वैनतेयमप्यासादयेयं V. 1), लंघ् 1 A, 10; आत्मोद्धतैरपि रजोभिरलंघनीयाः (S. 1); 'not to be o.-n' &c.; सं-,प्राप् 5 P, आक्रम् 1 U, 4 P, ग्रह् 9 U. 2 अभिभू 1 P, धृ 1 P, 10, ग्रस् 1 A; सहसा-अकस्मात्-आपत् 1 P or आक्रम्; *See* **Attack, Overcome**; 'o. business' कार्यं समाप् c.

Overtask, Overtax, *v. t.* अतिभारं-अतिकरं न्यस् 4 U or निक्षिप् 6 P.

Overthrow, *v. t.* नश् c., वि-प्र-,° क्षि 1, 5 P, ध्वंस् c., प्र-वि-उत्°, उच्छिद् 7 P, अव-उत्-सद् c. 2 परिवृत् c., परि-विपरि-अस् 4 U, पराक्षिप् 6 P or c., अधोमुखीकृ 8 U, निपत् c. 3 जि 1 P, पराजि (A.), अभि-परा-भू 1 P, दम् c. (दमयति), वशीकृ 8 U, परास् 4 U, भंज् 7 P, पराहन् 2 P. -*s.* नाशः, ध्वंसः, प्र-वि°-,उच्छेदः, उत्सादः, क्षय. 2 पातः, भंगः, भेदः, परा-अभि-भवः, पराजयः, व्यसनं. 3 परिवर्तनं, पर्यासः, निपातनं.

Overtop, *v. t.* मूर्ध्नि-शिखरे-स्था 1 P, अतिशी 2 A, अभि-भू 1 P; *See* **Excel.**

Overture, *s.* प्रस्तावः, उपन्यासः, उपक्षेपः, निवेदनं, प्रार्थना, वचनं; 'secret o.' उपजापः. 2 प्रस्तावना, उपोद्घातः.

Overturn, *v. t.* परि-विपरि-अस् 4 U, परिवृत् c., निपत् c., अधोमुखीकृ 8 U, अधरोत्तरीकृ. 2 **Overthrow,** q. v.

Overvalue, *v. t.* अधिकं मन् 4 A or c., बहु मन्, अधिकमूल्यं कृ 8 U or स्था c. (स्थापयति).

Overweening, *a.* अत्यभिमानिन्, अतिदृप्त, अत्यवलिप्त, अतिश्लाघिन्.

Overwhelm, *v. t.* अभि-भू 1 P, आकुलीकृ 8 U, ग्रस् 1 A, आक्रम् 1 U, 4 P; अव-सद् c. अव-सं-मृद् 9 P or c., अव-नि-पत् c. निष्पिष् 7 P. 2 आ-वृ 5 U, आस्तृ-स्तॄ 5, 9 U, आच्छद् 10, आकॄ 6. P. 3 नि-,मस्ज् c. (मज्जयति), गाह् c., अव-वि°-, प्लु c., आ-सं-परि-°. **-ed,** *a.* अभिभूत, ग्रस्त, आक्रांत, मग्न, आकीर्ण, उपप्लुत, उपद्रुत, आकुल; *See* **Overcome**; 'o. with grief' शोकसमाकुल; 'o. with a flood of tears' बाष्पपूरपरिप्लुत.

Overwork, *v. t.* अधिकं कर्म कृ c., अत्यंतं आयस् c. or खिद् c.; (oneself) अत्यंतं परिश्रम् 4 P. -अत्यायासः, अतिक्लेशः-श्रमः.

Overwrought, *a.* अतिपरिष्कृत.

Overzeal, *s.* अत्यौत्सुक्यं, अत्युत्कंठा. **-ous,** *a.* अत्युत्सुक, अत्यासक्त, अतिव्यग्र.

Oviform, *a.* अंडाकृति, कोशाकार.

Oviparous, *a.* अंडज, द्विज, द्विजन्मन्, अंडोत्पन्न.

Ovum, *s. See* **Egg.**

Owe, *v. t.* धृ 10, (with dat. of creditor). 2 ऋणग्रस्त-*a.* भू 1 P, अनुगृहीत-*a.* भू; oft. ex. by pot. pass. part.; 'you o. respect to your elders' गुरुजनस्तव पूज्यः. **-ing,** *a.* देय, दातव्य, शोधनीय, निस्तार्य. 2 जनित, जात, उद्भूत, प्रयुक्त, कारण-प्रभव-हेतु-in comp.; 'o. to' ex. by abl. or instr.; 'to whom is your deliverance o.' कस्त्वन्मुक्तिहेतुः-कारणं, केन त्वं मोचितः.

Owl, *s.* कौशिकः, उलूकः, पेचकः, दिवाभीतः, दिवांधः, घूकः, निशाटनः, वायसारातिः; 'o.-light' मंदप्रभा, ईषत्प्रकाशः.

Own, *a.* स्वीय, स्वकीय, आत्मीय, स्वक, निज, आत्मभूत; स्व, आत्मन् in gen. or in comp.; 'my o.' मदीय; so त्वदीय, तदीय, युष्मदीय, अस्मदीय; 'of one's o. accord' स्वयं, स्वेच्छया; 'to make one's o.' आत्मसात् कृ 8 U. -*v. t.* स्वीकृ, अंगीकृ, प्रति-पद् 4 A, अभ्युप-गम् 1 P or इ 2 P, ग्रह् 9 U, *See* **Acknowledge.** 2 (To be master of) ex. by स्वामी, ईश्वरः, पतिः, अधिकारी, with gen. or by (*a.*); or by gen. alone; 'I o. much land' विपुलभूमेः स्वाम्यहं; 'who o. s this treasure' कोऽस्य वित्तस्य स्वामी-पतिः, कस्येदं वित्तं 3 स्वत्वं प्रति-पद् c. or घुष् c., स्वीय-*a.* इति वद् 1 P; *See* **Claim.** **-ed,** *a.* स्वीकृत, स्वत्वविशिष्ट; 'o. by me' मत्स्वत्वविशिष्ट, मत्स्वामिक, मदधीन. **-er,** *s.* स्वामिन् *m.* ईश्वरः, पतिः, अधिकारिन् *m.* ईशः, प्रभुः; *See* **Lord.** **-ership,** *s.* स्वत्वं, स्वामित्वं, स्वाम्यं, प्रभुत्वं, अधिकारः. **-ing,** *s.* स्वीकारः, अभ्युपगमः.

Ox, *s.* वृषभः, वृषः, उक्षन् *m.*, बली(र्व)र्दः, ऋषभः, अनडुह् *m.*, गौः, भद्रः, सौरभेयः; 'a herd of oxen' औक्षकं; 'a large o.' महोक्षः; 'an old o.' वृद्धोक्षः, जरद्गवः; 'head of a herd of oxen' आर्षभ्यः; 'an o. allowed to go at liberty' षंढः, गोपतिः, इट्चरः; 'the dewlap of an o.' सास्ना, गलकंबलः; 'his shoulder' वहः; 'who bears the yoke' धुर्यः, धूर्वोढा; 'who draws a cart ' शाकटः; ' who draws a plough ' हालिकः, सैरिकः; ' who bears a burden ' धूर्वहः, धूर्यः, धुरीणः, धौरेयः, धुरंधरः.

Oxidize, *v. t.* जॄ c. -**Oxidation,** *s.* जारणं, आसेचनं.

Oyster, *s.* शुक्ति *f.*, शुक्तिका, मुक्तास्फोटः; ' o.-shell ' शुक्तिपुटं.

P

Pabulum, *s.* भोजनं, आहारः, पौष्टिकं. -**Pabular,** *a.* पौष्टिक (की *f.*).

Pace, *s.* पदं, चरणन्यासः, पदविक्षेपः-पातः-क्रमः, पादविक्षेपः-न्यासः, विक्रमः. 2 गति *f.*, गमनं, अयनं, चलनं, चारः. 3 गतिवेगः-क्रमः; ' a quick p.' द्रुतपदं; ' at a rapid p.' द्रुतगत्या. 4 (Of horses) धारा, गतिः; *See* under **Horse**; ' a horse with a good p. ' सुखायनः, सुखचारः; ' keep p. with ' सह गम् or चल् 1 P. -*v. i.* परि-अति-क्रम् 1 U, 4 P; क्रमेण क्रमेण गम्-व्रज्-चल् 1 P; ' p. up and down ' इतस्ततः चल् or भ्रम् 1, 4 P; ' p. ing to and fro ' इतस्ततः परिक्रम्य. -**ed,** *a.* गति in comp.; ' slow-p. ' मंदगति, मंदगामिन्.

Pachyderm, *s.* कठिनचर्मन्-*a.* पशुः. -**atous,** *a.* कठिनचर्मन्. 2 (*Fig.*) सहिष्णु, मंद.

Pacify, *v. t.* सां(शां)त्व् 10, शम् c. (शमयति), प्र-उप°-,प्र-सद् c., सं-परि-तुष् c., आराध् c. -**ied,** *a.* शांत,प्रसादित, शांतक्रोध; ' to be p. ' शम् 4 P, प्रसद् 1 P, तुष् 4 P, शमं इ-या 2 P. -**ier,** *s.* शमकः, सांत्वकः. -**ic,** *a.* शांत, प्रशमित, निरुद्वेग. 2 सांत्व-प्रशम-शील, सांत्वनकारिन्, साम in comp.; ' p. words ' सामवादः. -**ication,** *s.* शमः, शमनं, शांति *f.*, प्र-उप°-, सांत्वनं, सामन् *n.*, प्रसादनं. 2 संधानं, संधिकरणं. -**icatory,** *a.* शांतिद, शांतिकर (री *f.*), शमक, सामोपायक, साम in comp.

Pack, *s.* भारः, कूर्चः, भांडं, गुच्छः, पोटलिका, पटलं. 2 गणः, संघः,वर्गः, समूहः, वृंदं, संचयः; *See* **Multitude**; ' p. of hounds ' श्वगणः, कुक्कुरसंघः; ' a p. of persons ' मंडलं, जनसमूहः; ' p.-horse ' पृष्ठ्यः, स्थोरिन्; ' p.-saddle ' पर्याणं, पल्ययनं; ' p.-thread ' शणसूत्रं; ' p.-cloth ' वेष्टनं, पटः. -*v. t.* पटलीकृ 8 U, पुटीकृ, पुटयति (D.), सपिंड् 10, कूर्चीकृ; ' p. in a box ' समुद्गके नि-धा 3 U or निविश् c. 2 ससमर्द-उप संपीडपूर्व-संमिल् c. or समास् 1 P or एकीकृ or संयुज् 7 U, 10. 3 (Off) अप-निः-सृ c., सहसा अपगम् c. (गमयति) or प्र-स्था c. (स्थापयति). -*v. i.* पुटीभू 1 P, पिंडीभू, एकीभू. 2 सहसा अपगम् 1 P or प्र-स्था 1 A. -**age,** *s.* भांडं, कूर्चः, पत्रादिगुच्छः. -**Packet,** *s.* पोटलिका, लघुकूर्चः, लघुवेष्टनं; पत्रवेष्टनं. 2 पत्रवाहिनी नौः.

Pact, *s.* *See* **Contract.**

Pad, *s.* कूर्चः. 2 उपधानं, उपबर्हः. 3 सुखायनः, सुखचारः. 4 पादविकाशः. 5 मृदुवस्तु *n.*, तूलादिद्रव्यं. -*v. t.* मृदुवस्तुना आ-स्तृ 5 U or युज् 7U, 10. -*v. i.* मंदं or शनैः-चल् or व्रज् 1 P.

Paddle, *s.* क्षेपणि-णी *f.*, नौदंडः; ' p.-box ' क्षेपण्याधारः; ' p.-wheel ' नौचालनी. -*v. t.* नौदंडेन प्रेर् c. or चल् c. or प्रतुद् 6 P or c. -*v. i.* क्षेपण्या जले चल् c. or आहन् 2 U or तड् 10. 2 जले क्रीड् 1 P.

Paddock, *s* वाटः, वाटिका.

Paddy, *s.* धान्यं.

Padlock, *s.* तालकं.

Padrone, *s.* *See* **Patron.**

Pæan, *s.* जयशब्दः-ध्वनिः-घोषः.

Pagan, *s.* देवता-प्रतिमा-पूजकः. -**ism,** *s.* देवतार्चनं, प्रतिमापूजा-उपासना; *See* **Idolater,-try.**

Page, *s.* पृष्ठं, पत्रं. 2 चेटः, किंकरः, भृत्यः, पार्श्वानुचरः, परिचरः, बालानुचरः.

Pageant, *s.* आडंबरः, शोभा; चमत्कारः, कौतुकं. -*a.* Ex. by (*s.*). -**ry,** *s.* आडंबरः; *See* (*s.*).

Pagoda, *s.* *See* **Temple.**

Pail, *s.* भांडं, पात्रं, भाजनं.

Pain, *s.* दुःखं, वेदना, पीडा, व्यथा, आतंकः, रुज् *f.*, रुजा: अ(आ)र्ति *f.*, सं-परि-तापः, बाधा, यातना, क्लेशः, कष्टं, कृच्छ्रं, उद्वेगः, खेदः; ' bodily p. ' व्याधिः; ' mental p. ' आधिः, मनस्तापः, मनोव्यथा, चित्तोद्वेगः; ' causing p. ' पीडा-दुःख-कर (री *f.*); ' suffering p. ' दुःखभाज्, दुःखित; ' sharp p. ' शूलः-लं, तीव्रवेदना. 2 (Pains) परि-, श्रमः, प्र-, यत्नः, उद्योगः, व्यवसायः, उद्यमः, उत्साहः, आ-प्र-यासः, कष्टं; 'to take p. s' प्रयत् 1 A, उपक्रम् 1 A, चेष्ट् 1 A, घट् 1 A, व्यव-सो 4 P. 3 दंडः, साहसं. -*v. t.* पीड् 10, दु 5 P, व्यथ् c. (व्यथयति), तप् c., सं-परि-उप°-, बाध् 1 A, क्लिश् 9 P, अर्द् 1 P or c., दुःखयति (D.). -**ed,** *a.* पीडित, दून, दुःखित, व्यथित, तापित, सं-परि-तप्त, आर्त, दुःखार्त, दुःखातुर, सवेदन, कृच्छ्रगत, सव्यथ; ' to be p. ' व्यथ् 1 A, पीड्-क्लिश्-तप्-pass. -**ful,** *a.* सरुज, स-जायत, दुःखिन्, सव्यथ, दुःखार्त, *See*

Pained. 2 दुःखद, कष्ट, पीडा-दुःख-कष्ट-व्यथा-कर (री *f*.), दुःखावह, कष्ट or क्लेश-द or प्रद, बाधक, संतापक. 3 श्रम-कष्ट-साध्य, दुष्कर, कठिन. **-fully**, *adv*. सव्यथं, कष्टं, सदुःखं, सोद्वेगं. 2 सश्रमं, सायासं, कृच्छ्रेण, कष्टेन. **-less**, *a*. दुःख or व्यथा-हीन or रहित. **-Painstaking**, *a*. व्यवसायिन्, उद्यमिन्, उद्योगिन्. उद्यम-उत्साह-शील; *See* **Industrious.**

Paint, *v. t.* आ-लिख् 6 P, चित्र् 10. 2 रंज् c., वर्ण् 10, रंगेण लिप् 6 P, वर्णैः शुभ् c. 3 वर्ण्; *See* **Describe.** **-s.** वर्णकः-कं; वर्णिका, रंगः, लेपः; 'p.-brush' वर्तिका, तूलिका, तूलि *f*., वर्णतूली, ईषिका. **-ed**, *a*. चित्रित, वर्णित; (in a picture) चित्र-आलेख्य-गत, चित्रार्पित, आलिखित. **-er**, *s*. चित्रक(का)रः, रंगाजीवः, चित्रकृत्-लिख् *m*., रंजकः, चित्रकः, आलेखकः, तौलिकः. **-ing**, *s*. (Art) चित्रकर्मन् *n*., चित्र-क्रिया-विद्या. 2 आलेखनं, वर्णनं, रंजनं, चित्र-लेखनं. 3 आलेख्यं, चित्रं; 'drawn in a p.' आलेख्यगत; 'p. on the body' पत्ररेखा, पत्ररचना, पत्रावलि-ली *f*.

Pair, *s*. युगं, युगलं, युग्मं, द्वितयं, द्वय, यमलं-कं, युतकं; द्वंद्वं, मिथुनं, दंपती in comp. (of animate beings only); 'a p. of swans' हंसदंपती; 'a married p.' भार्यापती, जायापती, दंपती, जंपती, स्त्रीपुरुषौ. **-v. t.** संयुज् 7 U, 10; oft. ex. by **Match**, q. v.; 'well-p. ed rivals' तुल्यप्रतिद्वंद्विनौ. **-v. i.** मैथुनं आचर् 1 P or कृ 8 U, स्त्रीपुरुषवत् संगम् 1 A.

Palace, *s*. प्रासादः, हर्म्यं, सौधः-धं, राजकुलं, राज or नृप-गृहं-भवन-मंदिरं (House, q. v.) **-Palatial**, *a*. महत्, विशाल, राजयोग्य; 'p. building' महाभवनं

Palæontology, *s*. शिलाजातविद्या.

Palæstra, *s*. मल्लभूमि *f*.

Palanquin, *s*. नरयानं, शिबिका, चतुरस्रयानं, याप्ययानं.

Palate, *s*. तालु *n*., काकुदं; 'soft p.' शुंडिका, अलिजिह्वा. 2 रुचि *f*., अभिरुचिः. **-able**, *a*. आस्वाद्य, सुरस, स्वादु, रुच्य, रुचिकर (री *f*.), सरस, रसिक. **-al,-ial**, *a*. तालव्य.

Palaver, *See* **Flatter,-y.**

Pale, *a*. पांडु, पांडुर, विवर्ण, गतवर्ण, नीरक्त, मंदच्छाय, गतश्रीक; 'he grew or turned p.' विवर्णभावं प्रपेदे, पांडुच्छायो बभूव. 2 मंदप्रभ, मंदद्युति-कांति, हततेजस्, निस्तेजस्, मलिन or म्लान-प्रभ or कांति. 3 (Of colours) श्वेत, ईषत्, आ, in comp.: 'p. blue' आनील, श्वेतनील. **-s.** शलाका, शल्यं, शूलः-लं, शंकुः, स्थाणुः 2 वृति *f*., आवरणं, वेष्टनं, वारणः. **-v. t.** (शंकुपंक्त्या) आ-परि-वृ 5 U or c., परिवेष्ट् 1 A or c., अवरुध् 7 U. **-ing**, *s*. शंकुपंक्ति *f*., आवरणं. **-ish**, *a*. आपांडु, आपांडुर. **-ness**, *s*. पांडुता, वैवर्ण्यं, पांडुवर्णः-रागः. 2 तेजः-प्रभा-हानि *f*., कांतिक्षयः, [illegible].

Palette, *s*. *See* 'Pallet.'

Palfrey, *s*. लघुवाजिन् *m*., क्षुद्रघोटकः.

Palindrome, *s*. मुरजबंधः.

Palingenesis, *s*. रूपांतरं, रूपपरिवृत्ति *f*.

Palisade, *s*. स्तंभ or शंकु-पंक्ति *f*. or वलयः-यं, अवरोधकं.

Pall, *s*. वासस् *n*., प्रावारः, प्रच्छदपटः. 2 प्रेतपटः, प्रेतवासस् *n*., शवाच्छादनं. **-v. t.** विरसीकृ 8 U, अरुचिं उत्पद् c. **-v. i.** विरसीभू 1 P.

Palladium, *s*. पुर-नगर-देवता, रक्षादेवता. 2 रक्षा-क्षणं.

Pallet, *s*. खट्वा, लघुतल्पः. 2 वर्ण-रंग-पत्रं.

Palliate, *v. t.* (दोषं) लघूकृ 8 U, प्र-उप-शम् c. (शमयति), लंघयति (D.), प्रमृज् 2 P, क्षल् 10, आच्छद् 10. **-ion**, *s*. प्र-उप-शमः-शांति *f*., लघूकरणं, दोष or पाप-मार्जनं-क्षालनं-शमः. **-ive**, *a*. उपशमन (नी *f*.), शांतिप्रद, शमक. **-s.** पाप-दोष-शमनं. 2 उपशमनं, चूलकं, क्लेशापहं.

Pallid, **Pallor**, *See* **Pale,-ness.**

Palm, *s*. तलः-लं, प्रहस्तः, प्रपाणिः, प्रतलः, चपेटः, चर्पटः, करतलः; 'the p. s joined' संहततलः, संतलः; 'the hollowed p.' प्रसृतः-तिः, चुलुकः; 'joining the p. s together' बद्धांजलि, कृतांजलि, अंजलिपुटं कृत्वा. 2 (Tree) तालः, तृणद्रुमः, द्रुमेश्वरः; (the fruit) तालं; 'p. of victory' जयध्वजः-लक्षणं; 'p. of superiority' गुणाधिक्यपताका. **-v. t.** करतले गुप् 1 P or गुह् 1 U. 2 (Off) प्रवृत् c., वंच् 10; *See* **Cheat**; 'the trick was p. ed off upon him' तेन छद्मना असौ सम्यग् विप्रलब्धः. **-ate, -ated**, *a*. करतलाकृति. **-y**, *a* तालावृत, तालसंकीर्ण. 2 समृद्ध, श्रीमत्, विभव-भूति in comp.; 'p. days' विभवकालः, विभवः.

Palma-Christi, *s*. एरंडः, उरुबूकः, रुबू(बु)कः, रुचकः, चित्रकः, चंचुः, पंचांगुलः, मंडः, वर्धमानः, व्यडंबकः.

Palmister, *s*. सामुद्रज्ञः, सामुद्रिकः. **-Palmistry**, *s*. सामुद्रिकं, सामुद्रविद्या.

Palmiped, *a*. जालपाद (पदी *f*.).

Palmyra, *s*. *See* **Palm** (2).

Palpable, *a*. स्पर्शज्ञेय-गोचर, स्पृश्य. 2 स्थूल, घन, गाढ, निबिड. 3 स्पष्ट, सुविज्ञेय, प्रत्यक्ष, व्यक्त. **-Palpably**, *adv*. स्फुटं, व्यक्तं, प्रत्यक्षं.

Palpitate, *v. i.* वेप् 1 A, कंप् 1 A, स्पंद् 1 A, स्फुर् 6 P, उच्छ्वस् 2 P. **-ion**, *s*. स्पंदनं, कंपः, स्फुरणं, स्फुरितं, वेपनं, वेपथुः.

Palsy, *s.* स्तंभः, सं-वि-°, स्वापः, सुप्ति *f.* 2 पक्षाघातः, पक्षवायुः. -*v. t.* स्तंभ् 9 P or c., जडीकृ 8 U, स्वप् c., चैतन्यं नश् c. **-ied, -ical,** *a.* पक्षवायुग्रस्त.

Palter, *v. See* **Prevaricate.**

Paltry, *a.* क्षुद्र, लघु, तुच्छ, असार, अपकृष्ट, अधम, कु pr., कुत्सित.

Paludal, *a.* अनूप, जलमय.

Pamper, *v. t.* (अत्यंतं) स्फाय् c. (स्फावयति), संवृध् c., आप्यै c., परि,पुष् c., संतृप् c., पूर् 10. **-ed,** *a.* स्फीत, परिपुष्ट, हृष्टपुष्ट, आपीन, आप्यायित. **-er,** *s.* अतिपोषकः, आप्यायकः. **-ing,** *s.* स्फीति *f.*, परिपोषणं, आप्यायनं.

Pamphlet, *s.* पत्रिका, लघुपुस्तकं. **-eer,** *s.* पत्रिकाकारः, लघुपुस्तककृत् *m.*

Pan, *s.* भाजनं, पात्रं, भांडं, आधारः; 'frying p.' अंबरीषं, भ्राष्ट्रः; *See* under **Fry;** 'p.-cake' भृष्टापूपः. **2** विश्वमूर्तिः.

Panacea, *s.* सर्वरोगघ्नं औषधं, त्रैलोक्यचिंतामणिः.

Pancratium, *s.* मल्लयुद्धं-क्रीडा. **-Pancratic,** *a.* मल्लक्रीडानिपुण.

Pandect, *s.* विद्यासंग्रहः. **2** स्मृतिसंहिता.

Pandemic, *a.* सर्वजनीन, सार्वलौकिक (की *f.*), सर्वसामान्य; 'p. disease' जनपदोद्ध्वंसः.

Pandemonium, *s.* रक्षःसभा, पिशाचसभा.

Pander, -er, *s.* नर्मसचिवः, विटः, सुरतदूतः, कुंडाशिन् *m.*, संचारकः. -*v. t.* सुरतकामान् सं-पद् c., लांपट्यं प्रयुज् 7 A, 10. **-ing, -ism,** *s.* कौट्टिन्यं, विटकार्यं.

Pandiculation, *s. See* **Stretching.**

Pane, *s.* काचफलकः-शिला.

Panegyric, *s.* स्तुति *f.*, श्लाघा, प्रशंसा, स्तुतिवादः-पाठः, गुणवर्णनं-कीर्तनं. **-al,** *a.* स्तुतिमय (यी *f.*), प्रशंसात्मक. **-Panegyrize,** *v. t.* स्तु 2 U, श्लाघ् 1 A प्रशंस् 1 P; *See* **Praise. -Panegyrist,** *s.* संस्तावकः, वैतालिकः, वंदिन् *m.*, मागधः, स्तुतिपाठकः.

Panel, *s.* कपाटः-टं, अररः-री-रं; शाखा, भागः. **2** स्थेयगणः,-पत्रं.

Pang, *s.* वेदना, यातना, व्यथा, पीडा; (extreme) कारणा, अतिव्यथा; *See* **Pain.**

Panic, *s.* संत्रासः, समुद्वेगः, महासाध्वसं, विप्लवः, आकस्मिकभयं, त्रासः; 'p.-struck or -seized' संत्रस्त, भयविप्लुत, विद्रावित; 'p. in an army' पिंजलः, समुत्पिंजः. **2** अणुः, प्रियंगुः.

Pannel, *s.* पर्याणं.

Pannier, *s.* कंडोलः, पिटः, पे(पि)टकः, करंडः.

Panoply, *s.* सर्वांगत्रं, सर्वांगकवचः. **-ied,** *a.* संवर्मित, कृतसन्नाह.

Panorama, *s.* विश्वदृश्यं.

Pant, *v. i.* वेप् 1 A, स्पंद् 1 A, कंप् 1 A, उद्-ध्मा 1 P, स्फुर् 6 P, उच्छ्वस् 2 P. **2** कृच्छ्रेण निश्वस्, दीर्घ-स्थूलस्थूलं-निश्वस्. **3** सोत्कंठं स्पृह् 10 or अभिलष् 1, 4 P; *See* **Long.** -*s.*, **-ing,** *s.* कंपः, स्फुरणं; कृच्छ्रोच्छ्वासः, उच्छ्वासः, स्थूलस्थूलनिश्वासः.

Pantaloon, *s.* जंघावस्त्रं-परिधानं. **2** भंडः. विदूषकः, वैहासिकः.

Pantechnecon, *s.* उपस्कर-संग्रहः-पण्यशाला.

Pantheist, *s.* विश्वदेवतावादिन् *m.* **-Pantheism,** *s.* विश्वदेवतावादः, वैश्वदेवमतं. **-Pantheon,** *s.* विश्वदेवतागणः, विश्वदेवकुलं.

Panther, *s.* द्वीपिन् *m.*

Pantomime, *s.* मुग्धनर्तकः, केवलं अभिनेतृ *m.*, मूकाभिनेता. **2** मुग्धाभिनयः, लास्यं, निःशब्दलास्यं-हावः.

Pantry, *s.* अन्नकोष्ठः, भक्ष्यागारं.

Pap, *s.* चूचुकं, स्तनाग्रं. **2** स्तनः, कुचः. **3** मृदु खाद्यं.

Papa, *s.* तातः, पितृ *m. See* **Father.**

Paper *s.* पत्रं, पत्रकं; 'written p' लेखः, लिखितं, पत्रिका, लेख्यं. -*v. t.* पत्रेण आच्छद् 10 or आस्तृ 5 U.

Pappy, *a.* मज्जायुक्त, मृदु, कोमल.

Papulæ, *s.* वि-,स्फोटः, पिटि(ट)का.

Par, *s.* समता, तुल्यता, साम्यं, सम-तुल्य-भावः; 'at p.' सम, तुल्य. **-ity,** *s.* साम्यं, तुल्यत्वं.

Parable, *s.* उपमा, दृष्टांतः, निदर्शनं. **-Parabolic,** *a.* दृष्टांतरूप.

Parabola, *s.* अनुवृत्तं.

Parachute, *s.* विमानात् अवतरणार्थं छत्रं.

Parade, *s.* आडंबरः, दंभः, बाह्यशोभा. **2** यात्रा, सैन्ययात्रा. **3** शस्त्राभ्यासः, अस्त्र-रण शिक्षा, युद्धाभ्यासः, व्यायामः, योग्या; 'p.-ground' व्यायामभूमि *f.* -*v. t.* सदंभं-साडंबरं-दृश् c. **2** सैनिकान् व्यायस् c. or शस्त्रव्यापारं शिक्ष् c. -*v. i.* सदंभं पर्यट् 1 P or भ्रम् 1, 4 P.

Paradigm, *s.* निदर्शनं, रूपनिदर्शनं; 'p. of verbs' धातुरूपादर्शः.

Paradise, *s.* वैकुंठं, स्वर्गः, स्वर्लोकः, सुखभवनं; *See* **Heaven. 2** नंदनवनं. **-Paradisiacal,** *a.* स्वर्गीय, स्वर्ग्य.

Paradox, *s.* असत्याभासः, विरुद्धमतं. **-ical,** *a.* अयुक्ताभास, लोकविरुद्ध.

Paragon, *s.* प्रतिमा, उपमा, आदर्शः, प्रतिरूपं; *See* **Model. 2** अनुपमं वस्तु.

Paragraph, *s.* परिच्छेदः, खंडः, भागः, वाक्यखंडः-विच्छेदः.

Parallax, *s.* लंघनं.

Parallel, *a.* समांतर. 2 सदृश (शी *f.*), समान, सम, तुल्य, संवादिन्, समरूप, अनुरूप. *-s.* समांतररेखा; 'p. of latitude' अक्षवृत्तं. 2 सादृश्यं, साम्यं, समता, आनुरूप्यं, उपमा, प्रतिमा, प्रतिरूपं; 'having no p.', 'un-p.ed' अनुपम, अद्वितीय; *See* **Matchless.** *-v. t.* समांतरीकृ 8 U. 2 उप-प्रति-मा 3 A, 2 P, तुल् 10. 3 समीभू 1 P, संवद् 1 P. **-ism,** *s.* समांतरं, सादृश्यं.

Parallelogram, *s.* समांतरचतुर्भुजः.

Parallelopiped, *s.* समांतरखातः.

Paralysis, *s.* स्तंभः, स्वापः, जाड्यं, सादः, पक्षाघातः; 'p. of limbs' अंगभंगः, गात्रोपघातः, गात्रसादः. **-Paralytic,** *a.* सुप्तत्वच्, स्तब्धगात्र, पक्षवातग्रस्त. **-Paralyze,** *v. t.* संस्तंभ् 9 P, जडीकृ 8 U, अव-,सद् c., स्वप् c.; 'my limbs are p.-ed' सीदंति मम गात्राणि.

Paramount, *a.* प्रधानतम, सर्वाधीश, परम, विशिष्ट, प्रमुख, प्रधान; 'p. lord' अधीश्वरः, सम्राट्, सर्वेशः, सार्वभौमः; 'p. sway' साम्राज्यं.

Paramour, *s.* भुजंगः, जारः, विटः, उपपतिः. 2 (Female) उपपत्नी, उपस्त्री.

Parapet, *s.* वक्षोदघ्नः प्राकारः.

Paraphernalia, *s.* सामग्री, परिच्छदः, उपकरणं; 'royal p.' छत्रचामरादि राजचिह्नं, राजलक्षणानि; 'woman's p.' स्त्रीधनं, यौतकं.

Paraphrase, *v. t.* विस्तरेण व्या-ख्या 2 P, अनुवद् 1 P, शब्दांतरेण विपरि-णम् c. (णमयति). *-s.* अनुवादः, मूलशब्दविस्तारः-विवरणं. **-Paraphrastic,** *a.* मूलाधिकशब्द, विस्ताररूप.

Parasite, *s.* परान्नभोजिन् *m.*, परान्नपुष्टः, परपिंडादः, पात्रेसमितः. 2 विटः, चाटुकारः; *See* **Flatterer.** 3 वंदा, वृक्षादनी, वृक्षरुहा, जीवंतिका. **-ic,-ical,** *a.* परान्नपुष्ट, पराश्रय, परोपजीविन्; वृक्ष or तरु-रोहिन् or रुह.

Parasol, *s.* छत्रं, आतपत्रं.

Parboil, *v. t.* ईषत् क्वथ् 1 P.

Parcel, *s.* पोटली, पोटलिका, कूर्चः, भांडं. 2 भागः, अंशः, खंडः, उद्धारः. 3 राशिः, चयः, संघः, गणः, समूहः, वृंदं; 'part and p.' अंगभूत *a.*, शरीरावयवभूत *a.*; 'she forms, as it were, part and p. of my body' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); मेनकासंबंधेन शरीरभूता मे शकुंतला (S. 6). *-v. t.* (Out) विभज् 1 U, विभागशः विन्यस् 4 U or क्लृप् c.

Parcener, *s.* समांशिन् *m.*, समाधिकारिन् *m.* **-Parcenary,** *s.* समाधिकारः.

Parch, *v. t.* तप् c., दह् 1 P, प्लुष् 1 P, भ्रस्ज् 6 P; उत्-,शुष् c. (throat &c.). **-ed,** *a.* तप्त, दग्ध; प्लुष्ट, शुष्क, उच्छोषित, निर्जल, शोषितजल, क्षाम; 'having his throat p. up with thirst' पिपासाक्षामकंठः.

Parchment, *s.* चर्मपटः-पत्रं.

Pard, *s. See* '**Leopard.**'

Pardon, *v. t.* क्षम् 1 A, 4 P, सह् 1 A, मृष् 4 P, 10, मुच् 6 P, अव-सृज् 6 P, तिज् desid. (तितिक्षते). *-s.* क्षमा, क्षांति *f.*, तितिक्षा, मर्षणं, मोचनं, दोषमुक्ति *f.*, अपराधक्षमा; 'I beg your p.' क्षंतव्योऽहं भवता; 'to beg p. of' क्षमां प्रार्थ् 10 A. **-able,** *a.* क्षंतव्य, मर्षणीय, क्षमार्ह, सोढव्य, क्षमोचित. **-ed,** *a.* क्षांत, मर्षित, दोष-दंड-मुक्त, मुक्त-दंड-दोष.

Pare, *v. t.* तनूकृ 8 U, अवकृत् 6 P, तक्ष् 1, 5 P, त्वक्ष् 1 P, अवच्छिद् 7 P, खंड् 10, उल्लिख् 6 P, वि-लू 9 U. 2 (Skin) निस्त्वचीकृ, निस्तुषीकृ, त्वचयति (D.), त्वचं निष्कुष् 1 P, 'having p. ed nails' कृत्तनखः. **-er,** *s.* तक्षृ *m.*, खंडकः. **-ing,** *s.* तक्षणं, कर्तनं, तनूकरणं. 2 तष्टं, खंडः, भित्तं, विदलं, शकलः-लं.

Paregoric, *a.* शूलापह, शूलशामक.

Parent, *s.* मातृ *f.*, पितृ *m.*; *See* **Mother, Father**; 'p. s.' मातापितरौ, पितरौ, मातरपितरौ, प्रसूजनयितारौ; 'p. institution' उत्पादिका-पितृभूता-शाला; 'p. tree' उत्पादकः-जन्मदः-वृक्षः. 2 प्रभवः, कारणं, बीजं, हेतुः, उत्पादकः, जन्महेतुः. **-age,** *s.* अन्वयः, जाति *f.*, कुलं, वंशः, जन्मन् *n.*, उत्पत्ति *f.*; 'of royal p.' राजवंश्य, नृपबीज; 'of noble p.' महाकुल, कुलजन्मन्, अभिजनवत्. **-al,** *a.* पितृ, मातृ in comp., पैतृक (की *f.*), मातापितृयोग्य, पित्रुचित, पित्रनुरूप; 'p. affection' वात्सल्यं, अपत्यस्नेहः, पुत्रप्रीति *f.*

Parenthesis, *s.* निक्षेपचिह्नं; निक्षिप्तवाक्यं-वचनं, उप-अनन्वित-वाक्यं, प्रासंगिक-अप्रधान-वचनं. **-Parenthetical,** *a.* प्रासंगिक (की *f.*), निक्षिप्त, निवेशित, मूलानन्वित, अप्रधान. **-ly,** *adv.* निक्षिप्य, मूलानन्वयेन.

Parergon, *s.* शेषपूरणं.

Parget, *s.* लेपः, सुधा.

Parhelion, *s.* सूर्याभासः, मिथ्यासूर्यः.

Pariah, *s.* अंत्यजः, हीनजातिः.

Parish, *s.* पौरोहित्यभूमि *f.*-प्रदेशः; 'p. priest' ग्रामयाजकः-पुरोहितः. **-Parishioner,** *s.* ग्रामिकः, ग्रामस्थः, ग्रामवासिन् *m.*

Park, *s.* उपवनं, कृत्रिमवनं, क्रीडा-प्रमद-वनं, आक्रीडः, मृगयास्थानं-भूमि *f.* **-er,** (P.-keeper) *s.* वनपालः, उद्यानरक्षकः.

Parley, *v. i.* संभाष् 1 A, संवद् 1 P, [illegible] 1 P. *-s.*, **-Parlance,** *s.* संभाषणं, संवादः, संकथा, संलापः. 2 संधिप्रसंगः.

Parliament, *s.* विचार-मंत्रण-सभा, प्रतिनिधि-सभा.

Parlour, *s.* आलाप-संकथा-स्थान, सलापकोष्ठः.

Parlous, *a.* भयावह, भयंकर, भीतिप्रद.

Parochial, *a.* ग्राम्य, ग्रामीय, ग्रामिक (की *f.*).

Parody, *s.* अनुकरणकाव्यं. -*v. t.* शब्दान् परिवृत् *c.*

Parole, *s.* उक्ति *f.*, वचनं, प्रतिज्ञा.

Paronomasia, *s.* श्लेषः.

Paronychia, *s.* चिप्पं.

Parotis, *s.* लालाधारः.

Paroxysm, *s.* वेगः, सं-आ-वेगः, आवेशः, आक्रमः; 'p. of rage' क्रोधावेशः; 'in a p. of rage' क्रोधावेशवशात्.

Parricide, *s.* पितृ-हत्या-वधः-घातः. 2 पितृहन् *m.*, पितृघातिन् *m.*, पितृघ्नः. **-al,** *a.* पितृहन्. 2 पितृवधात्मक.

Parrot, *s.* शुकः, कीरः, किंकिरातः, वक्रतुंडः-चंचुः.

Parry, *v. t.* नि-वृ *c.*, परिहृ 1 P, प्रति हन् 2 P.

Parse, *v. t.* (पदानि) भंज् 7 P, छिद् 7 P. **-ing,** *s.* पदभंजनं-छेदः.

Parsimony, *s.* अल्प-मित-व्ययः. **-ious,** *a.* अल्प-मित-व्ययिन्, कृपण, व्ययपराङ्मुख (खी *f.*), दृढबद्ध-मुष्टि. **-iously,** *adv.* कार्पण्येन, मितव्ययेन. **-iousness,** *s. See* (*s.*).

Parsley, *s.* अजमोदा.

Parson, *s.* ग्रामपुरोहितः, ग्रामोपाध्यायः, ग्रामगुरुः. **-age,** *s.* ग्रामगुरुगृहं.

Part, *s.* वि-,भागः, अंशः, खंडः-डं, शकलः-लं, लवः, वि-,दलं, भिन्नं, कला. 2 प्र-,देशः, एकदेशः. अवयवः, अंगं. 3 (Allotted) वि-,भागः, अंशः, उद्धारः, वंटः. 4 कर्मन् *n.*, कार्यं, नियोगः, धर्मः, स्वकर्तव्यं-धर्मः; 'perform one's p.' कर्म निर्वह् *c.*, नियोगमनुष्ठा 1 P. 5 भूमिका; पात्रं; 'assignment of p.s' भूमिकाकल्पनं. 6 अंगं, अवयवः, घटकः, घटकावयवः; 'consisting of 4 p.s' चतुरंगं (बलं). 7 वारः, पर्यायः; *See* **Turn.** 8 पक्षः. 9 संबंधः, अनुषंगः; 'to have a p. in' संबंध्-अनुषंज्-pass. 10 (P.-s) मति *f.*, मतिगुणः, बुद्धि *f.*, धीशक्ति *f.*, *See* **Intellect;** (region) प्र-,देशः; 'for (on) one's p.' तावत्, अपि; 'for the most p.' प्रायः, बहुशः, प्रायशः, प्रायेण, भूयिष्ठं; *See* **Mostly,** 'by p.s,' 'in p.s' भागशः, अंशशः; 'in p.' अंशतः, ईषत्, किंचित्; 'in good p.' संप्रीतमनसा, प्रियं, अनुकूलं, प्रसन्नं; प्रसन्नमनसा; 'in ill p.' रुष्ट-खिन्न-मनसा; 'in four p.s' चतुर्धा; 'in many p.s' बहुधा. -*v. t.* विभज् 1 U, परि-क्लृप् *c.*, विभागशः विन्यस् 4 U, वंट् 10; *See* **Divide.** 2 वि-युज् 7 A, 10, विश्लिष् *c.*; पृथक् कृ 8 U, वि-भिद् 7 P or *c.*, विच्छिद् 7 P: (the hair) सीमंतयति (D.). -*v. i.* वियुज्-विभिद्-विच्छिद्-pass., विगम् 1 P. विश्लिष् 4 P, अप-या 2 P, अपगम्. 3 वि-, दल् 1 P, स्फुट् 6 P, वि-दृ pass., शकलीभू. 4 (With) आ-मंत्र् 10 A, आप्रच्छ् 6 A; त्यज् 1 P, क्षिप् 6 P (place); 'let me now p. with you' अनुजानीहि मामधुना गमनाय. **-ing,** *a.* प्रास्थानिक (की *f.*), प्रस्थान-प्रयाण in comp.; 'p. ceremony' प्रस्थानकौतुकं. -*s.* वियोगः, विश्लेषः, विरहः, विभेदः. 2 वि-अप-गमः, प्रस्थानं, प्रयाणं, अपयानं; 'p. of the hair' सीमंतः, सीमंतरचनं. **-ly,** *adv.* अंशतः, भागतः, किंचित्, ईषत्, स्तोकं, कियत्, अल्पं, स्तोकांशेन, खंडतः. **-Partake,** *v.* अंशभाज्-*a.* भू 1 P, अंशं-भागं-ग्रह् 9 U or हृ 1 P, भज् 1 A, अंशं भज्, भागिन्-*a.* भू; *See* **Share.** 2 भुज् 7 A, सेव् 1 A. **-er,** *s.* अंशिन् *m.*, भागी, अंश-भाग-ग्राही-हारी-हरः, सह-भाक्-भोगिन्, भुज्-भाज्-in comp. **-Partial,** *a.* अव्यापक, असार्वत्रिक-आंशिक (की *f.*), असमग्र, असंपूर्ण, असकल, एकदेश-खंड- in comp.: 'p. eclipse' खंडग्रासः; 'p. rent' एकदेशच्छिद्रं. 2 पक्षपातिन्, पक्षस्नेहिन्, पक्षानुकूल, पक्षानुरागिन्, एकदेशीय, सपक्षपात, संगिन्, असमदृष्टि, असमदर्शिन्. **-ity,** *s.* पक्षपातः, पक्षपातिता, पक्षस्नेहः-आनुकूल्यं-अनुरागः, असमता, असमदृष्टि *f.*-बुद्धि *f.*, संगः. 2 स्नेहः, अनुरागः, प्रणयः, प्रेमन् *m. n.*; 'speak without any p.' मध्यस्थतां गृहीत्वा भण (M. 3). **-ly,** *adv.* अंशतः, असमग्रं, असकलं, असंपूर्णं, क्वचित् क्वचित्, असर्वत्र, खंडतः, एकदेशे, ईषत्, स्तोकं, खंड-एकदेश-in comp.; 'p. broken' खंडभग्न; *See* **Partly.** **-Participate,** *v. t.* भाग-अंशं-ग्रह् 9 U, संविभज् 1 U. **-ion,** *s.* अंश-भाग-ग्रहणं, संविभागः, सहभोगः-भुक्ति *f.* **-Participant,** *a.*, *s.* भागिन्, अंशिन्; *See* **Partaker.** **-Particle,** *s.* कणः, अणुः, लवः, क्षुद्रांशः, कणिका, लेशः, कला, परमाणुः. 2 निपातः, अव्ययः-यं. **-Partition,** *s.* परिच्छेदः, वियोजनं. 2 वि-,भागः, विभागकल्पनं-ना, विभजनं, वंटनं, व्यंशनं. 3 व्यवच्छेदनं, भित्ति *f.*, व्यवधा-धानं, कोष्ठः, संधिः. -*v. t.* विच्छिद् 7 P, विभज् 1 U, अंशांशि दा 3 U; *See* (*v. t.*). **-Partner,** *s.* अंशिन् *m.*, भागी, समांशी, सहभोगी-भागी; संगी, सहायः, सहकारी, संभूयकारी, संसर्गी, अनुषंगी; 'p. of joys and sorrows' समदुःखसुखः (S. 3). 2 **Husband, Wife,** q.v. **-ship,** *s.* सहकारिता, संभूयकारित्वं, समांशिता, संभूयसमुत्थानं.

Parterre, *s.* पुष्पवाटी-टिका, कुसुमाकरः.

Participle, *s.* कृदंतः; 'present p.' शतृ, शानच्; 'past p.' निष्ठा; 'potential passive p.' कृत्यः (all being names of terminations).

Parti(y)coloured, *a*. *See* under **Party.**

Particular, *a*. विशिष्ट, सविशेष, विशेषक, अव-परि-च्छेदक, विशेष in comp. 2 व्यक्त, विभिन्न, विविक्त, उद्दिष्ट, पृथगात्मक, अमुक in comp. 3 अव्यापक, अनौत्सर्गिक (की *f.*); विशिष्ट, not General q. v. 4 असाधारण (णी *f.*), असामान्य, लोकोत्तर, अप्राकृत (ती *f.*). 5 विलक्षण, अपूर्व. 6 सूक्ष्म, सूक्ष्मदृष्टि, सूक्ष्मदर्शिन्; 'at a p. time' विशिष्टसमये, समयविशेषे; 'a p. rule' विशेषविधिः; 'he is very p. about his dress' वेषक्रियायां सोऽतीव सूक्ष्मदृष्टिः. -*s*. विशेषः, अव-परि-च्छेदः; 'give p.s of the man' तस्य नरस्य विशेषं ब्रूहि; 'he told all the p.s of the battle' युद्धं स विस्तरेण अवर्णयत्, अखिलं युद्धवृत्तांतं अकथयत्; 'in p.' विशेषतः, विशेषेण. -**ity**, *s*. विशेषनिर्देशः कथनं, एकैकशःनिर्देशः. 2 असामान्यता, अव्यापकत्वं. 3 पार्थक्यं, भिन्नता, व्यक्ति *f*., विशिष्टता. 4 विवरणं, विस्तरः. -**ly**, *adv*. विशेषतः, सविशेषं, प्रधानतः. 2 विस्तरेण, सविस्तरं; सूक्ष्मतया, अतिसूक्ष्मं. 3 पृथक्, अवयवशः, एकैकशः. -**Particularize,** *v. t.* विशिष् 7 P, एकैकशः निर्दिश् 6 P or अभि-धा 3 U, सविशेषं वर्ण् 10 or कथ् 10, व्यवच्छिद् 7 P. -**ation,** *s*. विशेषवर्णनं-ना, विशेष-निर्देशः-कथनं, व्यवच्छेदः. -**ed,** *a*. विशेषित, एकैकशः निर्दिष्ट, व्यवच्छिन्न.

Partridge, *s*. तित्तिरः-रिः, चकोरः-रकः.

Parturient, *a*. आसन्नप्रसवा, प्राप्तप्रसववेदना -**Parturition,** *s*. प्रसवः, जननं, जन्मन् *n*. उत्पत्ति *f*.

Party, *s*. पक्षः; 'one's own p.' स्व-आत्म-पक्षः; 'of one's p.' स्वपक्षावलंबिन्, स्वपक्षपातिन्; 'of the opposite p.' वि-प्रति-पक्षः. 2 संसर्गः, सपक्षाणां गणः-संघः, कृतसंसर्गा जनाः, शाखा, पक्षः. 3 गणः, समूहः, दलं, संघः, वृंदं, मंडलं, गुल्मः-ल्मं, पंक्ति *f*. 4 अर्थिन् *m*., प्रत्यर्थी, वादी, प्रतिवादी. 5 सभा, समाजः, पंक्तिः, गणः; 'dinner (convivial) p.' सग्धि *f*., सह-सं-भोजनं; सपीति *f*., तुल्यपानं (drinking p.). 6 विशिष्टजनः, व्यक्ति *f*., विवक्षितपुरुषः. 7 संबंधिन् *m*., अनुषंगी, भागी, अंशी, सहकारी, सहायः; 'a p. to a plot' कूटसहायः. -*a*. पाक्षिक (की *f*.), पक्ष in comp. by (*s*.); 'p.-coloured' चित्रविचित्र, नानावर्ण-रंग, विचित्र; 'p.-man' पक्षपातिन् *m*. पाक्षिकः; 'p.-spirit' पक्षपातः; *See* **Partiality;** 'p.-wall' भित्ति *f*., संधिः; कुड्यं. -**Partisan,** *s*. पक्षपाती, पक्षावलंबी, पक्ष्यः, एकपक्षः, सपक्षः, सहोत्थायी, अनु-,संगी, पार्श्व(र्श्वि)कः, पक्षधरः. -**ship,** *s*. पक्षपातः-ग्रहणं-अवलंबनं.

Parvenu, *s*. *See* **Upstart.**

Pasquinade, *s*. निंदात्मको लेखः, उपहास-लेखः.

Pass, *v. t.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P; 'they two p. ed each other' परस्परमतीत्य-उल्लंघ्य-तौ निर्गतौ; तॄ 1 P, सं-उत्-निः-°, उत्-, लंघ् 1 A, 10, पारं गम् 1 P, अतिगम्; 'p.ed his examination' परीक्षापारं गतः, परीक्षामुत्ततार. 2 (Time) गम् c. (गमयति), नी 1 P, अति-वह् c., क्षै c. (क्षपयति), या c. (यापयति); 'he with difficulty p. ed eight years' तेनाष्टौ परिगमिताः समाः कथंचित् (R. VIII. 92); 'p-ing (staying for) three nights' तिस्रो वसतीरुषित्वा (R. VII. 33). 3 सं-,चर् c., संक्रम् c. 4 निष्पद् c., व्यव-स्था c. (स्थापयति), सिध् c. (साधयति); सं-अनु-मन् 4 A, परिग्रह् 9 P (bill &c.); 'p. sentence' निर्णयं दा 3 U, दंडं आदिश् 6 P; 'this p. es conception' विचार-विषयातिक्रांतमेतत्, धियः पथि न वर्तते. -*v. i.* गम्, इ-या- 2 P, चल्-चर् 1 P, प्र-,सृ 1 P, अति-व्यति-इ, अतिक्रम्; 'let it p. now' तिष्ठतु तदधुना, यातु, किमनेन. 2 प्र-चल्, प्रचलित-*a*. भू 1 P, प्र-सृ, प्रचलीभू. 3 सिध् 4 P, निष्पन्नी-सिद्धीभू, अनु-सं-मन् pass.; परिग्रह् pass. 4 उप-,संक्रम्, संचर्. 5 संवृत् 1 A, समा-पद् 4 A, सं-,भू, आ-पत् 1 P, घट् 1 A; *See* **Happen, Occur.** -**away,** अति-व्यति-इ, गम्, या, अतिक्रम्, अतिवृत्. 2 वि-प्र-,नश् 4 P, प्र-वि-ली 4 A, तिरोभू, वि pass., क्षर् 1 P. -**by,** अतिक्रम्, अति-इ, अतिचर्, उल्लंघ्. 2 उपेक्ष् 1 A, न गण् 10, त्यज् 1 P, अपास् 4 U; *See* **Neglect.** -**for,** Ex. by denominatives; एरंडोपि द्रुमायते 'p. es for a tree'; मन्-गण्-pass.; 'he p.s for a learned man' पंडित इति मन्यते (जनैः). -**into,** निविश्-प्रविश् 6 P. -**off,** अप-इ, अप-या-गम्, विगम्. -(*v. t.*) वि-सृ c., संदृश् c., आकल् 10; 'tried to p. the matter off with a joke' तं वृत्तां परिहासमिव गणयितुं-आकलयितुं-येते; हृदय-वल्लभोऽभिलिख्य कामदेवव्यपदेशेन सखीपुरतोऽपह्नुतः (Rat. 2) 'p. ed off the picture of her beloved upon her friend as that of Cupid.' -**on,** प्र-वृत्, प्र-या-गम्, सृ. -**over,** उपेक्ष्, उत्सृज् 6 P, त्यज्, न गण्, *See* लंघ्, अति-इ-अतिक्रम्, अतिक्रम्य गम्, तॄ; (*v. i.*); अंतरयानि (D.), मध्यमांबावृत्तांतोऽन्तरि आर्येण (U. 1) 'is p.ed over' &c.; Ex. 'let us p. by' स्था, आस् 2 A with तावत्; 'let us p. over this sad tale' तिष्ठतु-आस्तां-तावद्

दुःखवृत्तांतः. **-through,** निर्भिद् 7 P, प्रविश्य निर्गम्; (throughts &c.) *See* **Occur.** -*s.* संकटं, संक्रमः, संचरः, संकट or संबाध-पथः or मार्गः, दुर्गसंचरः, 2 दरी, विदरः, रंध्रं. 3 (Passport) अनुज्ञा, अनुमति *f.*, अनुज्ञापत्रं, मुद्रा; 'why do you leave the camp without (taking) a p.' किमर्थमगृहीतमुद्रः कटकान्निष्क्रामसि; 'without a p.' अमुद्रालांछितः (Mu. 2). 4 प्रहारः, आघातः, ताडनं. 5 दशा, अवस्था, स्थिति *f.*, दुर्दशा, दुर्गति *f.*, कष्टं, कृच्छ्रं, कष्टावस्था. **-able,** *a.* गम्य, तार्य, सुगम, उल्लंघ्य; 'not p.' दुर्गम, अगम्य. 2 सह्य, सोढव्य, उपेक्षणीय, विगुण. **-age,** *s.* गमनं, तरणं, यानं; 'p. through the world' लोकयात्रा, संसारपथः, 'p. to and fro' गमनागमनं, यातायातं. 2 मार्गः; *See* **Way.** 3 संक्रमः, संचारः, अतिक्रमः, पारगमनं, उल्लंघनं; *See* (*s.*). 4 गमन-संक्रमण-कालः. 5 संचरः, संक्रमः, दुर्गसंचरः. 6 गमनाधिकारः, अनुज्ञा- पत्रं- मुद्रा; *See* **Pass.** 7 वचनं, स्थानं, स्थलं, देशः. 8 वृत्तं, भूतं, वृत्तांतः; 'p.-money' आता(त)रः, तरमूल्यं-पण्यं, तारिकं, तार्यं. **-ed,** *a.* अतीत, गत, संक्रांत, वीत, तीर्ण, सिद्ध. 2 (As excrement) उच्चारित, हन्न, गून. **-er,** *s.* (p.-by), पथिकः, अध्वगः, पांथः; *See* **Traveller.** **-ing,** *s.* तरणं, गमनं, चलनं. -*a.* गामिन्, यायिन् in comp. 2 अतिक्रामक. 3 उत्तम, परम, श्रेष्ठ, विशिष्ट. -*adv.* अतीव, अतिमात्रं, नितांतं, अति pr., अतिशय in comp. **-Passenger,** *s.* तरः, तरितृ *m.*, उत्तरणकृत्. 2 नौ or पोत-गामी or यायी. 3 पथिकः, यात्रिकः, पांथः; *See* **Traveller.** **-Past,** *a.* गत, अतीत, भूत, व्यतीत, अतिक्रांत, वृत्त, परोक्ष; 'p. time' भूतकालः. 2 पूर्व, पूर्वतन (नी *f.*); 'in p. times' पुरा, पूर्वं, पुराकल्पे. 3 सिद्ध, निष्पन्न, समाप्त, कृत -*s.* भूतं, अतीतं, समतीतं, अतिक्रांतं, गत-अतीत-भूत-कालः. -*prep.*, अति pr., अतीत, अतिक्रांत, नष्ट, हीन in comp., अ-निर्-pr.; 'p. cure' असाध्य, निरुपचार; 'p. the range of sight' चक्षुर्विषयातिक्रांत, नयनपथातीत; 'p. all shame' निर्लज्ज, नष्ट-त्यक्त-लज्ज; 'p. human strength' अतिमानुषशक्ति; *See* **Beyond** also.

Passible, *a.* वेदनक्षम.

Passion, *s.* भावः, विकारः, विकृति *f.*, वृत्ति *f.*, रागः, रसः, मनो-विकारः-धर्मः-भावः-वृत्तिः-रागः, इंद्रियवृत्तिः. 2 इंद्रियं; 'the p.s' इंद्रियाणि, इंद्रियवर्गः, 'subduing the p.s' इंद्रियनिग्रहः; 'p. of love' कामविकारः, शृंगारभावः; 'void of p.s' वीतराग, विरक्त; 'absence of p.s' विरागः, विरक्ति *f.* 3 प्रकोपः, संरंभः, क्रोधः, रोषः, अमर्षः, उत्-सं-तापः; चंडता, उग्रता, क्षोभः, व्या-सं-क्षोभः, चित्त-क्षोभः-तापः-वेगः. 4 लालसा, लोभः, लोलुपता, औत्सुक्यं, उत्कंठा, उत्कटेच्छा, गाढाभिलाषः, व्यसनं, आसक्ति *f.*; 'quality of (tendency to) p.' रजोगुणः, रजस् *n.* 5 कामः, मदनः, स्मरः, कामविकारः, स्मरमोहः, रजः, रजोवृत्तिः, मदः, कामुकत्वं, अभिलाषः, अनुरागः; *See* **Love, Lust.** 6 दुःखानुभवः, दुःखभोगः. 7 सहनं, कर्माश्रयता, ग्रहणं **-ate,** *a.* क्रोधन, कोपन, क्रोधिल, शीघ्रकोपिन्, सुलभकोप, संरंभिन् ससंरंभ, रोष-कोप-क्रोध-शील, अमर्षण, रोषण, क्रोधिष्ठ, चंड पित्त-स्वभाव, आवेशवत्, चंड उत्ताप-संताप-शील, तिग्म, उष्ण. 2 तीव्र, अतितीक्ष्ण, उग्र, अत्युत्कट, उच्चंड, प्रखर, अतिरिक्त, परम, नितांत, गाढ, उत्कट; 'p. love for gambling' द्यूते गाढाभिनिवेशः, 'p. lover of music' नितांतं संगीतप्रियः. 3 रागयुक्त, विकाराधीन, सराग, रागान्वित, उत्कंठित, सानुराग, रजोगुणिन्, कामार्त; 'a p. woman' भामिनी, कोपना. **-ately,** *adv.* सकोपं, सक्रोधं, ससंरंभं, सामर्षं. 2 चंडं, अत्युत्कटं, तीक्ष्णं. बलवत्. 3 सरागं, सानुरागं, रागपूर्वं. **-ateness,** *s.* चंडस्वभावः, सुलभक्रोधित्वं, रोषणता, &c. **-less,** *a.* विरक्त, रागहीन, शांत-वीत-राग, निःसंग.

Passive, *a.* कर्मवाच्यं (p. voice); 'impersonal p.' भाववाच्यं. 2 सहन, सहिष्णु, सहनशील-वृत्ति-धर्मक, तितिक्षु, अनिवारक; oft. ex. by सह् 1 A. 3 निश्चेष्ट, निष्क्रिय, अप्रवर्तक, कर्माश्रय, कर्मपात्र. **-ly,** *adv.* सहिष्णुतया, निश्चेष्टं, अप्रतिकारेण. **-ness,** *s.* सहनशीलं-धर्मः-वृत्तिः, सहिष्णुता. 2 निश्चेष्टता, कर्माश्रयता, कर्मपात्रता.

Passport, *s.* *See* **Pass,** *s.* 3.

Paste, *v. t.* (उदपेषं) वि-, लिप् 6 P, बंध् 9 P, आ-संज् c. -*s.* उदपेषः, जलपेषः; 'p.-board' संसृष्टपत्रं.

Pastern, *s.* अश्वखुरसंधिः.

Pastime, *s.* क्रीडा, विनोदः, लीला, केलि *f.*, विहारः, खेला, खेलनं, विलासः, कौतुकं.

Pastor, *s.* अवि-अजा-पालः, मेषपालः. 2 आचार्यः, गुरुः, उपाध्यायः. **-al,** *a.* Ex. by (*s.*) in comp.; 'p. life' अविपालवृत्ति *f.*; 'p. duties' धर्मकार्याणि; 'p. office' आचार्यकर्म. -*s.* 'p. poem' गोपकाव्यं.

Pastry, *s.* मिष्टान्नं, आपूपिकं, पिष्टकाः (pl.); 'p. cook' आपूपिकः, भक्ष्यंकारः.

Pasture, *s.* शाद्वलं, शाद्वल-तृणावृत-भूमि *f.*, यवसक्षेत्रं, गोप्रचरः. 2 तृणं, यवसं, घासः, पशव्यं, गवादनं, पशुभोजनं. -*v. i.* चर् 1 P, तृणं खाद् 1 P or भक्ष् 10. -*v. t.* चर् c., तृणं भुज् c. or खाद् c. **-age,** *s.* प्रचारभूमिः, गोप्रचरः. 2 शस्यं, घासः, यवसं; *See* (*s.*)

Pasty, *s.* मांसपूपः.

Pat, *a.* युक्त, उचित. -*adv.* युक्तं, उचितं, सम्यक्. -*v. t.* हस्तेन स्पृश् 6 P or परामृश् 6 P; लघु प्र-हृ 1 P or तड् 10. -*s.* लघ्वाघातः, लघुप्रहारः.

Patch, *v.* सं-ग्रंथ् 9 P, वस्त्रखंडान् निषिव् 4 P or सं-धा 3 U; 'p.ed up garment' नानाखंडैर्ग्रथितं वस्त्रं, कर्पटः, कंथा; 'wearing p. ed garment' कंथाधारिन्, कर्पटिक. -*s.* खंडः-डं, शकलः-लं, वस्त्र-पट-खंडः, ग्रथितखंडः; 'p.-work' संग्रंथनं, खंड-कर्मन् *n.* कंथाकरणं. 2 भूभागः, प्रदेशः, भूमि *f.*, क्षेत्रं. -ed, *a.* संग्रथित, खंडमय (यी *f.*), खंडरूप.

Pate, *s.* मुंडं, मस्तकाग्रं; *See* **Head.**

Patent, *a.* स्पष्ट, व्यक्त, स्फुट, सुप्रकाश, सुव्यक्त, सुस्पष्ट, प्रत्यक्ष. -*s.* असामान्याधिकारः, विशिष्टाधिकारपत्रं. -ee, *s.* असामान्याधिकारिन् *m.*

Pater-familias, *s.* कुलपतिः, कौटुंबिकः.

Paternal, *a.* पैतृक (की *f.*), पैत्र (त्री *f.*), पित्र्य, पितृ in comp., पित्रागत, पितृप्राप्त; 'p. estate' पैतृकी भूमिः; 'p. aunt' पितृष्वसा. 2 पित्रनुरूप, पितृतुल्य-सन्निभ. -ly, *adv.* पितृवत्, पितेव, पितृसंनिभं.

Paternity, *s.* पितृत्वं, पितृधर्मः. 2 प्रभवः, प्रसूति *f.*

Path, *s.* (P.-way) पथिन् *m.*, मार्गः, पद्धति *f.*, सरणि-णी *f.*, वर्त्मन् *n.*, पदवि-वी *f.*; *See* **Way;** 'the p. of a planet' कक्षा-क्षः; 'the wrong p.' उत्पथः, कापथः, विमार्गः; 'good p.' सुपथः; 'to seduce from the right p.' उत्पथं नी 1 P. -less, *a.* निष्पथ, अगम्य, दुर्गम.

Pathogenesis, *s.* रोगनिदानशास्त्रं.

Pathetic,-al, *a.* करुण, हृदयद्राविन्-ग्राहिन्, हृदिस्पृश्, हृदयंगम, करुणात्मक. -ally, *adv.* करुणं, हृदयग्राहितया; 'a speech p. worded' करुणार्थग्रथितं वचः' -**Pathos,** *s.* करुणो रसः, कारुण्यरसः, करुणारसः; रागः, रसः, कारुण्यं.

Pathology, *s.* रोगनिदानशास्त्रं.

Patient, *a.* क्षमिन्, सहिष्णु, तितिक्षु, सहनक्षमा-शील, सहन, क्षमावत्, मर्षिन्, क्षमायुक्त. क्षम-सह in comp. 2 धीर, शांत, धृतिमत्; 'very p.' बहुसह; 'p. of labour' क्लेशसह-क्षम; 'to be p.' सह् 1 A, क्षम् 1 A; *See* **Endure.** -*s.* आतुरः, रुग्णः, रोगिन् *m.* -ly, *adv.* क्षांत्या, क्षमापूर्वं, धीरतया. -**Patience,** *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहिष्णुता. 2 धीरता, प्रशांति *f.*, धृति *f.* धैर्यं, उत्साहः.

Patio, *s.* अंगणं-नं.

Patriarch, *s.* कुलपतिः, आदि-मूल-पुरुषः. 2 वृद्ध-गुरु-जनः. -al, *a.* (*s.*) in comp.

Patrician, *s.* कुलीनः, अभिजातः, कुलीनजनः, शिष्टः. -*a.* कुलीन, शिष्ट, सद्वंशज, अभिजात.

Patricide, *s.* *See* **Parricide.**

Patrimony, *s.* पैतृकरिक्थं-धनं, गोत्रधनं, पैतृकं, दायः, पित्रागतधनं. -ial, *a.* पितृप्राप्त-आगत, दायलब्ध, पैतृक (की *f.*).

Patriot, *s.* स्वदेशानुरागिन् *m.*, स्वदेशहितपरायणः, स्वदेशाभिमानिन् *m.* स्वदेशभक्तः. -ic, *a.* स्वदेशानुरागिन्, स्वभूम्यनुरक्त, स्वदेशाभिमानिन्, स्वदेशभक्त-आसक्त. -ically, *adv.* स्वदेशहितेच्छया. -ism, *s.* स्वदेशप्रीति *f.*-अनुरागः, जन्मभूमिवात्सल्यं, स्वदेशाभिमानः.

Patrol, *v. i.* (रक्षणार्थं) रात्रौ परिक्रम् 1 U, 4 P or परिभ्रम् 1, 4 P. -*s.* रक्षिणः, नागरिकाः (pl.), रक्षकः, रक्षिन् *m.*, रात्रिंपरिचरः.

Patron, *s.* संभावयितृ *m.*, पालकः, उपकारकः. संवर्धकः, आश्रयः, पुरस्कर्तृ *m.*, रक्षकः, शरणं; नाथः, पोषकः, पिंडदः. -age, *s.* संभावना, आश्रयः, साहाय्यं, अनुग्रहः, उपकारः, पालनं, पोषणं, रक्षणं, संवर्धनं, अवलंबः, पुरस्कारः. -al, *a.* रक्षक, वर्धक. -ize, *v. t.* सं-भू *c.*, आश्रयं दा 3 U, प्रति-अनु-पा *c.* (पालयति), अनुग्रह् 9 P, अवलंब् 1 A, संवृध् *c.*; oft. by (*s.*) with भू 1 P. -less, *a.* निराश्रय, अनाथ, अशरण, निरवलंब, निराधार.

Patronymic, *s.* पैतृकनामन् *n.*, गोत्रनाम, अपत्यवाचकः; 'chapter treating of Taddhita p. terminations' तद्धितापत्याधिकारप्रकरणं.

Patten, *s.* काष्ठपादुका.

Patter, *v. i.* पटपटायते (D.). -*s.* पटपटाशब्दः.

Pattern, *s.* आदर्शः, निदर्शनं, उपमा, प्रतिमा, प्रतिरूपं-कृति *f.* 2 आकारः, रूपं, संस्कारः; *See* **Model.**

Paucity, *s.* अल्पता, स्तोकता; ex. by 'few' q. v.

Paunch, *s.* पिचिंडः, उदरं, जठरः-रं, तुंदं, लंबोदरं; 'having a p.' लंबोदर, तुंदिल, पिचिंडिल; *See* **Corpulent.** -*v. t.* निरंत्रीकृ 8 U.

Pauper, *s.* अनाथः, आकिंचनः, दरिद्रः, भिक्षुः, भिक्षाजीविन्; *See* **Beggar, Poor.** -ism, *s.* भिक्षावृत्ति *f.*, भैक्ष्याजीवः, भैक्ष्यं.

Pause, *v. i.* वि-उप-रम् 1 P, निवृत् 1 A; विश्रम् 4 P, शम् 4 P, विच्छिद् pass.; 'p. upon' सं-,चिंत् 10; *See* **Consider.** -*s.* विरामः, विरति *f.*, निवृत्ति *f.*, विच्छेदः, विश्रामः, प्र-उप-शमः. 2 अंतरं, व्यवधानं, अवकाशः, अंतरालं. 3 अवसानं, यतिः (in poetry).

Pave, *v. t.* प्रस्तरैः-इष्टकाभिः-खच् 10 (खचयति) or आस्तॄ 9 U,-स्तृ 5 U, (भूमिं)

निबंध् 9 P. **-er,** *s.* शिलास्तरणकृत् *m.* **-ment,** *s.* कुट्टिमः-मं, निबद्धा भूः, शिलास्तरः-फलकं.

Pavilion, *s.* मंडपः-पं, पटमंडपः-वासः; *See* **Tent.**

Paw, *s.* पादः, सनखः पादः. 2 हस्तः, करः, चपेटः. **-v.** पादेन-खुरेण (भूमिं) अभिहन् 2 P or विलिख् 6 P. 2 करेण स्पृश् or परामृश् 6 P.

Pawn, *v. t.* निक्षिप् 6 P, न्यस् 4 U, आ-धा 3 U, न्यासीकृ 8 U, आधीकृ. **-s.** न्यासः, निक्षेपः, आधिः, बंधकः, पणः; *See* **Pledge.** 2 (At chess) शा(सा)रः-रिः; 'p.-broker' निक्षेपव्यवसायिन् *m.*

Pay, *v. t.* दा 3 U, 1 P. 2 सं-पद् c., संपृ c., साध् c.; (a person) वेतनं-मूल्यं-दा; (debt) परि-,शुध् c., अपाकृ 8 U, अपवृज् 10, प्रतिकृ; 'p. for' निस्तॄ 1 P, निष्कृ; 'he paid for the book' तस्य पुस्तकस्य मूल्यं स ददौ; 'they paid for their offence with their lives' जीवितव्ययेन स्वापराधस्य निष्क्रयः कृतः; *See* Cost. **-s.** वेतनं, भृति *f.*, मूल्यं, निर्वेशः; *See* Hire; 'p.-day' वेतनदानदिवसः; 'p.-master' वेतनाध्यक्षः. **-ee,** *s.* परि-,ग्रहीतृ *m.* **-er,** *s.* दातृ *m.* शोधकः. **-ment,** *s.* दानं, शोधनं, निराकरणं, निस्तारः. साधनं; 'p. of a debt' ऋणमुक्ति *f.*-शोधनं, आनृण्यं.

Pea, *s.* कलायः, स(सा)तीनकः, सतीलकः, हरेणुः, रेणुकः.

Peace, *s.* संधिः, संधानं; 'to make p.' सं-धा 3 U. 2 शमः, प्र-उप-शमः-शांति *f.*, निर्वृति *f.*, स्वास्थ्यं, स्वस्थता, शांतता, सुखं; निरुद्वेगः, उपप्लवाभावः. 3 ऐक्यं, सख्यं, मैत्री, अविरोधः, संवादः. 4 मौनं, तूष्णींभावः; 'p. of mind' स्वास्थ्यं, चित्तप्रसादः, मनःशांतिः; 'hold p.' तूष्णीं भू, वाचं यम् 1 P, मौनीभू; 'p.-maker' संधातृ *m.* 'p.-offering' शांतिहोमः. **-*interj.*** शांतं, तूष्णीं भव. **-able,** *a.* प्र-,शांत, शांतप्रकृति-स्वभाव, अक्षुब्ध, प्रसन्न, निराकुल, अव्यग्र, अनुद्विग्न, स्वस्थ. 2 शांतिप्रिय, युद्ध-कलह-विमुख (खी *f.*). **-ableness,** *s.* शांतता, स्वास्थ्यं. 2 युद्धद्वेषः, कलहविमुखता. **-ful,** *a.* प्र-,शांत, निरुपद्रव, निरुपप्लव, निष्कंटक, विग्रह-संग्राम-हीन. 2 (Life &c.) निर्वृत, स्वस्थ, निरुद्वेग, सुख, in comp.; *See* **Peaceable. -fully,** *adv.* शांतं, निरुद्वेगं, स्वस्थं, शांतमनसा-चेतसा. 2 युद्धं विना, साम्ना, सामोपायेन.

Peacock, *s.* मयूरः, नीलकंठः, शिखंडिन् *m.*, शिखी, बर्ही, बर्हिणः, शिखावलः. केकी, भुजंगभुक्, कलापी, मेघनादानुलासी, प्रचलाकी; 'p.'s tail' शिखंडः, बर्हः, पिच्छं, कलापः; 'p.'s crest' शिखा, चूडा; 'eye in the tail' चंद्रकः; मेचकः; 'p.'s cry' केका. **-Peafowl,** *s.* मयूरः-री, मयूरजाति *f.* **-Peahen,** *s.* मयूरी, शिखंडिनी, बर्हिणी.

Peak, *s.* शिखरः-रं, शृंगं, कूटः-टं, सानु *m. n.*, चूडा, ककुदः-दं, पर्वताग्रं. 2 (Generally) अग्रं, शिखरं, शिखा, चूडा. **-ed,** *a.* शिखरिन्, शृंगिन्, सकूट, ककुद्मत्. 2 तीक्ष्णाग्र, सूच्यग्र.

Peal, *s.* ध्वनिः, रवः, नि-,नादः, महाध्वनिः, निर्घोषः; *See* Noise; 'p. of thunder' घनगर्जितं, मेघनिर्घोषः, स्तनितं; 'p. of bells' घंटानादः, क्वणितं. **-*v. i.*** नद्, स्वन्, क्वण्,ध्वन् 1 P; स्तन्, गर्ज् 1 P (of thunder).

Pearl, *s.* मुक्ता, मुक्ताफलं, मौक्तिकं, शुक्तिजं; 'p.-shell शुक्ति *f.*, मुक्तास्फोटः, शुक्तिका, मुक्तागारं. **-y,** *a.* मुक्तामय (यी *f.*), मुक्तापूर्ण. 2 मुक्तोपम, मुक्ताभ.

Peasant, *s.* कृषकः, कृषीवलः, क्षेत्रिकः, ग्राम्यः, ग्रामीणः, जानपदः; *See* **Farmer. -ry,** *s.* कृषीवलाः, कृषकवर्गः.

Pease, *s.* pl. *See* **Pea.**

Pebble, *s.* उपलः, दृषत्कणः, चूर्णखंडः, शर्कराखंडः. **-y,** *a.* प्रचुरोपल, उपलसंकीर्ण, शर्करिल, सशर्कर, शार्करीय.

Peccable, *a.* पापवश-अधीन.

Peccadillo, *s.* स्खलितं, अल्प or क्षुद्र-दोषः or अपराधः.

Peccant, *a.* पापिन्, अपराधिन्, दोषिन्, सदोष, पापशील. 2 दुष्ट, दूषित, विकृत. **-Peccancy,** *s.* विकारः, दोषः.

Peccavi, *s.* दोषस्वीकारः.

Peck, *v.* (चंचुपुटेन) अभिहन् 2 P, तुद् 6 P, प्र-हृ 1 P, वि-,लिख् 6 P, दंश् 1 U, तुंडेन खंड् 10, चंचुप्रहारं कृ 8 U, चंचुप्रहारेण जर्जरीकृ. 2 (Grain) चंच्वा ग्रह् 9 U or आ-दा 3 A or लिह् 2 U; 'p. at' सततं ग्रह् 1 P, निंद् 1 P; *See* **Censure. -s.** द्रोणपादः. **-er,** *s.* मतुदः.

Pectoral, *a.* उरस्य. 2 कासघ्न (घ्नी *f.*). **-s.** कासघ्नं, कफ-श्लेष्म-घ्नं.

Peculate, *v. i.* छलेन आत्मसात्कृ 8 U or ग्रस् 1 A, or मुष् 9 P or अपहृ 1 P. **-ion,** *s.* छलेन अपहारः, ग्रसनं, मोषणं. **-or,** *s.* मोषकः,

Peculiar, *a.* विशेष in comp.; विशिष्ट, असाधारण (णी *f.*), असामान्य, अव्यापक; आत्मीय, स्वीय; *See* **Particular. -s.** असाधारणधनं, स्वीयं धनं. **-ity,** *s.* विशेष-धर्मः-लक्षणं-चिह्नं-गुणः, विशेषः, धर्मः, गुणः. **-ly,** *adv.* विशेषतः, विशेषेण, सविशेषं.

Pecuniary, *a.* अर्थ-धन-द्रव्य-in comp.; 'p. loss' अर्थहानिः; 'p. difficulty' अर्थकृच्छ्रं. 2 धन-द्रव्य-रूप, अर्थात्मक.

Pedagogue, *s.* बालशिक्षकः-पाठकः. 2 **Pedant,** q. v.

Pedal, *a.* पादविषयक, पादसंबंधिन्.

Pedant, *s.* पंडितंमन्यः, पंडितमानिन् *m.*, विद्यागर्वितः. **-ic, ical,** *a.* पांडित्यदर्शिन्, समुद्धत. **-ically,** *adv.* विद्याभिमानेन. **-ry,** *s.* विद्यावलेपः, पांडित्यदर्पः, दंभार्थं पांडित्यदर्शनं.

Peddler, *s. See* **Pedler.**

Pedastal, *s.* (स्तंभादेः) पादः, आधारः; स्तंभतलं, फलकः.

Pedestrian, *s.* पदातिः, पादचारिन् *m.*, प(पा)दगः, पादातः; *See* **Foot-soldier.** -*a* पादग, पादचारिन्-गामिन्, पाद in comp **-ism,** *s.* पादचारः, पादगमनं.

Pedicle, Pedicel, *s.* मंजरि-री *f.* 2 वृंतं, प्रसवबंधनं.

Pedicular, *a.* यूकापूर्ण.

Pedicure, *s* पादरोगवैद्यः. 2 पादापेक्षा.

Pedigree, *s.* वंशावलि-ली *f.*, अन्वयः, वंशः, कुलं. 2 वंशावलिपत्रं, वंशचरितं.

Pedler, *s.* (भ्रमन्) भांडवाहः, क्षुद्रद्रव्यविक्रयिन् *m.*

Peduncle, *s.* वृंतं, प्रसव-पुष्प-बंधनं.

Peel, *s.* त्वच् *f.*, वल्कं, चर्मन् *n.*, शल्कं. **-*v. t.*** त्वचं अप-नी 1 P or निष्कुष् 1 P or निर्हृ 1 P, त्वचयति (D.), निस्त्वचीकृ 8 U, त्वक्ष् 1 P. **-*v. i.*** निस्त्वचीभू 1 P. **-ing,** *s.* त्वक्षणं, त्वङ्निष्कर्षः.

Peep, *v. i.* जालमार्गेण दृश् 1 P or वीक्ष् 1 A, प्रच्छन्नं ईक्ष्, सूक्ष्मं निरूप् 10; जालांतरप्रेषितदृष्टिरन्या (R. vii. 9) 'another p. ing through a window.' 2 शनैः उद्-गम् 1 P or उद्-इ 2 P or प्र-निर्-भा 2 P, प्रकाश् 1 A, दृश्-लक्ष्-pass., प्रादुः-आविः-भू 1 P. 3 विरु 2 P, कूज् 1 P. **-*s.*** जालमार्गेण वीक्षणं, सूक्ष्मनिरूपणं-वीक्षणं-दृष्टिः *f.* 2 पूर्व-प्रथम-दर्शनं-आलोकः-प्रकाशनं; 'p.-hole' जालमार्गः-रंध्रं, सूक्ष्मरंध्रं, जालांतरं.

Peer, *s.* वयस्यः, सहायः, तुल्यः, तुल्य-सम-पदस्थः. 2 कुलीनः, अभिजातः, शिष्टजनः. **-*v. i.*** **Appear,** q. v. 2 **Peep,** q. v. **-er,** *s.* सूक्ष्मनिरूपकः. **-ess,** *s.* कुलीना. **-less,** *a.* अतुल, अनुपम, अप्रतिम; *See* **Matchless.**

Peevish, *a.* पिशुन, प्रतीप, वक्र, वक्र-वामशील, दुःशील, कर्कश, रूक्षभाव, दुष्टप्रकृति. 2 कलहप्रिय, कोपन. **-ly,** *adv.* प्रतीपं, वक्रभावेन. **-ness,** *s.* पैशुन्यं, वक्रभावः-शीलं, रूक्षस्वभावः, दुःशीलता, कार्कश्यं.

Peewit, *s. See* **Lapwing.**

Peg, *s.* नागदंतः, भारयष्टि *f.*, विहंगिका; 'p. of a lute' कूणिका; 'iron p.' कीलः-लकः. **-*v. t.*** नागदंते अवलंब् c. or बंध् 9 P.

Pelf, *s.* अन्यायार्जितं धनं.

Pell, *s. See* **Skin,** or **Hide** *s.*

Pellet, *s. See* **Pill.**

Pellicle, *s.* तनुत्वच् *f.*, सूक्ष्मचर्मन् *n.*, पटलं, पुटः-टं.

Pell-Mell, *adv.* संकुलं, संकीर्णं, क्रमं विना.

Pellucid, *a.* स्वच्छ, निर्-वि-मल, विशद, प्रसन्न, शुद्ध. **-ity,** *s.* **ness,** *s.* स्वच्छता, निर्मलता, वैशद्यं, प्रसादः.

Pelt, *v. t.* (लोष्टैः) प्रहृ 1 P, तड् 10, अभि-, हन् 2 P, आहन् 2 U; 'he was p. ed to death' लोष्टघातं हतः. 3 तीव्रं-बलवत्-वृष् 1 P, धारासारेण वृष्; 'there was a p. ing shower of rain' धारासारेण महती वृष्टिर्बभूव (H. 3). **-*s.*** चर्मन् *n.*, दृति *f.*, कृत्ति *f.* 2 प्रहारः, आघातः.

Pelvis, *s.* बस्तिदेशः.

Pen, *v. t.* लिख् 6 P, पत्रे निविश् c. 2 (व्रजे) नि-अव-रुध् 7 U. **-*s.*** लेखनी, कलमः, अक्षरतूलिका, तूलिका. वर्णिका (painter's p.). 2 व्रजः, अवरोधः; 'cow-p.' गोशाला, गोष्ठं; 'p.-man' लिपिज्ञः, लेखकः, लेखनकुशलः; 'p.-manship.' लिपि *f.*, लेखनविद्या, लेखनचातुर्य-कौशलं. **-Pent,** (up) *a.* नि-अव-रुद्ध; 'p. house' उपगृहं.

Penal, *a.* दंडार्ह, दंडनीय, दंड्य. 2 दंडविषयक. **-ty,** *s.* दंडः, निग्रहः, शासनं. 2 साहसं, अर्थ-धन-दंडः.

Penance, *s.* तपस् *n.*, तपस्या, तपश्चर्या, कृच्छ्रं, यमः, कायक्लेशः; 'imposed p.' प्रायश्चित्तं; 'practise p.' तपः तप् 4 A or आचर् 1 P, तपस्यति (D).

Penchant, *s. See* **Inclination.**

Pencil, *s.* तूलिका, तूलि *f.*, वर्तिका, ईषिका, लेखनी. **-*v. t.*** लिख् 6 P, वर्तिकया लिख् or अंक् 10.

Pendant, *s.* कर्णावतंसः, कुंडलं, प्रालंबः, लोलकः.

Pendent, *s.* वि-,लाल, चल, प्रलंबमान, प्रलंब, आलंबिन्, आ-प्र-लंबित.

Pending, *a.* अनिर्णीत, अनिश्चित, अनिष्पन्न. 'p. the decision' यावन्निर्णयो न कल्प्यते.

Pendulous, *a.* प्र-,लंब, लंबिन्, लंबित, लोल.

Pendulum, *s.* लोलकः, लोलदंडः.

Penetrate, *v. t.* प्र-आ-विश् 6 P, निर्-भिद् 7 P, व्यध् 4 P, छिद् 7 P, गाह् 1 A (forest &c.); निखन् 1 P. 2 व्याप् 5 P, मुर्छ् 1 P, (छाया न मूर्च्छति मलोपहतप्रसादे दर्पणतले S. 7). 3 अर्थं बुध् 1 P or ज्ञा 9 U, आशयं ग्रह् 9 U. **-ion,** *s.* प्रवेशः-शनं, भेदः-दनं, वेधः-धनं. 2 व्याप्ति *f.*, मूर्च्छनं. 3 अर्थबोधः, अर्थ-आशय-ज्ञानं. 4 (Power of p.) ग्रहणसामर्थ्यं, कुशाग्र-सूक्ष्म-मति *f.* or बुद्धि *f.*, तीक्ष्ण or सूक्ष्म-बुद्धित्वं or मतित्वं, वैदग्ध्यं; 'a man of p.' मर्मज्ञः, सूक्ष्ममतिः, कुशाग्रबुद्धिः, विदग्धः, भेदिन्, मार्मिकः. **-ing, -ive,** *a.* प्रवेशक,

वेधिन्, भेदक. 2 व्यापक, व्यापिन्. 3 सूक्ष्म or तीक्ष्ण-मति or बुद्धि, कुशाग्रमति-बुद्धि, विदग्ध, मर्मज्ञ, मर्मच्छेदिन्.

Peninsula, *s.* द्वीपकल्पः-ल्पं. **-r,** *a.* द्वीपकल्परूप; द्वीपकल्पस्थ.

Penis, *s.* लिंगं, उपस्थः, शिश्नः, मेढ्रः, मेहनं, शेफस् *n.*, चर्मदंडः.

Penitent, *a.* अनुशयिन्, अनुतापदग्ध, जात-कृत-अनुताप. **-ial,** *a.* अनुतापजनित, अनुशयार्थक, पश्चात्तापरूप. **-iary,** *s.* प्रायश्चित्तागारं, कारावासः. **-ly,** *adv.* सानुशयं, सपश्चात्तापं. **-Penitence,** *s.* अनुतापः, पश्चात्तापः, अनुशयः, अनुशोकः; *See* **Repentance.**

Pennant, Pennon, *s.* ध्वजः, पताका, केतुवसनं; *See* **Banner.** **-Pennate,** *a.* सपक्ष, पक्षयुक्त.

Penny, *s.* मुद्रा. **-Penniless,** *a.* अकिंचन, निर्धन; *See* **Poor.**

Pensile, *a.* *See* **Pendent.**

Pension, *s.* (भूत-पूर्व-सेवार्थं) वृत्ति *f.*, वेतनं, वार्षिकं. **-*v. t.*** (भूत-पूर्व-सेवार्थं) वृत्तिं दा 3 U. **-er,** *s.* वृत्तिभुज् *m.*, वृत्तिभोगिन् *m.*

Pensive, *a.* चिंता or ध्यान-पर or परायण, सचिंत, चिंताक्रांत, उन्मनस्क, उदासीन; 'in a p. mood' सचिंतवृत्त्या, गंभीरं. **-ly,** *adv.* सचिंतं, ध्यानपूर्वं. **-ness,** *s.* ध्यानपरता, विषादः, खेदः.

Pentachord, *s.* पंचतंत्रीवाद्यं.

Pentagon, *s.* पंचभुजः. **-al,** *a.* पंचकोण, पंचभुज.

Pentangular, *a.* पंचकोण, पंचास्र.

Penult, *s.* उपांत्याक्षरं. **-imate,** *a.* उपांत्य; 'p. letter' उपधा, उपांत्यं.

Penumbra, *s.* खंडच्छाया.

Penury, *s.* दारिद्र्यं, निर्धनता, दुर्गति *f.* **-ious,** *a.* दीन, निर्धन, निःस्व; *See* **Poor.** 2 कृपण, क्षुद्र, कदर्य; *See* **Miserly.**

Peon, *s.* भृत्यः, पदातिः; *See* **Servant.**

People, *s.* जनाः, लोकः, प्रजा, (*pl.* also); जनता, देशवासिनः, प्रकृतयः (pl.); 'country p.' ग्रामीणाः, ग्रामीयजनाः, जानपदाः; 'common p.' प्राकृताः, इतरे-पृथग्-जनाः, सामान्य or प्राकृत-जनाः or लोकाः. 2 वर्गः, गणः, वर्णः, जनः, लोकः. 3 सेवकजनः-गणः, परिवारः. **-*v. t.*** जनैः पूर् 10 or आकॄ 6 P, वस् c.

Pepper, *s.* मरी(रि)चं, कालकं, वेल्लजं, कृष्णं, ऊषणं, धर्मपत्तनं; 'long ' पिप्पली; See under **Long.** **-*v. t.*** अवकॄ 6 P.

Pepsin, *s.* जाठररसविकारः.

Peptic, *a.* पाचक, पाचन, दीपन, अग्निद.

Peracute, *a.* अतितीक्ष्ण, अतितीव्र.

Peradventure, *adv.* कदापि, कदाचित दैवात्, दैववशात्.

Perambulate, *v. t.* परि-इ 2 P, परिक्रम् 1 U, 4 P, परिभ्रम् 1, 4 P, पर्यट् 1 P, परि-सृ-गम् 1 P; इतस्ततः चल्-चर् 1 P. **-ion,** *s.* परिक्रमः-मणं, परिभ्रमणं, पर्यटनं.

Per annum, *adv.* प्रतिवर्षं, प्रतिवत्सरं.

Perceive, *v. t.* उपलभ् 1 A, ज्ञा 9 U, वि-भू c., बुध् 1 P, ग्रह् 9 U, अवगम् 1 P, अव-इ 2 P, अनुभू 1 P, विद् 2 P; *See* **Know.** **2** (By the eye) दृश् 1 P, ईक्ष् 1 A, निरूप् 10, आ-,लक्ष् 10, आलोक् 1 A, 10; *See* **See.** **-ed,** *a.* ज्ञात, विदित, उपलब्ध, गोचर; 'p. by the senses' इंद्रियगोचर. **-er,** *s.* लक्षकः. **-Perceptible,** *a.* वेद्य, उपलभ्य, प्रत्यक्ष, दृष्टिगोचर, व्यक्त, परिस्फुट. सुस्पष्ट; oft. by विषय, गोचर, ग्राह्य in comp.; 'p. by the eye' प्रत्यक्ष, चक्षुर्ग्राह्य. दृष्टिगोचर; कर्णविषय, इंद्रियगोचर, &c. **-Perceptibly,** *adv.* प्रत्यक्षं, प्रत्यक्षतः.

Perception, *s.* उपलब्धि *f.*, ग्रहणं; बोधः, अवगमनं, अनुभवः, वेदनं, विभावनं, ज्ञानं, व्यक्ति *f.* **2** (Power of p.) ग्राहकत्वं, ग्रहण-वेदन-शक्ति *f.*, [illegible], चैतन्यं, चिच्छक्ति *f.* **-Perceptive,-Percipient,** *a.* ग्रहणक्षम, ग्राहिन्, ग्राहक, विषयग्रहणसमर्थ, चेतन.

Per cent, *adv.* Ex. by उत्तर in comp; '5 p.' पंचोत्तरं शतं.

Perch, *s.* वासयष्टि *f.*, संडीनयष्टिः, यष्टिः, दंडः. **-*v. i.*** अध्यास् 2 A (with acc.), नि-ली 4 A, निषद् 1 P (with loc.); सं-डी 1 A (of birds.).

Perchance, *adv.* *See* **Perhaps.**

Percolate, *v. i.* कणशः-लवशः स्रु-क्षर्-गल्-1 P or स्यंद् 1 A. **-*v. t.*** शुध् c., बिंदुक्रमेण-लवशः स्रु c. or गल् c. **-ion,** *s.* लवशः क्षरणं-स्रवणं-गलनं.

Percussion, *s.* समाघातः, संघट्टः, आ-प्रति-घातः.

Perdition, *s.* उच्छेदः, क्षयः, वि-प्र-नाशः. **2** अधोगति *f.*, अधःपातः, नरक-निरय-पातः; 'p. (ruin) seize thee' (cf. 'Murrain take thee') अकरणिः-अजीवनिः-अवग्राहः-निग्राहः-ते भूयात्.

Perdue, *a.* प्रच्छन्न, गूढ.

Perdurable, *a.* चिरस्थायिन्.

Peregrinate,-ion, See **Travel.**

Peremptory, *a.* सुनिश्चित, निर्णीत, नियत; अविशंक्य, अवैकल्पिक (की *f.*), परिच्छिन्न, अवश्यक. 2 स्पष्ट, परिस्फुट, सुव्यक्त, भिन्नार्थ; 'p. order' अलंघनीयः-अनतिक्रमणीयः-आदेशः; 'the command of elderly persons is (to be considered as) p.' आज्ञा गुरूणां ह्यविचार-

पीया (R. xiv. 46). 3 दृढ-स्थिर-मति, सकृद्वादिन्, दृढसंकल्प. **-ily,** *adv.* सुनिश्चितं, सुव्यक्तं, भिन्नार्थं, सुस्पष्टं; दार्ढ्येन, दृढनिश्चयपूर्वं. **-iness,** *s.* स्पष्टता, दृढनिश्चयः, दृढता, अविशंक्यता.

Perennial, *a.* वर्षावधि, वर्षस्थायिन् 2 नित्य, अक्षय्य, निरंतर, अविरत.

Perfect, *a.* सिद्ध, संपन्न, निष्पन्न, समाप्त, परिणत. 2 अशेष, समग्र, सकल, सं-परि-पूर्ण, समस्त, अविकल, अखंड, अक्षत, अन्यून, निर्दोष. 3 परम, उत्कृष्ट, विशिष्ट, उत्तम; निपुण, कुशल, अभिज्ञ, पारंगत, विशारद, प्रवीण, परिपक्व, संपन्न. 4 (In grammar) लिट्. **-***v. t.* साधु c., सिध् c. (साधयति), सं-निः-पद् c., परि-सं-पूर् 10, समाप् c., निर्वृत् c.; ex. by कृ 8 U with (*a.*). **-er,** *s.* संपादकः, साधकः. **-ion, -ness,** *s.* सिद्धि *f.*, संपन्नता, समग्रता, अखंडता, संपरि-पूर्णता, निष्पत्ति-समाप्ति-*f.* 2 परि-पाकः, परिणति *f.*, पक्वावस्था, उत्कृष्टता, उत्कर्षः, विशिष्टता, प्रकर्षः, परा कोटिः-काष्ठा. 3 नैपुण्यं, संपन्नता, कौशलं, विज्ञानं, प्रावीण्यं. 4 गुणः, परम-उत्तम-गुणः, विशेषः, प्र-उत्-कर्षः. **-ive,** *a.* साधक, संपादक, समापक, सिद्धिकर (री *f.*). **-ly,** *adv.* सर्वथा, सर्वशः, साकल्येन; समग्रं, संपूर्णं, अशेषतः, निःशेषं.

Perfidy, *s.* विश्वासघातः-भंगः-भेदः, असत्यसंधता, प्रतिज्ञा-समय-भंगः; शत्रुसेवा, कापट्यं, वंचनं-ना. **-ious,** *a.* असत्यसंध, विश्वास or विश्रंभ-घातिन् or भेदिन्, भग्नप्रतिज्ञ वंचक, शठ, मिथ्याचार, शत्रुसेविन्. 2 (Of acts) अनार्य. **-iously,** *adv.* विश्वासघातेन, शठवत्, कैतवेन.

Perforate, *v. t.* आ-,व्यध् 4 P, छिद्रयति (D.), निर्भिद् 7 P, उत्-समुत्-कॄ 6 P. (मणौ वज्रसमुत्कीर्णे R. i. 4): 'un-p. ed jewel'- अनाविद्धं रत्नं (S. 2.) **-ed,** *a.* विद्ध, सच्छिद्र, उत्कीर्ण, सरंध्र, सुषिर. **-ion,** *s.* वेधः-धनं, निर्भेदः. 2 छिद्रं, रंध्रं, विवरं, सुषिरं. **-or,** *s.* वेधनिका, आविधः, आस्फोटनी.

Perforce, *adv.* बलात्, बलेन, प्रसभं, प्रसह्य, बलवत्, बलात्कारेण.

Perform, *v. t.* कृ 8 U, निर्वृत् c., आचर् 1 P, सं-निः-पद् c., साध् 5 P or c., वि-धा 3 U, अनु-ष्ठा 1 P, निर्वह् c.; (promise) पॄ 10, तॄ 1 P शुध् c., अपवृज् 10; (a sacrifice) आतन् 8 U, आहृ 1 P. 2 (On the stage) नट् 10, अभि-नी 1 P, प्रयुज् 7 A, 10; *See* Act; 'has not been (seen) p ed on the stage' न प्रयोगतो दृष्टं (Rat. 1). **-ance,** *s.* संपादनं साधनं, करणं, विधानं, निर्वर्तनं, अनुष्ठानं, आचरणं. 2 कार्यं, कर्मन् *n.*, क्रिया, कृति *f.*, व्यापारः, चेष्टा, चेष्टितं, प्रवृत्ति *f.*, चरितं. 3 प्रयोगः, अभिनयः, नाटनं. **-er,** *s.* कर्तृ *m.*, संपादकः, निर्वर्तकः, अनुष्ठातृ *m.* निर्वाहकः. 2 (In dramas) अभिनेतृ *m.*, नटः; प्रयोजकः. 3 वादकः.

Perfume, *v. t.* अधि-, वास् 10, धूप् 1 P, 10, धूपेन वास्, सुरभीकृ 8 U, परिमलयति-आमोदयति- (D.), भू c. **-s.** परिमलः, आमोदः, सुगंधः, सु-,वासः, सौरभं-भ्यं. 2 (Thing scented) गंधः, गंधद्रव्यं, गांधिकं. 3 (For the person) गात्रानुलेपनी; वर्ति *f.*, अनु-वि-लेपनं, वर्णकं; 'p. artificially made' कृत्रिम वृक-धूपः. **-ed,** *a.* सुवासित, सवास, सुरभीकृत, सामोद, धूपित, भावित. **-er,** *s.* गांधिकः, गंधोपजीविन् *m.*, गंधविक्रयिन् *m.* गंधवणिज् *m.*, गंधाजीवः. **-ery,** *s.* गंधद्रव्यं, गंधव्यापारः-विक्रयः. **-ing,** *s.* वासनं, भावनं. 2 (With unguents) चर्चा, चार्चिक्यं, अनु-वि-लेपनं, स्थासकः, अंगरागः.

Perfunctory, *a.* अनवहित, निरुत्साह, प्रमत्त, अनुत्कंठ; *See* Negligent. **-ily,** *adv.* अनवधानेन, निरुत्साहं. **-iness,** *s.* अनवधानं, अनास्था, निरुत्साहता.

Perhaps, *adv.* कदाचित्, दैवात्, कदापि, नु वा, किंस्वित्, स्यात्, or by pot.

Periapt, *s.* रक्षाकरंडः

Pericardium, *s.* हृदयकोशः, हृदाशयः.

Pericarp, *s.* बीजकोशः-गुप्ति *f.*

Pericranium, *s.* कपालावरणं.

Perigee, *s.* नीचतमं-नेदिष्ठं-स्थानं

Peril, *s.* भयं, शंका, संदेहः, संशयः. **-***v. t.* संशये पत् c. **-ous,** *a.* संदिग्ध, सशंक, भयहेतुक; *See* **Danger, Hazard.**

Period, *s.* समयः, कालः, वेला, कालावधिः, अंतरं, अवधिः, नियतकालः. 2 कालचक्र-पर्यायः-आवर्तः, वर्षचक्रं, युगं. 3 अंतः, अवसानं, विरामः. 4 पूर्णवाक्यं, वाक्योच्चयः; पूर्णविरामः; 'p. of life' वयः, वयोवस्था; 'last p.' चरमवयः, अंत्यावस्था. **-ic, -ical,** *a.* नित्य, अनुकालिक-नियतकालिक-सामयिक-(की *f.*). **-s.** सामयिकपुस्तकं; 'a monthly p.' मासिकपुस्तकं. **-ically,** *adv.* काले काले, समयतः, कालानुरूपं, नियतकाले.

Periosteum, *s.* अस्थित्वच् *f.*

Peripatetic, *a.* इतस्ततः-भ्रमत्-भ्रमणशील.

Periphery, *s.* परिवेशः-षः. परिधिः, परिणाहः. 2 नेमि-मी *f.*, प्रधिः.

Periphrase, Periphrasis, *s.* वागुपचयः वाग्विस्तरः, वाग्बाहुल्यं-प्रपंचः. **-***v. i.* प्रपंचयति (D.), वाग्विस्तरेण वर्ण् 10 or व्या-ख्या 2 P. **-Periphrastic,** *a.* बहुवाक्य, बहुपद; 'p. future' लुट्.

Perish, *v. i.* नश् 4 P, प्र-वि-°, क्षि-pass., क्षयं-नाशं-लयं-गम् प्रमी 4 A, ध्वंस् 1 A,

1 P or इ-या 2 P, प्र-वि-ली 4 A: मृ 6 A, व्यापद् 4 A; See **Die**. -able, a. वि-, नश्वर (री f.), विनाशधर्मन्, भंगुर, क्षयिन्, वि-,ध्वंसिन्, क्षयिष्णु, क्षय-नाश-शील, लयाधीन; 'p. in a moment' क्षणिक, क्षणभंगुर.

Peristyle, s. स्तंभपंक्ति-श्रेणी f.

Peritoneum, s. अंत्रवेष्टनं.

Perjure, v. t. साक्ष्ये मिथ्या-अनृतं वद् 1 P, मिथ्या शप् 1, 4 U, कूटसाक्ष्यं कृ 8 U: -ed, -er, a., s. कूटशपथकारिन्, मिथ्याशासक, कूटसाक्षिन्. -y, s. कूट or मिथ्या-साक्ष्यं or शपनं.

Perk, -y, a. See **Saucy**.

Permanent, a. नित्य, स्थिर, नित्य-चिर-स्थायिन्, ध्रुव, अक्षय, स्थायिन्; See **Lasting**. -ly, adv. नित्यं, स्थिरं, ध्रुवं, शाश्वतं, सर्वकालं. -**Permanence**, -cy, s. स्थिरता, स्थायित्वं, ध्रुवता, नित्यता, अक्षयता, अनपायः, सनातनत्वं. 2 प्रतिष्ठा, स्थिति f., (कुलस्य स्थितये K. I. 18), (दशरथस्य कुलं प्रतिष्ठां गतं U. 5).

Permeate, v. t. व्याप् 5 P, व्यश् 5 A; See **Pervade**. 2 प्र-विश् 6 P, भिद् 7 P, गाह् 1 A. -ion, s. व्याप्ति f., प्रवेशः, भेदनं. -**Permeable**, a. व्याप्य, भेद्य, प्रवेश्य.

Permit, v. t. अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A, आज्ञां दा 3 U. See **Allow**. -s. अनुज्ञा-अनुमति-पत्रं, अनुज्ञा. -**Permissible**, a. अनुज्ञेय, अनुमंतव्य, अनुज्ञार्ह. 2 धर्म्य, न्याय्य, ग्राह्य, युक्त; See **Lawful**. -**Permission**, s. अनुज्ञा, अनुमति f. -तं, अनुमोदनं; आदेशः, आज्ञा. -**Permissive**, a. अनुज्ञाप्रद, अनुमोदक; अनवश्यक.

Permute, v. t. वि-नि-मे 2 A, परि-वृत् 1 A. -ation, s. वि-,निमयः, परिवर्तः, परिवृत्ति f., व्यतिहारः. 2 अंकपाशः.

Pernicious, a. घातक, अपकारक, वि-,नाशक, हिंस्र, हिंसक, अपकारिन्, दुष्ट, गर्ह्य; See **Injurious**. -ly, adv. सापकारं, सापायं, सनाशं.

Peroration, s. उपसंहारः.

Perpendicular, a. लंब, लंबरूप; सरल, ऋजु, अकुटिल. -s. लंबः. -ly, adv. लंबरूपेण, सरलं, ऋजु.

Perpetrate, v. t. कृ 8 U, वि-धा 3 U, आचर् 1 P; See **Commit**.

Perpetual, a. नित्य, सतत, शाश्वत (ती f.), अविच्छिन्न, अविरत, संतत, निरंतर, सनातन (नी f.), अनंत, नित्य-चिर-स्थायिन्. -ly, adv. नित्यं, सदा, नित्यशः, शाश्वतं, शश्वत्, सततं, अविरतं -**Perpetuity**, s. अविच्छेदः, नित्य-चिर-स्थायिता, आनंत्यं, नित्यता, अविरामः, नैरंतर्य, अक्षयस्थिति f., सनातनत्वं; 'to p.' शाश्वतीः समाः. -**Perpetuate**, v. t. स्थिरीकृ 8 U, कृ with (a.).

Perplex, v. t. मुह् c., आकुलीकृ 8 U, सं-वि-भ्रम् c. (भ्रमयति), मोहं-संभ्रमं-उत्पद् c. 2 संकुलीकृ, संकीर्णीकृ. क्लिश् 9 P; See **Embarrass**, **Confuse**. -ed, a. आ-व्या-कुल, संभ्रांत, वि-,मूढ, कातर, व्यग्र, उद्विग्न, अधीर; व्याकुलचित्त, संभ्रांतमनस्, व्यस्त-मूढ-विक्षिप्त-चित्त. -ing, a. मोहक, संदिग्ध, भ्रम-मोह-कारिन्, मोहकर (री f.), मोहन, भ्रांतिजनन (नी f.); विषम. -ity, s. व्या-, मोहः, आ-व्या-कुलत्वं-ता, संभ्रमः, व्यग्रता, चित्तविक्षेपः, व्यस्तचित्तत्वं, चित्तवैक्लव्यं, संशयः, संदेहः.

Perquisite, s. अधिकलाभः, पुरस्कारः; See **Gift**.

Persecute, v. t. प्र-सं-बाध् 1 A, उप-प्लु 1 A, पीड् 10, उप-द्रु 1 P, क्लिश् 9 P, पीडार्थे अनुसृ 1 P, अभि-,द्रुह् 4 P. -ion, s. बाधा, उपद्रवः, उपप्लवः, पीडनं, अभिद्रोहः. -or, s. बाधकः, उपद्रवकारिन् m.

Persevere, v. i. मनः-चित्तं-अभिनिविश् c., सदा प्रवृत् 1 A, अभियुज् pass., अभिनिवेशेन सं-पद् c., सततं प्रयत् 1 A, अनवरतं चेष्ट् 1 A, निर्बंधं कृ, साग्रहं प्रवृत्; 'p. in your opposition' स्थिरप्रतिबंधो भव (S. 2); 'he who p. s in good actions' सदाचारप्रवृत्तः, सदा सन्मार्गयायी. -ance, s. अभिनिवेशः, अध्यवसायः, उद्यमसातत्यं, दीर्घप्रयत्नः-उद्यमः-उद्योगः-उत्साहः, अतिनिर्बंधः, सदाभियोगः. 2 अनवरतचेष्टा, प्रवृत्ति f., प्रसक्ति f., धैर्य, आग्रहः, उद्योगः. उद्यमः, व्यवसायः. -ing, a. अभियोगवत्, उद्यमिन्, अभिनिविष्ट, अध्यवसायिन्, दीर्घोद्योगिन्, सदाप्रवृत्त, उत्साहवत्, आग्रह-निर्बंध-शील, प्रसक्त, प्रसित. -ingly, adv. अभिनिवेशेन, दीर्घोद्योगेन. प्रसक्तं, सोत्साहं, सनिर्बंधं.

Persist, v. i. साग्रहं प्रवृत् 1 A, अतिनिर्बंधेन आचर् 1 P. पर्यव-स्था 1 A; See below; 'do not p. in your wickedness' दुराचरितेषु मा ते निर्बंधो भूत्; See **Persevere**. -ence, -cy s. निर्बंधः, आग्रहः, अभिनिवेशः, पर्यवस्थानं, दृढाग्रहः. -ent, a. निर्बंधपर, साग्रह; See **Obstinate**. -ently, adv. साग्रहं, निर्बंधेन.

Person, s. पुरुषः, नरः, जनः, व्यक्ति f.; 'this p.' अयं जनः (referring to the speaker); 'a female p.' स्त्रीजनः, अंगनाजनः. 2 शरीरं, अंगं, वपुस् n. देहः, कायः, तनु f., गात्रं; See **Body**. 3 रूपं. आकारः, आकृति f., मूर्ति f.; 'an enemy in the p. of Krishna' कृष्णरूपः शत्रुः 4 पात्रं, भूमिका. 5 पुरुषः (in grammer 'in p.' स्वयं, स्वतः, आत्मना, साक्षात्. प्रत्यक्षं. -able, a. सुरूप. सुगात्र (त्री f.),

शोभनाकार. **-age,** *s.* पुरुषः, जनः, नरः, व्यक्तिः. 2 श्रेष्ठ-विशिष्ट-जनः. **-al,** *a.* व्यक्तिगत. पुरुषविशेषानुबद्धं. विशिष्टजनोद्दिष्ट. 2 शारीरिक-दैहिक- (की *f.*), शरीर-अंग in comp.: 'p. beauty' अंगसौष्ठवं; 'p. graces' शरीरलावण्यं, 'p. union' शरीरसंबंधः; 'p. attendant' आसन्नपरिचारकः; 'p. attendance' शरीरचर्या-शुश्रूषा. 3 स्वयंकृत, स्व-आत्म-कृत, साक्षात्कृत. 4 आत्मन्, स्व. निज in comp., 'for p. profit' आत्म-स्व-हिताय; 'p. experience' स्वानुभवः 5 पुरुष-व्यक्तिवाचिन्, पुरुष in comp. 6 अस्थावर, जंगम. **-ality,** *s.* व्यक्तिगताक्षेपः; विशेष-व्यक्तिनिर्देशः, व्यक्त्युद्देशः, व्यक्तिसंस्पर्शः. 2 व्यक्तिः, पृथक्त्वं, स्वत्वं. **-ally,** *adv.* स्वयं, स्वतः, प्रत्यक्षं-क्षतः, साक्षात्. 2 व्यक्तितः, पृथक्. **-Personate,** *v. t.* रूपं-वेषं ग्रह् 9 U or धृ 1 P, 10 or आ-स्था 1 U (with gen.), छद्म-कूटं-कृ 8 U; oft. ex. by वेश or रूप in comp., or by denom.; 'p.ing Nala' नलरूपमास्थाय, नलरूपः, नलवेशधारिन्; 'p.s a king' नृपायते, राजानति. 2 अभि-नी 1 P, नट् 10, रूप् 10. **-ion,** *s.* रूप-वेशधारणं-ग्रहणं. 2 अभिनयः, नाटनं. **-or,** *s.* वेशधारिन्-भृत् *m.* 2 अभिनेतृ *m.* **-Personify,** *v. t.* चेतनत्वं-चेतनभावं-आरुह् c (रोपयति), (अचेतने) चेतनवदुपचर् 1 P, (अचेतनेऽपि चेतनवदुपचारदर्शनात् S. B. 9 9 **-ed,** *a.* Ex. by मूर्ति *f.*, मूर्तशरीरिन्-*a.*, इव or साक्षात्. **-ication,** *s.* चेतनत्वारोपः. चेतनधर्मारोपः, मनुष्यगुणारोपः, उपचारः; oft. by इव, साक्षात्; 'p. of virtue' साक्षात्-मूर्तिमान्-धर्मः; *See* **Embodied.**

Personnel, *s.* कार्यकारिवर्गः.

Perspicacious, *a.* तीक्ष्ण-सूक्ष्म-दृष्टि, सूक्ष्मदर्शिन्. 2 तीक्ष्ण or सूक्ष्म-बुद्धि or मति, कुशाग्रबुद्धि. **-ness, -Perspicacity,** *s.* सूक्ष्मदृष्टित्वं, दृष्टिसूक्ष्मता, दृक्पाटवं. 2 सूक्ष्ममतित्वं.

Perspicuous, *a.* स्पष्ट, विशद, प्रसन्न, व्यक्त, सुप्रकाश, सुबोध. **-ly,** *adv.* स्पष्टं, विशदं, भिन्नार्थं. **-ness, -Perspicuity,** *s.* स्पष्टता, प्रसादः, वैशद्यं.

Perspire, *v. i.* प्र-,स्विद् 4 P, स्वेदं-घर्मं-स्रु *c.* **-v.** *t.* रोमद्वारा निःसृ c. or स्रु c., स्विद् c. **-ation,** *s.* स्वेदनं, घर्म-स्वेद-स्रावः. 2 स्वेदः, घर्मः, स्वेद-घर्म-जलं-बिंदुः-उदकं; 'excessive p.' प्रस्वेदः. **-ing,** *a.* सस्वेद, सघर्म, स्वेद-घर्म-स्राविन्, स्वेदित, स्विन्न; 'violently p.' प्रस्विन्न, भृशस्विद्.

Persuade, *v. t.* अनु-नी 1 P, प्र-बुध् c., अनुशास् 2 P, प्र-वृत् c., नियुज् 10, प्रोत्सह् c आकृष् 1 P; oft. by causal of roots 2 प्रति-इ c., प्रतीतिं-विश्वासं जन् c. (जनयति), संशयं-संदेहं-छिद् 7 P; *See* **Convince.** **-ed,** *a.* अनुनीत; जातनिश्चय-विश्वास, प्रतीत, छिन्नसंशय, जातप्रत्यय; 'I feel p.' इति मे प्रतीतिः, इति दृढं मन्ये. **-er,** *s.* प्रवर्तकः, प्रोत्साहकः, नियोजकः. **-Persuasion,** *s.* अनुनयः, अनुशासनं, उपदेशः, प्रवर्तनं, नियोजनं, प्रबोधः-धनं, प्रोत्साहनं. 2 संदेह-संशयच्छेदः, शंकानिवृत्ति *f.*, दृढनिश्चयः, प्रत्ययः, निर्णयः. 3 मतं, मार्गः, पथिन् *m.*, संप्रदायः. **-Persuasive, Persuasory,** *a.* सानुनय, प्रवर्तक, प्रबोधक, अनुनायिन्, हृदयग्राहिन्, आकर्षिन्. 2 प्रत्ययकारिन्, संशयच्छिद्.

Pert, *a.* चपल, लघु; *See* **Lively.** 2 धृष्ट, प्रगल्भ, अविनीत. **-ly,** *adv.* चापल्यात्, धृष्टतया, अविनयेन. **-ness,** *s.* चापल्यं, धार्ष्ट्यं, अविनयः.

Pertain *v. i.* संबंध् pass., संबंधिन्-*a.* भू 1 P; *See* **Belong.**

Pertinacious, *a.* निर्बंधशील, आग्रहिन्, स्थिर-दृढ-प्रतिज्ञ; धीर, दृढ. **-ly,** *adv.* सनिर्बंधं, साग्रहं. **-ness, -Pertinacity,** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, दार्ढ्यं, धैर्यं; *See* **Obstinate, -cy.**

Pertinent, *a.* प्रास्ताविक (की *f.*), युक्त, यथायोग्य, उपपन्न, योग्य. प्रस्तावसदृश (शी *f.*); 'to be p.' उप-पद् 4 A, युज् pass. **-ly,** *adv.* युक्तं, उपपन्नं, यथोचितं, प्रसंगानुरूपं, प्रस्तावसदृशं. **-Petinence, -cy,** *s.* युक्तता, उपपत्ति *f.*, योग्यता, प्रसंगसंगति *f.*, याथार्थ्यं, प्रस्तुतानुसारः.

Perturb, *v. t.* सं-,क्षुभ् c., आकुलीकृ 8 U, उपहन् 2 P, वि-मुह् c., व्यग्रीकृ, व्यस् 4 A, संकरीकृ; *See* **Confuse.** **-ation,** *s.* सं-,क्षोभः, व्यग्रता, उपप्लवः, व्या-,मोहः, आकुलत्वं, वैक्लव्यं, उद्वेगः. **-ed,** *a.* क्षुब्ध, आ-व्या-कुल, विक्लव, व्यग्र, परिप्लव, उद्विग्न, पर्याकुल.

Peruse, *v. t.* समग्रं पठ् 1 P or अधि-इ 2 A, निपुणं वच् c.; *See* **Read.** **-al,** *s.* अध्ययनं, पठनं, पारायणं.

Pervade, *v. t.* अभि-,व्याप् 5 P, वि-अश् 5 A. सर्वतः आक्रम् 1 U, 4 P or प्रविश् 6 P, वि-गाह् 1 A, मुर्च्छ् 1 P; मूर्च्छन्त्यमी विकाराः ऐश्वर्यमत्तेषु (S. 5) 'p. (the minds of) those' &c., '(the freshness of) youth has p.ed her limbs' यौवनमंगेषु सन्नद्धं (S. 1). **-ing, -Pervasive,** *a.* व्यापक, व्यापिन्; 'p. all things' सर्वग, सर्वव्यापिन्; 'p. the whole body' सर्वांगीण **-Pervasion,** *s.* अभिव्यापनं, व्याप्ति *f.*, आक्रमणं; मूर्च्छनं.

Perverse, *a.* वाम, कुटिल, प्रतीप, विपरीत, वक्र प्रतिकूल, वि-प्रति-लोम, वक्र-वाम-शील, कुटिलमति, पिशुन; *See* **Obstinate.** **-ly,** *adv.* वामतया, कौटिल्येन, प्रतीपं, विपरीतं, वामशीलतया. **-ness,** *s.* प्रतीपता, वामता,

वैपरीत्यं, कौटिल्यं, दुष्टता, दौरात्म्यं, दुःशीलं.

Pervert, *v. t.* वि-कृ 8 U, परिवृत् c., साचीकृ, विरूप् 10, विलोमीकृ, अन्यथा कृ; भ्रंश् c., विपर्यस् 4 U or c., कलुषयति (D.), कलुषीकृ; दुष् c. (दूषयति), विपरिणम् c. (णमयति). **-er, -ing**, *s., a.* विकारिन्, विपरिणामिन्, विपर्यासकारिन्. **-Perversion**, *s.* विकारः, विकृति *f.*, विक्रिया, विलोमत्व, प्रतीपता, विपरिणामः, विपर्यासः, विपर्ययः, दूषणं, भ्रंशनं, साचीकरणं, कालुष्यं.

Pervious, *a.* व्याप्य, भेद्य, प्रवेश्य.

Pest, *s.* मारि-री *f.*, म(मा)रकः; (fig.) आधिः, कंटकः, उत्पातः, शल्यं; वामाः कुलस्याधयः (S. 4) 'are a p. to the family' 'p. of the people' लोककंटकः. **-er**, *v. t.* बाध् 1 A, पीड् 10, उपप्लु 1 A, *See* **Harass.** **-ilence**, *See* (s.) above. **-iferous, -ilential**, *a.* मरकावह, मारात्मक, घातुक, विनाशक, दूषक, बाधक, अपकारक, अपकारिन्, आनिष्टकर (री *f.*)

Pestle, *s.* मुस(श)लः-लं, अयोग्रं.

Pet, *s.* प्रेम-प्रीति-पात्रं, प्रेमास्पदं, क्रीडामृगः. 2 ईषत्कोपः, कोपावेशः. *-a.* प्रिय, प्रेमास्पदीभूत, वल्लभ; *See* **Favourite.** *-v. t.* लल् 10; *See* **Fondle.**

Petal, *s.* दलं, पत्रं. **-ed, -ous**, *a.* सदल, दलवत्.

Petition, *v. t.* अर्थ् 10 A, प्र-अभि°-, याच् 1 A; निविद् c., वि-ज्ञा c. (ज्ञापयति). *-s.* प्रार्थना, याच्ञा, निवेदनं, विज्ञप्ति *f.*, विज्ञापना. 2 (Written) विज्ञप्तिः, प्रार्थनानिवेदन-पत्रं. **-er**, *s.* प्रार्थकः, प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, निवेदकः; 'ascertain who are the p. s' ज्ञायतां कः कः कार्यार्थीति (Mr. 9).

Petrify, *v. t.* पाषाणी-प्रस्तरी-कृ 8 U, कठिनीकृ, जडीकृ, संस्तंभ् c.; 'p. ed with astonishment' आश्चर्यजडीकृत. *-v. i.* पाषाणीभू 1 P. **-action**, *s.* पाषाणीकरणं; पाषाणीभूतद्रव्यं.

Petroleum, *s.* शिलातैलं-रसः.

Petrology, *s.* अश्म-विद्या or शास्त्रं.

Petticoat, *s.* शाटी, शाटकः; चंडातकं, अर्धोरुकं (girl's); 'p. government' स्त्रीशासनं; 'under p. government' स्त्रीजितः, स्त्रीवशः.

Pettifogger, *s.* क्षुद्र-अधम-वृत्तिः.

Pettish, *a.* कर्कश, वक्रशील-भाव, परुषस्वभाव, प्रतीप; *See* **Peevish.** **-ly**, *adv.* कर्कशं, परुषं. **-ness**, *s.* कार्कश्यं, स्वभावपारुष्यं.

Petty, *a.* लघु, क्षुद्र, अल्प; *See* **Small**; oft. by उप or कल्प in comp.; 'a p. king' उपराजा, नृपकल्पः.

Petulant, *a.* कर्कश, प्रतीप, दुःशील, वाम; *See* **Peevish.** 2 अविनीत, प्रगल्भ, धृष्ट. **-ly**, *adv.* प्रतीपं, धृष्टवत्. **-Petulance**, *s.* प्रतीपता, दुःशीलं, धृष्टता.

Pewit, *s.* *See* **Lapwing.**

Pewter, *s.* कांस्यं; पीतलोहं. **-er.** *s.* कांस्यकारः.

Phalanx, *s.* व्यूहः; पंक्ति *f.*

Phantasm, *s.* आ-,भासः, छाया, माया, मनोरथसृष्टि *f.*

Phantasmagoria, *s.* मायाजालं.

Phantasy, *s.* *See* **Fancy.**

Phantom, *s.* भूतः, वेतालः, पिशाचः, रात्रिचरः. 2 आ-,भासः, मनोरथसृष्टि *f.*, माया, कल्पना.

Pharisee, **Pharisaic**, *s.*; *a.* *See* **Hypocrite.**

Pharmacopœia, *s.* औषधतत्त्वशास्त्रं. भेषजसंस्कारग्रंथः.

Pharmacy, *s.* औषधक्रिया-संस्कारः-विद्या.

Pharos, *s.* दीपस्थानं-गृहं.

Phase, Phasis, *s.* दर्शनं, वस्तु *n.*; 'p. s of the moon' चंद्रस्य क्षयवृद्धी. 2 (Point of view) दृष्टि *f.*; *See* **View.**

Pheasant, *s.* वंजिनः, जीवंजीवः.

Phenomenon, *s.* दृग्विषयः; गोचरवस्तु *n.*, दर्शनं, आलोकः. 2 उत्पातः, अद्भुतं.

Phial, *s.* लघुकूपी, काचकूपी-पात्रं.

Philander, *v. i.* स्त्रीजनसमागमं अभ्यस् 4 P, वि-लस् 1 P. विलासं-विभ्रमं-दृश् c.

Philanthropy, *s.* लोकहितेच्छा, लोक-जनप्रीति *f.*, सर्वभूतदया, विश्वप्रीतिः, विश्वसौहृदं. **-ic-,ical.** *a.* लोकहितैषिन्, जनहितकामः, जगन्मित्रं, विश्वामित्रं, विश्वसुहृद्. **-ist**, जनहितैषिन् *m.* विश्वसुहृद्.

Philippic, *s.* भर्त्सनवाक्यं, निंदात्मकः प्रबंधः.

Philology, *s.* भाषाविज्ञानं-तत्त्वं, शब्दव्युत्पत्तिशास्त्रं-विद्या. **-er-, -ist**, *s.* शाब्दिकः भाषातत्त्वज्ञः. **-ical**, *a.* शाब्दिक (की *f.*), शब्दशास्त्रीय.

Philomath, *s.* विद्याप्रियः-भक्तः, ज्ञानसेविन् *m.* **-y**, *s.* विद्यासेवनं.

Philosophy, *s.* दर्शनं; 'six systems of p.' षड्दर्शनं. 2 तत्त्वज्ञानं, विज्ञानं, तत्त्वविद्या-शास्त्रं; तत्त्वं, -ज्ञानं, विद्या, शास्त्रं in comp.; 'moral p.' नीतिशास्त्रं; 'logical p.' तर्कशास्त्रं-विद्या, &c. **-er**, *s.* दर्शनज्ञः, तत्त्वविद् *m.*, तत्त्वज्ञः ज्ञानिन् *m.* तात्त्विकः, ज्ञानी, पंडितः, प्राज्ञः, ज्ञाननिष्ठः; 'p.'s stone' चिंतामणिः; स्पर्शमणिः. **-ic,-ical**, *a.* तत्त्व-दर्शन in comp.; दार्शनिक (की *f.*). 2 विज्ञ, तत्त्व-

ज्ञानपर, ज्ञान-विद्या-पर. -ically, *adv.* दर्शनानुसारेण, तत्त्वतः. -ize, *v. i.* तत्त्वं निरूप् 10 or आलोच् 10 or अन्वीक्ष् 1 A.

Philtre, *s.* मंत्रौषधं, वशीकरणचूर्णं.

Phiz, *s.* *See* Face.

Phlebotomy, *s.* शिरावेधः-मोक्षः-छेदः. रक्तमोक्षणं-स्रावः

Phlegm, *s.* कफः, श्लेष्मन् *m.*. सिंघाणकं. 2 मांद्यं, जाड्यं; 'a medicine removing p.' (phlegmagogue) श्लेष्ममर्दनं, कफनाशनं. -atic, *a.* कफिन्, श्लेष्मल-ण, बहुकफ. 2 कफकर (री *f.*), श्लेष्मजनन (नी *f.*). 3 श्लेष्मज. 4 जड, मंद, शीत; *See* Indifferent.

Phonetic, *a.* स्वरसंवादिन्, ध्वनि-स्वर-in comp. -Phonetics, Phonics, *s.* स्वर or ध्वनि-विद्या or शास्त्रं.

Phonograph, *s.* स्वरलेखनयंत्रं.

Photograph, *s.* आलोकलेख्यं. -er, *s.* आलोकलेख्यकारः.

Phrase, *s.* वाक्यं, उक्ति *f.*, वचनं. -*v. t.* अभि-धा 3 U, उद्दिश् 6 P; *See* Call. -Phraseology, *s.* वाक्यबंधः-रचना, भाषासरणि *f.*, वाक्प्रकारः, वाग्रीति *f.*-व्यापारः-व्यवहारः; 'dramatic p.' नाट्योक्तिः. नाट्यपरिभाषा.

Phrenetic, *a.* उन्मत्त; *See* Frantic. -Phrenitis, *s.* सन्निपातज्वरः, उन्मादः; *See* Frenzy.

Phrenology, *s.* नास्तिष्कविद्या.

Phthisic, **Phthisis**, *s.* श्वासावरोधः, श्वासाकृच्छ्रं; क्षयः, क्षयरोगः, शोषः, यक्ष्मन् *m.*, राजयक्ष्मा. -Phthisical, *a.* क्षयिन्, क्षयरोगिन्.

Phylactery, *s.* रक्षाकरंडः.

Physic, *s.* चिकित्सा, उपचारः, वैद्यक्रिया, औषधोपचारः. 2 औषधं, भेषजं, अगदः. -*v. t.* कित् desid. (चिकित्सति-ते), उपचर् 1 P, भेषजं दा 3 U. -ian, *s.* वैद्यः, भिषज् *m.*, चिकित्सकः, अगदंकारः, रोगहारिन्-हृत् *m.* -Physical, *a.* साकार, स्थूल, जड; *See* Material. 2 अंग, विग्रह, शरीर in comp.; 'p. strength' शरीरबलं; 'p. substance' स्थूलद्रव्यं-वस्तु. 3 Medicinal, q. v.; 'p. science (physics)' पदार्थविज्ञानं,-शास्त्रं. -ly, *adv.* प्रकृत्या, स्वभावतः, जातितः, जन्मतः; *See* Naturally.

Physiognomy, *s.* आकृति *f.*, वदनाकृतिः, मुखं, वदनं. 2 वदनलक्षणनिरूपणं. -ist, *s.* मुखसामुद्रिकः

Physiography, *s.* भूवर्णनं.

Physiology, *s.* प्राण्योषधिजीवनशास्त्रं.

Physique, *s.* शरीरस्थिति *f.*

Piacular, *a.* अघ-पाप-नाशिन्.

Picaroon, *s.* समुद्रीयदस्युः.

Pick, *v. t.* चि 5 U, ग्रह् 9 U, समाहृ 1 P, आ-दा 3 A, उद्-धृ 1 P, 10, लू 9 U, छिद् 7 P, (flower &c.). 2 शुध् c., मृज् 2 P or c., परिष्कृ 8 U. 3 (Up) वृ 5 U, उद् 1 P, उद्ग्रह्; पृथक् कृ; 'p. a bone' अस्थिमांसं चर्व् 1 P, 10; 'p. out' उत्स् 10, निष्कृष् 1 P; 'p. a quarrel' कलहं उत्-स्था c. (उत्थापयति); 'p. holes' (in another's coat) परस्य छिद्राणि दृश् 1 P, रंध्राणि-छिद्राणि-अन्विष् 4 P; 'p. the pocket' ग्रंथिं छित्त्वा अपहृ. -*s.* Pick-axe, q. v. 2 उद्धारः, वरणं. 3 विशिष्टभागः, उत्कृष्टभागः; 'ear-p.' कंडूयनकं; 'tooth-p.' दंतोल्लेखनी; 'p.-axe' टंकः, पाषाणभेदनी, पाषाणदारणः; 'p.-pocket' ग्रंथिच्छेदकः-चौरः. -ing, *s.* उद्धरणं, उद्ग्रहणं.

Picket, *s.* सेनारक्षः, रक्षकदलं. 2 शंकुः, स्थाणुः.

Pickle, *s.* संधितं, संधानं, संधितद्रव्यं. 2 लवणं. -*v. t.* सं-धा 3 U, उपस्कृ 8 U.

Picnic, *s.* विहरणं, वनभोजनं.

Pictorial, *a.* सचित्र, चित्रोपेत, चित्रलिखित.

Picture, *s.* चित्रं, आलेख्यं, प्रतिमा, प्रतिकृति *f.*, प्रतिरूपं, प्रतिच्छंदः-दकं, प्रतिच्छाया; 'as if drawn in a p.' आलिखित इव; 'p.-board' चित्रफलकः; 'p.-frame' चित्राधारः, चित्रावरणं; 'p.-gallery' चित्रावली, चित्रशाला; 'p.-maker' चित्रक(का)रः. -*v. t.* मनसि कृ 8 U, आलोच् 10, मनसा क्लृप् c. or विचर् c. or वि-भू c. 2 चित्र् 10, आलिख् 6 P, वर्ण् 10. -ed, *a.* चित्रगत, आलेख्यगत, चित्रार्पित, आलिखित. 2 मनसा कल्पित. -Picturesque, *a.* चित्रोपम, वि-,चित्र, शबल.

Piebald, *a.* *See* Variegated.

Piece, *s.* खंडः-डं, विभागः; अंशः, लवः, शकलः-लं, वि-,दलं, भिन्नं. 2 रचना, प्र-,बंधः; 'to break in p s' शकलीकृ 8 U, खंडशः कृ, खंड् 10; 'to fall to p. s' वि-,दल् 1 P; 'p. of poetry' काव्यप्रबंधः, कविता; 'p. of work' कार्यं; 'p. of money' मुद्रा; 'p. of water' जलाधारः, जलाशयः; 'in p. s' खंडशः, लवशः; 'p. at chess' शा(सा)रिः-रः; 'a p. to each' एकैकं, प्रत्येकं, पृथक् पृथक्; 'what a p. of work is man' अहो निर्माणविशेषः नरजीवः; 'of a p.' एकरूप-प्रकार; 'of a p. with' सदृश (शी *f.*), अनुरूप; *See* Like. -*v. t.* संयुज् 7 U, 10, संधा- समाधा-3 U. -less, *a.* अखंड. -Piecemeal, *adv.* खंडशः, लवशः, भागशः, खंडं खंडं, पृथक् पृथक्. -*a.* भागिन्, खंड in comp.

Pied, *a.* *Sec.* Veriegated.

Pier, *s.* सेतुबंधः 2 स्तंभः, वप्रः-प्रं.

Pierce, *v. t.* व्यध् 4 P, निर्-भिद् 7 P, प्र-भंज् 7 P, छिद् 7 P; *See* **Perforate.** 2 आ-उप-हन् 2 U, शीतवातोपहतः 'p. ed by cold winds'. **-ed,** *a.* विद्ध, निर्भिन्न, छिद्रित; 'p. ed through the heart' भिन्नहृदय; 'having the ears p.' विद्ध-छिद्रित-कर्ण. **-er,** *s.* वेधकः. भेदकः. 2 वेधनिका. वेधनी. **-ing,** *a.* वेधक; वेधिन्, भेदिन् भिद्-छिद्- in comp.; 'p. the vital parts of the heart' हृदयमर्मभिद्-छिद्; (sound) परुष, कर्कश. **-s.** वेधः-धनं, निर्भेदः, छेदः-दनं.

Piety, *s. See* under **Pious.**

Pig, *s.* शूकरशावः-वकः शूकरः; *See* **Hog.** 2 कुशी: लोहपिंडः; 'p.-iron' असंस्कृतं अयः; 'p. -headed' स्थूल, स्थूलधी. **-gish.** *a.* शूकरोपम.**-Piggery,** *s.* शूकरालयः.

Pigeon, *s.* कपोतः, पारावतः, कलरवः; 'wood p.' हारि(री)तः; 'p.-hearted' भीरुहृदय, कातर; 'p.-hole' कपोतबिलं; 'p.-house,-cot' कपोतपालिका, विटंकः.

Pigment, *s.* वर्णकः; वर्णः, रंगः.

Pigmy, *s.* वामनः, ह्रस्वः, खर्वः. **-a.** वामन, ह्रस्व, खर्व, लघुतनु, अल्पमूर्ति.

Pike, *s.* प्रासः, कुंतः, शूलः-लं; *See* **Lance;** 'p.-man' प्रासिकः, कौंतिकः, शाक्तीकः, शूलिन् *m.*

Pilaster, *s.* चतुरस्रः स्तंभः.

Pile, *s.* राशिः, चयः, निकरः, पुंजः, पूगः, स्तोमः, समूहः. 2 चिता, चिति *f.*, चित्या. 3 स्थूणा, स्तंभः, शंकुः, कीलः. 4 हर्म्यं, भवनं, महामंदिरं. 5 ऊर्णा. **-v. t.** समाचि 5 U, राशीकृ 8 U.

Piles, *s.* अर्शस् *n.*, दुर्नामकं, अर्शोरोगः, गुदकीलकः, गुदांकुरः; 'affected by p.' अर्शस.

Pilfer, *v. t.* मुष् 9 P, चुर् 10, अपहृ 1 P. **-er,** *s.* चौरः, मोषकः; *See* **rob,-ber.**

Pilgrim, *s.* यात्रिकः, तीर्थसेविन् *m.* **-age,** *s.* तीर्थयात्रा, यात्रा, यात्राप्रसंगः, तीर्थाटनं-सेवा; 'on a p. to Garuda' गरुडस्य यात्राप्रसंगेन; 'place of p.' तीर्थः-र्थं, पुण्यस्थानं.

Pill, *s.* वटिका, गुटिका, गुलिका.

Pillage, *-v. t.* वि-,लुंट्-ठ् 1 P, 10, अपहृ 1 P. **-s.** विलुंठनं, लोप्त्रं, लोत्रं, अपहारः. **-er,** *s.* लुंठकः, अपहारकः.

Pillar, *s.* स्तंभः, स्थाणुः, स्थूणा, अवष्टंभः; यूपः (sacrificial); 'p. of state' राज्यस्य आधारस्तंभः; 'p. s of justice' न्यायाधाराः, धर्मावष्टंभाः.

Pillow, *s.* उपधानं, उपबर्हः, बालिशः; 'p.-case' उपधानकोशः-आवेष्टनं; 'I slept, making my left arm serve as a p.' वामभुजमुपधाय अशयिषि (D. K. ii. 5). **-v. t.** उपधा 3 U, उपधानीकृ 8 U.

Pilous, *a.* लोमश, प्रचुरलोमन्. **-Pilosity,** *s.* लोमशत्वं, लोमप्राचुर्यं.

Pilot, *s.* कर्णधारः-ग्राहः, कार्णिकः, कार्णिन् *m.*, नाविकः, नौवाहः 2 **Guide,** q. v. **-v. t.** मार्गं दृश् c., प्रणी 1 P, वह् c. **-age,** *s.* कार्णिकवेतनं.

Pimp, *s.* विटः, संचारकः; *See* **Pander.**

Pimple, *s.* पिटिका, स्फोटः, क्षुद्र-तनु-व्रणः, रक्तस्फोटः- गंडः, रक्तवटी. **-ed,-y,** *a.* सस्फोट, व्रणिन्, दुर्व्रण, पिटिकावृत.

Pin, *s.* सूचि *f.*, कीलः-लकः-कं, शलाका, शंकुः, शल्यं 2 (Of a carriage) अणिः-णी, अक्षाग्रकीलः; 'p.-maker' सूचिकारः. **-v. t.** सूच्या बंध् 9 P, कील् 10.

Pincers, *s.* संदंशः-शकः, कंकमुखं.

Pinch, *v. t.* पीड् 10, बाध् 1 A, क्लिश् 9 P, संकुच् 1 P (the body), आर्तीकृ 8 U; 'p. ed with cold' शीतार्त, हिमपीडित; 'p. ing poverty' दुःसहं दारिद्र्यं. 2 अंगुल्यग्रेण पीड्. 3 मुष्टिना संग्रह् 9 P, संग्रह्; 'none but the wearer knows where the shoe p. es' न हि वंध्या विजानाति गुर्वीं प्रसववेदनां. **-s.** अंगुलिपीडनं; संग्राहः, ग्रहणं; 'p. of snuff' नस्यकूर्चः. 2 संकटावस्था, दुर्गति *f.*, कष्टं, कृच्छ्रं; 'p.-fist' बद्ध-दृढ-मुष्टिः, अमुक्तहस्तः.

Pine, *s.* देवदारुः-रु, पीतद्रुः, सरलः, पूतिकाष्ठं; *See* **Fir** also. **-v. i.** (Away) अवसद् 1 P, परि-,म्लै-ग्लै 1 P, क्षि-pass., खिद्-म्ली 4 A. 2 (For) उत्तम् 4 P, उत्कंठ् 1 A. उत्सुकायते (D.); oft by उत्क, उत्सुक, उत्कंठ in comp.; 'a heart p. ing away in absence' विरहोत्कंठं हृदयं; 'p. ed for his home' गृहं गंतुमुद्ताम्यत्; अद्रिसुतासमागमोत्कः (K. vi. 95) 'p. ing to be united with Parvati'; अंतःपुरविरहपर्युत्सुकस्य राजर्षेः (S. 3) 'who is p. ing by separation &c. **-ing,** *s.* म्लानि *f.*, अवसादः, उत्कंठा. **-a.** म्लान, क्षीण, विषण्ण, उत्क, उत्सुक, सोत्कंठ.

Pinion, *s.* पक्षः, पर्णं 2 बाहुपाशः-बंधः. **-v. t.** पक्षौ बंध् 9 P, बाहू बंध्.

Pink, *s.* पाटलवर्णः, पाटलः. 2 अग्रं, शिखरं, पराकाष्ठा. **-a.** पाटल, पाटलवर्ण; 'p.-eyed' गज-सूक्ष्म-नेत्र. **-v. t.** [illegible] 1 P: *See* **Perforate.**

Pinnace, *s.* क्षुद्र-लघु-नौका.

Pinnacle, *s.* अट्टः, प्रासादाग्रं-शृंगं, प्रोच्छ्रितं हर्म्यं. 2 शिखरं, शृंगं, अग्रं.

Pioneer, *s.* आटविकः, काष्ठ-तरु-छिद् *m.* 2 मार्गदर्शकः, अग्रेसरः, अग्रयायिन् *m.* *See* **Forerunner.** **-v. t.** सैन्यमार्गं शुध् c.

Pious, *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मात्मन्, पुण्य, पुण्यात्मन्, भक्तिमत्, शुचि-

व्रत, भक्ति or धर्म-निष्ठ or परायण, धर्माचार; 'led a p. life' धर्माचरणेन आयुरक्षपयत्; 'p. action' धर्म्यक्रिया; for p. purpose' धर्मार्थं. 2 धर्म-भक्ति-मूलक. -ly, *adv.* भक्त्या, धार्मिकवत्. -ness,-Piety, *s.* धर्मनिष्ठा-परता-आसक्ति *f.*, धर्मात्मता, पुण्यशीलं, ईश्वर-धर्म-भक्ति *f.*, ईश्वरनिष्ठा-सेवा, पुण्यता, भक्तिः; 'distinguished for p.' धर्मप्रधान. 2 पितृसेवा, पुत्रधर्मः. [वि-रु 2 P.

Pip, *s.* बीजं. 2 बिंदुः, अंकः. -*v. i.* कूज् 1 P,

Pipe, *s.* वंशः, वेणुः, सुषिरं. 2 नालः, नाडिडी-लि-ली *f.*, प्रणालः-ली; 'water-p.' सारणि *f.*, प्रणालिका. -*v. i.* वेणुं वद् c. or ध्मा 1 P. -er, *s.* वांशिकः, वेणुध्माः.

Piquant, *a.* उग्र, तिग्म, कटु, तीक्ष्ण, प्र-,खर. 2 मिष्ट, स्वादु, सरस.

Pique, *s.* कलिः, कलहः; ईषत्कोपः. -*v. t.* ईषत् कुप् c. or रुष् c. 2 उत्तिज् c., उत्पद् c., प्रोत्सह् c., प्रणुद् c. 3 (Oneself) अभिमन् 4 A; विकत्थ् 1 A; 'he p.s himself upon his learning' पंडितंमन्योऽसौ.

Pirate, *s.* समुद्रदस्युः. 2 साहसिकनौका. 3 शब्दचौरः. -*v. t.* अपहृ 1 P, लुंठ्-ट् 1 P, 10. **Piracy,** *s.* समुद्रीयचौर्यं-लुंठनं -**Piratical,** *a.* साहसिन्, साहसिक (की *f.*).

Piscator, *s. See* **Fisherman.**

Pisces, *s.* मीनः, मीनराशिः.

Piscivorous, *a.* मत्स्याशन, मत्स्याद.

Pismire, *s. See* **Ant.**

Piss, *s.* मूत्रं, मेहः. -*v. t.* मूत्रं उत्सृज् c., मिह् 1 P, मूत्र् 10.

Pistil, *s.* गर्भकेसरः-रं.

Pit, *s.* गर्तः-र्ता, विवरं, बिलं, अवटः; 'p.-coal' आकरांगारः; 'p.-fall' गूढ or छन्न-कूपः or गर्तः, अंधकूपः. -*v. t.* सूक्ष्मगर्तैः अंक् 10 or चिह्नयति (D.). 2 योद्धुं प्रोत्सह् c., प्रतियुध् c.

Pitch, *v. t.* रच् 10, प्रतिवि-धा 3 U; रुह् c. (रोपयति), स्था c. (स्थापयति), निविश् c. 2 क्षिप् 6 P, प्र-,अस् 4 P, नि-,पत् c. 3 अरालेन अंज् 7 P. -*v. i.* आ-अव-पत् 1 P, अवरुह् 1 P, अव-तॄ 1 P, अध्यास् 2 A. 2 निविश् 6 A, शिबिरं अध्यास्. 3 अधोमुखेन पत्, अवाङ् गम् 1 P. 4 (Upon) वृ 5 U; *See* **Choose.** -*s.* तिंदुः, रालः, अरालः, यक्षधूपः सर्जरसः, सर्वरसः, बहुरूपः 2 कोटि *f.*, काष्ठा, अग्रं; शिखरं; 'highest p.' परा काष्ठा-कोटिः. 3 परिमाणं, पर्यंतः; *See* **Degree.** 4 उत्संगः, कटकः-कं. 5 स्वरः; 'mineral p.' शिलाजतु *n.* -y, *a.* तिंदुलिप्त. 2 सूचिभेद्य, अंध, अतिकृष्ण.

Pitcher, *s.* कुंभः, घटः, घटी, कलसः-शः, पुटग्रीवः; *See* **Jar.**

Pith, *s.* मज्जा, गर्भः, सारः. 2 सारः, सारांशः, सत्त्वं, तत्त्वं. 3 निर्यासः, रसः. 4 सत्त्वं, वीर्यं, बलं, उत्साहः. -less, *a.* असार, निःसार, फल्गु, निःसत्त्व, विरस. -y, *a.* ससार, सत्त्वपूर्ण, सरस, ससत्त्व, सारवत्, सारगर्भ. 2 सप्रभाव, तेजस्विन्, वीर्यवत्, ससत्त्व.

Pittance, *s.* स्तोकांशः, अत्यल्पभागः; अल्पमूल्यं-वेतनं, ग्रासाच्छादनमात्रं.

Pity, *s.* दया, अनुकंपा, करुणा, घृणा, कृपा, अनुक्रोशः; 'in p. to my passion' (रागजनितं) दुःखं मे निरवेक्ष्य (Mr. 5); 'what a p. it is' अहो नु कष्टमेतत्. -*v. t.* 'take p. on' दय् 1 A (with gen.); अनुकंप् 1 A, दयां कृ 8 U (with loc.); प्रसद् 1 P. -**Piteous, Pitiable,** *a.* अनुकंप्य, करुणा-अनुकंपा-योग्य, दयाविषयः-भाजनं-पात्रं, करुण, दीन; 'in p. accents' करुणस्वनैः. 2 वराक (की *f.*), तपस्विन् (of persons). -ly. *adv.* करुणं, दीनं. -ness, *s.* अनुकंप्यता, कारुण्यं; दैन्यं. -**Pitiful, -Pitying,** *a.* करुणार्द्र, करुणामय (यी *f.*), करुणा-दया-शील, सदय, सानुकंप, दयालु, कृपालु; *See* **Kind;** 'a p. person' दयानिधिः-सागरः, दीनबंधुः-वत्सलः. 2 करुण, दीन, शोच्य 3 **Contemptible.** q. v. -ly, *adv.* सदयं, सानुकंपं, सकरुणं. -ness, *s.* दयालुता, कारुण्य, दयार्द्रता. -**Pitiless,** *a.* निर्दय, निरनुक्रोश, निर्घृण, निष्कृप, क्रूर, निष्ठुर, कठोर, अकरुण. -ly, *adv.* निर्दयं, क्रूरं, निष्ठुरं.

Pivot, *s.* विवर्तनकीलः.

Placard, *s.* घोषणापत्रं. -*v. t.* घोषणापत्रेण प्रकाश् c.

Placate, *v. t.* **Appease,** q. v. -**Placable,** *a.* क्षमाशील; सांत्वनीय, आराध्य, प्रसाद्य.

Place, *s.* स्थानं, स्थलं, प्र-,देशः, स्थली, भू-भूमि *f.*, धिष्ण्यं. 2 पदं, आस्पदं, विषयः. 3 पदं, पदवि-वी *f.*, अधिकारः, नियोगः, अधिकारपदं; *See* **Office.** 4 अवकाशः, अवसरः, प्रसरः; 'p. of honour' संमानपदं, गौरवपदं; 'in one p.' एकत्र; 'in many p.s' बहुत्र; 'p. of residence' निवासस्थानं; वसति *f.*; 'p. for dancing' नृत्यशाला-स्थानं; 'out of p.' अस्थाने, अनुचितं; 'in the p. of a father' पितृस्थाने-भूमौ; 'p. for fear' भयस्थानं-कारणं-हेतुः; 'in one p.-in another p.' क्वचित्-क्वचित्, इतः-इतः, एकत्र-अन्यत्र; 'in the first p.' प्रथमं, प्रथमतः, प्रथमं तावत्; 'in the next p.' अपरंच, पुनः, पुनश्च; 'give p.' स्थानं त्यज् 1 P, अप-सृप् 1 P, अप-सृ 1 P; 'to take p.' *See* **Happen, Occur.** -*v. t.* स्था c. (स्थापयति), धा 3 U, नि-आ°-, वि-,न्यस् 4 U, निक्षिप् 6 P, धृ 10, नि-विश् c., आरुह् c. (रोपयति), (स्था oft. by कृ 8 U, दा 3 U, व्यापृ c.,

पार्श्वयामास करं किरीटे R. vi. 19); 'p. over' अधिकृ, अधि-ष्ठा 1 P; 'p. in an office' पदे नियुज् 7 A, 10 or आरुह् c.

Placid, *s.* शांत, प्र-उप°-, प्रसन्न, निराकुल, अनुद्विग्न, जितक्रोध, असंभ्रम, शांतात्मन्, प्रसन्नचित्त. **-ly,** *adv.* प्रसन्नं, शांत्या, शांतचेतसा, निराकुलं. **-ity, -ness,** *s.* शमः, शांति *f.*, प्रसादः, अक्रोधः, असंभ्रमः, अक्षोभः.

Plagiarism, *s.* शब्दचौर्यं, वागपहारः. **Plagiarist,** *s.* शब्द-ग्रंथ-चौरः.

Plague, *s.* मारी, महामारी, म(मा)रकः. 2 उत्पातः, अरिष्टं, अनर्थः, शल्यं, उपद्रवः, कंटकः, उपप्लवः; *See* **Pest.** **-v. t.** मार्या ग्रस् 1 A or आक्रम् 1 U, 4 P. 2 बाध् 1 A, पीड् 10, तप् c., दु 5 P; *See* **Harass.** **-ing,** *a.* बाधक, पीडक, क्लेशद, पीडाप्रद.

Plain, *s.* समभूमि *f.*-देशः-स्थलं-ली, समभूभागः; *See* **Level.** **-a.** सम, सपाट. 2 विनीत, निरलंकार, अभूषित, निर्भूषण. 3 स्पष्ट, व्यक्त, विशद, परि-,स्फुट, सुबोध, स्पष्टार्थ, भिन्नार्थ, प्रकाश, प्रत्यक्ष, प्रकट. 4 केवल, मात्र in comp. 5 (Style) अनलंकृत, शुद्ध, अनलंकार, अव्यंजन. 6 (Food) उपस्कर-हीन-शून्य, असंस्कृत. 7 अमाय, दाक्षिण, निष्कपट, निर्व्याज, सरल, कपट-माया-हीन, निर्व्यलीक, अकृत्रिम, ऋजु; *See* **Frank.** 8 सामान्य, साधारण (णी *f.*); मध्यमरूप, नातिसुंदर (री *f.*); 'a p. woman' 'one p. in person' सामान्यलावण्योपपन्ना, नातिसुभगा, अनतिसुंदरी; 'p. dealing' न्यायाचार, शुद्ध-सरल-मति, निर्व्यलीक, दक्षिण, अमाय, ऋजु; (*s.*) सारल्यं, निष्कापट्यं. **-v. t.** समीकृ 8 U. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, स्पष्टार्थं, सुबोधं, प्रकाशं, प्रकटं, प्रत्यक्षं. 2 निर्व्याजं, निर्व्यलीकं, अवक्रं, सारल्येन, अमायया, निष्कपटं. 3 विनीतं, अनलंकारं; 'p. dressed' विनीतवेष. **-ness,** *s.* समता, विनीतत्वं, भूषणाभावः, व्यक्तता, स्पष्टता, वैशद्यं, सुबोधता, प्राकाश्यं, अव्याजः, निर्व्याजता, अकापट्यं, सारल्यं, अमाया, आर्जवं, &c.

Plaint, *s.* प्रतिज्ञा, अभियोगः, भाषापादः, भाषा, पूर्वपक्षः, पक्षः. 2 विलापः, विलपनं, परिदेवनं-ना, शोकः. **-Plaintiff,** *s.* अर्थिन् *m.*, वादी, अभियोगी, कार्यार्थी, अभियोक्तृ *m.*, सूचकः. **-Plaintive,** *a.* परिदेविन्, विलापिन्. 2 शोकावह, शोकार्थक, शोक-दुःख-गर्भ; करुण, दीन, सकरुण; 'in p. words' परिदेविताक्षरैः. **-ly,** *adv.* करुणं, दीनं.

Plait, *s* भंगि-गी *f.*, भंगः, ऊर्मि *f.*, पुटः, चूणः. 2 वेणि-णी *f.*, कबरी, धम्मिल्लः. **-v. t.** ग्रंथ् 9 P, व्या-वृत् c., पुटीकृ 8 U, संवे 1 P, वेणीकृ, वेणीरूपेण ग्रंथ्.

Plan, *s.* उपायः, प्रयोगः, प्र-,युक्ति *f.*, कल्पना. 2 सूत्रपातः, चित्रलेखनं; आलेख्यं, स्थूलवर्णनं. **-v. t.** प्र-सं-कल्प् c., प्र-,युज् 10, चिंत् 10. मंत्र् 10 A, अनुसंधा 3 U, आलोच् 10, मनसा विचर् c. or वि-भू c. 2 आलिख् 6 P. सूत्रपातं कृ 8 U. **-ning,** *s.* उपाय-कल्पना-योजना.

Planch, *See* **Plank.**

Plane, *a.* सम, समस्थ. **-s.** समं, समक्षेत्रं, धरातलं. 2 तक्षणी, त्वक्षणी. **-v. t.** समीकृ 8 U. 2 तक्ष् 1, 5 P.

Planet, *s.* ग्रहः, ज्योतिस् *n.*; 'minor p.' उपग्रहः; 'passage of a p.' संक्रमः, संक्रांति *f.*; 'aspect of a p.' ग्रहदशा; 'influence of a p.' ग्रहावेशः. **-ary,** *a.* ग्रह in comp.

Planish, *v. t.* समीकृ 8 U., तिज् c.. प्र-मृज् c.

Plank, *s.* फलकः-कं; दारु-काष्ठ-फलकः. **-v. t.** फलकैः आस्तॄ 9 U or आच्छद् 10.

Plant, *s.* ओषधि *f.*, लता; तरुः, वृक्षः. **-v. t.** (Seeds) आ-,रुह् c. 2 प्रति-,स्था c. (स्थापयति), वि-,न्यस् 4 U, निविश् c., नि-खन् 1 P, नि-धा 3 U, रुह् c. 3 अधि-,वस् c. **-ation,** *s.* रोपणं. 2 क्षेत्रं, in comp., वाटः-टी, वाटिका; शाकटं-शाकिनं in comp., वृक्षवाटिका; 'sugar-p.' इक्षुशाकटं-वाटिका. 3 Colony, q. v. **-er,** *s.* रोपयितृ *m.*, रोपकः. 2 वाटिकेश्वरः.

Plantain, *s.* कदली-लः, रंभा, वारणबुसा-षा, मोचा, अंशुमत्फला, काष्ठीला; 'p. fruit' कदलीफलं, मोचं; 'wild p.' काष्ठकदली.

Plantigrade, *a.* पादतलचारिन्.

Plash, *s.* आघातः, आस्फालनं. 2 क्षुद्रजलाशयः. **-v. i.** जले क्रीड् 1 P, जलं आस्फल् c. **-v. t.** अवच्छिद् 7 P, लू 9 U, कृत् 6 P. 2 संग्रंथ् 9 P. **-y,** *a.* जलाढ्य.

Plaster, *s.* लेपः, सुधा, चूर्णलेपः. 2 उपनाहः उपदेहः. **-v. t.** लिप् 6 P, वि-अनु-प्र-°, दिह् 2 U, उप-नह् 4 P. **-er,** *s.* लेपकः, पलगंडः. **-ing,** *s.* वि-प्र-लेपः-पनं.

Plastic, *a.* आकारद, कल्पक. 2 नम्य, सुखनम्य.

Plat, *s.* **Plot,** q. v. **-v. t.** **Weave,** q. v. 2 प्र-सं-कल्प् c., चिंत् 10.

Plate, *s.* पात्रं, भाजनं. 2 कोशः-षः, हेमरूप्यं. 3 फलकः-कं, पत्रं; पट्टः-ट्टं, पट्टिका; 'copper p.' ताम्रपट्टः, ताम्रपत्रं; 'p.s of grant' शासन-नियम-पत्राणि. **-v. t.** रजतपत्रेण आवृ 5 U or आच्छद् 10; रजतेन अलंकृ 8 U. **-ed,** *a.* रजतपत्रावृत, रूप्यनिबद्ध.

Plateau, *s.* समस्थली, अधित्यका; *See* **Level.**

Platform, *s.* वेदि *f.*, वेदिका, उन्नतस्थानं.

Platoon, *s.* गुल्मः-ल्मं.

Platter, *s.* पात्रं, भाजनं.

Plaudit, *s.* प्रशंसा, धन्यवादः, जयघोषः.

Plausible, *a.* सत्याभास, सत्यसंकाश, बाह्यतः रमणीय.

Play, *v. i.* क्रीड् 1 P, रम् 1 A, वि-हृ 1 P, विलस् 1 P, खेल् 1 P. 2 (At dice) दिव् 4 P, क्रीड्, ग्लह् 1 A; 'p. s at dice' अक्षैः-अक्षान्-दीव्यति. 3 वद् c. (instrument). 4 चेष्ट् 1 A, वृत् 1 A, चल् 1 P. —*v. t.* रूप् 10, नट् 10, अभिनी 1 P, ex. by denom.; 'p. s the king' नृपायते; 'p. s the woman' स्त्रीवाचरति. 2 प्र-,चल्-इ c., प्रवृत् c., प्रसृ c. 3 वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P. —*s.* क्रीडा, खेला-लनं, लीला, केलि *f.*, विनोदः, विलासः, विहारः, कौतुकं, परिहासः; 'in p.' लीलया, परिहासेन. 2 नाटकं. 3 अक्षक्रीडा, द्यूतं, देवनं. 4 अभिनयः, गति *f.* 5 आचरणं, चेष्टितं; वृत्ति *f.*, व्यापारः, कृत्यं, चेष्टा; 'foul p.' दुश्चेष्टितं. 6 चलनं, सरणं. 7 प्रसरः, अवकाशः, अवसरः; 'p.-day' अनध्यायदिवसः-तिथिः, विश्रामदिवसः; 'p. house' नाटक-रंग-शाला; 'p.-thing' क्रीडनकं, क्रीडाद्रव्यं-वस्तु. **—er,** *s.* क्रीडकः; (at dice) अक्ष-,देविन् *m.*, अक्षक्रीडकः, अक्षधूर्तः. 2 नटः, कुशीलवः, नर्तकः, अभिनेतृ *m.* पात्रं. **—ful,** *a.* क्रीडासक्त, क्रीडापर-मग्न, केलि-क्रीडा-लीला-शील, लीला-खेला-पर, विलासिन्, विनोदिन्; (of things) सलील -क्रीडा-केलि in comp.; 'p. anger' प्रणयक्रीडा-कोपः, केलिकोपः. **—fully,** *adv* क्रीडापूर्वं, परिहासेन (jokingly); लीलया, सकौतुकं, सविलासं, सखेलं. **—fulness,** *s.* क्रीडासक्ति *f.*, लीलापरता, सलीलत्वं, क्रीडाशीलता.

Plea, *s.* कारणोत्तरं, उत्तरं, उत्तरपादः. 2 व्यपदेशः, छद्मन् *n.*, अपदेशः, निमित्तं, कारणं, मोचनहेतुः. 3 वादः, व्यवहारः, कार्यं. 4 प्रार्थना; 'raising a p.' ध्वजीकरणं. **—Plead,** *v.* उत्तरं दा 3 U or प्रतिपद् 4 A or वद् 1 P, निमित्तं दृश् c., वि-,अप-दिश् 6 P; 'p. guilty' अपराधी अस्मीति वद् or प्रतिपद्; 'tears shall p. in vain' अश्रुपातो निर्गुणो भवेत्. 2 विनयेन प्रार्थ् or अभ्यर्थ् 10 A, सविनयं याच् 1 A; 'p. ed for his life' जीवितदानार्थं प्रार्थयामास. 3 उप-क्षिप् 6 P, उपन्यस् 4 U, व्यपदेशार्थं पुरः क्षिप्. 4 (Cause) प्रति-पद् c., परार्थं उत्तरं वद्, परपक्षं समर्थ्; 'p. ing headache as an excuse' शिरःशूलस्पर्शं व्यपदिशन्; 'p. ing illness' अस्वास्थ्यव्याजेन-व्यपदेशेन. **—er,** *s.* अभिभाषकः, उत्तरवादिन् *m.* समर्थकः, हेतुवादिन् *m.* **—ing,** *s.* हेतु-उत्तर-वादः, व्यपदेशनं, हेतूपन्यासः.

Please, *v. t.* प्री 9 P, 10 (प्रीणयति), तृप् c., सं-परि-°, रम् c. (रमयति), प्रमुद् c., छंदयति (D.), आ-नंद् c., सं-,तुष् c., प्रसद् c., आह्लाद् c., हृष् c., आराध् c., अनुरंज् c.; oft. by इच्छा, प्रसादः, कृपा; विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया (R. VIII. 46) 'if it p. God to do so' &c.; 'he was p. ed to accept my presents' ममोपायनानि स सुप्रीतमनसा-सुप्रसन्नं-स्वीचकार; 'may it p. your ladyship' प्रसीदतु भट्टिनी (M. 4). 2 (Like) *See* below. —*v. i.* 'to be p. ed' तुष् 4 P, तृप् 4 P; रम्-मुद् 1 A, नंद् 1 P. 2 अर्ह् 1 P or प्रसद् 1 P, with inf., or simply by Imperative; 'p. sit here' अत्रोपविशत्वार्यः; 'worthy Sir, p. to wait for 2 or 3 days' द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25) 3 रुच् 1 A, इष् 6 P; *See* Like; 'just as my friend p. s' यदभिरोचते वयस्याय; 'do as you p.' यथाभिलषितं क्रियतां. **—ance,** *s.* क्रीडोद्यान. **—ant,** *a.* सुखकर (री *f.*), मधुर, सुखद-प्रद, सुखावह, रम्य, रमणीय, प्रिय, मनोहर-रम, अभिराम, सुभग, अभिमत, सुख, काम्य, कांत, हर्षावह, रुचिर, हृद्य, हृदयंगम, प्रीति-तुष्टि-कर, मनोज्ञ, मंजुल, चारु; 'a p. joke' हृदयंगमः परिहासः (Mal. 3). **—antly,** *adv.* सुखं, रम्यं, मधुरं, प्रियं, रुचिरं. **—antry,** *s.* परि(री)हासः, नर्मभाषितं, विनोदः, नर्मालापः, विनोद-नर्म-उक्ति *f.* **—ing,** *a.* सुख in comp.; रम्य, कांत; *See* Pleasant; 'p to the ear' सुखश्रव, श्रुतिसुख, मंजुलस्वन, सुश्राव्य; 'p. to the eye' प्रेक्षणीय, नयनाभिराम, सुदृश्य; 'p. language' चाटु *m. n.*, चाटूक्तिः. **—ingly,** *adv.* सुभगं, सुखं, सुख-चारु in comp. **—Pleasure,** *s.* सुखं, सं-परि-तोषः, आनंदः, प्रीति *f.*, सौख्यं, तुष्टि *f.*, प्र-, मोदः, आह्लादः, हर्षः, मुदा. 2 अभि-, रुचि *f.*, इच्छा, अभिलाषः, छंदः-दस् *n.*, कामः; 'at one's p.' स्वेच्छया, कामतः, यथाकामं, यदृच्छया, स्वैरं; 'wandering at p.' कामचारिन्, स्वच्छंदगामिन्; 'sensual p.' भोगः, विषयसुखं, विषयानुरागः; 'sexual p.' रति *f.*, रतिसुखं, सु-,रतं; 'p.-boat' केलि-क्रीडा-नौका; 'p.-ground' आरामः, क्रीडा-केलि-विलास-वनं-काननं, प्रमदवनं, क्रीडोद्यानं; 'p. mansion' केलिगृहं-भवनं, लीलागारं, विलासमंदिरं. 3 प्रसादः, अनुग्रहः. **—able,** *a.* रम्य, रमणीय, सुखद, सुख; *See* Pleasant. **—ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः, भोगपरायणः.

Plebian, *a.* प्राकृत (ती *f.*), सामान्य, साधारण (णी *f.*), अवरवर्ण, अकुलीन. —*s.* प्राकृतः, प्राकृतजनः, पृथग्जनः, नीच-अवर-जनः.

Plectrum, *s.* कोणः, शारिका.

Pledge, *s.* न्यासः, निक्षेपः, आधिः, उपनिधिः, उपन्यासः-निक्षेपः, पणः. 2 अभिज्ञानं; ‘ p. of love ’ प्रत्ययभिज्ञानं. 3 प्रतिज्ञा, क्षणः, परिपणः-णनं; ‘I have given a p.’ विहितप्रतिज्ञः-गृहीतक्षणः-अहं. 4 प्रतिभूः, लग्नकः, बंधकः. -*v. i.* न्यस् 4 U, निक्षिप् 6 P, आ-नि-धा 3U, परि-,पण् 1 A, आधी-न्यासी-कृ 8 U. 2 (One's word) प्रति-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of person), उरीकृ, वचनेन बंध् 9 P; ex. by (*s.*); अस्मत्सौदामिनीसमक्षमनयोर्वृत्तेयं प्रतिज्ञा (Mal. 1) ‘ they two p. ed their word’ &c.; ‘ he has p. ed his virtue (honor) that he would not harm you ’ तव विरूपकरणे तेन सुकृतमंतरे धृतं (P. iv. 1); ‘ he who has p. ed his word ’ कृतविहित-प्रतिज्ञः, प्रतिज्ञा-वचन-बद्धः, दत्तवचनः-प्रतिज्ञः, गृहीतक्षणः.

Pledget, *s.* पट्टः, आवेष्टनं.

Pleiades, *s.* कृत्तिकाः.

Plenary, *a.* सं-परि-पूर्ण, समग्र.

Plenipotent, *a.* पूर्णशक्तियुक्त. -**Plenipotence**, *s.* पूर्णसामर्थ्यं शक्ति *f.* **Plenipotentiary**, *s.* पूर्णशक्तियुक्तः, महादूतः.

Plenish, *v. t.* उपस्कृ 8 U, परि-छद् 10.

Plenist, *s.* पूर्णतावादिन् *m.*

Plenitude, *s.* पूर्णता, प्राचुर्यं, वैपुल्यं, समृद्धि *f.*, अतिरेकः, उत्सेकः, परा कोटिः-काष्ठा.

Plenty, *s.* बाहुल्यं, प्राचुर्यं, वैपुल्यं, बहुत्वं, समृद्धि *f.*, उद्रेकः, अतिरेकः, उत्सेकः, स्फीति-वृद्धि- *f.* -**Plenteous**, **Plentiful**, *a.* प्रभूत, प्रचुर, विपुल, बहु, बहुल, भूरि, भूयिष्ठ, पुष्कल, समृद्ध, सं-परि-पूर्ण, उद्रिक्त, स्फीत, उत्सिक्त, उपचित. -**ly**, *adv.* बाहुल्येन, बहुशः, भूयिष्ठं, भूरि, प्रभूतं, विपुलं, अतिरिक्तं. -**ness**, *s.* बाहुल्यं, प्राचुर्यं; *See* (*s.*).

Pleonasm, *s.* अधिकपदत्वदोषः; शब्दाधिक्यं, शब्दातिशयः. -**Pleonastic**, *a.* अधिकशब्द, बहुपद.

Plethora, *s.* रक्तपित्तं. 2 बाहुल्यं; प्राचुर्यं, अतिवृद्धि *f.* -**Plethoric**, *a.* रक्तपित्तरोगिन्.

Pleurisy, पार्श्वशूलं.

Plexus, *s.* नाडी-शिरा-जाल.

Pliant, **Pliable**, *a.* आ-,नम्य, सुखनम्य, मृदु, शिथिल, अदृढ, आयम्य.

Pliers, *s.* *See* ‘ **Pincers.** ’

Plight, *s.* दशा, अवस्था, स्थिति *f.*, भावः, वृत्ति *f.*, गति *f.*; ‘ sorry p. ’ दुर्दशा, दुर्गतिः. 2 **Pledge**. q. v. -*v. t.* प्रति-ज्ञा 9 A, न्यस् 4 U; *See* **Pledge**. -**ed**, *a.* प्रतिज्ञात, न्यस्त; ‘ p. word ’ विहितप्रतिज्ञा, संगरः, अभिसंधिः.

Plinth, *s.* स्तंभमूलं-तलं; प्राकारमूलं.

Plod, *v. i.* अविरतं श्रम् 4 P or आयासं कृ 8 U, मंदं मंदं आयस् 1, 4 P. -**der**, *s.* मंदं मंदं निरंतरायासिन् *m.*, नित्योद्योगिन् *m.* पिपीलिकाधर्मिन् *m.* -**ding**, *s.* अतिमांद्येन निरंतरश्रमः-नित्यायासः.

Plot, *s.* भू-भागः-प्रदेशः, क्षेत्रं, स्थलं-ली, भू-भूमि-*f.* 2 कपटप्रबंधः, कूटप्रबंधः, कपटोपायः, मंत्रणा, कु-संकल्पः-मंत्रणा-कल्पना, कूटोपायः, उपजापः; (generally) उपायः, संकल्पः, प्रयोगः. 3 कथा, वस्तु *n.*; ‘ arrangement of p. ’ वस्तुरचना-विन्यासः; ‘ the p. of which is composed by Kulidasa ’ कालिदासग्रथितवस्तु नाटकं (S. 1.) -*v. i.* कपटप्रबंधान् चिंत् 10 or युज् 10, उपायान् क्लृप् c. or निरूप् 10 or अनुसं-धा 3 U; ‘ p. against ’ द्रुह् 4 P (with dat.), अभिद्रुह् (with acc.) ; ‘ p. against one 's life ’ जीवितापहरणाय कपटप्रबंधान्रचयंति. -**ter**, *s.* कुमंत्रणाकृत् *m.*, अभिद्रोग्धृ *m.*

Plough, *s.* हलं, लांगलं, सी(शी)रः, हालः, गोदारणं; ‘body of a p.’ निरीशं-षं; कुटकं, फालः, कृषकः; ‘pole of a p.’ ईषा-शा, (लांगलीषा), लांगलदंडः; ‘handle of a p.’ ईषादंडः; ‘ furrow made by a p. ’ सीता, लांगलपद्धति *f.*; ‘ p.-boy ’ बालकर्षकः; ‘ p.-gear ’ हलसज्जा-उपकरणं; ‘ p.-land ’ सीत्यं, हल्यं, फालकृष्टं, हल्यक्षेत्रं; ‘ p.-man ’ हालिकः, लांगलिन् *m.*, हलिन् *m.* लांगलिकः, सैरिकः, हलधरः-भृत् *m.* कृषकः, कर्षकः; ‘ p.-share ’ कुशी, फालः, कृषकः. -*v. t.* कृष् 1 P, 6 U, भिद् 7 P, विद् 9 P or c., उत्कृष् 1 P, (सद्यः सीरोत्कषणसुरभि Me. 16). -*v. i.* हलं वह् c. or चल् c. -**ed**, *a.* कृष्ट, हल्य, सीत्य; ‘ twice, thrice, p. ’ द्वि-त्रि-हल्य; ‘ p. after sowing ’ बीजाकृत, उप्तकृष्ट. -**er**, *s.* कर्षकः, हालिकः. -**ing**, *s.* कर्षणं, उत्कर्षणं, भूमिदारणं.

Pluck, *v. t.* (Off) लू 9 U, निष्कृष् 1 P; ‘ crows with feathers p. ed off ’ लूनपक्षाः काकाः; (out) उत्पट् 10, सं-,उद्ध 1 P, निर्हृ; (hair) लुंच् 1 P, अव-उत्-°, उत्पट् c.; (up) उन्मूल् 10, उत्-खन् 1 P, उच्छिद् 7 P, उत्पट्, उद्धृ, कृष्. 2 (Gather) चि 5 U, अव-सं-°, लू, छिद्, आ-दा 3 A, ग्रह् 9 U. -*s.* सत्त्वं, वीर्यं, पौरुषं, उत्साहः; *See* **Courage**. -**ing**, *s.* उत्पाटनं, उद्धरणं, उल्लुंचनं, अव-,चयः.

Plug, *s.* रोधनी, स्तंभनी. -*v. t.* पि-धा 3 U, स्तंभ् 9 P.

Plum, *a.* कर्कंधूः,-फलं; *See* **Jujube.**

Plumage, *s.* पक्षाः (pl.), पिच्छकलापः, बर्हभारः, पक्षः, पर्णं, पतत्रं, गरुत् *n.*

Plumb, *s.* लंबः,-सूत्रं. -*a.* लंब, ऋजु, लंबरूप. -*v. t.* सूत्रेण समायुज् 7 U, 10. 2 वेधं परि-मा 3 A, 2 P. -**er**, *s.* सीसकारः.

Plume, *s.* पक्षः, पर्णं, पिच्छं; *See* **Feather**. 2 शिखा, चूडा, शेखरः. -*v. t.* पर्णानि रच् 10. 2 पक्षान् निर्हृ 1 P or उत्पट् 10. 3 (Oneself upon) आत्मानं श्लाघ् 1 A, विकत्थ् 1 A; 'p. s himself upon his learning' ज्ञानेन आत्मानं अतीव श्लाघते-विकत्थते, पंडितंमन्यः, पंडितमानी. **-less**, *a.* पक्षहीन. **-ous, -ose, -y, Plumigerous**, *a.* सपक्ष, पक्षवत्, पक्षविशिष्ट.

Plummet, *s.* लंबः, लंबसूत्रं, लंबसीसकं, सीसकसूत्रं.

Plump, *a.* पीन, पीवर, पुष्ट, स्थूल, उच्छून, आप्यान, स्फीत; *See* **Fat**. -*adv.* अकस्मात्. -*v. t.* आप्यै c., श्वि c., स्फाय् c. (स्फावयति). **-ly**, *adv.* व्यक्तं, स्पष्टं. **-ness**, *s.* पीनता, पुष्टि *f.*, स्फीति *f.*

Plunder, *v. t.* (धनादि) अप-,हृ 1 P, मुष् 9 P, चुर् 10, वि-,लुंट्-ठ् 1 P, 10. -*s.* विलुंठनं, लोत्रं, लोप्त्रं, अपहारः, अपहृतं धनं. **-er**, *s.* अपहारकः, विलुंठकः, मोषकः. **-ing**, *s.* अपहारः, अपहरणं, मोषणं.

Plunge, *v. i.* मस्ज् 6 P, नि-अव-°, आप्लु 1 A, गाह् 1 A, वि-अव-°, प्रविश् 6 P. -*v. t.* Causal of roots above. -*s.* अवगाहः-हनं, नि-,मज्जनं, आप्लवः, प्रवेशः. **-ed**, *a.* मग्न, अवगाढ, आप्लुत, लीन, प्र-नि-विष्ट.

Plungeon, *s.* प्लवः, प्लाविन् *m.*

Plural, *a.* (Number) बहुवचनं. 2 अनेक, बहु. **-ity**, *s.* बहुत्वं, अनेकता; ex. by 'Many' q. v.

Plus, *s.* धनं; सहित, संकलित in comp.

Pluto, *s.* यमः, कालः, कृतांतः.

Plutocracy, *s.* धनवत्सत्तात्मकं राज्यं. **-Plutocrat**, *s.* धनवत्-सत्तावत् *m.* -शासितृ *m.*

Pluvial, Pluvious, *a.* वृष्टिमत्, प्रचुर-बहु-वृष्टि.

Ply, *v. t.* पत् c., धा 3 U, न्यस् 4 U, प्रयुज् 7 A, 10; पुनः पुनः प्रयुज् or व्यापृ c., सततं व्यापृ c.; 'p. thy work' कार्यव्यापृतो भव, कार्यं निर्वाहय; 'p. thy needle' सूच्या कार्ये प्रवर्तस्व. 2 (प्रयत्नेन) चल् c., संचर्-ल् c. 3 आग्रहेण उप-स्था 1 U, अनुनिर्बंध् 9 P; *See* **Importune**; 'p. with entreaties' अतिप्रार्थनया उद्विज् c. -*v. i.* अविरतं व्यापृ 6 A or प्रवृत् 1 A or उद्यम् 1 A or चेष्ट् 1 A. -*s.* पुटः, भंगः; *See* **Fold**.

Pneumatic, *a.* वायुरूप, वायुमय (यी *f.*), वायव (वी *f.*), वायु in comp. -*s.* (P. s) वायुविद्या-शास्त्रं.

Pneumonia, *s.* क्लोमपाकः.

Poach, *v. t.* ईषत् पच् 1 P. 2 (Game) कूटोपायेन ग्रह् 9 U or अपहृ 1 P or चुर् 10. 3 ग्रहणार्थं अनुसृ 1 P or अनुगम् 1 P; *See* **Pursue**. **-er**, *s.* मृगयाचौरः, जांगलचौरः. **-ing**, *s.* मृगया-जांगल-चौर्यं, पक्षिग्रहणं.

Pock, *s.* *See* **Pimple**. **-mark**, *s.* मसूरिका-क्षतं-चिन्हं.

Pocket, *s.* कोषः, आधारः. -*v. t.* कोषे नि-धा 3 U, (छलेन) आत्मसात्कृ 8 U. 2 (Insult) सह् 1 A; *See* **Bear**. **-ed**, *a.* कोषगुप्त, कोषांतर्गत, अंतर्हित.

Pod, *s.* बीजकोशः-शी *f.*, शिंबा, शिंबि-बी *f.*, शिंबिका.

Podagrical, *a.* वातकिन्, वातरोगिन्.

Prevent, *v. t.* वृ c., नि-विनि-°, रुध् 7 U, प्रति-अव-नि°, प्रति-नि-षिध् 1 P, प्रतिकृ 8 U, बाध् 1 A, प्रतिबंध् 9 P, प्रतिष्टंभ् 9 P, प्रति-व्या-हन् 2 P, प्रत्या-ख्या 2 P, निवृत् c., अंतरायः-भू- परिपंथी भू 1 P: 'do not p. me from fighting' युध्यमानं मां मा रुंद्धि, युध्यमानस्य मेंऽतरायो मा भूः. -ion, *s.* प्रति-, रोधः, नि-, वारणं, प्रतिबंधः, प्रतिकारः, व्याघातः, प्रतिषेधः; 'p. is better than cure' प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं. -ive, *a.* हर (री *f.*), घ्न (घ्नी *f.*), in comp., निवारक, प्रतिबंधक, निरोधक. -*s.* वारणं, प्रतिबंधकं.

Previous, *a.* पूर्व, प्राग्भूत, भूत, गत, अतीत, पूर्ववृत्त-गत, प्राक् in comp. -ly, *adv.* पूर्वं, प्राक्, पुरस्तात्, पूर्व in comp.

Previse, *v. t.* अग्रेदृश् 1 P or नि-रूप् 10. 2 पूर्वं सूच् 10 or प्र-बुध् c. -ion, *s.* अग्र-निरूपणं-दृष्टि *f.*

Prey, *s.* आमिषं (fig. also); मांसं, भक्ष्य, अन्नं, खाद्यं, भोज्यं, 'fell a p. to enemies' द्विषामामिषतां ययौ (R. XII. 11). -*v. i.* भक्ष्यं आ-अप-हृ 1 P. 2 (Upon) भक्ष् 10; संतप् c., बाध् 1 A, क्रमशः नश् c.

Price, *s.* मूल्यं, अर्घः, पण्यं, अवक्रयः, पणः; 'high p.' महार्घः, बहुमूल्यं. -*v. t.* मूल्यं स्था c. (स्थापयति) or संक्लृप् c. -ed, *a.* कृतमूल्य. 'high-p.' महार्घ-र्घ, बहुमूल्य.

दुर्मूल्य; 'low-p.' अल्पमूल्य. -less, *a.* अनर्घ-र्घ्य, अमूल्य.

Prick, *v. t.* व्यध् 4 P, निर्-,भिद् 7 P, तुद् 6 P, पीड् 10; व्यथ् c. (व्यथयति), क्लिश् 9 P or c. 2 प्रेर् c., उत्तिज् c., प्रोत्सह् c., प्रणुद् 6 P or c. 3 (Ears) उन्नम् c. (नमयति), उच्छ्रि 1 U, स्तब्धीकृ 8 U; 'with ears p. ed' स्तब्धकर्ण. -*s.*, -**ing**, *s.* प्रतोदः, तोत्रं, तोदनं; सूचि *f.*, शल्यं, कंटकः. 2 वेधः-धनं, तोदनं. 3 यातना, तीव्रव्यथा, आतंकः, शूलः-लं. -**ed**, *a.* विद्ध, भिन्न, शल्य-सूचि-विद्ध-भिन्न; 'p. at heart' भिन्न-विद्ध-मर्मन्. -**er**, *s.* वेधकः. 2 तोत्रं; *See* (*s.*).

Prickle, *s.* कंटकः, सूचि-ची *f.*, शल्यं, शूकं. -**y**, *a.* सकंटक, सशूक, बहुकंटक-शूक.

Pride, *s.* (Good) अभिमानः. 2 अहंकारः, गर्वः, उत्सेकः, अवलेपः, दर्पः, औद्धत्यं, मदः, मादः, आटोपः, अहंमानः, मानः, चित्तसमुन्नति *f.*, अवष्टंभः, चित्तोद्रेकः, स्मयः; (impudent) प्रागल्भ्यं, धृष्टता, प्रतिभा-भानं. 3 अलंकारः, अवतंसः, ललामं, अभिमानास्पदं-भूमिः. -*v. t.* (Oneself upon) आत्मानं श्लाघ् 1 A or विकत्थ् 1 A, अभिमन् 4 A, or ex. by (*s.*); 'p.-ing himself on his learning' पंडितमानी, पंडितंमन्यः, विद्याभिमानी, जातज्ञानावलेपः; 'p. ing herself upon her beauty' रूपगर्विता. -**Proud**, *a.* (In a good sense) अभिमानिन्. 2 दृप्त, गर्वित, अवलिप्त, सगर्व, सदर्प, उत्सिक्त, उद्धत, उत्सेकिन्, अभिमानिन्, साटोप, साहंकार; अहंमानिन्, उत्-, मत्त, समुन्नद्ध; प्रगल्भ, धृष्ट, प्रतिभावत्, गर्वितचित्त, मदोद्धत; दर्पाध्मात, स्मयाकुल. 3 (Building &c.) उत्तुंग, प्रोच्छ्रित, विशाल, सप्रताप; 'p. of one's birth' कुलाभिमानिन्; रूपगर्वित, यौवनोन्मत्त, &c.; 'to be p.' दृप् 4 P गर्व् 1 P, प्रगल्भ् 1 A. -**ly**, *adv.* सदर्पं, सगर्वं, सावलेपं, साटोपं, साहंकारं, उद्धतं.

Priest, *s.* (Family) पुरोहितः, पुरोधस् *m.* कुलाचार्यः. 2 (Sacrificial) ऋत्विज् *m.*, याजकः, अध्वर्युः, होतृ *m.* याज्ञिकः. 3 (Vedic) श्रोत्रियः, मंत्रविद् *m.*, ब्राह्मणः, द्विजः, विप्रः. 4 आचार्यः, गुरुः, उपाध्यायः, पुरोहितः, धर्माचार्यः, धर्माध्यक्षः. 5 (Of a deity) पूजकः, उपासकः, अर्चकः; 'p.-craft' उपाध्यायच्छलं-कैतवं; 'p.-ridden' पुरोहिताधीन. -**ess**, *s.* होत्री, याजिका. -**hood**, *s.* पौरोहित्यं, उपाध्यायपदं-वृत्ति *f.*, 2 पुरोहिताः, पुरोहित or याज्ञिक-गणः or वर्गः, पौरोहित्यं. -**ly**, *a.* याजकीय, पौरोहित्यसंबंधिन्, (*s.*) in comp.

Prig, *s.* दांभिकः, दंभिन् *m.*, रूपगर्वितः. -**gish**, *a.* दांभिक (की *f.*), आत्माभिमानिन्.

Prim, *a.* अतिविनीत, अतिसूक्ष्म.

Prime, *s.* आदिः, आरंभः, पूर्व-प्रथम-भागः. 2 उत्तमदशा, प्रौढता, उत्तमभागः-अंशः; 'in the p. of youth' प्रथमे वयसि; 'the p. of youth' प्रथमं वयः, नव-अक्षत-यौवनं, यौवनश्रीः; 'being in the p. of youth' अक्षत-नव-यौवन. -*a.* प्रथम, आद्य. 2 मुख्य, प्रधान, प्रमुख, अग्र्य; 'p. minister' मुख्यमंत्री, प्रधानामात्यः, महामंत्री. 3 उत्कृष्ट, श्रेष्ठ, परम, उत्तम, विशिष्ट; *See* **Principal**. -**ly**, *adv.* प्रथमं, श्रेष्ठं. -**ness**, *s.* उत्तमता, विशिष्टता. -**Primary**, *a.* प्रथम, आद्य, आदिम, पूर्व, मौल (ली *f.*), मूल-आदि in comp.; 'p. cause' आदिकारणं-बीजं, निदानं, मूलहेतुः; 'p. sense' मूलार्थः. 2 प्रधान, मुख्य, प्रमुख, अग्र्य; *See* **Prime**. -**ily**, *adv.* प्रथमं-मतः, आदौ, पूर्वं, मुख्यशः, प्राधान्येन. -**iness**, *s.* प्रथमता, प्राधान्यं. -**Primate**, *s.* प्रधानोपाध्यायः. -**Primer**, *s.* प्रथम-आरंभ-पुस्तकं. -**Primeval**, *a.* आद्य, आदिम, प्राक्कालीन, पूर्वकालीन, प्राक्तन (नी *f.*), मौलिक-प्राथमिक- (की *f.*). -**Primitive**, *a.* प्राथमिक, प्रथम, आद्य; *See* **Primeval**. 2 मूल in comp., अव्युत्पन्न; *See* **Primary**. 3 प्राक्तनमार्गसेविन्. -**ly**, *adv.* आदौ, आरंभे, प्रथमं-मतः. 2 प्राक्तनव्यवहारानुसारेण.

Primogenial, *a.* प्रथम-आदि-जात, मूल in comp.

Primogenitor, *s.* प्रथम-कुल-पुरुषः. -**Primogeniture**, *s.* पूर्वजत्वं, ज्येष्ठत्वं, अग्रजत्वं, वयोज्येष्ठता.

Primordial, *a.* आद्य; बीजभूत, मौल (ली *f.*), *See* **Primeval**.

Prince, *s.* कुमारः, राजपुत्रः-सुतः, युवराजः. 2 नृपः, राजन् *m.*, पार्थिवः; *See* **King**. 3 भर्तृदारकः, कुमारः, (in dramas). -**dom**, *s.* राज्यं, राष्ट्रं, विषयः. 2 यौवराज्यं. -**like**, -**ly**, *a.* राजयोग्य-सदृश (शी *f.*), राजार्ह, नृपोचित, नृपोपम, राजकीय, प्रतापवत्, ऐश्वर्यवत्, प्रताप-वैभव-शालिन्. 2 राजवंश्य, राजकुलज; 'p. birth' राजवंशप्रसूतिः; 'p. merits' राजोचिता गुणाः -**Princess**, *s.* कुमारी, राजपुत्री, नृपात्मजा, नृपसुता, भर्तृदारिका.

Principal, *s.* अध्यक्षः, अधि-,पतिः, नायकः, मुख्यः; *See* **Leader**. 2 मूलं, मूलधनं, नीविवी *f.*, परिपणः. -*a.* मुख्य, परम, प्रधान-वर in comp., प्रमुख, अग्र, अग्र्य, प्रवर, श्रेष्ठ, विशिष्ट, उत्कृष्ट, उत्तम, अनुत्तम, वर्य, वरेण्य, परार्ध्य, अग्रि(ग्री)य, प्राग्रहर; नायक, अग्रणी, मुखर, धुर्य, धुरीण, धूर्वह, धुरंधर, oft. ex. by व्याघ्र, पुंगव, ऋषभ, कुंजर, सिंह, शार्दूल, नाग, प्रकांड, in comp.; *See* **Excellent**, 'p. door' सिंहद्वारं; 'p. queen' अग्र-पट्ट-महिषी; 'p. minister' प्रधानामात्यः. -**ity**, *s.* राष्ट्रं, प्रदेशः, मंडलं,

राज्यं. -ly, *adv.* प्रधानतः, प्राधान्येन, मुख्यशः, विशेषतः, विशेषेण.

Principle, *s.* तत्त्वं, मूलतत्त्वं, बीजं, सारः. 2 कारणं, हेतुः, आदिबीजं-हेतुः, मूलं, अंगं, अवयवः, साधनं, मूलांग-द्रव्यं. 3 नियमः, विधिः, सूत्रं, उत्सर्गः, स्थिति *f.*, व्यवस्था. 4 गुणः, भावः, धर्मः, स्वभावः. 5 क्रमः, रीति *f.*, मार्गः, मर्यादा, धारा, पद्धति *f.* 6 आधारः, आश्रयः, उपष्टंभः, मूलं; (opp. of practice) आगमः, शास्त्रं; 'grounded in p. s' आगमिन्, शास्त्रनिपुण, 'having good p.s' सुनियमनिष्ठ, सुवृत्त; 'of bad p-s.'; खंडितवृत्त, भ्रष्टचरित.

Print, *v. t.* मुद्रयति: (D.). अंक् 10, मुद्राक्षरैः अंक्. -*s.* चिह्नं, अंकः, मुद्रा; 'foot-p. पदं, पदमुद्रा-चिह्नं. 2 मुद्रणयंत्रं. 3 मुद्रणं; 'in p.' मुद्र्यमाण. -ed, *a.* मुद्रित, मुद्रांकित, मुद्राक्षरांकित. -er, *s.* मुद्रकः; मुद्रणकृत् *m.* -ing, *s.* मुद्रणं, मुद्रांकनं, 'p.-house' मुद्रणयंत्रालयः, मुद्रणशाला; 'p.-press' मुद्रणयंत्रं.

Prior, *a.* प्रधान, गरीयस्, गुरुतर, पूर्व, अग्र्य, आदिम, आद्य, पूर्व-आदि-प्राक् in comp.; 'p. existence' प्राग्भावः, पूर्व जन्म; 'p. and subsequent' पूर्वापर, परापर, परावर. -*s.* मठाध्यक्षः, मठाधिपतिः, विहारपालः. -ity, *s.* पूर्वता, प्रथमता. (Of rank) अग्रपदं-मानः; श्रेष्ठपदं, प्राधान्यं. -y, *s.* मठः-विहारः, आश्रमः.

Prism, *s.* कक्षायतं. -**Prismatic,** *a.* कक्षायत.

Prison, *s.* कारा, बंदिशाला-गृहं, बंधनालयः, कारागृहं, चारः-रकः, गुप्तिस्थानं; 'escaped from the p.' बंधनं भित्त्वा पलायांचक्रे; 'keep in p.' बंधने निरुध् 7 U. -er, *s.* बंदि-दी *f.*, कारागुप्तः, रुद्धः, कारागारस्थः. 2 (Of war) युद्धगृहीतः.

Pristine, *a.* प्राक्तन (नी *f.*), पुराण, पूर्व, पूर्वकालिक (की *f.*), प्राचीन, प्राक्कालीन.

Private, *a.* विजन, विविक्त, निर्जन, एकांत, निभृत, निःशलाक. 2 स्व, आत्मीय, असाधारण (णी *f.*). असामान्य, विविक्त, स्व-आत्म in comp. 3 गुप्त, गूढ, रहस्य, प्र-,छन्न, अप्रकट, अव्यक्त, रहस्-मिथः-अंतः-in comp. 4 अनधिकारिन् अनधिकारिक (की *f.*); 'p. profit' आत्महितं, स्वलाभः; 'p. road' गूढ-प्रच्छन्न-मार्गः; 'p. door' अंतर्द्वारं, गूढद्वारं, प्रच्छन्नं; 'p. apartments' अंतःपुरं, अवरोधगृहं,' अंतर्गृहं; 'now is the time to be p.' रहस्यमधुना (Bh. II 97); 'p. talk' रहःसंकथा, मिथोजल्पः; 'p. parts' गुह्यं, उपस्थः; 'p. room' अंतःशाला-कोष्ठः, उपरोधकं. -*s.* सैनिकः. -ly, 'in p.' *adv.* रहः, रहसि, मिथः, रहस्ये, निभृतं, विविक्ते, एकांते, विजने, उपांशु, गूढं, प्रच्छन्नं, गुप्तं, अप्रकाशं, अप्रकटं -ness, Privacy, *s.* रहस् *n.*, विविक्तं, विजनं, रहोभावः, विविक्त-एकांत-वासः; रहस्यं, गुप्तता, छन्नता, अप्राकाश्यं. 2 रहःस्थानं-स्थलं, विविक्त-निर्जन-स्थानं, निर्जनदेशः.

Privation, *s.* अभावः, विरहः, राहित्यं, हानि *f.*, क्षयः, लोपः, नाशः. 2 कष्टं, कृच्छ्रं, आपद्-विपद् *f.* 3 आहारविरहः, आहाराभावः, सुखसाधनलोपः, अन्नवस्त्रहानिः. -**Privative,** *a.* हानि-क्षय-लोप-कर (री *f.*). 2 अभावात्मक, अभावरूप, अभाववाचिन्. -*s.* अभावशब्दः, नञ्पदं. -ly, *adv.* अभावरूपेण.

Privilege *s.* विशेषाधिकारः, असामान्याधिकारः, स्वाधिकारः, अधिकारः, स्वत्वं. -*v. t.* विशेषाधिकारं दा 3 U. -ed, *a.* अधिकारविशिष्ट, साधिकार, विशेषाधिकारयुक्त.

Privy, *a.* गूढ, प्रच्छन्न, विविक्त, रहः in comp.; *See* **Private.** 2 (To) संसर्गिन्, सहाय, सहकारिन्; सहज्ञानिन्, सहप्रवेशिन्; 'p. council' गूढसभा; 'p. councillor' गूढसभासद्. -*s.* शौचस्थानं-कूपः, उच्चारप्रस्रावस्थानं. -ly, *adv.* रहसि, गूढं; *See* **Privately.** -**Privity,** *s.* सहकारिता, सहायता, संसर्गः, सहज्ञानं 2 गुह्य or गुप्तस्थानं or इंद्रियं. अधोंगं.

Prize, *s.* पारितोषिकं, उपायनं, प्रतिफलं. 2 रत्नं, बहुमूल्यं वस्तु, महार्घद्रव्यं. 3 युद्धजितं धनं-द्रव्यं. 4 जय or सिद्धि-फलं or लाभः. 5 स्पर्धा-पण-जेयं, पणः; 'p.-fighter' मल्लः; 'p.- fighting' मल्लयुद्धं, स्पर्धायुद्धं. -*v. t.* बहु मन् 4 A, अवेक्षया पा c. (पालयति), संमन् c. 2 मूल्यं-अर्घं-निरूप् 10 or निर्णी 1 P. -ed, *a.* बहुमत, अभीप्सित, इष्ट.

Pro, *Prefix,* प्र, अग्रे; 'p. s and cons.' विधिनिषेधपक्षौ.

Probable. *a.* संभाव्य, सत्यसंकाश; gen. ex. by सं-भू 1 P, उप-पद् 4 A, युज् pass. or by (*adv.*); 'It is p.' एतद् उपपद्यते, संभवति, युज्यते, स्यान्नाम एवं. -**Probably,** *adv.* प्रायेण, प्रायः, प्रायशः, किल, नाम,: स्यात्; by pot. pass. part. of भू; एतेन मम प्रियमित्रेण भाव्यं 'he is p. my dear friend.' -**Probability,** *s.* संभवः, संभाव्यता, अनुमानं, better by (*adv.*).

probate, *s.* मृतलेखप्रमाण.

Probation, *s.* परीक्षा-क्षणं. -ary, *a.* परीक्ष्यमाण. -er, *s.* परीक्ष्यमाणः; अंतेवासिन् *m.*, नवशिष्यः, प्राथमकल्पिकः.

Probe, *s.* शलाका, एषणी. -*v. t.* शलाकया परीक्ष् 1 A. 2 निपुण-सूक्ष्मं-परीक्ष् or आलोच् 10. -ator, *s.* परीक्षकः. -ing, *s.* क्षतपरीक्षणं.

Probity, *s.* *See* **Honesty.**

Problem, *s.* प्रश्नः, विकल्प or विवाद-प्रश्न or विषयः. 2 कृत्यं, उपपाद्यं. 3 (Question) उद्देशकः (in Math.); 'its solution' न्यासः (Lit.). -atical, *a.* संदिग्ध, अनिश्चित, वैकल्पिक (की *f.*).

Proboscis, *s.* प्रोथः, करः, शुंडा, हस्तः.

Proceed, *v. i.* प्रचल् 1 P, प्र-या 2 P, प्रगम्-सृ 1 P, अग्रे गम्, प्र-स्था 1 A. 2 प्रवृत् 1 A, न विरम् 1 P; 'the play still p.s' क्रीडा अद्यापि प्रवर्तते एव. 3 पुनः वक्तुं प्रवृत्. 4 प्रवृत्, आरभ् 1 A, प्र-उप-क्रम् 1 A; (with) प्रस्तु 2 U or c., प्रवृत् c., (प्रारब्धं) सं-पद् c., निष्पद् c., निर्वह् c.; 'p. with your tale' ततस्ततः, ततः, परं कथय; 'p with the matter at issue' प्रस्तूयतां विवादवस्तु (M. 2); 'you may p. with your dinner preparations in honor of the worthy Brâhmanas' प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः (Mu. I). 5 प्र-उद्-सं-भू 1 P, प्रवृत्, उत्पद् 4 A. प्र-,जन् 4 A, उद्-इ 2 P, निःसृ, निर्गम्; oft. ex. by कारणं, मूलं, निमित्तं, हेतुः; 'from what cause does thy disorder p.' किंनिमित्तं ते संतापः (S. 3). 6 (Against) अभियुज् 7 A, 10, राजकुले निविद् c. -ing, *a.* उत्पन्न, जात, प्रभव, उद्भव, उत्थित, मूल, कारण, निमित्त, हेतु in comp. *See* (*v.*). -s., **-Procedure,** *s.* कार्यं, व्यवहारः, व्यापारः, चरितं, चेष्टितं, आचारः, वृत्तं, कृति *f.*, विधानं, अनुष्ठानं. 2 रीति *f.*, क्रमः, संप्रदायः, मार्गः, पर्यायः; 'legal p.' व्यवहारविधिः, व्यवहारक्रमः. **-Proceeds,** *s.* उत्पन्नं, उदयः, लाभः, फलं. **-Process,** *s.* प्रसरः, प्रगमः, प्रवृत्तिः, यानं. 2 क्रमः, रीतिः, मार्गः, पर्यायः, विधिः, गतिः, परिपाटि-टी *f.*, सरणि-णी *f.*, पद्धति *f.* 3 व्यवहारः, कार्यं; 'in p. of time' कालक्रमेण, दिनेषु गच्छत्सु, गच्छता कालेन. **-Procession,** *s.* यात्रा, जन or लोक-यात्रा or श्रेणी. 2 प्रगमनं, प्रस्थानं, प्रचलनं, प्रवृत्तिः. -al, *a.* यात्रारूपं.

Proclaim, *v. t.* घुष् 10, उत्-वि°-, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटयति (D.), प्रकटीकृ, कृत् 10, उच्चर् c. 2 Outlaw, q. v. -er, *s.* घोषकः, प्रख्यापकः. **-Proclamation,** *s.* घोषः-षणं-णा, ख्यापनं, प्रकाशनं, उत्कीर्तनं; 'written p.' घोषणपत्रं, राजाज्ञापत्रं.

Proclivity, *s.* प्रावण्यं, प्रवृत्ति *f.*, शीलता in comp. **-Proclivious,** *a.* प्रवण, शील in comp.

Procrastinate, *v.* विलंब् 1 A, व्याक्षिप् 6 P, कालं क्षिप् or हृ 1 P, चिर(रा)यति (D.), मंदायते (D.). -ion, *s.* विलंबः, दीर्घसूत्रता, व्याक्षेपः, कालयापनं-हरणं-क्षेपः. -or, *s.* दीर्घ-सूत्रः-त्रिन् *m.* चिरक्रियः.

Procreate, *v. t.* प्र-सू 2, 4 A, उत्पद् c., जन् c. (जनयति). -ion, *s.* प्रसवः, प्रसूति *f.*, जननं, उत्पत्ति *f.*, प्रजोत्पादनं. -ive, *a.* उत्पादक, साधक, जनयितृ. -or, *s.* जनकः, उत्पादयितृ *m.*

Proctor, *s.* प्रतिहस्तः, प्रतिनिधिः

Procumbent, *a.* शयान, पतित.

Procure, *v. t.* आ-नी 1 P, सं-पद् c., घट् c. (घटयति). 2 लभ् 1 A, आप् 5 P, अधिगम् 1 P, विद् 6 U, आ-समा-सद् c.; *See* Get. -er, *s.* प्रापकः, संपादकः. 3 विटः, नर्मसचिवः, संचारकः, कुंडाशिन् *m.* -ess, *s.* कुट्ट(हि)नी, शंभली, दूती-तिका, संचारिका, सु-,रतताली.

Prodigal, *a.* मुक्तहस्त, अति-अमित-बहु-व्ययिन्, उत्सर्गिन्, अतिव्ययशील-पर, अतित्यागिन्. -*s.* मुक्तहस्तः, व्ययपरः. -ity, *s.* अतिव्ययः, अपव्ययः, बहु-अमित-व्ययः, अतित्यागः, अत्युत्सर्गः, अर्थोत्सर्गः, मुक्तहस्तत्वं. -ly, *adv.* महाव्ययेन, मुक्तहस्तेन, अत्युत्सर्गेण.

Prodigy, *s.* अद्भुतं, अद्भुत or अपूर्व-विषयः or वस्तु, उत्पातः, महाश्चर्यं, अनन्यसाधारणं वस्तु. 2 (Of persons) अद्भुतशक्ति, अद्भुतबुद्धिसंपन्न. -ious, *a.* महाप्रमाण, अतिमहत्-बृहत्, विकट-राक्षस-शरीर, अद्भुताकार; *See* Giant. 2 अद्भुत, अपूर्व, विलक्षण, विचित्र, आश्चर्य -iously, *adv.* अद्भुतं, साश्चर्यं. -iousness, *s.* अद्भुतता, अतिमहत्त्वं.

Produce, *v. t.* निर्मा 3 A, 3 P, सृज् 6 P, उत्पद् c., जन् c. (जनयति), उत्-सं-भू c., साध् 5 P or c., कृ 8 U, वि-धा 3 U, क्लृप् c., घट् c., (घटयति), वि-,रच् 10. 2 प्र-,सू 2, 4 A, उत्पद् c., सं-प्र-जन् c. 3 प्र-,दृश् c., आ-उपा-नी 1 P, प्रसृ c., पुरस्कृ, पुरोभि-धा, अग्रे स्था c. (स्थापयति) or निविश् c., आविष्कृ, प्रकटीकृ, निष्कृष् 1 P. 4 प्र-,दा 3 U. 5 वृध् c. -*s.* फलं, उत्पन्नं, लाभः, उत्पत्ति *f.*, प्रसवः. -ed, *a.* उत्पन्न, उत्पादित, निर्मित, घटित, सृष्ट, जनित, जात, उद्भूत; 'to be p.' जन् 4 A, उत्पद् 4 A, उत्था 1 P, सं-उद्-भू 1 P; *See* Arise; gen. ex. by ज, जात, जन्य, प्रभव, उद्भव, हेतु, प्रसूत, प्रयुक्त in comp.; 'p. from water' अंभोज, जलोद्भव, &c.; 'p. from flowers' कुसुमभव &c. -er, -ing, *s.*, *a.* उत्पादक, प्रसविन्, प्रद, द, दायिन्, आवह, कारिन्, कर (री *f.*), in comp. **-Product,** *s.* फलं, उत्पन्नं, लाभः. 2 परिणामः, फलं, उत्तरफलं. 3 गुणनफलं, वधः, घातः, फलं, गुणाकारः. -ion, *s.* उत्पादनं, निर्माणं, सृष्टि *f.*, घटनं, विधानं, निष्पादनं. 2 जननं, उत्पत्तिः, प्रसवः, उद्भवः, संभवः, जन्मन् *n.* 3 निर्मितद्रव्य-वस्तु, शिल्पनिर्माणं. -ive, *a.* शस्यप्रद-दायिन्, सफल, अवंध्य. 2 उत्पादक, दायिन्,

दृ, प्रद, कारिन्, आवह in comp ; 'p. of gain' लाभप्रद, लाभावह. 3 लाभ or फल-प्रद [or कर.

Proem, *s. See* **Preface.**

Profane, *v. t.* अपवित्रीकृ 8 U, दुष् c. (दूषयति).2 लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिप्लु 1 P. 3 **Contemn,** q. v. –*a.* अपवित्र; अपुण्य, अमेध्य, अशुद्ध; not Holy q. v. 2 अधार्मिक (की *f.*), धर्म-ईश्वर-द्वेषिन्, धर्म-ईश्वर-निंदारूप. 3 असंस्कृत, अप्रतिष्ठित, संस्काररहित. 4 लौकिक-सांसारिक-प्रापंचिक- (की *f.*). **-ation,** *s.* दूषणं, अपवित्रीकरणं, अतिक्रमः-मणं. **-ly,** *adv.* धर्मनिंदापूर्वं, अधार्मिकवत्. **-ness,** *s.* धर्म or ईश्वर-निंदा- or द्वेषः, धर्म or ईश्वर-अवज्ञा or अतिक्रमः.

Profess, *v. t.* प्रति-ज्ञा A, प्रकाश् c., प्रतिज्ञापूर्वं कथ् 10 or वद् 1 P, स्वी-अंगी-कृ 8 U, उ(ऊ)रीकृ, अभ्युपगम् 1 P. 2 छद्म-छलं-कृ, दृश् c., भू c.; *See* **Pretend**; oft. by नाम; तव कन्या नाम भवेयं (D. K. II. 5) 'I shall p. myself to be your daughter'. 3 उद्यम् 1 A, चेष्ट् 1 A. **-ed,** *a.* स्वीकृत, अंगीकृत, प्रकाशित, प्रकटित, व्यक्तोदित, प्रकाश. **-edly,** *adv.* प्रतिज्ञापूर्वं, प्रकाशमेव, सप्रतिज्ञं. **-ion,** *s.* प्रतिज्ञा, उक्ति *f.*, वचनं, अंगी-स्वी-कारः, प्रकाशवादः-वचनं, ख्यापनं. 2 **Pretension,** q. v.; 'p. s of love' कृत्रिमप्रीतिः, अलीकः रागाविर्भावः. 3 वृत्ति *f.*, आ-उप-जीविका, आजीवः, व्यवसायः, व्यापारः; 'military p' शस्त्राजीवः, क्षत्रवृत्तिः. **-ional,** *a.* वृत्तिमत्, व्यवसायिन्, (*s.*) in comp. **-or,** *s.* अध्यापकः, गुरुः. 2 ख्यापकः, प्रकाशकः, प्रतिज्ञातृ *m.*, स्वीकर्तृ *m.* **-orship,** *s.* अध्यापकपदं-पदवी.

Proffer, *v. See* **Offer.**

Proficient, *a.* प्रवीण, कुशल, निपुण, अभिज्ञ, विचक्षण, पारंगत, अभ्यंतर, निष्णात, व्युत्पन्न, लब्धप्रतिष्ठ, पटु. **-Proficience,-cy,** *s.* प्रावीण्यं, वैचक्षण्यं, प्रतिष्ठा, कौशलं, पाटवं; 'has attained p. in all sciences' सर्वशास्त्रेषु परां प्रतिष्ठां गतः, परं कौशलमवाप, सकलशास्त्रपारंगतः.

Profile, *s.* पार्श्वदृश्यं, अर्धमुखदर्शनं.

Profit, *s.* लाभः, हितं, उपकारः, अर्थः, कल्याणं. 2 फलं, लाभः, आयः, उदयः, वृद्धि *f.*, कलांतरं, लभ्यं; 'p. and loss' लाभालाभौ; 'capital with p. thereon' मूलकलांतरे. **-v. t.** हितमावह् 1 P, उपकृ 8 U, हिताय भू 1 P. **-v. i.** (Oneself) फलं-लाभं-प्राप् 5 P or विद् 6 U. 2 वृध् 1 A, उन्नतिं-उत्कर्षं-या 2 P, प्र-उप-चि pass. ; *See* **Improve.** **-able,** *a.* लाभ-अर्थ-कर (री *f.*), लाभप्रद, लाभ-फल-द, फल-लाभ-आवह. 2 हित, हितकर, हितावह, उपयुक्त, उपकारिन्, सोपकार. **-ableness,** *s.* साफल्यं, फलदता, उपयुक्तता. **-ably,** *adv.* सलाभं, सफलं, सहितं, अमुधा. **-less,** *a.* निष्फल, अफल, अहित, व्यर्थ, निरर्थक.

Profligate, *a.* खंडितवृत्त, दुश्चरित्र, दुराचार, पाप-निरत-अभिनिविष्ट, व्यसनिन्, दुर्वृत्त, भ्रष्ट-नष्ट-चरित्र, भोग-विषय-आसक्त. **-s.** व्यसनिन् *m.* लंपटः, विषयिन् *m.* भोगासक्तः. **-ly,** *adv.* सव्यसनं, दुर्वृत्ततया. **Profligacy,** *s.* व्यसनिता, भ्रष्टचरितं, दुराचारः, भ्रष्टता, भोगासक्ति *f.*, दुर्वृत्तता.

Profound, *a.* प्र-,गाढ, अतिग(गं)भीर, घन, अगाध. 2 परम, गाढ, घन, अत्यंत, सु-अति- pr.; 'p. respect' परमादरः, आदरातिशयः. 3 गहन, नि-,गूढ, गूढार्थ, दुर्बोध, दुर्ज्ञेय, परमगहन. 4 (Of persons) निष्णात, पारंगत, परम, व्युत्पन्न, अभिनिविष्ट, गूढतत्त्वज्ञ. **-ly,** *adv.* गंभीरं, गाढं, अत्यंतं, भृशं, सु-अति pr. **-ness,-Profundity,** *s.* गांभीर्यं, अगाधता. 2 घनता, गाढता. 3 गहनता, गूढता. 4 अभिनिवेशः.

Profuse, *a.* प्रचुर, प्रभूत, अपरिमित, विपुल, बहु, अत्यधिक, अतिरिक्त, समृद्ध, उद्रिक्त, अतिशय-सु-अति in comp. 2 मुक्तहस्त, अतिव्ययिन्, व्ययपर; *See* **Prodigal**; 'he is a p. writer' वाक्प्रपञ्चप्रियः, प्रचुरवाक्यानि लेखे प्रयोजयति. **-ly,** *adv.* प्रचुरं, भृशं, भूरि, बाहुल्येन, अत्यंतं, सु-अति pr.; अतिव्ययेन, अपरिमितं **-ness,-Profusion,** *s.* अतिव्ययः, अमितव्ययः, अत्युत्सर्गः. 2 समृद्धि *f.*, प्राचुर्यं, उद्रेकः, अतिरेकः, उपचयः, बाहुल्यं.

Prog, *s.* भोजनं, अन्नं, भैक्ष्यं.

Progenitor, *s.* पितृ *m.* प्रजापतिः, पूर्वजः, पूर्व-कुल-पुरुषः, जन्मदः, जनयितृ *m.* *See* **Ancestor.**

Progeny, *s.* संतानः, अपत्यं, संतति *f.*, प्रजा.

Prognostic, *s.* निमित्तं, अजन्यं, शकुनः-नं, लक्षणं; *See* **Omen.** **-a.** प्र-उद्-बोधक, अग्रसूचक. **-ate,** *v. t.* पूर्व-अग्रे-सूच् 10 or दृश् c.; *See* **Forebode.** **-ation,** *s.* पूर्वसूचनं-ना. **-ator,** *s.* पूर्वलक्षणज्ञः, अग्रसूचकः.

Programme, *s.* सूचिपत्रं; कार्यक्रमः-परिपाटी.

Progress, *s.* प्र-,वृद्धि *f.*, उत्कर्षः, क्रमशः वृद्धिः, उत्कर्षक्रमः. 2 प्राप्ति *f.*, आगमः; 'p. in learning' विद्यागमः, विद्याभिनिवेशः. 3 प्र-गमनं, प्रयाणं, यानं, यात्रा, प्रस्थानं, प्रसरः, क्रमः-मणं, अयनं; *See* **March**; 'difficult p.' संक्रमः, दुर्गसंचरः. **-v. i.** उत्कृष् pass., वृद्धिं-उन्नतिं-या 2 P, प्र-,वृध् 1 A, प्र-उप-चि pass.; *See* **Improve.** 2 प्रगम्-चल्-सृ 1 P, प्रया 2 P, प्रस्था 1 A; *See* **Advance.** **-ion,** *s.* श्रेढी, श्रेढीव्यवहारः; 'first term' मुखं, वदनं, आदिः; 'common difference' चयः; 'geometric mean' चयो गुणः; 'sum' श्रेढीफलं; 'number of terms' गच्छः. **-ive,** *a.* आनुक्रमिक (की *f.*),

क्रमिक, अधिकाधिक, उत्तरोत्तर, क्रमशः वर्धमान. -ively, *adv.* क्रमशः, अनुक्रमेण, उत्तरोत्तरं, अधिकाधिकं.

Prohibit, *v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, निवृ c., प्रत्या-ख्या 2 P, नि-अव-रुध् 7 U. -ion, *s.* नि-प्र ति-षेधः, प्रत्यादेशः, निरोधः, निवारणं, बाधा. -or, *s.* निवारकः, निषेधकः. -ive, -ory, *a.* निषेधक, निवारक, नि-प्रति-षेधिन्, निषेधार्थक, निषेधवाचिन्.

Project, *s.* उपायः, प्र-,युक्ति *f.*, कल्पना, प्रयोगः, संकल्पः, प्रबंधः. 2 अभिप्रायः, आशयः, उद्देशः. -*v. i.* प्रलंब् 1 A, बहिर्लंब्, उपरि लंब्, बहिः स्था 1 P or सृ 1 P or वृत् 1 A. -*v. t.* प्र-,क्षिप् 6 P, प्रास् 4 U, निपत् c., प्रणुद् 6 P; *See* Throw. 2 (मनसा) क्लृप् c., निरूप् 10, चिंत् 10, युज् 10, आलोच् 10, अनुसं-धा 3 U. -ile, *a.* प्रक्षेपणीय, दूरवेधिन्. -*s.* अस्त्रं; *See* Missile. -ing, *a.* प्र-,लंब, उन्नत, उदग्र, उत्तुंग, बहिर्वर्तिन्; oft. by उत्सेध, उत्सेधिन्; 'with a p. nose' प्रलंबनास; घोणोन्नत, उन्नस; 'having p. teeth' उदग्रदत्, करालदंत; 'having p. breasts' स्तनाभोगवती, उन्नतस्तनी; 'shattered by falling over (her) p. breasts' पयोधरोत्सेधनिपातचूर्णिताः (K. v. 24). -ion, *s.* प्रलंबता, उदग्रता. 2 आभोगः, उत्सेधः; निर्यूहः, दंतकः. 3 छेद्यकं. -or, *s.* चिंतकः, योजकः.

Prolapse, Prolapsus, *s.* भ्रंशः. -*v. i.* भ्रंश् 1 A, 4 P.

Prolated, *a.* प्लुत (vowel), दीर्घोच्चारित.

Prolegomenon, *s.* प्रस्तावना, उपोद्घातः.

Prolepsis, *s.* पूर्वग्रहणं, पूर्वादानं.

Prolific, *a.* अवंध्य, बहुप्रज-प्रसव-अपत्य, प्रसवशील, सूतिन्, बहुसंतान. 2 बहुफलप्रद, बहुफल; *See* **Productive.** -ally, *adv.* प्राचुर्येण , विपुलं.

Prolix, *a.* सु-अति-विस्तर, प्रपंचित, सुदीर्घ, दीर्घसूत्रिन्, अत्यायत. -ity, *s.* अतिविस्तरः, प्रपंचः, वाग्विस्तरः-प्रपंचः, वागुपचयः; दीर्घसूत्रता, अतिविस्तारः. -ly, *adv.* विस्तरशः; अतिविस्तरेण, सप्रपंचं.

Prologue, *s.* प्रस्तावना, आमुखं, प्रास्ताविकी विज्ञप्तिः; 'benedictory p.' नांदी.

Prolong, *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, वि-प्र-सृ c., विस्तृ c., आयम् 1 A or c. 2 व्याक्षिप् 6 P or विलंब् c.; 'a p. ed note' तानः. -ation, *s.* विस्तारः, वितति *f.*, आयतिः, दीर्घीकरणं.

Prolusion, *s.* *See* **Prelude.**

Promenade, *v. t.* विहृ 1 P, विचर् 1 P, विहारार्थं परिभ्रम् 1, 4 P. -*s.* विहारः, परिभ्रमणं. 2 विहारस्थानं.

Prominent, *a.* प्रधान, प्रमुख, श्रेष्ठ, मुख्य, विशिष्ट, परम; *See* **Principal.** 2 सुस्पष्ट, सुप्रकाश, सुव्यक्त, सुदृश्य. 2 उन्नत, उदग्र, उत्तुंग, प्रलंब, साभोग, उद् pr.; *See* Projecting. -ly, *adv.* प्राधान्येन, विशेषतः, सुप्रकाशं, सुस्पष्टं, उन्नतं. -Prominence, *s.* प्राधान्यं, विशिष्टता, श्रेष्ठता, उत्कर्षः, परमपदं. 2 उन्नति *f.*, उत्सेधः, उत्तुंगता, आभोगः.

Promiscuous, *a.* प्र-सं-कीर्ण, संकुल, अविविक्त, निर्विशेष, अपरिच्छेद, अभेद, संमिश्रित 'p. union' संकरः, सांकर्यं. -ly, *adv.* निर्विशेषं-षेण, संकीर्णं, अभेदेन, अक्रमेण, अपरिच्छेदेन. -ness, *s.* संकीर्णता, संकुलता, अभेदः, संकरः.

Promise, *v. t.* सं-प्रति-आ-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of persons); स्वी-अंगी-कृ 8 U, अभ्युपगम् 1 P, अभ्युप-इ 2 P, संविद् 2 A, संगॄ 6 A, उ (ऊ) रीकृ, उररीकृ, परि-,पण् 1 A; 'the plan p. s to succeed' उपायः सफलो भवेदित्यनुमीयते or अहं आशंसे; 'a p. ing boy' वर्धिष्णुर्बटुः, आशानिबंधनं. -*s.* प्रतिज्ञा, समयः, सं-प्रति-श्रवः, अभिवचनं, संविद् *f.*, नियमः, संगरः, संकेतः, अभिसंधा, अभ्युपगमः, स्वीकारः, उरीकारः, अंगीकारः, परिपणनं. 2 आशा, आशंसा; 'hollow p.' मुधावचनं, शब्दपांडित्यं, 'breaking a p.' प्रतिज्ञा-वचन-भंगः, संविद्-व्यतिक्रमः, विसंवादः; keep or fulfil a p.' प्रतिज्ञां पा c. (पालयति) or शुध् c., *See* Keep, Fulfil: 'p. breaker प्रतिज्ञालंघिन्-व्यतिक्रामिन्, विसंवादिन्; give a p. orally' वाचा प्रतिज्ञां, वाग्दानं कृ. -ory, *a.* प्रतिज्ञाविशिष्ट.

Promontory, *a.* उदग्रभूमि *f.*, भूशिरस् नासिका.

Promote, *v. t.* वि-,वृध् c., उपकृ 8 U, पुरस्कृ, प्रवृत् c., साध् c., उपचि 5 U, प्रयुज् 10; (a person) सं-,उन्नम् c. (नमयति), उन्नतिं नी 1P or प्राप् c., पदं वृध् c. पदोत्कर्ष-प्रतिपत्ति-प्राप् c., अधिकपदे नियुज्. 3 Prompt, q. v. -er, *s.* प्रवर्तकः, उपकर्तृ *m.* *See* Patron. -ion, *s.* उपकारः, पुरस्कारः, प्रवर्तनं, साहाय्यं, वर्धनं, वृद्धि *f.*, उपचयः, उन्नतिः, उत्कर्षः, पदवृद्धिः, पदोन्नतिः, प्रतिपत्ति *f.*, श्रेष्ठपदावाप्ति *f.* -ive, *a.* प्रवर्तक, साधक, उपकारिन्.

Prompt, *a.* सत्वर, अविलंब; क्षिप्र, अविलंबित, अदीर्घसूत्र; (of persons) उद्यत, उद्युक्त, अविलंबिन्, आशुकारिन्, प्रत्युत्पन्नमति, सप्रतिभ, पटु, उद्यमिन्, उद्योगिन्. -*v. t.* प्र-उत्सह् c., प्रणुद् 6 P or c., प्रचुद् 10, प्रवृत् c., प्र-उद्-युज् 10 उत्तिज् c., प्र-ईर् c., आकृ c., उद्दीप् c., उत्था c. (उत्थापयति), प्र-उद्-बुध् c.; 'p. ed by hunger' क्षुद्बोधित. 2 प्र-अनु-बुध् c., सूच् 10. -er, *s.* प्रोत्साहकः, प्रवर्तयितृ *m.*, प्रयोजकः, &c. 2 अनु-प्र-बोधकः, सूचकः; 'who seldom wanted a p.' यः सदा प्रत्युत्पन्नमतिः, प्रयो-

धननिरपेक्षः. -ing, s. प्रेरणं, प्रोत्साहनं, उत्तेजनं, &c. 2 सूचना, प्रबोधनं. -ness, -itude, s. औत्सुक्यं, अविलंबः, उत्साहः; क्षिप्रता. 2 प्रतिभा, प्रत्युत्पन्नमति f., पटुता 3 उद्यमः, उद्योगः. -ly, adv. सत्वरं, अविलंबेन, क्षिप्रं, सद्यः, आशु, अचिरात्, समतिगं.

Promulgate, v. t. प्रकाश् c., वि-,घुष् 10, कृत् 10, प्र-ख्या c. (ख्यापयति); *See* Proclaim. -ion, s. प्रकाशनं, घोषणं, कीर्तनं. -er, s. प्रकाशकः, घोषकः.

Prone, a. प्रवण, शील, आलु in comp., उद्यत, उन्मुख; *See* Inclined, Apt; 'p. to fall' पतयालु, पातुक, पतनशील. 2 (Bent) नत, नम्र, अधोवदन, अधोमुख-अवाङ्मुख-(खी f.). -ness, s. प्रावण्यं, प्रवृत्ति f., उन्मुखता, शीलता, आलुता in comp. 2 अधोमुखता, नम्रता.

Prong, s. शूलः-लं, कंटकः, अग्रं, शिखा.

Pronoun, s. सर्वनामन् n.

Pronounce, v. t. उच्चर् c., उदीर् c., उदा-व्या-हृ 1 P, गद् 1 P, वद् 1 P प्र-,वच् 2 P, प्र-ख्या 2 P, कृत् 10; 'p. judgment' निर्णयं कथ् 10; उत्तरं दा 3 U, &c. 2 निश्चयेन वद्, दृढं प्रति-ज्ञा 9 A; 'imperfectly p. ed' ग्रस्त, असंपूर्णोच्चारित, लुप्तवर्ण-पद. -Pronunciation, s. उच्चारणं, उदाहरणं, उदीरणं; 'science of p.' शिक्षा; 'easy of p.' सुखोच्चार्य.

Proof, s. *See* under Prove.

Prop, s. आश्रयः, शरणं, आधारः, अवष्टंभः, आ-अव-लंबः-बनं, उपघ्नः. -v. t. धृ 1 P, 10, आ-अव-लंब् 1 A, अवष्टंभ् 9 P; 'a tree that p. s another creeper' उपघ्नतरु.

Propaganda, s. धर्मप्रसारकसंस्था.

Propagate, v. t. विस्तृ c., प्रवृध् c., वि-प्र-तन् 8 U; वि-प्र-सृ c.; (opinions) प्रचर्-रू c., प्रवृत् c. or संचर् c.; प्रचलीकृ, प्रसृ c. 2 परंपरया उत्पद् c. or प्र-सू 2 A, प्रसवपरंपरया जातिं पुष् c. शावकान् प्रसू or जन् c. or उत्पद् c. -ion, s. प्र-,वर्धनं, प्रसारः, विस्तारः, वितति f., प्र-,वृद्धि f., प्रचारः-रणं. 2 परंपरोत्पत्ति f., प्रसूतिपारंपर्य-क्रमः; प्रजा-संतान-वृद्धि f. -or, s. प्रचारकः, प्रवर्तकः.

Propel, v. t. प्रेर् c., प्र-,णुद् 6 P, or c., संचल् c., प्रचुर् 10, सं-,चर् c., क्षुभ् 1 P; *See* Prompt.

Propense, a. प्रवण, उन्मुख, आसक्त, उद्यत. -ity, s. प्रवणता, प्रवृत्ति f., उन्मुखता, प्रावण्यं, प्रवाहः, शीलता-आलुता in comp.; 'p. to fall' पतयालुता; 'good p.' सुशीलं, साधुवृत्तिः; 'evil p.' व्यसनं, दुर्गुणः, दुःशीलं.

Proper, a. स्वीय, निज, आत्मीय, स्व-आत्म in comp. 2 युक्त, योग्य, उचित, उपपन्न, अनुरूप, न्याय्य, संगत, सदृश (शी f.), यथार्ह, यथोचित, समंजस, पर्याप्त, सांप्रतिक (की f.); oft. ex. by pot. pass. part.; 'to be p.' युज् pass., उपपद् 4 A; 'it is p.' स्थाने; स्थाने व्रीडिता अप्सरसः (V. 1.), स्थाने भवान् अकिंचनत्वं व्यनक्ति (R. v. 16). -ly, adv. युक्तं, उचितं, यथार्हं, सम्यक्, स्थाने, न्यायतः, सांप्रतं, यथायोग्यं, धर्मेण. 2 यथार्थतः, परमार्थतः; तत्त्वतः, वस्तुतः; 'p. speaking' वस्तुतः, यथार्थदृष्ट्या. -ty, s. धर्मः, गुणः, लक्षणं, स्वभावः, विशेषः, रूपं, स्वरूपं, धर्मः, सहज-प्रकृति-गुणः. 2 स्वत्वं, स्वाम्यं, अधिकारः, प्रभुत्वं. 3 संपत्ति f., द्रव्यं, अर्थः, धनं, वित्तं, वसु n., विभवः; द्रव्य-अर्थ-जातं, रिक्थं; 'woman's p.' स्त्रीधनं, 'landed p.' भूमिधनं, भूमिः, स्थावरं धनं; 'public p.' गण-सामान्य-द्रव्यं; 'p. in cattle' गोधनं. -Propriety, s. युक्तता, औचित्यं, उपपत्ति f., न्यायः, सामंजस्यं, योग्यता, यथार्थता, पात्रता, संगति f., 'p. of conduct' विनयः, मर्यादा, अनतिक्रमः, सुचरितं.

Prophesy, v. t. भावि कथ् 10 or सूच् 10 or प्रदृश् c., अनागतं नि-आ-विद् c.; *See* Predict. -Prophecy, s. भाविकथनं-सूचनं, भविष्यद्वादः, आदेशः, भविष्यार्थः, सिद्धादेशः. -Prophet, s. सिद्धः, भविष्यद्वादिन् m., अग्रनिरूपकः, भाविकथकः, अनागत-विद्-दर्शिन्; 'saying of a p.' सिद्धादेशः. -ess, s. अनागतदर्शिनी, भविष्यद्वादिनी. -ic, -ical, a. (s.) in comp.

Prophylactic, a. रोगहारिन्-हृत्.

Propinquity, s. सन्निधिः, संनिकर्षः, सामीप्यं; *See* Nearness.

Propitiate, v. t. प्रसद् c., आराध् c., अनु-रंज् c., सांत्व् 10, अनुनी 1 P, प्र-,शम् c. (शमयति), सं-परि-तुष् c. -ion, s. प्रसादनं, आराधनं, अनुरंजनं, सांत्वनं, अनुनयः, प्र-उप-शमः-मनं. -or, s. प्रसादकः, आराधयितृ m., अनुरंजकः &c. -ory, a. शमक, सांत्वक, शांतिकर (री f.), शांतिप्रद; 'p. rite' शांतिक्रिया. -propitious, a. सु-प्रसन्न, सदय, अनुकूल, हितकाम - बुद्धि, अभिमुख (खी f.), प्रवणीकृत, अनुग्राहिन्, वरद. 2 शुभ, मंगल, कल्याण (णी f.), शर्मद, शुभंकर. -ly, adv. प्रसन्नं, अनुकूलं, सदयं, सानुग्रहं. -ness, s. प्रसादः, आनुकूल्यं, आभिमुख्यं, शुभता.

Proportion, s. प्रमाणं, परिमाणं; आनुगुण्यं, आनुरूप्यं, परस्पर-अन्योन्य-संबंधः-अन्वयः-अनुबंधः-सादृश्य-समता; अन्वयः, संबंधः; संधानं, संयोगः, संमिति f. (of limbs &c.) 2 अंशः, विभागः; *See* Part. 3 अनुपातः, संबंधसाम्यं; 'in p. to' ex. by अनुगुण, अनुरूप, सदृश, प्रमाणतः, अनुसारेण, यथा in comp.; 'in p. to one's strength' यथाशक्ति, शक्त्यनुसारेण, शक्तितः; 'spend in p. to your gains ' आयप्रमाणेन व्ययं कुरु; ' p. of limbs ' अंगसंयोगः, अवयवसंगतिः. -v. t., -ate, v. t. अनुरूपी-सदृशी-कृ 8 U, समीकृ, संधा 3 A, 2 P. -al, a. समप्रमाण, परस्परानुगुण. -ate,-able,-ed, a. अनुरूप, अनुगुण, सदृश, संमित, सम, तुल्य, अनुसारिन्; ' with jaws p. to their size (strength)' स्वप्रमाणानुरूपैर्घटैः (S. 1), ' her body beautiful, being p.' चतुरश्रशोभि तस्या वपुः (K. I. 32). -ately, -ably, adv. अनुरूपं-पेण, अनुगुणं, अनुसारेण, सदृशं, यथाप्रमाणं, यथाभागशः.

Propose, *v. t.* प्र-स्तु 2 U, उपन्यस् 4 U, उपक्षिप् 6 P, प्रति-ज्ञा 9 A, सूच् 10, कर्तव्यं निर्दिश् 6 P or अभि-धा 3 U. 2 उद्दिश्, आकांक्ष् 6 P; *See* **Intend.** -al, *s.* प्रस्तावः, उपन्यासः, उपक्षेपः, अभिधानं, प्रतिज्ञा, वचनं, कर्तव्यनिर्देशः. -ition, *s.* **Proposal,** q. v. 2 प्रतिज्ञा, सिद्धांतः, प्रमेयं.

Propound, *v. t.* प्रति-पद् c., उपन्यस् 4 U, उपक्षिप् 6 P, निर्दिश् 6 P, प्रति-ज्ञा 9 A.

Proprietor, *s.* स्वामिन् *m.* प्रभुः, ईशः, पतिः, अधिकारिन् *m.* *See* **Owner.** -ship, *s.* स्वाम्यं, प्रभुत्वं, स्वामित्वं, अधिकारः. -**Proprietary,** *a.* स्वाम्यधीन, प्रभुनिष्ठ, स्वामिगत; ' p. right ' स्वाम्यं, अधिकारः, स्वत्वं.

Propulsion, *s.* प्रेरणा, चोदना.

Prorogue, *v. t.* व्याक्षिप् 6 P. (नियतकालं यावत्) विसृज् 6 P or त्यज् 1 P. -**Prorogation,** *s.* कार्यत्यागः-निवृत्ति *f.*, व्याक्षेपः.

Proscribe, *v. t.* घोषणापूर्वं दंडं आदिश् 6 P or बहिष्कृ 8 U or निर्वस् c., ' here is Jivasiddhi being disgraced and p. ed from the city ' एष जीवसिद्धिः सनिकारं नगरान्निर्वास्यते (Mu. 1). 2 निषिध् 1 P, निह्नु c. -**Proscription,** *s.* सघोषण दंडाज्ञा.

Prose, *s.* गद्य. -*a.* गद्यात्मक, गद्यरूप, गद्य in comp -**Prosaic,** *a.* गद्यरूप, गद्यात्मक, गद्य in comp. 2 नीरस, विरस, रस-सत्त्व-हीन.

Prosecute, *v. t.* (नित्यं-अनवरतं) प्रवृत् c., अनुसृ 1 P, अनु-ष्ठा 1 P, अनु-सेव् 1 A, निर्वह् c., अनुशील् 10; ' p. studies ' अध्ययनक्रममनुवृत्; ' p. one's efforts ' अनवरतं उद्यम् 1 A or प्रयत् 1 A; ' p. one's undertaking ' प्रारब्धं उद्वह् 1 P, प्रतिपन्नं निर्वह् c. 2 अभियुज् 7 A, 10, अभिशंस् 1 P; सूच् 10, निविद् c. -ion, *s.* अनुशीलनं, प्रवर्तनं, नित्यानुष्ठानं, नित्यप्रवृत्ति *f.*, निर्वाहणं, अविरतानुसरणं. 2 अभियोगः, निवेदनं; 'p. of effort ' नित्योद्योगः; ' p. of study ' नित्याध्ययनं, अध्ययनक्रमः. -or, *s.* निर्वाहकः. 2 अभियोक्तृ *m.*, वादिन् *m.*, अर्थिन् *m.*, अभिशंसकः.

Proselyte, *s.* परधर्माश्रयिन्, स्वधर्मत्यागिन्, पक्षांतर-मतांतर-ग्राहिन्; *See* **Convert.** -ize, *v. i.* स्वधर्मं ग्रह् c., -ism, *s.* मतांतरग्रहणं, धर्मांतरस्वीकारः.

Prosody, *s.* छंदस् *n.*, छंदःशास्त्रं. -al,-ical, *a.* छांदस (सी *f.*), छंदः in comp. -ian, *s.* छंदःशास्त्रज्ञः.

Prospect, *s.* आलोकः, दर्शनं, चक्षुर्विषयः, दृग्गोचर-प्रदेशः-विषयः. 2 आयति *f.*, उत्तरापेक्षा; ' he has good p. s before him ' शुभा तस्यायतिः. 3 आशा, प्रत्याशा, आशंसा, अपेक्षा. -ive, *a.* उत्तर, उत्तरकालीन, भाविकालभाव्य, उत्तरकालसापेक्ष; *See* **Future.** -ively, *adv.* उत्तरकालापेक्षया.

Prosper, *v. i.* सं-,ऋध् 4, 5 P, प्र-वि-वृध् 1 A, स्फाय् 1 A, एध् 1 A, प्र-उप-चि pass., समृद्धि-वृद्धिं या 2 P or उप-इ 2 P; ' I hope your (commercial) business is p. ing ' अपि प्रचीयंते संव्यवहाराणां लाभाः (Mu. 1). 2 सिध् 4 P, सं-पद् 4 A, सफलीभू 1 P, कृतार्थीभू. -*v. t.* वृध् c., प्र-उप-चि 5 U. एध् c., उपकृ 8 U, अनुग्रह् 9 P, सफलीकृ, साध् c., सिद्धिं नी 1 P. -ity, *s.* सं-, ऋद्धि *f.*, संपद् *f.*, संपत्ति *f.*, अभ्युदयः, श्रीः, लक्ष्मीः, वि-,भूति *f.*, सौभाग्यं, वैभवं, पुण्योदयः, ऐश्वर्यं; ' time of p. ' संपत्-समृद्धि-उदय-कालः-समयः. 2 समृद्धिः, उत्कर्षः, उन्नति *f.*, उदयः, प्र-उप-चयः, वि-सं-वृद्धि *f.*, साफल्यं, कृतार्थता, सिद्धि *f.* 3 क्षेमः-मं, कौशल्यं, कल्याणं, शुभं, शिवं, हितं, भद्रं. -ous, *a.* समृद्ध, श्रीमत्, समृद्धिमत्, लक्ष्मीवत्, सश्रीक, ऐश्वर्यशालिन्; (state &c.) वर्धिष्णु, प्र-उप-चीयमान, एधमान, वर्धमान; ' in p. days ' संपत्सु, अभ्युदयकाले, भूतिसमये, समृद्धिकाले. 2 सफल, सिद्ध, कृतार्थ, सिद्धार्थ; (happy) सुस्थ, निरापद, क्षेम, कुशल, कल्याण (णी *f.*), शिव, भद्र, मंगल, शुभ, सौभाग्यवत्, धन्य. -ously, *adv.* समृद्ध्या, अभ्युदयेन, सुसंपदा, सौभाग्येन, शुभं, भद्रं.

Prostitute, *s.* वेश्या, वेशवधूः, गणिका, वारपण्य-स्त्री-अंगना-योषित्, भोग्या, सामान्यस्त्री, रूपाजीवा; (false to her husband) पुंश्चली, बंधकी, असती, कुलटा, स्वैरिणी, पांसु(शु)ला, धर्षिणी, इत्वरी. -*v. t.* निंद्यकर्मार्थं प्र-उप-विनि-युज् 1 A, 10 or व्यापृ c. -ion, *s.* वेश्याजीवः, वेश्या-गणिका-वृत्ति *f.*, वारसेवा, बंधकीत्वं, पौंश्चल्यं, &c.

Prostrate, *a.* प्रणत, भूमिगत, साष्टांगप्रणत-पतित; ' lie or fall p. ' *See* (*v.*); ' p. on the bed ' शयनगत, शयने-अधमूर्धशय; 'lying p. at the feet' चरण or पाद-पतित or प्रणत. 2 अवसन्न, क्षीण. -*v. t.* (C.-self)

दंडप्रणामेन-साष्टांगपातं-नम् 1 P or प्रणिपत् 1 P, दंडवत् पत्; नीचैः प्रणम् or प्रणिपत्. 2 नि-अव-पत् c.; धूलिं गम् c. (गमयति). 3 (Strength) अवसद् c; ध्वंस् c., प्र-वि-नश् c., हृ 1 P; क्षि 1, 5 P. -ed, *a.* प्रणिपतित, भूमिगत, निपतित, &c. 2 क्षीणबल-शक्ति, हृत or नष्ट-शक्ति or ओजस्. -ion *s.* दंडप्रणामः अष्टांगप्रणामः-प्रणिपातः, साष्टांगप्रणामः-वंदनं; प्रणिपातः, प्रणामः. 2 (Of spirits) अवसादः, ग्लानि *f.*, विषण्णता, उद्वेगः; 'p. of strength' शक्तिपातः-क्षयः, सत्त्वहानि *f.*

Protect, *v. t.* रक्ष् 1 P, अव् 1 P, परि-,त्रै 1 A, गुप् 1 P, पा 2 P, पा c (पालयति), परि-प्रति°-; तृ c. 2 संगुप् c., परि-,गुप् c. -ion, *s.* गोपनं, गुप्ति *f.*, पालनं, त्राणं, रक्षा, रक्षणं, अभ्युपपत्ति *f.*, संवर्धनं, परिपोषणं. 2 शरणं, आ-संश्रयः, आ-अव-लंबः, आधारः; 'go for p.' आश्रि 1 U, आलंब् 1 A, शरणं गम् 1 P or प्रपद् 4 A; 'paper granting p.' अभयपत्रं. -or, *s.* रक्षकः, गोप्तृ *m.*, पालयिता, रक्षिता, रक्षिन्, पालकः, त्राता, शरणं, शरण्यः; आश्रयः, पः-पालः in comp. -**Protege,** *s.* आश्रितः, पालितः, उपजीविन् *m.*, पोष्यः, शरणं गतः.

Protend, *v. t.* विस्तृ c., प्रसृ c.; *See* **Extend.**

Protest, *v. i.* दृढं-दृढोक्ति पूर्वं-वद् 1 P or आख्या 2 P; 'p. against' दृढं विरुद्धं वद्, दृढं-दृढोक्तिपूर्वं नि-प्रति-षिध् 1 P, दृढं असंमतिं प्रकाश् c. or ज्ञा c.; 'I strongly p. against this order' अयमादेशोऽन्याय्य इति सनिश्चयं वदामि 'p. in writing' असंमतिलेखं-विप्रतिपत्ति-पत्रं-प्रकाश् c. -*s.* दृढनिषेधवाक्यं, अस्वीकार-असंमति-वादः, विरुद्धवादः, अस्वीकारप्रकाशनं; 'written p.' असंमतिपत्रं. -ant, *s.* रोमीयमतविरुद्धः. -ation, *s.* दृढवचनं-उक्तिः-वादः, विरुद्धवचनं, निषेधोक्तिः.

Proteus, *s.* कामरूपः.

Prototype, *s.* आदर्शः, मूलं, मूलप्रतिमा.

Protract, *v. t.* विलंब् c., व्याक्षिप् 6 P; *See* **Delay.** 2 प्र-,तन् 8 U; प्रसृ c., दीर्घीकृ 8 U. -ed, *a.* सुदीर्घ, विलंबित, चिरस्थित, चिर in comp.; 'p. note' तानः; 'p. sound' प्लुतः. -ion, *s.* विलंबः, व्याक्षेपः.

Protrude, *v. i.* प्रः-निः-सृ 1 P, निर्गम् 1 P, उद्भिद् pass., प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. -*v. t.* Causal of roots above. -ing, *a.* बहिर्लंब, बहिःस्थ. -**Protrusion,** निःसरणं, उद्भेदः, प्रलंबनं. -**Protuberance,** *s.* वि-,स्फोटः, गंडः, शोथः, शोफः, श्वयथुः, (on the skin). 2 प्रलंबनं, उत्सेधः, उत्तुंगता, आभोगः, उन्नति *f.* -**Protuberant,** *a.* उन्नत, उत्तुंग, उच्छ्रित, उच्छून, प्रलंब; 'having p. breasts' तुंग-उन्नत-स्तनी, घट-कुंभ-स्तनी; oft. ex. by उत्सेधः; पयोधरोत्सेधविशीर्णसंहति (K. v. 8) the continuity being broken by her p. breasts.' -**Protuberate,** *v. i.* प्रलंब् 1 A; *See* **Project,-ing** &c.

Proud, *a.* *See* under **Pride.**

Prove, *v. t.* उप-प्रति-पद् c., साध् c., वि-ख्या c., प्र-मा 3 A, 2 P, प्रमाणीकृ 8 U, सत्याकृ, स्था c. (स्थापयति). 2 प्र-,दृश् c., सूच् 10, निर्दिश् 6 P, प्रकाश् c., व्यंज् 7 P or c.; 'he was p. ed guilty' अपराधी स्थापितः; 'good men p. their usefulness by deeds, not by words' ख्याप्यते हि फलेन साधवो न तु कंठेन निजोपयोगिता (N. II. 48), कर्मणा न तु वाङ्मात्रेण दर्शयंति. 3 परीक्ष् 1 A निरूप् 10, निर्णी 1 P, निश्चि 5 U, प्रति-इ c.: *See* **Test.** -*v. i.* सं-उत्-पद् 4 A, वृत् 1 A, सं-,भू 1 P; निर्णी-निश्चि-प्रतीइ pass.; 'the tilled ground p. ed a treasure indeed' कृष्टा भूमिरेव कोषस्थाने बभूव, कोषत्वमापद्यत. -er, *s.* साधकः, विभावकः. -**Proof,** *s.* साधनं, प्रमाणं, उपपत्ति *f.*, उप-प्रति-पादनं; 'written p.' लेखप्रमाणं, साधनपत्रं; 'burden of p.' साधनधर्मः, क्रियानिर्णयः; 'the burden of p. lies on both parties' द्वयोरपि वादिनोः क्रिया प्राप्नोति (V. M. 6.). 2 लक्षणं, चिह्नं. 3 परीक्षा-क्षणं, निर्णयः, निश्चयः; 'to put to the p.' परीक्ष्. 4 स्थूल-प्रथम-मुद्रणं. 5 अभेद्यता, अहार्यता, अविकार्यता; 'p. against advice' उपदेशाहार्य; 'water p.' जलेनाभेद्य. -less, *a.* निष्प्रमाण, साधनहीन.

Provenance, *s.* उत्पत्ति *f.*, संभवः, उद्भवस्थानं.

Provender, *s.* पाथेयं; खाद्यं, पशुभोज्यं, शुष्कतृणादि *n.*

Proverb, *s.* जनप्रवादः, लोकवादः, आभाणकः, जनोक्ति *f.*, न्यायः, वचनं, उक्तिः. -ial, *a.* लौकिक (की *f.*), लोकप्रसिद्ध-प्रचलित, लोक-जन in comp., न्यायरूप. -ially, *adv.* लोके, जनश्रुत्या.

Provide, *v. t.* (पूर्वं) सं-,युज् 7 U, 10, संभृ 3 U, प्र-उप-क्लृप् c., सनाथीकृ 8 U, द्रव्यसामग्रीं उपपद् c. or वि-धा 3 U or कृ; *See* **Prepare.** 2 (पूर्वं) नियम् 1 P, प्रति-ज्ञा 9 A, परिपण् 1 A, संकेत-समयं-कृ; निर्दिश् 6 P; *See:* **Enjoin, Ordain;** (for, against) gen. ex. by अर्थं-अर्थे in comp.; 'should p. wealth against times of want' आपदर्थं धनं रक्षेत्; 'who p. s for the future' अनागतविधाता; 'p. against' निवारणाय सज्जीभू, प्रतिकारोपायं कृ c. -ed, *a.* (पूर्वं) संभृत, परिकल्पित; युक्त, उपेत, सहित, अन्वित,

सनाथ, सनाथीकृत; 'he is duly p. for' तस्य समुचिताः संविधाः कृताः; उपकरणसामग्रीयुक्तः, अशनवसनादियुक्तः. 2 पूर्वं निर्दिष्ट, परिगणित, पूर्वं संकेतित; 'p. that' यदि, चेत्, एतेन समयेन. **-ence,** *s.* विधिः, परमेश्वरः; *See* God. 2 सुविमर्शः, दूरदर्शित्वं, पर्यवेक्षणं, पूर्वविवेकः-विचारः, सुसमीक्षा, दूर-दीर्घ-दृष्टि *f.* **-ent,** *a.* दूरदर्शिन्, विमृश्यकारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि. **-ential,** *a.* ईश्वर-विधातृ-कृत-प्रयुक्त-घटित. **-entially,** *adv.* विधिवशात्, ईश्वरेच्छया, दैवात्, दिष्ट्या. **-ently,** *adv.* सविवेकं, सुसमीक्ष्य, सुविमृश्य, दूरदृष्ट्या. **-Provision,** *s.* परिकल्पनं, विधानं, उपपादनं. 2 पूर्वोपायः, पूर्वकल्पना, संविधा-धानं. 3 समयः, संकेतः, प्रतिज्ञा, पणः, नियमः, अभिसंधिः. 4 (P. s.) सामग्री, संभारः, संचयः, संग्रहः, साहित्यं, संविधा, उपस्करः, उपकरणजातं; (for journey) पाथेयं, भोज्यं, भक्ष्यं, भक्ष्यादि-सामग्री, गमनसंविधा; (for army) वीवधः. **-*v. t.*** Provide, q. v. **-al, -ary,** *a.* सामयिक (की *f.*), अल्पकालस्थायिन्, आपात in comp., आपाततः नियुक्त. **-ally,** *adv.* आपाततः, समयानुरूपेण, स्तोककालं. **-Provisory,** *a.* सप्रतिज्ञ, सामयिक. **-Proviso,** *s. See* (*s.*) (3).

Province, *s.* विषयः, राष्ट्रं, देशः, चक्रं, मंडलं. 2 नियोगः, कार्यं, कर्मन् *n.*, कर्तव्यं, अधिकारः. 3 प्रकरणं, अंगं, विषयः (fig. also), (सर्वकौतुकिकस्याभ्यवहार्यमेव विषयः V. 3. **-ial,** *a.* देशीय, देश्य, राष्ट्रीय, राष्ट्रिक-देशिक-(की *f.*), देश-राष्ट्र in comp. **-*s.*** देशस्थः, ग्रामस्थः. **-ialism,** *s.* ग्रामीणभाषा, असंस्कृतभाषा.

Provoke, *v. t.* प्र-, कुप् c., क्रुध् c., क्रोधं-कोपं-उत्पद् c. or उद्दीप् or उत्तिज् c. 2 उत्पद् c., जन् c., (जनयति), प्रवृत् c., उत्तिज् c.; *See* **Excite, Cause.** 3 धृष् 5 P, आह्वे 1 A. **-ing,** *a.* प्रकोपक, उद्दीपक, उत्तेजक, क्रोधावह, संतापकारिन्, संतापक. **-ingly,** *adv.* Ex. by (*v.*). **-Provocation,** *s.* प्रकोपः, क्रोधोद्दीपनं, कोपोत्तेजनं; कोपकारणं-हेतुः. 2 उद्दीपनं, उद्बोधनं. **-Provocative,** *a.* उद्दीपक, उद्बोधक. **-*s.*** दीपनं, अग्निवर्धनं, क्षुदुद्बोधनं, प्ररोचनं.

Provost, *s.* अध्यक्षः, अधिकारिन् *m.*, अधीशः.

Prow, *s.* पोताग्रभागः,

Prowess, *s.* शौर्यं, वीर्यं, वि-परा-क्रमः, पौरुषं, ओजस् *n.*, रणोत्साहः-शौर्यं; 'personal बाहुवीर्यं, भुजबलं.

Prowl, *v. i.* (भक्ष्यार्थं); परि-, भ्रम् 1, 4 P, पर्यट् 1 P. **-ing,** *s.* परिभ्रमणं, पर्यटनं.

Proximate, *a.* समीप, निकट, आसन्न, संसक्त, सन्निकृष्ट. **-ly,** *adv.* समीपं, संसक्तं. **-Proximity,** *s.* सन्निधिः, सन्निकर्षः, सान्निध्यं, नैकट्यं, संसक्ति *f.*; *See* **Nearness.**

Proximo, *adv.* आगामिनि (मासे)

Proxy, *s.* प्रतिनिधिः-पुरुषः, प्रतिहस्तः; 'by p.' प्रतिनिधिद्वारा.

Prude, *a.* (Woman) अतिविनीता, विनयाभिमानिनी, सूक्ष्माचारनिष्ठा. **-ry,** *s.* अतिविनीतता, विनयाभिमानः, मिथ्याविनयः. **-ish,** *a. See* (*a.*).

Prudent, *a.* दूरदर्शिन्, विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि, परिणामदर्शिन्, सदसद्विवेकिन्; बुध, मनस्विन्, नीतिज्ञ, विज्ञ, प्र(प्रा)ज्ञ, मनीषिन्, सावधान, कृतधी; *See* **Wise,** also. 2 (Of acts) समीचीन, श्रेयस्, वरं *ind.* **-ial,** *a.* सविवेक, विवेक-समीक्षा-प्रयुक्त. **-ly,** *adv.* विमृश्य, समीक्ष्य, सविवेकं, दूरदर्शितया, परिणामदृष्ट्या, प्रज्ञावत्. **-Prudence,** *s.* दूरदर्शिता, दूर-दीर्घ-दृष्टि *f.*, विवेकः, प्रसमीक्षा, समीक्ष्य-विमृश्य-कारित्वं, सदसद्विवेकः, नीति *f.*, मनीषा, मति-बुद्धि *f.*

Prune, *v. t.* अग्राणि लू 9 U or अव-छिद् 7 P or निकृत् 6 P. **-ing,** *s.* अवच्छेदः, निकृंतनं; 'p.-knife' विटपच्छेदनी छुरिका.

Prurigo, Prurient, *See* **Itch,-y.**

Pry, *v.* (Into) सूक्ष्मं निरीक्ष् 1 A or निरूप् 10 or कुश् 1 P; निपुणं अनुसं-धा 3 U or अन्विष् 4 P or चर्च् 6 P. **-ing,** *s.* सूक्ष्म-निरूपण-अन्वेषणं, सूक्ष्मचर्चा.

Prythee, *adv.* अपि, ननु, (ननु मां प्रापय पत्युरंतिकं K. iv. 32).

Psalm, *s.* स्तोत्रं, गेयं, गीतं, भक्ति-धर्म-गीतं. **-ist,** *s.* गीत-स्तोत्र-कारः. **-Psalter,** *s.* गीतसंहिता-संग्रहः.

Pseudo, prefix, Ex. by मिथ्या, कपट, कूट-छद्म, कृतक, कृत्रिम in comp.; *See* **False.** **-nym,** *s.* कृतकनामन्. *n.*

Pshaw, *interj.* धिक्, अपेहि.

Psychic, *a.* आध्यात्मिक.

Psychology, *s.* अध्यात्मविद्या, आन्वीक्षिकी.

Puberty, *s.* यौवनं, वयस् *n.*, तारुण्यं, यौवनदशा-अवस्था, प्रौढदशा; 'a woman attained to p.' स्त्रीधर्मिणी, उदक्या; *See* under **Menstrual.** **-Pubescent,** *a.* प्राप्तयौवन, प्रौढ, तरुण.

Public, *s.* लोकाः, जनाः, प्रजाः, प्रकृतयः (pl.); लोकः, जनः, प्रजा; 'in p.' प्रकाशं, लोकसमक्षं, प्रकटं, सर्वप्रत्यक्षं. **-*a.*** प्रजा-लोक-संबंधिन्; साधारण (णी *f.*,) सामान्य, सर्वजनीन-य, सार्वलौकिक (की *f.*), लोक-जन-गण in comp.; 'p. odium' जनद्वेषः; 'p. good' लोकहितं; 'p. property' गणद्रव्यं. 2 प्रसिद्ध, लोक-जन-प्रसिद्ध, सर्वत्र प्रचलित, बहुलीभूत, लोकविश्रुत, प्रकाशीभूत,

सार्वलौकिक (की *f.*) 3 प्रकाश, अगूढ, अच्छन्न, अविविक्त, सर्वप्रकाश, राज in comp.; ‘p. road’ राजमार्गः; ‘p. sale’ प्रकाशविक्रयः; ‘p. house’ शुंडा, पानं, शुंडापानं, सुरालयः, सुरापणः; *See* under Liquor; ‘p.-minded’, ‘p.-spirited’ उपकारशील, जनहितबुद्धि, सर्वजनहितपरायण, लोकहित, जनहितैषिन्. -an, *s.* शौंडिकः, सुरापणिकः. 2 कर-शुल्क-ग्राहिन् *m.* -ity, *s.* प्रकाशता, प्राकाश्यं, प्रख्याति *f.*, प्रसिद्धि *f.*, विश्रुति *f.*, जन-लोक-प्रसिद्धिः, स्पष्टता; ‘give p.’ Publish, q. v. -ly, *adv.* प्रकाशं-शतः, प्रसह्य, प्रकटं, सर्वप्रकाशं-संमुखं-समक्षं; अगूढं, अच्छन्नं, सुव्यक्तं, स्पष्टं. **-Publish,** *v. t.* प्रकाश् c., प्रथ् 10, ख्या c. (ख्यापयति), प्र-वि-घुष् 10, ज्ञा c. (ज्ञापयति), प्रचर् c., बुध् c., प्रकाशीकृ 8 U, प्रकटीकृ, आविष्कृ, प्रकटयति, (:D.), प्रकटी-प्रसिद्धी-कृ; (books &c.) प्रकाश् c. -er, *s.* प्रकाशकः, प्रकाशयितृ *m.*, ख्यापकः. **-Publication,** *s.* प्रकाशनं, घोषणं, ख्यापनं. 2 प्रकाशितपुस्तकं-ग्रंथः.

Pucker, *v. t.* संकुच् 1 P, आकुंच् c., संहृ 1 P, पुटीकृ 8 U. -s., -ing, *s.* संकोचः, पुटः, वलि-ली *f.* -ed, *a.* संकुचित, पुटीकृत. 2 **Wrinkled,** q. v.

Puddle, *s.* पंकिलजल, पंकगुल्मः, पंकजलाशयः, -*v. t.* आविली-कलुषी-कृ 8 U; *See* **Spoil.**

Pudency, *s.* *See* **Modesty.**

Pudendum, Pudenda, *s.* योनि *f.*, भगं, उपस्थः.

Puerile, *a.* बालिश, बालोचित, बालेय, बाल-शिशु-योग्य. -ity, *s.* बालिश्यं, बालधर्मः.

Puerperal *a.* प्रसव-प्रसूति in comp. **-Puerperous,** *a.* बालप्रसविनी.

Puff, *v. t.* ध्मा 1 P, आ-उप-°, उत्-,श्वि c., (lit. & fig.): वातेन पूर् 10, उद्-हन् 2 P, स्फाय् c. (स्फाययति). -*v. i.* श्वस् 2 P, कृच्छ्रेण श्वस्, उद्-ध्मा. 2 वा 2 P. 3 फुत्कृ 8 U, मारुतं निःसृ c. 4 श्वि-उद्धन्-ध्मा-pass., स्फीत-आध्मात-उच्छून- *a.* भू 1 P; ‘do not p. up, when praised’ स्तूयमाना नोत्सिच्यंते (Ka. 329). -*s.* श्वासः, मुखमारुतः. 2 फूत्कारः, फूत्कृतं. 3 वात्या, वातवेगः; *See* **Gust.** 4 अतिप्रशंसा. -ed, *a.* आध्मात, उच्छून, स्फीत, उद्धत, मारुतपूर्ण, श्वासपूरित; ‘p. up with pride’ दर्पाध्मात, उत्सिक्त, मदोद्धत, उद्धत. -ing, *s.* उत्सेकः, *See* **Pride.**

Pug-faced, *a.* वानरवदन, कपिमुख.

Pug-nose, *s.* *See* under **Flat.**

Pugilist, *s.* मुष्टियोधः, मल्लः. **-Pugilism,** *s.* मुष्टि-मल्ल-युद्धं, मुष्टीमुष्टि युद्धं.

Pugnacious, *a.* कलह-युद्ध-प्रिय, रणोत्सुक, युयुत्सु, रण-युद्ध-कलह-काम. **-Pugnacity,** *s.* युयुत्सा, कलहेच्छा, कलह-युद्ध-कामः.

Puisne, *a.* अवर, अवरपदस्थ.

Puissant, *a.* शूर, विक्रांत, वीर्यवत्, प्रबल. **-Puissance,** *s.* शौर्यं, वि-परा-क्रमः, वीर्य; *See* **Bravery.**

Puke, *v. i.* वम् 1 P, छर्द् 10. -*s.* (वांतिकृत्) औषधं.

Pulchritude, *s.* *See* **Beauty.**

Pule, *v. i.* बालकवत् रु 2 P or कूज् 1 P.

Pull, *s.* कर्षणं, आकर्षः; ग्रहणं, धरणं. -*v. t.* कृष् 1 P, आ-सं-°. 2 ग्रह् 9 U, आ-दा 3 A, धृ 1 P, 10. -down, नि-,पत् c., अधः पत् c., अवकृष्; (in strength) अव-सद् c., अप-चि 5 U, क्षि 5 P, अपकृष्. -off, अप-नी 1 P, अप-उत्-कृष्, अवतॄ c., उन्मुच् 6 P, अपहृ 1 P; निष्कृष्, निर्हृ. -out, उद्धृ, निष्कृष्, वि-उत्-पट् 10, उत्खन् 1 P, निर्हृ; (hair) उत्-, लुंच् 1 P. -towards, आ-समा-कृष्. -up, उन्मूल् 10, उद्धृ, उच्छिद् 7 P, उत्पट्; *See* **Eradicate.** -ing, *s.* आकर्षणं, ग्रहणं, &c.; ‘p. by the hair’ केशग्रहः-हणं; ‘mutual p. of the hair’ केशाकेशि युद्धं.

Pullet, *s.* कुक्कुटशावः.

Pulmonary, *a* तिलक-फुप्फुस in comp.

Pulp, *s.* मज्जा, सारः, वसा. 2 गर्भः, बीजं. -ous,-y, *a.* मज्जाबहुल, मज्जागुणक, मांसल, मज्जोपम, कोमल.

Pulpit, *s.* पीठं, आसनं.

Pulse, *s.* नाडि-डी *f.*; (beating) नाडीस्फुरणं-स्पंदनं; ‘feel the p.’ नाडीं दृश् 1 P or स्पृश् 6 P. or परीक्ष् 1 A, ‘the p. is quick’ लघुगतिः नाडी; ‘the p. is low on account of phlegm’ कफान्मंदगतिर्ज्ञेया (नाडी). 2 वैदलः, शमी-शिंबी-धान्यं; शमीजः. **-Pulsate,** *v. i.* स्पंद् 1 A, स्फुर् 6 P; *See* **Throb.** -ion, *s.* गति *f.*, स्फुरणं, आघातः. स्पंदनं; ‘p. of the heart’ हृदयोद्धर्षः.

Pulverize, *v. t.* चूर्ण् 10, क्षुद् 7 P, पिष् 7 P. **-Pulverulent,** *a.* चूर्ण-क्षोद-मय (यी *f.*).

Pummel, *s.* वंका.

Pump, *s.* उत्तोलनयंत्रं, जलोत्क्षेपणं. -*v. t.* (जलादि) उत्तुल् 10, उत्क्षिप् 6 P. 2 (Out) निष्कृष् 1 P, रिच् 7 P, or c.; रिक्तीकृ 8 U.

Pumpkin, *s.* कूष्मांडः-डकः, कर्कारुः.

Pun, *s.* श्लेषः -*v. t.* श्लेषं प्रयुज् 7/A, 10.

Punch, *s.* प्रहारः, आ-अभि-घातः. 2 विदूषकः, भंडः. 3 वेधनिका. —*v. t.* तड् 10 or प्रहृ 1 P. 2 Perforate q. v.

Punchy, *a.* स्थूलकाय; *See* Fat.

Punctilio, *s.* सूक्ष्मता, अतिसौक्ष्म्यं; सूक्ष्मविषयः-नियमः. —**Punctilious**, *a.* सूक्ष्मनियमनिष्ठ-निरत, सूक्ष्माचारनिष्ठ, अतिसूक्ष्मदृष्टि *f.* —**ness** *s.* सूक्ष्मनियमनिष्ठा; अतिसूक्ष्मदृष्टि *f.*

Punctual, *a.* सामयिक (की *f.*), संकेतसमय-निष्ठ-अनुवर्तिन्; 'let us be p.' सामयिका भवामः (M. 1). —**ity**, —**ness**, *s.* समय-संकेत-पालनं-निष्ठा-अनुवर्तनं, सामयिकता. —**ly**, *adv.* यथासमयं-संकेतं-कालं.

Punctuate, *v. t.* विरामचिह्नानि लिख् 6 P; चिह्नैः अंक् 10

Puncture, *v. t.* कीलाग्रेण व्यध् 4 P or भिद् 7 P. —*s.* वेधः-धनं; *See* Prick.

Pungent, *a.* तीव्र, तीक्ष्ण, प्रखर, तिग्म, उग्र, चंड. 2 मर्मभिद्, अरुंतुद, मर्माविध्, कटु. 3 (To the taste) तीक्ष्ण, तिक्त, तीव्र, कटु, उष्ण. —**Pungency**, *s.* प्रखरता, उग्रता, चंडता, तीक्ष्णता, कटुता, तीव्रता &c.

Punish, *v. t.* दंड् 10, शास् 2 P, (with two acc.); निग्रह् 9 P, दम् c. (दमयति); तड् 10 (by beating); 'p. ed him by an unjust death' अन्यायेन तं जघान, अन्याय्यवधं तमदंडयत्; 'should p. as a thief' चौरदंडेन दंडयेत् (Y. ii. 269). 2 Plain, q. v. —**er**, *s.* शास्तृ *m.*, शासकः, दंडयिता. —**ment**, *s.* दंडः, शासनं, निग्रहः; साहसं; दमः. —**Punitive, Punitory**, *a.* दंड in comp.

Punt, *s.* प्ररालुः, तरांधुः.

Puny, *s.* क्षुद्र, अत्यल्प, अतिलघु.

Pupil, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, अध्येतृ *m.*, विद्यार्थिन् *m.* 2 कनीनिका, तारा, तारका. —**age**, *s.* शिष्यदशा-अवस्था, अंतेवासित्वं.

Puppet, *s.* पुत्रिका, पांचालिका; *See* Doll; 'p.-show' पुत्रिकाक्रीडा.

Puppy, Pup, *s.* कुक्कुरशावः-शिशुः.

Purblind, *a.* हतदृष्टि, ईषदंध.

Purchase, *v. t.* क्री 9 U. 2 व्ययेन-श्रमेण प्राप् 5 P or लभ् 1 A. —*s.* क्रयः. 2 क्रीतद्रव्यं. 3 संग्रहणं, ग्राहः; 'p.-money' क्रयमूल्यं, अर्घः, मूल्यं. —**er**, *s.* क्रयिन् *m.*, क्रेतृ *m.*

Pure, *a.* वि-, शुद्ध, शुचि (in all senses); स्वच्छ, विशद, निर्-वि-अ-मल, प्रसन्न, अनाविल, अकलुष. 2 पुण्य, अनघ, निष्पाप, साधु, अपाप, अलिप्त, निष्कलंक, अकल्मष. 3 पवित्र, पावन, मेध्य, परि-,पूत, प्रयत, तीर्थ in comp. 4 केवल, शुद्ध, मात्र in comp. 5 अदुष्ट, अभ्रष्ट, असंसृष्ट, अविकृत. 6 (Language) अपशब्दहीन-रहित, असंकीर्ण. 7 (Woman) सती, साध्वी, अज्ञातव्यवाया, सुरतानभिज्ञा, अस्पृष्टा, अक्षतयोनिः, पुरुषास्पृष्टा; 'of p. descent' सद्वंशज, शुद्धान्वय; of p. heart', 'p.-minded' शुद्धात्मन्, विमलात्मन्, शुद्धमति, शुद्धहृदय; प्रयतात्मन्; 'to be p.' शुध् 4 P. —**ly**, *adv.* निर्मलं, विशुद्धं, शुचि; निष्पापं, &c.; मात्रं, केवलं &c. —**ness**, —**Purity**, *s.* वैमल्यं, वि-,शुद्धि *f.*, शुद्धता, प्रसादः, वैशद्यं, शुचिता, शौचं, पुण्यता, साधुता, अपापता, पवित्रता, पूतता, साध्वीत्वं, &c. —**Purify**, *v. t.* परि-,पू 9 U or c., शुध् c., वि-परि-,° शुचीकृ 8 U, निर्मलीकृ, पवित्रीकृ, संस्कृ; प्र-,मृज् 2 P, निर्णिज् 3 U, प्रक्षल् 10, धाव् 10. —**ed**, *a.* परि-,पूत, शुद्ध, शोधित, प्रक्षालित, धौत, निर्णिक्त, &c.; 'p. by penance' प्रयतात्मन्. —**ication**, *s.* परि-,पूति *f.*, वि-परि-शुद्धि *f.*, शौचं, संस्कारः, पावनं, शोधनं, निर्मलीकरणं, प्रक्षालनं, धावनं, मार्जनं. —**icative**, —**icatory**, *a.* पावन, पवित्र, पावक, तीर्थ in comp.; अघपाप-नाशिन्, अघमर्षण; *See* Pure, 'p. rites' शांतिक्रिया, संस्कारः. —**ing**, *a.* पावन, पावक, पाविन्, &c.

Purge, *v. t.* शुध् c., वि-,रिच् 7 P or c., मलं निःसृ c. or शुध् c. 2 परि-,पू 9 U, शुध् c., 2 पापं-अघं शुध्; *See* Purify. —*s.* वि-,रेचनं-कं; उदरशोधनं. —**ation**, *s.* वि-,रेचनं, वि-,रेकः, शोधनं, शुद्धि *f.* —**ative**, *a.* वि-,रेचक-न, सारक, शोधन. —*s.* वि-,रेचनं-कं, सारकं. —**atory**, *s.* शोधक, पावन, अघनाशन-मर्षण. —*s.* पापमोचनस्थानं.

Purlieu, *s.* *See* Border.

Purloin, *v.* *See* Rob, Steal.

Silent, *a.* तूष्णीक, अनालापिन्, मूक, मौनिन्, निःशब्द, नीरव. 2 रुद्ध-बद्ध-मुख, निरुत्तर, अनुत्तर; 'habitually s.' तूष्णींशील, अल्पभाषिन्, वाग्यत, वाचंयम; 'when the lute was s.' वीणायां मूकीभूतायां; 'become or remain s.' (after speaking) उपशम् 4 P, विरम् 1 P; एवमुक्त्वा उपशशाम, उपशांतवचसि तस्मिन् &c. **-ly**, *adv.* तूष्णीं, जोषं, निःशब्दं, निभृतं, मौनीभूय. **—Silence**, *s.* मौनं, मूकभावः, निःशब्दता; अनालापः, तूष्णींभावः, अभाषणं; 'keeping s.' वाक्स्तंभः-रोधः-यमनं, मुखबंधनं; 'one who holds s.' वाचंयमः, मौनव्रतिन् *m.*; 'keep s.' तूष्णीं-जोषं-आस् 2 A or स्था 1 P; मौनं आस्था-भज् 1 A, वाचं यम् 1 P or निरुध् 7 U, मुखं बंध् 9 P. 2 प्र-,शांति *f.*, स्तिमितता; 'in the s. of night' प्रशांतायां रात्रौ. —*interj.* तूष्णीं भव, मौनं कुरु. —*v. t.* मौनं लभ् c. (लंभयति) or अवलंब् c., विरम् c., प्र-उप-शम् c. 2 निरुत्तरीकृ 8 U, अधरीकृ, मुखं बंध्. **-ed**, *a.* निरुत्तर, अनुत्तर, निरुत्तरीकृत, रुद्ध-बद्ध-मुख.

Silk, *s.* कौशेयं, कौशं, कीटसूत्रं; पट्टः, क्षौमं, दुकूलं, कौशांबरं, कौशिकं (s.-cloth); China s.' चीनांशुकं; 'bleached s.' पत्त्रोर्णं, धौतकौशेयं; 's.-cotton tree' शाल्मलिः-लः, शाल्मलिवृक्षः, पिच्छिला; 's.-worm' कोश(ष)कारः, पट्टकीटः, तंतुकीटः-कृमिः, कोशस्थः. **-en**, *a.* कौशेय (यी *f.*), क्षौम (मी *f.*), कौशिक (की *f.*), कौश (शी *f.*); 's.-cloth' दुकूलं, कौशांबरं, क्षौमं, &c. 2 मृदु, कोमल.

Sill, *s.* देहली, शिला, गृहावग्रहणी.

Silly, *a.* मूर्ख, बालिश, मूढ, अल्पधी-मति, दुर्मति, निर्बुद्धि; *See* **Foolish**; 'what a s. boy' अहो मूढो बालकः.

Silt, *v. t.* (up) अवरुध् 7 U, अवष्टंभ् 9 P.

Silvan, *a.* वन in comp., वन्य, वनस्थ, अरण्यज; 's. goddess' वनदेवता; 's. scenery' वनशोभा-श्रीः.

Silver, *s.* रूप्यं, रजतं, श्वेतं, दुर्वर्णं, खर्जूरं, कलधौतं; s. leaf रूप्यपत्रं 's.-smith' रूप्यकारः, स्वर्णकारः. **Silver wedding**, *s.* पंचविंशा विवाहतिथिः. —*a.* राजत (ती *f.*) (*s.*;) in comp., रजतनिर्मित-कृत, रौप्य (प्यी *f.*). —*v. t.* आच्छद् 10, रजतयति (D.), श्वेतवर्णीकृ 8 U. **-y**, *a.* रजतोपम, रूप्यवर्ण, श्वेत-शुभ्र-वर्ण, अतिधवल.

Similar, *a.* सम, समान, तुल्य, अनुगुण, अनुरूप, सधर्मन्; *See* **Like**. **-ity**, *s.* साम्यं, सादृश्यं, तुल्यत्वं. **-ly**, *adv.* तद्वत्, तथैव, एवं.

Simile, *s.* उपमा, निदर्शनं. **—Similitude**, *s.* औपम्यं, सादृश्यं. 2 आकारः, रूपं, मूर्ति *f.*

Simmer, *v. i.* शनैः पच्-क्वथ् pass.

Simper, *v. i.* विकृतं स्मि 1 A, कुस्मितं कृ 8 U, अनर्थकं हस् 1 P.

Simple, *a.* निरवयव, असंकीर्ण, असमस्त, शुद्ध, केवल, अमिश्र. 2 सरल, ऋजु, अमाय, शुद्धात्मन्, अवक्र, निर्व्याज, निष्कपट, मायाहीन. 3 (Dress) विनीत, (विनीतवेषेण प्रवेष्टव्यानि तपांवनानि S. 1). 4 स्पष्ट, व्यक्त, सुगम, सुबोध, भिन्नार्थ, अगूढार्थ; *See* **Plain**. 5 मुग्ध, बालिश, मूढ, दुर्मति. —*s.* ओषधि-धी *f.* **—Simpleton**, *s.* मूढः, मूढधीः, सुविश्वास्यः, क्षुद्रः, क्षुद्रमतिः. **—Simplicity**, *s.* शुद्धता, अमिश्रता, सरलता,

आर्जवं, सारल्यं, निर्व्याजता, अनुपाधित्वं, अमाया, अव्याजः, निष्कापट्यं. 2 विनीतत्वं, शुद्धता. 3 स्पष्टता, सुबोधता, सुगमत्वं. 4 बालिश्यं, मूढता. **-Simplify,** *v. t.* ऋजूकृ 8 U, विशदीकृ, सुगमीकृ, व्यक्तीकृ; *See* **Explain.** **-Simply,** *adv.* एव, केवलं, मात्रं in comp.

Simulate, *v. t. See* **Pretend.**

Simultaneous, *a.* एक-सम-कालिक (की *f.*), यौगपदिक. **-ly,** *adv.* समं, युगपत्, एक-सम-काले-ले, यौगपद्येन, एकदैव, सममेव. **-ness,** *s.* यौगपद्यं, एक-सम-कालता, युगपद्भावः.

Sin, *s.* पापं, पातकं, एनस् *n.*, कल्मषं, दुरितं, अघं, दुष्कृतं, वृजिनं, अंहस् *n.*, किल्बिषं, पंकः-कं, पाप्मन् *m.*, कलुषं; दोषः, अपराधः, पाप-अप-कर्म *n.*, कुकर्मन्, दुष्कृति *f.*-त्यं; 'heinous s.' महा-घोर-पातकं; 'destroying s.' पापनाशन-नाशिन्, अघमर्षण, पापापह. **-***v. i.* पापं &c. आचर् 1 P or कृ, अपराध् 4, 5 P, दुष् 4 P. **-ner,** *s. See* **Sinful** below; 'an atrocious s.' महा-घोर-पातकिन्-पापिन्, पापराशिः-निधिः. **-ful,** *a.* पापिन्, पातकिन्, पापकर (री *f.*), पाप्मन्, पापकृत्, पापात्मन्, कुकर्मन्, दुष्कर्मन्, एनस्विन्, पाप-दुष्ट-कर्मन्, अपराधिन्, किल्बिषिन्, पाप-निरत-बुद्धि-मति, पापात्मक. 2 (Of acts) पाप in comp., दुष्ट; कलुष; 's. act' पापं, दुष्कर्म; *See* (*s.*). **-fully,** *adv.* पापवत्, सपापं, दुष्टवत्. **-fulness,** *s.* सपापता, पापमति-निरति *f.*, दुष्टता, &c. **-less,** *a.* अनघ, निष्पाप, अपाप, अकल्मष, पापरहित, निर्दोष, निरपराध, and sim. comp.

Since, *prep.* प्रभृति, आरभ्य, (with abl.), आ with abl. or in comp.; sometimes also ex. by gen. abs.; अस्य कतिपये संवत्सरास्तपस्तप्यमानस्य (U. 4) 'it is several years s. he began to practise penance'; 's. then' तदाप्रभृति; '4 years s.' इतः पूर्वं चतुर्वर्षे; 'long s.' चिरं; 'ever s.' यतःप्रभृति. 2 पूर्वं, प्राक्, गतपूर्व-काले. **-***conj.* यतः, यस्मात्, यत्, हि (not at beginning); by abl. of abstract noun; *See* **Because.**

Sincere, *a.* अकृत्रिम, निर्व्याज, निष्कपट, निर्व्यलीक, दक्षिण, ऋजु, सरल, विशुद्ध, अमाय; यथार्थ, सत्य, तात्त्विक-वास्तविक (की *f.*); (of persons only) शुद्धमति-भाव, शुद्धात्मन्, विमलात्मन्, शुचि, सत्यशील-व्रत-वादिन्: *See* **Frank, Honest.** **-ly,** *adv* निर्व्याजं, निर्व्यलीकं, अमायया, शुद्धहृदयेन-भावेन, विमलात्मना. **-ity, -ness,** *s.* सारल्यं, दाक्षिण्यं, आर्जवं, निष्कापट्यं, अमाया, विमलात्मता, शौचं, यथार्थता, &c.

Sine, *s.* ज्या, ज्यापिंडः.

Sinecure, *a.* अकर्माधिकृत, कर्मशून्याधिकारिन्.

Sinew, *s.* स्नायु *f.*, स्नसा; (*s.* 3) बलं, शक्ति *f.*, सामर्थ्यं. **-y,** *a.* स्नायुमय (यी *f.*). 2 प्र-स-बल.

Sing, *v. i.* गै 1 P; (of birds) कूज् 1 P, रु 2 P. **-***v. t.* गै; गानेन वर्ण् or कृत् 10, उत्कृत्, अभिगै; 'they sang his praises' तं स्तुतिभिरुपतस्थिरे. **-er, -Songster,** *s.* गायकः, गातृ *m.* **-ing, -Song,** *s.* गीतं, गीति *f.*, गेयं, गानं. 2 कूजनं, रुतं, रावः, रवः.

Singe, *v. t.* ईषद् दह् 1 P, अग्निना स्पृश् 6 P.

Single, *a.* एक, एकाकिन्, अद्वितीय, केवल, असहाय; अद्वैध (धी *f.*). 2 भिन्न, व्यक्त, अविभक्त. 3 **Simple,** q. v. 4 अनूढ, अविवाहित, अकृतोद्वाह, निःसंग; 's. combat' द्वंद्वयुद्धं, नियुद्धं, बाहुयुद्धं; 's.-handed' एक, एकाकिन्, बाहुसहाय, भुजमात्रसहाय; 's.-hearted' अनन्यवृत्ति, एकचित्त; 's. stick' यष्टि *f.*, दंडः. **-***v. t.* (Out) (बहूनां मध्यात्) वृ 5 U, उद्धृ 1 P, उद्-ग्रह् 9 P; निरूप् 10, निर्दिश् 6 P. **-ness,** *s.* कैवल्यं, अद्वितीयता, &c. 2 शुद्धि *f.*, अनन्यता, अनन्यभावः. **-Singly,** *adv.* Ex. by (*a.*). 2 एकैकं, एकैकशः, प्रत्येकं, एकशः, पृथक्, पृथक् पृथक्; *See* **Separately.**

Singular, *a.* अपूर्व, अप्रतिम, अद्वितीय, अप्रतिरूप, अनुपम. 2 अनन्यसाधारण (णी *f.*), लोकोत्तर, अनन्यसामान्य; अपरूप, विलक्षण, अद्भुत, लोकबाह्य, अलौकिक (की *f.*): 's. number' एकवचनं. **-ity,** *s.* अपूर्वता, अप्रतिमता, असामान्यता, वैलक्षण्यं, वैचित्र्यं, असंगति *f.*, लोकोत्तरता. **-ly,** *adv.* अपूर्वं, विशेषतः, अद्भुतं, लोकोत्तरप्रकारेण.

Sinister, *a.* अमंगल, अशुभ, अकल्याण (णी *f.*), अभद्र. 2 दुष्ट, वक्र, वाम, कुटिल, अनृजु. 3 वाम, सव्य; 'of s. motives' दुराशय, पापमति; उमां स पश्यन्नृजुनैव चक्षुषा (K. v. 32) 'looking at Umā with no s. eye'. **-Sinistrally,** *adv.* वामतः, वामदिशि. **-Sinistrous,** *a.* वामस्थ, वामपार्श्ववर्तिन्.

Sink, *v. i.* नि-मस्ज् 6 P: 'sank in deep mire' महापंके निमग्नः; सद् 1 P. अव-नि-°, अधः गम् 1 P or पत् 1 P or या 2 P, अव-पत्. 2 ह्रासं-क्षयं या-इ 2 P, क्षि pass., ध्वंस् 1 A; *See* **Decay, Decline.** 3 (Down) अव-वि-सद्, पलि, म्लै-ग्लै 1 P, स्रंस् 1 A; *See* **Droop;** 'my heart s. s' सीदति मे हृदयं; 'limbs, s. ing down through excessive thirst' प्रबल-पिपासावसन्नानि अंगकानि (Ka. 36): 'his heart sank within him' तस्य धैर्यमही-

यत; स लुप्त-स्खलित-धैर्यः. -*v. t.* नि-मस्ज् c. (मज्जयति); अधः गम् c. or पत् c. 2 (A well &c.) खन् 1 P. 3 अवसद् c., परि-, म्लै c. (spirits &c.) 4 न्यूनीकृ 8 U, अल्पीकृ, लघयति ((D.), ह्रस् c., अपचि 5 U: क्षि 5 P. -*s.* जलनिर्गमः, गुप्तनाली.

Sinuous, *a.* कुटिल, वक्र, अराल, जिह्म. -**Sinuosity,** *s.* वक्रिमन् *m.*, कौटिल्यं.

Sinus, *s.* नाडि-डी-लि-ली *f.*

Sip, *v. t.* आचम् 1 P; उपस्पृश् 6 P, ईषत्-अल्पशः-पा 1 P. -*s.* आचमनं, उपस्पर्शः, ईषत्पानं.

Siphon, *s.* उत्क्षेपणी, वक्रनाली.

Sir, (Voc.) आर्य; भवन्, भोः; 'holy s.' भगवन्; 'gentle or good s.' भद्र, भद्रमुख.

Sirdar, *s.* मांडलिकः, सामंतः. 2 सेनानी *m.*

Sire, *s.* (In addressing) देव, श्रीमद्देव, महाराज, राजन्. 2 भगवन् (of holy men). 3 तातः, जनकः, पितृ *m.*

Siren, *s.* वि-,मोहिनी, (गानेन) लोभयित्री, मायिनी.

Sirrah, *interj.* रे, अरे, अरेरे.

Sirrup, *s.* स्वादु or मधुर-रसः or पेयं

Sister, *s.* स्वसृ *f.*, भगिनी, सोदर्या, जा(या)मिः-मी. 2 धर्मभगिनी; 'elder s.' अग्रजा; 'younger s.' अवरजा; 's.'s son' भागिनेयः, स्वस्रेयः; 's.'s daughter' स्वस्रीया, भागिनेयी; 's.'s husband' आवुत्तः; 's.-in-law' यातृ, ननांदृ, श्याली, भ्रातृजाया, प्रजावती (expressing different relations). -**hood,** *s.* भगिनीत्वं, भगिनीसंबंधः. 2 भगिनीसमाजः, स्त्रीगणः. -**ly,** *a.* भगिन्यनुरूप, स्वस्रीय, स्वसृयोग्य.

Sit, *v. i.* आस् 2 A, नि-,सद् 1 P, उपविश् 6 P: 'please s. here' अत्रास्यतां, इदमासनमलंकरोतु भवान्. 2 कार्यं निर्वह् c. 3 (Fit) Ex. by शुभ् 1 A; 'this crown s. s well on you' नितरां तवेदं मुकुटं शोभते, शोभसे एतेन मुकुटेन; 's. by' उपास्, अन्वास्; 's. up' स्था 1 P, सम्यक् (अनतकायं) स्था; 'half s. ing up in the bed' पूर्वार्धविसृष्टतल्पः (R. xvi. 6); जागृ 2 P.

Site, *s.* सन्निवेशः, सं-,स्थिति *f.*, स्थानं, पदं, स्थलं, आस्पदं, भूमि *f.*; (of a house) वास्तु *m. n.*, वेश्मभूः, गृहपोटः; 'purificatory ceremony of a s.' वास्तुशमनं.

Situate,-ed, *a.* अव-,स्थित, निविष्ट; दिश्य, स्थ, वर्तिन् in comp.; 's. to the east' पूर्वदिश्य, पूर्वस्थ; (of persons) स्थ, स्थित, अवस्थ in comp., अवस्थापन्न; 'so s.' एतदवस्थ; 'badly s.' दुःस्थ, दुःस्थित, कृच्छ्रगत, कष्टदशापन्न. -**ion,** *s.* सन्निवेशः, अवस्थानं, अव-,स्थितिः. 2 पदं, नियोगः, अधिकारः, पदवि-वी *f.* 3 अवस्था, दशा, स्थितिः, भावः, वृत्ति *f.*, आस्पदं.

Sitz-Bath, *s.* कटिस्नानं.

Six, *a.* षष्; 's.-fold' षड्गुण; 's.-faced' षण्मुखः, षडाननः; 'having s. mothers' षाण्मातुरः; 'collection of s.' षट्कं; 'in s. ways' षड्धा, षोढा; 'of s. months standing' षाण्मासिक (की *f.*), षण्मास्य. -**th,** *a.* षष्ठ (ष्ठी *f.*). -**Sixteen,** *a.* षोडशन्. -**th,** *a.* षोडश (शी *f.*). -**Sixty,** *a.* षष्टि *f.* -**ieth,** *a.* षष्टितम (मी *f.*).

Size, *s.* प्र-परि-माणं, मानं; 'of great s.' महाप्रमाण, पृथु; 'of a big s.' बृहत्प्रमाण. 2 आकारः, आकृति *f.*, रूपं, आकारमानं; 'of the s. of' ex. by (*s.*) or मात्र in comp.: 'of the s. of a mustard seed' सर्षपमात्रं (छिद्रं); बिल्वमात्रं, अंडपरिमाणं, &c. 3 लेपः.

Skain, Skein, *s.* पं(पिं)जि-जी *f.*-जिका.

Skate, *s.* हिमविसर्पणपादुका.

Skeleton, *s.* कंकालः; 'mules reduced to s. s' कंकालशेषाः खराः (U.3); अस्थिपंजरः. 2 आकारः, संस्थानं. 3 वस्तुमात्रं.

Sketch, *v. t.* वर्ण् 10, आलिख् 6 P, स्थूलवर्णनं-पांडुलेख्यं-कृ 8 U. -*s.* वर्णनं; आलेख्यं; 'rough s.' स्थूललेख्यं, पांडुलेखः; 's. of a painting' पांडुचित्रं, चित्रारंभः, रेखामात्रं. 2 वस्तुमात्रं.

Skew, *a.* तिर्यक्, अनृजु, विषम. -*v. i.* तिर्यक् निरीक्ष् 1 A.

Skewer, *s.* शलाका, कीलः-लकः, शंकुः.

Skiff, *s.* तरीः, नौ *f.*, लघुनौका.

Skill, *s.* कौशलं, नैपुण्यं, पटुता, पाटवं, प्रावीण्यं, चातुर्यं, वैदग्ध्यं, युक्ति *f.*, विज्ञता, &c. -**ful, -ed,** *a.* कुशल, निपुण, प्रवीण, पटु, विचक्षण, दक्ष, विदग्ध, चतुर, विशारद, पेशल, युक्तिमत्, कृतिन्, विज्ञ, अभिज्ञ-ज्ञ-विद् in comp. -**ly,** *adv.* सपाटवं, सनैपुण्यं, दक्षतया, चतुरं, कुशलतया, विज्ञवत्, सवैदग्ध्यं, &c. -**ness,** *See* (*s.*) above.

Skim, *s.* मंडः-डं, फेनः-णः. -*v. t.* फेनं गल् c. or अपनी 1 P or निर्हृ 1 P. -*v. i.* जवेन-वेगात् परिसृप् 1 P or परि-द्रु 1 P, लघुगत्या विसृप्. -**med,** *a.* हृत-मंड-फेन; 's. milk' घोलं, मथिततक्रं. -**mer,** *s.* झर्झरी-रं, खजः-कः.

Skimp, *v. i.* कार्पण्यं समाचर् 1 P. 2 निरवधानं कृ 8 U.

Skin, *s.* चर्मन् *n.* (of animals), त्वच् *f.*; (hide) अजिनं, दृतिः, कृत्ति *f.*; (of snakes) निर्मोकः, कंचुकः; 'reduced to mere s. and bones' त्वगस्थिमात्रशेष. 2 Rind, q. v.; 's.-deep' चर्मगत; *See* Superficial; 's-flint' अतिकृपणः, कदर्यः; *See* Miser. -*v. t.* चर्म-त्वचं-अपनी 1 P or निर्हृ 1 P or उल्लिख 6 P. निस्त्वचीकृ 8 U.

-ny, *a.* चर्मभूत, त्वङ्मात्र, चर्ममात्रावशेष, क्षीण, कृश; *See* **Lean.**

Skip, *v. i.* प्लु 1 A, वल्ग् 1 P, नृत् 4 P. **-s.**, **-ping**, *s.* प्लुतं-ति *f.*, प्लवनं, प्लुतगति *f.* **-ping**, *a.* प्लुतगति-गामिन्.

Skipper, *s.* नौकाधिपः.

Skirmish, *s.* डिंबाहवः, डिंबः, डिंबयुद्धं. **-v.** *i.* कृ 8 U with (*s.*).

Skirt, *s.* प्रांतः, पर्यंतः, अंतः, प्रांत-पर्यंत-भागः, परिसरः, सीमा, धारा; 's. s of a mountain' पर्यंतभूः. **2** अंचलः, दशा-वस्ति *m. f.* (pl.); वस्त्रांचलः, वसनांतः. **-v.** Ex. by (*s.*), प्रांतयति (D.); *See* **Border.**

Skittish, *a.* चंचल, चपल, तरल. **2** क्रीडा or खेला-शील or पर.

Skulk, *v. i.* निभृतं-अलक्षितं-स्था 1 P or वृत् 1 A, प्रच्छन्नं आस् 2 A.

Skull, *s.* कपालः-लं, कर्परः, शिरोस्थि *n.*; 's. for alms' भिक्षाकपालं; *See* **Scull.**

Sky, *s.* नभस् *n.*, वियत् *n.*, व्योमन् *n.*, गगनं-णं, आकाशः-शं, अंबरं, अंतरि(री)क्षं, खं, नाकः, दिव् *f.*, द्यो *f.*, विहायस् *m. n.*, विहायसः, अभ्रं, पुष्करं, अनंतं, सुरवर्त्मन् *n.*, विष्णुपदं, तारापथः; 'roaming through the s.' नभश्चरः, खेचरः, &c. 's.-coloured' व्योम-नील-वर्ण; 's.-lark' भ(भा)रद्वाजः; व्याघ्राटः; 's.-light' आकाशप्रकाशः; 's.-touching' अभ्रंलिह्-लिख्, नभोलिह्, व्योमस्पृश्, गगनचुंबिन्.

Slab, *s.* शिला, शिलातलं-पट्टः-फलकः.

Slabber, *v. i.* लालायते (D.), लालां स्रु c.

Slack, *a.* शिथिल, प्र-,श्लथ, स्रस्त, गलित. **2** मंद, अतीव्र, अतीक्ष्ण, प्रमत्त, अनवहित; *See* **Remiss. -en**, *v. t.* शिथिलयति (D.), श्लथ् 10, शिथिली-श्लथी-कृ 8 U, मंदीकृ; -रथस्य मंदीकृतो वेगः (S. 1.) 'I have s.-ed the speed' &c.; प्र-शम् c. (शमयति) 'will not s. (the bonds of) her love' न अनुरागं शिथिलयति (V. 2.); 's. your pace a little' गतिवेगं किंचित् शिथिलय; 'who have s. ed their efforts' शिथिलितप्रयत्नाः, श्लथोद्यमाः. **-v.** *i.* शिथिली-श्लथी-भू, शिथिलायते (D.), मंदीभू; *See* **Relax. -ened**, *a.* शिथिलित, शांतवेगरय. **-ly**, *adv.* शिथिलं, प्रमादतः, अनवधानेन. **-ness**, *s.* शैथिल्यं, &c.

Slake, *v. t.* प्र-,शम् c. (शमयति), छिद् 7 P, (thirst). **2** जलेन संमिश्र् 10 or संसृज् 6 P. **-v.** *i.* प्र-,शम् 4 P.

Slam, *v. t.* (Door) तीव्राघातेन पि-धा 3 U or बंध् 9 P.

Slander, *s.* अप-परि-वादः, पैशुन्यं, पिशुनवचनं, अभि-,असूया, निर्वादः; *See* **Scandal. -v.** *t.* परि-अप-वद् 1 A, असूयति (with dat); अपभाष् 1 A, कलंकयति (D.), अभिशंस् 1 P; *See* **Defame, Libel. 2** सूच् 10, उपजप् 1 P, कर्णे जप्. **-er**, *s.* परि-अप-वादकः, अभि-,असूयकः, पिशुनः, सूचकः, कर्णेजपः, उपजापकः. **-ous**, *a.* पिशुन, साभ्यसूय, सपरिवाद, सापवाद, परिवाद-अपवाद-गर्भ, परिवादात्मक. **-ously**, *adv.* सापवादं, पिशुनं, सपरिवादं.

Slang, *s.* प्रलापः, अपभाषा, अश्लील-भाषणं, खलोक्ति *f.*

Slant,-ing, *a.* तिर्यच्, वक्र, कुटिल, तिरश्चीन; अवसर्पिन्, प्रवण; 'striking s.-ly with the tusks' तिर्यग्दंतप्रहारिन्; 's. blow' तिर्यक्प्रहारः. **-v.** *t.* आवृज् 10, वक्रीकृ 8 U, प्रवणीकृ **-v.** *i.* वक्रीभू, अवसृप् 1 P, प्रवणीभू, आनम् 1 P. **-ingly**, *adv.* तिर्यक्, तिरः, साचि, तिरश्चीनं.

Slap, *s.* चपेटिका, चपेटः, तल or चपेट-प्रहारः or आघातः, आस्फोटनं. **-v.** *t.* चपेटेन प्रहृ 1 P or तड् 10 or आहन् 2 U, आस्फुट् c.

Slash, *v. t.* दीर्घं छिद् 7 P or कृत् 6 P, व्यवच्छिद्, वि-नि-कृत्, क्षतविक्षतीकृ 8 U. **-s.** दीर्घ-महा-छेदः, महाक्षतं-ति *f.* **-ing**, *a.* दीर्घच्छेदकारिन्; (fig.) अरुंतुद, मर्मच्छिद्-भिद्, तीक्ष्ण; *See* **Sharp.**

Slattern, *s.* वेशप्रमत्ता, अपरिष्कृतवेशा.

Slaughter, *v. t.* विशस् 1 P, हन्, 2 P or c.(घातयति), व्या-पद् c., प्र-मी 9 U, आलभ् 1 A (beast); *See* **Kill. -s.** विशसनं, वैशसं, घातनं, प्रमाथः, कंदनं, संहारः, प्रमापणं; *See* **Killing**; 's.-house' सू(शू)ना, वध्यस्थानं. वधभूमि *f.*, घातस्थानं. **-er**, *s.* घातकः, विशसितृ *m.*, सौ(शौ)निकः.

Slave, *s.* दासः, प्रेष्यः, चेटः, किंकरः, भृत्यः, दासेयः-रः, भुजिष्यः; *See* **Servant**; 'born a s.' गर्भदासः; 'domestic s.' गृहदासः; 'a female s.' दासी, चेटी, भुजिष्या; 's.-trade' दासविक्रयः; 's.-dealer' दासविक्रायिन् *m.*; (fig.) दासः, or ex. by वश, अधीन in comp.; 'a s. to carnal passions' इंद्रियसुखवशगः, विषयसुखाधीनः; 's. to love' कामपरवशः. **-ry**, *s.* दास्यं, दासत्वं, दासभावः, दास्यवृत्ति *f.* **-ish**, *a.* दासवत् *adv.*, दास in comp., दासोचित; *See* **Servile.**

Slaver, *s.* *See* **Saliva**

Slay, *v. t.* विशस् 1 P, हन् 2 P, व्या-पद् c., मृ c. **-er**, *s.* घातकः, हंतृ *m.*, हन् in comp.; *See* **Kill,-er.**

Sledge, *s.* अचक्रयानं.

Sledge-hammer, *s.* मुद्गरः, महाघनः.

Sleek, *a.* मृदु, श्लक्ष्ण, स्निग्ध, सुखस्पर्श.

Sleep, *v. i.* स्वप् 2 P, शी 2 A, संविश् 6 P, नि-द्रा 2 P, निद्रायते (D.); 'I also do not s. over this matter' मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते (Mu. 1.). *-s.* निद्रा, स्वप्नः, स्वापः, सुप्ति *f.*, शयनं, संवेशः; 'go to s.' निद्रां या 2 P; *See* (*v.*): 'fall into s.' निद्रया आभिभू pass. or आक्रम् pass.: 'he fell into a deep s.' गाढ-निद्राभिभूतः-विधेयः-बभूव; 'death-s.' घोर-काल-निद्रा; 'roused from s.' विनिद्र, भग्ननिद्र, प्रबोधित. **-er,** *s.* निद्रालुः, शयालुः, better by (*v.*). **-ing,** *s.* शयनं, निद्रा, &c.: 's.-house' शयनमंदिरं-गृहं. *-a.* निद्राण, शयित, शयान, सुप्त; 's. draught' निद्राकरमौषधं. **-less,** *a.* नष्टनिद्र, उन्निद्र, अ-वि-निद्र, निर्णिद्र; 'passes s. nights' उन्निद्राः-उत्सन्ननिद्राः-क्षपा गमयति. **-lessness,** *s.* निद्रानाशः, निर्णिद्रता, निद्राभावः. **-y,** *a.* निद्रालु, शयालु, तंद्रालु, निद्राशील. **2** निद्राक्रांत, निद्रापर-वश-विधेय-अभिभूत-आकुल-ग्रस्त. **3** निद्राप्रद-जनन (नी *f.*), स्वापकर (री *f.*). **4** सुषुप्सु, शिशयिषु, शयनेच्छु; 'to feel s.' स्वप्-शी-desid.: 'I feel s.' निद्रयाऽपन्हियेपराभूये, सुषुप्सामि.

Sleet, *s.* शीकरः, तुषार or शीकर-वर्षः or [आसारः.

Sleeve, *s.* पिप्पलः; 'to laugh in one's s.' अंतर् हस् 1 P.

Sleigh, *s. See* **Sledge.**

Sleight, *s.* (Of hand) हस्तलाघवं-कौशलं, माया, इंद्रजालं.

Slender, *a.* प्र-,तनु, कृश, क्षीण, क्षाम; 'having a s. waist', 's.-waisted' क्षीण or तनु-मध्य or मध्यम, कृशोदर, मृग or सिंह-कटि or मध्य; 's.-waisted woman' सुमध्यमा, कृशोदरी, तनुमध्या, वेदिविलग्नमध्या. **2** अल्प, क्षुद्र, लघु, तनु; 'possessed of s. means' क्षीणविभव. **-ness,** *s.* तनुता, कृशता, कार्श्यं, तानवं, अल्पता.

Sleuth, *s.* पदवी, पद्धति *f.*

Slice, *s.* खंडः-डं, शकलः-लं, छेदः, भागः, लवः. *-v. t.* खंड् 10, छिद् 7 P, खंडशः छिद्.

Slide, *v. i.* अव-वि-सृप् 1 P; 's. up and down' आरोहावरोहं कृ 8 U. **2** च्यु 1 A, स्खल् 1 P, भ्रंश् 1 A, 4 P. **-ing,** *s.* विसर्पः, अवसर्पणं, स्खलनं.

Slight, *a.* सु-,अल्प, स्तोक, क्षुद्र, तनु, लघु, ईषत् in comp.; 'a s. blow' लघुप्रहारः, ईषदाघातः; 'in a s. degree' ईषत्, किंचित्, मनाक्, स्तोकं, कियत्; 'not in the s. est degree' न मनागपि-किंचिदपि-स्तोकमपि. *-v. t.* उपेक्ष् 1 A, अवधीर् 10, अव-ज्ञा 9 U, तृणीकृ 8 U, तृणाय मन् 4 A, अवमन् 4 A, अवगण् 10; *See* **Contemn.** *-s.* उपेक्षा, अवधीरणं-णा, अवज्ञा, अवमानः, अनादरः, अवगणनं-ना. **-er,** *s.* उपेक्षकः, मंदादरः. **-ing,** *a.* सावज्ञ, अनादरपूर्वक, सावमान. **-ingly,** *adv.* सोपेक्षं, अनादरेण. **-ly,** *adv.* ईषत्, मनाक्, किंचित्, स्तोकं, अल्पमात्रं, by आ pr.: 's. blue' आनील, ईषन्नील.

Slim, *a. See* **Slender.**

Slime, *s.* पंकः, श्यानकर्दमः, सांद्र-श्यान-पंकः. **-y,** *a.* श्यान, पंकिल, चिक्कण, सांद्र.

Sling, *s.* क्षुगः, भिंदि(द)पालः, गोफणा. **2** दोला, काचः, शिक्यं, भारयष्टि *f.* *-v. t.* सुगेण क्षिप् 6 P or प्रास् 4 P. **2** उद्-बंध् 9 P, काचयति-आंदोलयति (D.).

Slink, *v. i.* अलक्षितं-निभृतं-अपया 2 P or अपगम् 1 P or अपसृप् 1 P or अपक्रम् 1 U, 4 P, छलेन अप-या, &c.

Slip, *v. i.* प्र-,स्खल् 1 P, (fig. also): वचनानि स्खलयन् पदे पदे (K. iv. 12) 'making their words slip.' &c.; चल् 1 P. **2** सहसा-अलक्षितं-अज्ञातः-निर्गम् 1 P or अपसृप् 1 P. **3** (Off) च्यु 1 A, प्र-,भ्रंश् 1 A, 4 P, स्रंस् 1 A, निर्-,गल् 1 P, पत् 1 P; 's. away' व्यप-या 2 P, अपसृप्-गम्; *See* **Slink;** 's. in' अलक्षितं आ-प्र-विश् 6 P; 'let s. an opportunity' अवसरं-समयं न ग्रह् 9 U or अवाक्षिप् 6 P. *-v. t.* अलक्षितं नि-धा 3 U or प्र-नि-विश् c. **2** वि-,मुच् 6 P, क्षिप्, भ्रंश् c.; अवगण् 10, उपेक्ष् 1 A, च्यु c, त्यच् 1 P, *See* **Neglect.** **3** शिथिलीकृ 8 U. स्रंस् c., शिथिलयति (D.); *See* **Loose.** *-s.* स्खलनं, स्खलितं, (fig. also); 's. as to names' गोत्रस्खलितं; प्र-,भ्रंशः, च्युति *f.*, पतनं. **2** दोषः, प्रमादः, अपराधः, भ्रमः, स्खलितं. **3** विटपः, शाखा, पल्लवः, कांडः. **4** खंडः-डं. **-pery,** *a.* पिच्छिल, मेदुर, चिक्कण, स्निग्ध, श्लक्ष्ण; 's. ground' निपत्या, पिच्छिलभूमिः. **2** अस्थिर, चल, लोल, तरल, अनवस्थित, चपल, चंचल; *See* **Fickle.**

Slipper, *s.* (लघु) पादुका, पादत्रं, उपानह् *f.*

Slit, *s.* दीर्घच्छेदः-वेधः-छिद्रं.

Slobber, *v. i.* लालां स्रु c.

Slop, *s.* (S. s) अधोंशुकं, अधोवसनं. **2** अमेध्यं-अपवित्रं-जलं, मलिनं-समलं-जलं. **3** कर्दमः, पंकः. *-v. t.* इतस्ततः प्रमादात् पत् c. or क्षिप् 6 P. **-py,** *a.* पंकिल, अनूप, सकर्दम.

Slope, *v. i.* अवसृप् 1 P, प्रवणीभू 1 P, क्रमशः निम्नीभू. *-v. t.* आवृज् 10, प्रवणीकृ 8 U. *-s.* प्रावण्यं; प्रवणभूमिः, अवसर्पिणी भूमिः; क्रमशः निम्नता. **2** (Of a mountain) नितंबः, उत्संगः, कटकः-कं; 'mountain s.' गिरिनितंबः; अवसर्पिणी भूः. **-ing,** *a.* प्रवण, अवसर्पिन्, क्रमशः निम्न, पातुक.

Slot, *s.* छिद्रं. **2** कीलकः.

Sloth, *s.* तंद्रा, आलस्यं, तंद्रि-द्री *f.*, तंद्रिका, कार्यविमुखता. -**ful,** *a.* अलस, तंद्रिल, तंद्रालु; *See* **Lazy.**

Slouch, *v. i.* अलसं चल् or गम् 1 P. -**ing,** *a.* प्रलंब, निम्न

Slough, *s.* निर्मोकः, कंचुकः, अहि-भुजंग-त्वच् *f.* 2 महापंकः, पंकिलस्थानं, पंकाढ्य-स्थलं,

Sloven, *s.* अविनीत-अपरिष्कृत-वेशः. -**ly,** *a.* मलिन, अव्यवस्थित; अविनीत, अपरिष्कृत, अविनीत-अपरिष्कृत-वेश. -**liness,** *s.* अव्यवस्था, अपरिष्कारः, मालिन्यं.

Slow, *a.* मंद, (in all senses); मंदाग्निः, मंदगतिः, मंदमतिः, मंदविषं, &c.; मंदगति-गामिन्, अद्रुत; आक्षिप्र, अशीघ्र; मंथर, 'a mind s. to discriminate' मंथरविवेकं चेतः; 's. in recognizing' प्रत्यभिज्ञान-मंथर (S. 4.). 2 विलंबित; कालातीत अतीतसमय; *See* **Late.** 3 मंदमति-धी-बुद्धि, जड or स्थूल-बुद्धि or मति, &c.; *See* **Dull.** 4 दीर्घसूत्र-त्रिन्, चिरक्रिय; 's. time' विलंबितवृत्ति *f.*; 's. fever' जीर्णज्वरः. -**ly,** *adv.* मंदं, मंदं मंदं, मंथरं; शनैः, शनैः शनैः, अशीघ्रं, अद्रुतं, विलंबेन. -**ness,** *s.* मांद्यं, मंदता; विलंबः, दीर्घसूत्रता, &c.

Sludge, *s.* पंकः.

Slug, *s.* प्रक्षेपणी गुलिका. 2 मंदः, अलसः, जडः, तुंदपरिमृजः, शीतकः, आलस्यशीलः, तंद्रालुः, स्थूल-जड-मतिः. -**gard,** *s.* *See* s. 2 above. -**gish,** *a.* मंद, अलस, तंद्रालु, मंदगति, आलस्यशील; *See* **Dull.** -**ly,** *adv.* मंदं, अलसवत्. -**ness,** *s.* मांद्यं, आलस्यं, तंद्रा, जाड्यं.

Sluice, *s.* (जल-) प्रवाहः,: प्रपातः. 2 द्वारं, परि(री)वाहः, :जलनिर्गमः.

Slumber, *v. i.* प्र-,स्वप् 2 P; अनिर्भरं स्वप्; (fig.) अनुपयुक्त-अव्यापृत-*a.* स्था or भू 1 P. -*s.* लघु-अल्प-अगाढ-निद्रा.

Slur, *s.* कलंकः, दूषणं, अकीर्तिचिह्नं. -*v. t.* 'cast a s. on' कलंकयति-मलिनयति- (D.), मलिनीकृ 8 U, दुष् c. (दूषयति). 2 प्र-,छद् 10, गुह् 1 U.

Slush, *s.* कर्दमः, सजलपंकः.

Slut, *s.* बंधकी, अविनीता, पुंश्चली; *See* **Prostitute,** -**tish,** *a.* अविनीत. अपरिष्कृतवेश.

Sly, *a.* धूर्त, कितव, कापटिक-छाद्मिक-(की *f*), समाय, सव्याज, वंचन-कपट-पटु. 2 चतुर, विदग्ध; 's. laugh' अंतर्हासः. -**ly,** *adv.* चतुरं, धूर्ततया, वैदग्ध्येन, सव्याजं, समायं. 2 निभृतं, अलक्षितं. -**ness,** *s.* व्याजः, छलं, छद्मन् *n.*, कापट्यं, माया, धूर्तता, वैदग्ध्यं, चातुर्यं.

Smack, *v. t.* Ex. by गंध, स्वाद in comp.; आ-अव-भास् 1 A; *See* **Savour.** -*v. t.* आ-,स्फुट् c.; आस्फल् c. 2 सशब्दं चुंब् 1 P. -*s.* आ-,स्वादः, रसः, गंधः. 2 आस्फोटनं. आस्फालनं; परुषस्वनः. 3 सशब्दचुंबनं.

Small, *a.* अल्प, स्तोक, (of quantity). 2 लघु, तनु, अणु, क्षुद्र; अल्प-क्षुद्र-तनु, अल्प-शरीर, अगुरु, अबृहत्, अमहत्; oft. ex. by क affixed; *See* **Little;** 's. tree' वृक्षकः; 's. boy' बालकः &c. 3 (Voice) नीच, अगुरु; 's.-pox' मसूरी-रिका, विस्फोटकः; शीतला, वसंतरोगः (modern names).

Smart, *a.* तीक्ष्णमति, कुशाग्रबुद्धि, प्रदीप्तप्रज्ञ, चतुर; विदग्ध. 2 तीव्र, तीक्ष्ण, शीघ्र, द्रुत, लघु; आशु-शीघ्र-कारिन्. 3 (Speech &c.) सरस, मार्मिक (की *f.*), रसिक, रसगर्भ. 4 शोभन, सुवेश, प्रफुल्ल, सु pr. 5 (Pain &c.) तीव्र, तीक्ष्ण, उग्र, दुर्विषह; वेगवत्. -*s.* तीव्रवेदना, तीक्ष्णव्यथा-वेदना; शूलः-लं. -*v. i.* व्यथ् 1 A, तप् pass., तीक्ष्णव्यथां अनुभू 1 P; 'I am s. ing under the defeat' पराभवो मम हृदि प्रत्युप्तं शल्यमिव; न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्पंदते (Vi. 5.). -**ly,** *adv.* तीक्ष्णं, तीव्रं, शीघ्रं, द्रुतं; लाघवेन, शोभनं, सु pr. -**ness,** *s.* तीव्रता, तीक्ष्णता; शीघ्रमतित्वं, मार्मिकता, सरसता; शोभा, &c.

Smash, *v. t.* चूर्ण् 10, वि-,मृद् 9 P, निष्पिष् 7 P, भंज् 7 P, प्रमंथ् 9 P, निर्दल् c. (दलयति); *See* **Break.** -*s.* प्रमाथः, निर्दलनं, विमर्दः, चूर्णनं, निष्पेषः-षणं.

Smatter, *v. i.* अल्पं ज्ञा 9 U, पल्लवग्राहि पांडित्यं कृ 8 U, किंचित् अवगम् 1 P. -**er,** *s.* चुंबकः, पल्लवग्राहिपंडितः; अल्पज्ञः. -**ing,** *s.* अल्पज्ञानं, पल्लवग्राहि पांडित्यं; oft. ex. by किंचित्, अल्पमात्रं; 's. of knowledge' अत्यल्पं ज्ञानं.

Smear, *v. t.* लिप् 6 P, वि-प्र-आ-अव-°, अभि-, अंज् 7 P or c., दिह् 2 U. -**ing,** *s.* लेपः-पनं, अंजनं.

Smell, *s.* घ्राणं; 'sense of s.' घ्राणेंद्रियं; घ्राणशक्ति *f.*, गंधग्रहणशक्तिः. 2 आ-,घ्राणं, गंधग्रहणं. 3 गंधः, वासः, आमोदः; *See* **Odour, Fragrance.** -*v. t.* घ्रा 1 P, आ-उपा-° -*v. i.* Ex. by गंध in comp. or सगंध-तुल्यगंध-*a.*; 's. ing of honey' मधुगंधि; 's. ing like fat' वसागंधि; 'the flower s. s sweet' मधुरोस्य कुसुमस्य गंधः; 'it s. s of smoke' धूमसगंधमेतत्. -**ing,** *a.* गंधग्राहिन्. 2 गंधयुत, सगंध, वासयुक्त.

Smelt, *v. t.* वि-ली c., वि-द्रु c. -**er,** *s.* लोहद्रावकः; लोहकारः.

Smile, *v. i.* स्मि 1 A, मंदं विहस् 1 P, ईषद् हस्, मंदस्मितं-मंदहास्यं-कृ 8 U; 's. on' अनुग्रह् 9 P; प्र-सद् 1 P, प्रसन्न-कृपार्द्रदृष्टि-*a.* भू (with loc.); 'fortune s. s on you' भाग्यशाली भवान्.

-*s.* स्मितं, मंदहासः-हास्यं-स्मितं, विहसितं, विहसनं; 'speaking with a s.' स्मितपूर्वाभिभाषिन्; 'with a s.' सस्मितं. -ing, *a.* स्मेर, सस्मित, स्मयमान, प्रसन्न, प्रफुल्ल; 's. sweetly' शुचिस्मित, चारुहासिन्; 'a s. countenance' स्मेर-हास्य-मुखं, प्रसन्न-प्रफुल्ल-वदनं. -ingly, *adv.* सस्मितं, विहस्य.

Smirch, *v. t.* मलिनीकृ 8 U.

Smirk, *s.* विकृतहासः, विलक्षस्मित. -*v. i.* कृ 8 U with (*s.*)

Smite, *v. t.* हन् 2 P, प्र-हृ 1 P, तड् 10, नि-अप-कृ 8 U, तुद् 6 P; व्यध् 4 P; 's. en with anxiety' संस्पृष्टमुत्कंठया (S. 4); 's. en by love' मदनबाणहत, कामोपहत, कामार्त, मदनसंतप्त, अनंगपीडित. 2 हन्, सृ c., सूद् 10; *See* **Kill.** -er, *s.* हंतृ *m.* सूदनः, घातकः.

Smith, *s.* शिल्पिन् *m.*, कारः in comp.; 'iron s.' लोहकारः, अयस्कारः; स्वर्णकारः, &c. -ery, -y. *s.* शिल्प-कर्म-शाला; लोहकारशाला.

Smock, *s.* (स्थूल) शाटकः, अधोवसनं.

Smoke, *s.* धूमः-मिका, धूपः-पिका; 'a quantity of s.' धूम्या; 'cloud of s.' धूमपटलं-ओघः. -*v. t.* (धूमनालीं) पा 1 P, सेव् 1 A. 2 धूमेन क्षुभ् c. or क्षुभ् c., धूप् 1 P, 10, धूम्रयति-धूमयति-(D.). -*v. i.* धूमायते (D.), धूमं उत्क्षिप् 6 P or उद्-गॄ 6 P or निः-सृ c. or उत्सृज् 6 P; 's. ing food' धूमं विसृजत् (मोष्णं) अन्नं. 2 धूमनालीं पा. -er, *s.* धूमपाः, धूमपायिन्-सेविन् *m.* -ing, *s.* धूमपानं. 2 धूमोत्क्षेपः-पणं. -less, *a.* निर्धूम, धूमहीन-रहित. -y, *a.* सधूम, धूमावरुद्ध, धूमबहुल. 2 धूम्र, धूमाभ, धूमल, धूमाकार. 3 धूमगंध-स्वाद.

Smooth, *a.* सम; श्लक्ष्ण, मृदु (fig. also); स्निग्ध, मसृण, अरूक्ष; अपरुष, अकटु, अकर्कश (sound); 'by s. words' श्लक्ष्णया गिरा, सांत्ववादेन, मृदुभिर्वचोभिः; 'by s. remedies' सामोपायैः. 2 धारावाहिन्, विसारिन्, सततप्रवाहिन्; निरुपप्लव, निर्विघ्न, निरंतराय, निर्बाध, (business &c.); शांत, अक्षुब्ध, प्रसन्न, अनुत्तरंग, निर्वात (water). -*v. t.* समीकृ 8 U, श्लक्ष्णीकृ. 2 अविघ्न-*a.* &c. कृ, निर्विघ्नीकृ. -ly, *adv.* सुखेन, निर्विघ्नं, निरंतरायं, अनायासेन. -ness, *s.* श्लक्ष्णता, स्निग्धता, मृदुता, अक्षोभः, प्रसादः, &c.

Smother, *v. t.* श्वासं अव-नि-रुध् 7 U, श्वासावरोधं कृ 8 U. 2 प्रति-, स्तंभ् 9 P, निग्रह् 9 P, नियंत्र् 10, नियम् 1 P. -ed, *a.* रुद्ध-श्वास-प्राण.

Smoulder, *v. i.* अंतर् ज्वल् 1 P or स्फुर् 6 P or दह् pass., better by 's. ing'; 'just as a s.-ing tree bursts into flame' अंतःप्रसुप्तदहनो ज्वलतीव वनस्पतिः (U. 4). -ing, *a.* अंतर्दाहिन्-ज्वालिन्, गूढदाहवत्, प्रसुप्तदहन.

Smudge, *v. t.* मलिनयति (D); कृष्णी-अस्पष्टी-कृ 8 U, दिह् 2 U; -*s.* मलं, कलुषं, कलंकः.

Smug, *a.* शोभन, सुवेश।

Smuggle, *v. i.* प्रतिषिद्धानि भांडानि आहृ 1 P or आनी 1 P.

Smut, *s.* मसी, मलं. 2 अश्लीलवाच् *f.*, दुरुक्तं, दुर्वचनं. -*v. t.*, **Smutch,** *v. t.* मलिनीकृ 8 U, मलीमसीकृ, मलिनयति (D.). -ty, *a.* मलिन, मलीमस. 2 अश्लील, दुरुक्त, अवाच्य.

Snack, *s.* *See* **Share, Repast.**

Snaffle, *s.* लघुवल्गा.

Snail, *s.* शंबूकः, कोष-कवच-स्थः. 2 मंथरः.

Snake, *s.* सर्पः, भुजगः, भुजंगः-गमः, पन्नगः, अहिः, नागः, उरगः, उरंगमः, विषधरः, भोगिन् *m.*, व्यालः, आशीविषः, फणिन् *m.*, दर्वीकरः, जिह्मगः, पवनाशनः, कुंभीनसः, दंदशूकः, चक्रिन् *m.*, द्विजिह्वः, द्विरसनः, सरीसृपः, कुंडलिन् *m.*, गूढपाद् *m.*, चक्षुःश्रवस् *m.*, काकोदरः, दीर्घपृष्ठः, बिलेशयः; 'hooded s.' फणभृत् *m.* भोगधरः, भोगिन् *m.*; 's. without poison' राजि(जी)लः, डुंडुभः; 's. with a spotted skin' मालुधानः, मातुलाहिः, चित्रसर्पः; 'that has cast off his slough' निर्मुक्तः, मुक्तकंचुकः; 'his venom' क्ष्वेडः, गरलं, विषं; 'his hood' स्फटा, फटा, फणा, स्फोटा दर्वी; 'charmer of s. s' अ(आ)हितुंडिकः, व्यालग्राहिन् *m.* -y, *a.* (*s.*) in comp.; आहेय (यी *f.*).

Snap, *v. t.* (अकस्मात्) त्रुट् c., भंज् 7 P, खंड् 10, छिद् 7 P. 2 आ-, स्फल् c., सहसा ग्रह् 9 U or उद्-हृ 1 P. 3 अकस्मात् दंश् 1 P; 's. the fingers' अंगुली स्फुट् c., छोटिकां दा 3 U or कृ 8 U. -*v. i.* (सहसा) त्रुट् 4, 6 P, दल् 1 P स्फुट् 6 P, भंज्-भिद् pass. 2 क्वण् 1 P. 3 भष् 1 P. 4 दंश् 1 P, दंतैः ग्रह् 9 U. -*s.*, -ping, *s.* त्रोटनं, आस्फालनं, आस्फोटनं, आकस्मिकभंगः. 2 छोटिका, मुकु(चु)टी, अंगुलिभंगः. 3 आकस्मिकदंशः. -pish, *a.* दंशनशील, दिदंक्षु. 2 कर्कश, परुष, दुःशील, कुक्कुरस्वभाव.

Snare, *s.* पाशः, वागुरा, जालं; 'take in a s.' जाले बंध् 9 P; (fig.). उन्मार्गेण-अपथेन-प्रवृत् c. or गम् c. (गमयति) -*v. t.* पाशे पत् c., पातयित्वा बंध् 9 P, पाशीकृ 8 U; जाले बंध्.

Snarl, *v. i.* भष् 1 P, रै 1 P; गर्ज् 1 P. 2 परुषं-कर्कशं-वद् 1 P. -er, *s.* भषकः, कर्कशः, श्वशीलः-स्वभावः.

Snatch, *v. t.* (away) आच्छिद् 7 P, (कृपाणपातविषयात आच्छिंदतः प्रेयसीं Mal.

5); आक्षिप्य ग्रह् 9 U, झटिति ग्रह् or हृष् 1 P or हृ 1 P or धृ 1 P, 10 or आ-कल् 10 (कलयति). **-at,** ग्रहीतुं प्रवृत् 1 A, सवेगं ग्रह् desid. (जिघृक्षति). **-off,** अपहृ, मुष् 9 P, चुर् 10. **-out,** उत्-कृष्, निर्हृ, उद्धृ, उन्मूल् 10, वि-उत्-पट् 10. **-up,** उत्क्षिप् 6 P, (उत्क्षिप्यैनां ज्योतिरेकं जगाम S. 5.). **-s., -ing,** *s.* आकस्मिकग्रहणं-धरणं; आच्छेदः, सहसा आकलनं. 2 अल्पांतरं, अल्पावकाशः. 3 क्षण-आकस्मिक-प्रवृत्ति *f.*; 'by s. es' खंडशः; 's. es of moonlight' कदाचित्कः चंद्रप्रकाशः. **-ing,** *a.* लोलुप, गृध्नु; *See* **Greedy.**

Sneak, *v. i. See* **Slink. -ing,** *a.* कुत्सितवृत्ति, अधम, कापुरुषवृत्ति; *See* **Mean.**

Sneer, *v. i.* (at) अव-उप-हस् 1 P (with acc.); सहासं अवज्ञां सूच् 10; अव-ज्ञा 9 U; अवमन् 4 A; *See* **Deride. -s.** अव-उप-हासः; अवज्ञाहासः. **-ingly,** *adv.* सोपहासं, सावज्ञं.

Sneeze, *v. i.* क्षु 2 P, कृ 8 U with (*s.*) **-s., -ing,** *s.* क्षुतं, क्षवः, क्षवथुः, क्षुत् *f.*, हंजिः, छिक्का.

Snicker, Snigger, *v. i.* अंतर् हस् 1 P.

Sniff, *v. t.* नासाद्वारेण निःश्वस् 2 P.

Snip, *v. t.* अग्रभागं-अग्रं-लू 9 U; *See* **Nip.**

Snipe, *s.* दीर्घचंचुः. 2 **Fool,** q. v.

Snivel, *s.* नासामलं, सिंहा(घा)णं-नं. **-v. i.** मलं स्रु c.; 'he s. s' तस्य नसः मलं स्रवति.

Snob, *s.* सभ्यंमन्यः, भद्रमानिन् *m.*

Snooze, *See* **Nap.**

Snore, *v. t.* घर्घरायते (D.), घर्घररवं कृ 8 U. **-ings.** *s.* घर्घरः, घर्घररवः, क्रथनं.

Snort, *s.* फू(फु)त्कारः. **-v. i.** फूत्कृ 8 U, फुत्कारं मुच् 6 P.

Snot, *See* **Snivel.**

Snout, *s.* प्रोथः, नासा, पोत्रं.

Snow, *s.* हिमं, तुषारः, तुहिनं, प्रालेयं, अवश्यायः, नीहारः, मिहिका; 'flo' of s.' तुषारस्रुति *f.*, हिमनिष्यंदः; 's.-drift,' 'mass of s.' हिमानी, हिमसंहति *f.*, हिमराशिः; 's.-capped' हिमावृतशिखर; 's.-storm' हिमवर्षः-संपातः. **-v. i.** हिमं वृष् 1 P, हिमकणान् मुच् 6 P. **-y,** *a.* हिमवत्, हैम(मी *f.*); तुषार-हिम-मय (यी *f.*), हिमावृत, (*s.*) in comp.; 's. mountain' हिमाद्रिः, तुहिनाचलः, &c. 2 हिमाभ, हिमवर्ण.

Snub, *v. t.* पराभू 1 P, अधिक्षिप् 6 P; प्रत्यादिश् 6 P, अधरीकृ 8 U, अपकृष् 1 P, वाचं रुध् 7 U; 's. nose' चिपिटनासा, नतनासिका; 's.-nosed' अवटीट, अवनाट, अवभ्रट, नतनासिक, चिपिट.

Snuff, *s.* नस्यं, नासाचूर्णं, क्षुत्करी; 's.-box' नस्यधानी, नस्याधारः. 2 दग्धवर्ति *f.*-तूला, छत्रं. **-v. t.** निश्वस् 2 P, अंतर् ग्रह् 9 U. 2 दग्धवर्तिं अवच्छिद् 7 P, छत्रं अपनी 1 P; 's. out' निर्वा *See* **Extinguish. -ers,** *s.* वर्तिकर्तनी-छेदनी. **-y,** *a.* नस्यदूषित-मलिन.

Snuffle, *See* **Snort.**

Snug, *a.* सु-,संहत, सु-,प्रच्छन्न, सुगुप्त, आवृत, सुगूढ, सुसंश्लिष्ट, सुरक्षित. 2 सुखावह, हितकर (री *f.*), सुस्थ, सुस्थित, सुख, स्वस्थ. 3 निकटशायिन्. **-ly,** *adv.* सुखेन, यथासुखं; सुसंहतं, सुसंश्लिष्टं, सुगुप्तं. **-Snuggle,** *v. i.* निकटे-पार्श्वतः-शी 2 A.

So, *adv.* तथा, एवं, तद्वत्, एवंविधं; इति, इत्थं. 2 ईदृक्, एतावत्, इयत्, तथा, एतादृशं. 3 तत्, तेन, तस्मात्, ततः 'as-s.' यथा-तथा; 's.-that' तथा-यथा; 's. and so' अमुक (की *f.*); मया अमुकसूनुना लिखितं अमुकेन (Y. ii. 88) 'written by me s. and s., the son of s. and s.'; 's.-called' नाम, नामन् in comp.; 's. far' एतावत्, एतदवधि; एतावत्पर्यंतं; 's. far as' तावत्, oft. ex. by इति; *See* **As**; 's. forth' इत्यादि, एवमादि; 's. long' एतावत्कालं यावत्, इयतो दिवसान्, इयंतं कालं; 's. long as' यावत्-तावत्; 's. many' इयत्, एतावत्; 'as many' 's. many' यावत्-तावत्; 's. much' (*adv.*) तादृक्, ईदृक्, तथा; (*a.*) एतावत् इयत्; 's. that' येन, यथा; 's. then' एवं तर्हि, एतावता, एवं च; 's. much as' अपि, अपि तावत्; 'could not s. much as wet the tip of his bill' चंच्वग्रमपि तावत् जलक्लिन्नं कर्तुं नाशकत्.

Soak, *v. t.* (चिरं) मस्ज् c. (मज्जयति), जलेन सिच् 6 P, क्लिद् c., आ-प्लु c., अभ्युक्ष् 1 P. **-ed,** *a.* जल-सिक्त-क्लिन्न, अभ्युक्षित.

Soap, *s.* मार्जनलेपः; perhaps अरिष्टः, फेनिलः (s. berry plant). **-y,** *a.* चिक्कण, स्निग्ध.

Soar, *v. t.* उत्पत्-उद्भ्रम् 1 P, उड्डी 1 A, ऊर्ध्वं विसृप् 1 P or डी; 'the aspirations of the great s. high' उत्सर्पिणी महतां प्रार्थना (S. 7); 'high-s. ing hope' दूराधिरोहिणी आशा (S. 5) **-er,** *s.* उड्डयनकृत् *m.* **-ing,** *s.* ऊर्ध्वगमनं, उड्डयनं, ऊर्ध्वारोहणं, दूराधिरोहणं.

Sob, *v. i.* सगद्गदं रुद् 2 P or क्रंद् 1 P, फु(फू)त्कृ 8 U. **-bing,** *s.* फु(फू)त्कारः, गद्गदः, सगद्गदाक्रंदनं. **-bingly,** *adv.* सगद्गदं, गद्गदगिरा.

Sober, *a.* शांत, धीर, गंभीर, स्थिर, स्थिरमतिबुद्धि, विचारशील. 2 अमत्त, अक्षीव, निर्मद. 3 (In drinking) पानाप्रसक्त, पानसंय-

मिन्, अनतिपायिन्. 4 मित, परिमित, नियत, समर्याद. -*v. t* निर्मदीकृ 8 U, स्थिरीकृ, मदं अपनी 1 P, स्थैर्यं आ-पद् c. -**ed**, *a.* विगतमद, निर्मद, नष्टमद. -**ly**, *adv.* धीरवत्, गंभीरं, शांतचेतसा, विचारपूर्वं; सविवेकं. -**ness, Sobriety**, *s.* धीरता, गांभीर्यं, स्थैर्यं, विचारशीलता, सुविचारः; शांति *f.*, अनुद्वेगः, अरभसः. 2 अमत्तता, मदाभावः. 3 संयमः, निग्रहः, पानाप्रसक्ति *f.*, मितपानं.

Sobriquet, *s.* उपाधिः, उपनामन् *n.*

Sociable, *a.* संगमप्रिय, संसर्गप्रिय-शील, जनसंगशील, संवासप्रिय-शील. 2 सुजन, मधुरालाप, सुशील, संलापप्रिय, स्नेहबुद्धि. -**ness, Sociability**, *s.* संसर्गशीलता, जनसंगमप्रीति *f.*; सौजन्यं, सुशीलं, संलापप्रियता-शीलता.

Society, *s.* संगमः, संगः, संसर्गः, समागमः, सहवासः, संगति *f.*, संवासः, साहचर्यं. 2 श्रेणी, संघः. 3 समाजः, लोक or जन-समूहः or संघः, पंक्ति *f.*, सभा-संसद्-परिषद्-*f.*; 'admissible into s.' पांक्तेय, पांक्तेय, सभ्य. -**Social**, *a.* सामाजिक, सांसर्गिक (की *f.*); oft. ex. by (*s.*) in comp.; 's. interest' समाजहितं; 's. intercourse' अन्योन्यसंघट्टनं, परस्परसंसर्गः-व्यवहारः. 2 **Sociable**, q. v. 3 संसर्ग or संगम-रूप or आत्मक.

Sociology, *s* समाजशास्त्रं.

Sock, *s.* पादत्रं, (और्णं) पादत्राणं.

Socket, *s.* आधारः, पात्रं, भाजनं.

Sod, *s.* शाद्वलं, तृणावृतभूभागः.

Sodality, *s.* मंडलं, संघः. 2 धर्मपथः

Sodden, *a.* अति-सिक्त-क्लिन्न; शून.

Sodomy, *s.* पुंमैथुनं, पुरुषमेहः, पायु-गुदमैथुनं. -**Sodomite**, *s.* पुरुषमेहिन् *m.*, गुदमैथुनकृत्.

Sofa, *s.* पर्यंकः, मंचः, शय्या; शयनं, आसनं.

Soft, *a.* मृदु (in all senses); प्रकृत्या मृदुः, मृदुर्गीः, मृदु पुष्पं, मृदुरुपायः. &c.; 'even red-hot iron becomes s.' अभितप्तमयोपि मार्दवं भजते (R. viii. 43); 'neither very severe nor very s.' न खरो न च भूयसा मृदुः (R. viii. 9); कोमल, मृदुल, पेलव, सुकुमार, अप्रखर, अपरुष, अकठोर, अनुग्र, अकठिन, अकर्कश, सौम्य (disposition). 2 स्निग्ध, श्लक्ष्ण, मसृण, मृदु-सुख-स्पर्श; अशिथिल, अदृढ, अघन; (voice) मधुर, मृदु, मंजुल; (in mind) सुप्रतार्य, अल्पबुद्धि, बालिश. -*interj.* तूष्णीं भव, तूष्णीं, शांतं, नचिरैः. -**en**, *v. t.* मृदूकृ 8 U, कृ with (*a.*) (with pity) दयार्द्रीकृ, वि-,द्रु c., करुणया मृदु c. 2 शम् c. (शमयति), प्र-,उप-°, सांत्व् 10, लघूकृ, लघयति (D.): *See* **Alleviate.** -*v. i.* मार्दवं भज् 1 A, भू 1 P with (*a.*); मृदूभू, दयार्द्रीभू; प्र-,शम् 4 P; *See* **Melt.** -**ening**, *a.* शांतिद, शांतिकर (री *f.*), शमक-न. -**ly**, *adv.* मृदु, कोमलं, समार्दवं, &c. 2 लघुगत्या, चपलं. 3 निःशब्दं, निभृतं, मंदं, शनैः, शनैः शनैः. -**ness**, *s.* म्रदिमन् *m.*, मार्दवं, सौकुमार्यं, कोमलता, शैथिल्यं, मसृणता, माधुर्यं, &c.

So-ho, *interj.* हंहो, भो भोः.

Soil, *s.* भूः, भूमि *f.*, प्र-,देशः, स्थलं-ली; (earth) मृद् *f.*, मृत्तिका; 'native s.' जन्मभूमिः; 'fertile s.' उर्वरा, सर्वसस्याढ्या; 'dry s.' मरुः, धन्वन् *m.*; 'barren and salt s.' ई(इ)रिणं; 'waste s' खिलं, अप्रहतभूमिः; 'stony s.' शर्करिलभूमिः. 2 मलः-लं, कल्कं, कलुषं-किट्टं, कलंकः -*v. t.* मलिनीकृ 8 U, कलुषयति-मलिनयति-कलंकयति- (D.), दुष् c. (दूषयति). -**ed**, *a.* मलिनित; कलुषित, &c.; कल्किन्, मलिन, समल, लिप्त.

Sojourn, *v. i.* अव-स्था 1 A, स्वल्पकालं निवस् 1 P, प्रवस्, देशांतरं अधि-आ-वस्, प्रवासं-यात्रां-कृ 8 U. -*s.*, -**ing**, *s.* अवस्थानं, अवस्थिति *f.*, यात्रा, प्रवासः, अल्पकालनिवासः; 'the s. of life' संसारवृत्तिः, संसारयात्रा. -**er**, *s.* आगंतुकः, अवस्थायिन् *m.*, प्रवासी, यात्रिकः, परदेशसेवी.

Solace, *v. t.* सां(शां)त्व् 10, आ-समाश्वस् c.; परितुष् c.; (oneself) विनुद् c., वि-हृ 1 P. -*s.* सान्त्वनं-ना, आश्वासनं, विनोदः-दनं, क्लेश or शोक-शांति *f.* or अपहरणं; *See* **Comfort, Console.**

Solar, *a.* सौर (री *f.*), सावन (नी *f.*); सूर्य, अर्क (**Sun**, q. v.) in comp.; 's. heat' सूर्यातपः; सूर्यवंशः, सूर्यग्रहणं, अर्कबिंबं, &c.

Solder, *v. t.* सं-धा 3 U. -*s.* संधिः, धातुलेपः.

Soldier, *s.* सैनिकः, योधः, भटः, आयुधिकः, योद्धृ *m.* शस्त्र or अस्त्र-धरः-भृत् *m.*-जीविन् *m.*-आजीवः, शस्त्र-युद्ध-उपजीवी. -**like**, -**ly**, *a.* सैनिकवत्, सैनिक इव, सैनिकयोग्य. 2 शूर विक्रांत; *See* **Brave.** -**y**, *s.* सेना, बलं, सैन्यं, योध-सैनिक-समूहः, भटगणः.

Sole, *a.* एक with एव; एकाकिन्, केवल. -*s.* तलं, पादतलं; (of shoe) पादुकातलं. -**ly**, *adv.* एक-*a.* with एव or simply एव; केवलं.

Solecism, *s.* संस्कारच्युति *f.*, अपप्रयोगः, अशुद्धप्रयोगः, म्लेच्छितं.

Solemn, *a.* पुण्य, पवित्र; विधिपूर्व, संस्कारसहित, धर्मसंस्कारयुक्त. 2 गुरु, गंभीर, धीर, उदात्त; (occasion) अलघु, गुर्वर्थ; oft. ex. by उत्सव in comp.; 's. occasions' उत्सवदिवसाः; 's. procession' यात्रोत्सवः. 3 दृढ, दृढप्रतिज्ञापूर्व, सनिश्चय, स्थिरनिश्चयात्मक; 'a s. promise' दृढप्रतिज्ञा. -**ity**, -**ness**, *s.* क्रिया, संस्कारः, धर्म-पुण्य-क्रिया, विधिः, उत्सवः. 2 गांभीर्यं, गुरुत्वं, गौरवं. 3

णाडंबरः. -ize, *v. t.* यथाविधि अनु-ष्ठा 1 P or सं-पद् c., यथाशास्त्रं निर्वह् c. 2 गौरवं उत्पद् c. or आह्व 1 P. -ly, *adv.* यथाविधि, विधिवत्, यथाशास्त्रं, विधिपूर्वं. 2 साडंबरं; धीरं, गौरवेण, सगौरवं, गंभीरं, &c.

Solicit, *v. t.* याच् 1 A, प्र-अभि-अर्थ् 10 ’. सविनयं याच् or प्रच्छ् 6 P. -ation, *s.* याच्ञा, प्रार्थनं-ना, याचना, सविनयप्रार्थना. -or, *s.* याचकः, अर्थिन्, *m.*, प्रार्थयितृ *m.*, प्रार्थकः. -ous, *a.* उत्सुक, सचिंत, सोत्कंठ; व्यग्र, उत्क in comp.; उद्विग्न, चिंताक्रांत. -ously, *adv.* उत्सुकं, सोत्कंठं. -ude, *s.* व्यग्रता, चिंता, उत्कंठा, औत्सुक्यं, उद्वेगः.

Solid, *a.* ससार, सारवत्, वास्तविक (की *f*). 2 अशून्य, सगर्भ, पूर्णगर्भ. 3 घन, सु-,दृढ, दृढसंधि; सु-,संहत, स्थूल, कठिन, संघातवत्; अद्रव; अग्निसंयोगाद् द्रवभावापत्त्या काठिन्यविनाशो भवति (S. B. 545) ‘lose their s. state’ &c. 4 (Knowledge) अगाध, परिपक्व, सुदृढ, सुपरिणत -*s.* घनः; ‘s. contents’ घनफलं. 2 संघातः, घन-अद्रव-द्रव्यं. -ify, *v. t.* घनीकृ 8 U, कठिनीकृ. -ity,-ness, *s.* घनता, काठिन्यं-दृढता. &c.

Soliloquy, *s.* स्वगत or आत्मगत-भाषण or वचः. -**Soliloquize,** *v. i.* स्वगत &c. वच् 2 P, (Say q. v.)

Solitary, *a.* विविक्त, निर्जन, विजन, निभृत, एकांत; (of persons) विविक्त or एकांत वासिन् or सेविन्, विविक्तप्रिय, एकचर, निःसंग; एक, एकाकिन्, असहाय. 2 **Single,** q. v. -*s.* विविक्तवासिन् *m.*, परिव्राज् *m.* -ily, *adv.* विविक्त, निभृतं, रहः, उपांशु. -iness, -**Solitude,** *s.* विविक्तं, निर्जनं-विजनं-स्थानं, रहःस्थानं, विजनं, अरण्यं. 2 विजनता, निर्जनता, विविक्तता. 3 विविक्ताधिवासः, विविक्तवृत्ति *f.*-सेवा, संसर्गाभावः.

Solstice, *s.* अयनांतः, अयनं, अयनकालः-संधिः, क्रांति *f.*,-कालः; ‘summer s.’ कर्कसंक्रांतिः, उत्तरायणं; ‘winter s.’ मकरसंक्रांतिः, दक्षिणायनं. -**Solstitial,** *a.* (*s.*) in comp.; ‘s. point’ अयनांतः.

Solve, *v. t.* व्याकृ 8 U, विवृ 5 U; शुध् c., वि-परि-,° व्या-ख्या 2 P, विशदीकृ, साध्-सिध् c. (साधयति), उप-प्रति-पद् c.; ‘s. the difficulties’ विषमपदानि शोधयति-विमर्शयति. 2 (Question) उत्तरं दा 3 U or वद् 1 P; ‘s. doubt’ संशयं छिद् 7 P or निराकृ or निरस् 4 U or अपनी 1 P. 3 वि-,द्रु c., वि-,ली c. -ency, *s.* समृद्धता, ऋणशोधनक्षमता. -ent, *a.* समृद्ध, सधन, ऋणशोधनक्षम. 2 द्रावण (णी *f.*), द्रावक. -*s.* द्रावणं. -**Soluble,** *a.* वि-,द्राव्य, विलाप्य, द्रवार्ह. -**Solution,** *s.* साधनं, विवरणं, &c.; व्याख्या, व्याख्यानं, सिद्धि *f.*, उपपत्ति *f.* 2 द्रावणं, विलयनं. 3 सं-,योगः.

Sombre, *a.* श्याम, मलिन. धूसर, मंद-मलिन-प्रभ.

Some, *a.* किम् (कः-का-किं) with चिद्, चन, अपि, or अमुक in comp.; ‘the son of s. one’ अमुकसूनुः. 2 (Quantity) किंचित्, कियत्, ईषत्, अल्प, स्वल्प, स्तोक; ‘to s. extent’ किंचित्, ईषत्, कियताप्यंशेन, स्तोकांशेन; ‘s.-others’ एके or केचित्-अन्ये-अपरे. 3 (Number) कतिचित्, कतिपय (यी-या *f.*); ‘going s. steps’ कतिचित् पदानि गत्वा; ‘s. how’ कथमपि, केनापि प्रकारेण, कथं कथमपि, कथंचित्, यथाकथंचित्; ‘s. how or other’ येन केन प्रकारेण; ‘s. one,’ ‘s.-body’ काश्चित्, कोपि, यःकश्चन; अमुकः, &c.; ‘s. thing’ यत्किंचित्, किमपि, किंचन, किंचित्; ‘s.-thing is better than nothing’ वधिरान्मंदकर्णः श्रेयान्; ‘s.-time’ पूर्वं, एकदा, पुरा, प्राक्, गतकाले, पूर्वकाले; ‘s.-times’ क्वचित्, कदाचित्, कदापि, कर्हिचित्; कदा कदा, काले काले; ‘s.-what’ किंचित्; किंचन, अल्पं, स्तोकं; (*adv.*) किंचित्, ईषत्, स्तोकं, आ pr., देश्य-देशीय-कल्प in comp.; or by doubling *adj.*; ‘s.-what red’ आताम्र, ताम्रकल्प, ईषद्रक्त; ‘s.-what afraid’ भीतभीत इव; ‘s.-where’ क्वापि, कुत्रचित्, कुत्रापि, यत्र कुत्रचित्, यत्र कुत्रापि.

Somer-sault,-set, *s.* ऊर्ध्वपादलंघनं.

Somnambulate, *v. t.* निद्रायां or स्वप्ने चर् 1 P. -**Somnambulism,** *s.* निद्राचारः-भ्रमणं, स्वप्नचारः. -**Somnambulist,** *s.* निद्राचारः, स्वप्नचारिन् *m.*

Somniferous, *a.* स्वाप-निद्रा-जनन (नी *f.*), निद्राकृत्, स्वापकर (री *f.*).

Somniloquist, *s.* निद्रालापिन् *m.*, निद्राभाषी.

Somnolent, *a.* निद्रालु, निद्रालस; *See* **Sleepy.**

Son, *s.* पुत्रः, सुतः, तनयः, सूनुः, आत्मजः, आत्मसंभवः, नंदनः, अंगजः, तनु(नू)जः, दारकः, कुमारः; oft. ex. by deriv.; ‘s. of Dasaratha’ दाशरथिः; गांगेयः, पांडवः, &c.; ‘s.-in-law’ जामातृ *m.* -less, *a.* अपुत्र, निपुत्रिक, निःसंतान.

Song,-ster. *s. See* under **Sing.**

Sonnet, *s.* गीतिका, गाथा, लघुगीतं-काव्यं.

Sonorous, *a.* मधुर, मंजुल. 2 व्यक्त, स्पष्ट, सुपरिस्फुट, व्यक्तवर्ण. 3 विराविन्, उच्च, सुस्वर, शब्दन, घोषण, शब्द-ध्वनि-कर (री *f.*) -ly, *adv.* मधुरं, स्पष्टं; उच्चैः; महाशब्देन. -ness, *s.* माधुर्यं, स्पष्टता, उच्चता, सुस्वरता.

Soon, *adv.* अचिरेण, अचिरात्, अविलंबं, आशु, सद्यः, झटिति, सपदि; द्राक्, द्रुतं; *See* **Quickly;** 'as s. as' (so s.), 'no s.-er than' ex. by यावत्-तावत्, च-च, मात्र in comp.; *See* **Scarcely.** **-er,** *adv.* वरं; शीघ्रं; 's. or later' अद्य श्वो वा; 'this is s. said than done' वक्तुं सुकरमिदं न तु कर्तुं.

Soot, *s.* कज्जलं, किट्टं, मसी-षी. **-y,** *a.* कज्जलमय (यी *f.*), धूमश्याम.

Sooth, *s.* सत्यं, तथ्यं; 'in s.' सत्यं, नाम, यत्सत्यं, नूनं खलु, सत्यमेव; 's.-sayer' दैवज्ञः, गणकः, मौहूर्तिकः. 's.-saying' शुभाशुभकथनं,: दैवपरीक्षा-चिंतनं.

Soothe, *v. t.* शम् c. (शमयति), प्र-उप-°, लघूकृ 8 U, लघयति (D.), निर्वा c. (वापयति); (persons) लल् 10, अनुनी 1 P, सांत्व् 10, प्र-सद् c., परि-तुष् c., आराध् c., परामृश् 6 P (by stroking), आश्वस् c. **-ing,** *a.* शमन (नी *f.*), शांतिकर (री *f.*), शांतिमद्, निर्वापयितृ, तापहर-हारिन्. 2 सांत्वक, आश्वासनशील; 'by s. words' सांत्वनीगरा, सामवचोभिः. **-s.** प्र-उप-शमनं, निर्वापणं, सांत्वनं, अनुनयः, लालनं.

Sop, *s.* पिंडः, अशं, पिष्टकखंडः.

Sophism, Sophistry, *s.* हेत्वाभासः, युक्त्याभासः, पक्षाभासः, आभासः, सत्याभासः, वाक्छलं. **-Sophist,-er,** *s.* हेत्वाभासवादिन् *m.*, तार्किकः. **-ic,-ical,** *a.* आभासरूप, हेत्वाभासरूप, सत्याभास. **-Sophisticate,** *v. t.* **Adulterate,** q. v.

Soporific, Soporiferous, *a.* निद्राजनन-स्वापन-(नी *f.*), निद्रा-स्वाप-कर (री *f.*), निद्रावह.

Sorcery, *s.* ऐंद्रजालं, माया, कुसृति *f.*, योगः, अभिचारः (black art). **-er,** *s.* ऐंद्रजालिकः, मायाकरः, अभिचारविद्. **-ess.** *s.* योगिनी, मायिनी, अभिचारिणी.

Sordid, *a.* नीच, कृपण, कुत्सित, अधम, दीन, जघन्य, निंद्य; *See* **Mean.** 2 मलिन, मलीमस.

Sore, *s.* क्षतं, व्रणः-णं, अरुष् *n.*, ईर्मं. **-a.** सरुज, जातव्यथ, दुःखित, क्षत, सव्रण; सवेदन, सव्यथ, स्पर्शासह. 2 पीडाकर (री *f.*), कष्ट-क्लेश-प्रद, दुःखद. 3 उग्र, तीव्र, दारुण, गुरु; 's. throat' कंठपाकः, कंठरुज् *f.* **-ly,** *adv.* भृशं, अतीव, नितांतं, उग्रं, दारुणं, सुतरां, बलवत्.

Sorrel, *s.* चुक्रः, सहस्रवेधिन् *m.*, अम्लवेतसः. शतवेधी. **-a.** पिंगल, पिशंग.

Sorrow, *s.* शोकः, शुच् *f.*, दुःखं, खेदः, क्लेशः, आधिः, संतापः, आर्ति *f.*, व्यथा; *See* **Grief.** **-v.** *i.* शुच् 1 P, खिद् pass., व्यथ् 1 A; *See* **Grieve.** **-ful,** *a.* सशोक, शोकार्त-आकुल-अन्वित-उपहत-आविष्ट, दुःखित, संतप्त, दुःखिन्, दुःखार्त, उद्विग्न, विषण्ण, दीन, दुर्मनस्, खिन्न, अवसन्न, म्लान, विमनस्. 2 शोच्य, शोचनीय, शोकास्पदीभूत, दुःखावह. **-fully,** *adv.* सशोकं, सखेदं, सोद्वेगं, सदुःखं. **-Sorry,** *a.* दुःखित, दुःखिन्, खिन्न, कष्टापन्न, &c.; *See* **Sorrowful.** 2 दीन, अनु-, शोच्य, कृपण, अनुकंप्य; 's. for one's past conduct' सानुशय, अनुतप्त; 'I am s. to hear this' इदं श्रुत्वा दुःखितोस्मि; 'I am s. to inform you' &c. इति भवते निवेदनं मे दुःखमावहति, निवेदयन्नहं कष्टापन्नोस्मि; 's. horse' कदश्वः; 's. fare' कदन्नं.

Sort, *s.* प्रकारः; विशेषः, भेदः in comp.; जाति *f.*, विधा in comp.; *See* **Manner;** 'a s. of tree' वृक्षविशेषः-भेदः; 'out of s. s' असुस्थ-अस्वस्थ-शरीर. **-v.** *t.* यथाक्रमं-यथावर्गं रच् 10 or विन्यस् 4 U, वर्गक्रमेण न्यस्. **-v.** *i.* युज्-उपपद्-pass., ex. by अनुरूप, युक्त; *See* **Becoming, Proper.**

Sortie, *s.* अवस्कंदः, अवपातः; *See* **Sally.**

Sot,-Sottish, *a.* पानमूढ, पानासक्त, मदोन्मत्त, सदापानरत. 2 **Foolish,** q. v.

Soul, *s.* आत्मन् *m.*; 'individual s.' प्रत्यगात्मा, विज्ञानात्मा; 'rational s.' चिदात्मा 'supreme s.' परमात्मा, ब्रह्मन् *n.*; 'animating s.' जीवात्मा, प्राणः, चेतनः, जीवः; 'embodied s.' देहिन् *m.*, शारीरात्मा, शरीरिन् *m.*, प्राणात्मा, क्षेत्रज्ञः. 2 आत्मा, चेतस् *n.*, चित्तं, मनस् *n.*, हृदयं; *See* **Mind;** 'possessed of a large s. महात्मन्, उदारचेतस्; 'oneness of s.' चित्तैक्यं, ऐक्यभावः; 'the whole s.' सर्वात्मा, सर्वभावः. 3 जीवनं, सारः; तत्त्वं, सार or तत्त्व-भागः or अंशः, सारभूतः. 4 (Self) आत्मा, स्वः. 5 वीर्यं, बलं, उत्साहः, तेजस्. 6 **Person,** q. v. 'the departed s.' प्रेतः, प्रेतनरः; 'heart and s.' प्र-नि-कामं, सर्वात्मना, सर्वभावेन; *See* **Heart;** 'he throws his heart and s. into the work' सुसमाहितेन चेतसा-सर्वात्मना कार्ये प्रवर्तते-व्याप्रियते

Sound, *s.* शब्दः, नि-, नादः, ध्वनिः, नि-, स्व(स्वा)नः, नि-ह्रादः, स्वरः, निनदः, निर्-, घोषः रावः, रवः, वि-संरावः नि-, स्वा(ध्व)नः, स्वनितं; 'musical s.' निक्वा(क्व)णः, क्वणितं; 'confused s.' कोलाहलः, कलकलः; तुमुलरवः; 'rattling s.' रणः, रणितं. 2 संधिसागरः. **-a.** सुस्थ, अरुग्ण, कल्य, निरामय, अनामय, नीरोग, नीरुज, प्रकृतिस्थ, व्याधिरहित; (in body) अक्षतशरीर, अविकलेंद्रिय (in mind) अनुपहतचित्त, अविह्वल अनाकुल, अविक्षिप्त. 2 अक्षत, अजातक्षत, अ

निर्-व्रण, क्षत-व्रण-हीन. 3 ससार, सारवत्, सारगर्भ. 4 अविकल, अन्यून, अखंड, अभिन्न. 5 तीक्ष्ण, तीव्र; निर्भर, प्र-,गाढ, सु-अति pr.; 's. sleep' गाढनिद्रा; 's. beating' तीक्ष्णदंडः, अतिताडनं. 6 निर्दोष, निश्छिद्र, विशुद्ध, दोषहीन. 7 गाढ, ग(गं)भीर, अगाध, सुपरिणत, परिपक्व. 8 (Argument &c.) अखंड्य, सप्रमाण, दृढ-सु-प्रमाण, न्याय्य, धर्म्य, युक्तिसिद्ध. 9 (In views) विशुद्धाचार; सत्यमार्गानुयायिन् —*v. i.* नि-,नद् 1 P, ध्वन् 1 P, स्वन् 1 P, क्वण् 1 P, ह्राद् 1 A, वि-,रु 2 P, स्तन्-रस्-1 P, शब्दं कृ 8 U, शब्दायते (D.). —*v. t.* ध्वन् c., स्वन् c., नद् c.; वद् c., आ-ध्मा 1 P, मुखमारुतेन पूर् 10, (trumpet, conch &c.); (drum) तड् 10, आहन् 2 U; 'the drum being s.-ed' आहतायां भेर्यां; (bow) आस्फल् c. 2 परीक्ष् 1 A, सूक्ष्मं-निपुणं-निरूप् 10 or अनुसंधा 3 U, ज्ञा desid. (जिज्ञासते). 3 उद्घुष् 10, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटीकृ; 's. the depth' तलं अवगाह् 1 A; 's. the depth of water' जलवेधं परि-मा 3 A, 2 P. **—ing**, *a.* शब्दन, मुखर, शब्दायमान, निनादिन्, निनदत्, घोषण, गर्जत्, निर्ह्रादिन्, शब्दकर (री *f.*); 's.-lead' लंबः, लंबसीसकं. —*s.* ध्वाननं, शब्दनं, वादनं.: 2 वेधपरिमाणं, तलावगाहनं. **—ly**, *adv.* तीव्रं, तीक्ष्णं, अत्यंतं, प्र-,गाढं; निर्भरं, दृढं, सुखेन, सु-अति pr. **—ness**, *s.* स्वास्थ्यं, कल्यता, आरोग्यं, अक्षतत्वं, निर्व्रणत्वं, अवैकल्यं, अन्यूनता, अखंड्यता, निर्दोषता, &c.; 's. of mind' चित्तस्वास्थ्यं, अविप्लवः.

Soup, *s.* जू(यू)षः-षं.

Sour, *a.* अम्ल, शुक्त, अम्लरस; 's. to the teeth' दंतशठ. 2 कर्कश, परुष, दारुण, रूक्ष, अरुंतुद; सदावक्र, वक्र-वाम-शील, कर्कशस्वभाव, दुष्प्रकृति. —*v. t.* अम्लीकृ 8 U. 2 कर्कशीकृ, वक्रीकृ. —*v. i.* अम्लीभू 1 P, कर्कशीभू. **—ness**, *s.* अम्लता, कार्कश्यं &c.

Source, *s.* प्रभवः, योनि *f.*, मूलं, कारणं, हेतुः, प्रसूति *f.*, उद्भवः, संभवः, आदिः, उद्गमस्थानं; *See* **Origin**; 'to have s. in' प्र-भू 1 P, प्र-,जन् 4 A, उत्पद् 4 A (with abl.); लोभात्क्रोधः प्रभवति, लोभात्कामः प्रजायते (H. 1); 'the s. of the Ganges is in the Himalaya' हिमवतो गंगा प्रभवति (S. K.).

Souse, *v. t.* सहसा प्लु c. or मस्ज् c. (मज्जयति) or जलेन सिच् 6 P. —*v. i.* **Pounce**, q. v.

Unite, *v. t.* युज् 7 U, 10, सं-समा-°, संगम् c., संहन् 2 P, समानी 1 P, सं-घट् c., संपृच् 7 P, 2 A, संधा 3 U; 'seems u. ed' भवति कृतसंधानमिव (S. 1). —*v. i.* घट् 1 A, (तप्तेन तप्तमयसा घटनाय योग्यं V. 2), संयुज् pass; एकत्र भू, सं-, मिल् 6 P; *See* Assemble. —ed, *a.* संहत; मिलित्वा; संयुक्त. —edly, *adv.* संभूय, मिलित्वा, एकीभूय, संहत- *a.* —**Union,** *s.* संगः, संगमः, समागमः, संगतिः *f.*, संहति *f.*, समवायः, सं-, योगः, संधिः; 'u. is strength' समवायो हि दुस्तरः; (*cf.* बहूनामप्यसाराणां संहतिः कार्यसाधिका 'weak faggots make a strong bundle').

Universe, *s.* विश्वं, सर्वं जगत्, त्रिभुवनं; *See* World. —al, *a.* विश्व, सार्वलौकिक-सार्वत्रिक-(की *f.*); सर्वगत, सर्व; 'u. spirit' विश्वात्मा, जगदात्मा, ब्रह्म. —ality, *s.* सर्वगतत्वं, अभिव्यापित्वं. —ally, *adv.* सर्वतः, सर्वत्र, विश्वतः, विष्वक्.

University, *s.* विद्यालय-मंडलं-गणः, शाला [मंडलं.

Univocal, *a.* एकार्थ, ऐकतानिक (की *f.*).

Unkempt, *a.* अप्रसाधित.

Unkind, *a.* अस्निग्ध, विप्रिय, निर्दय, क्रूर. —ness, *s.* निर्दयता, &c. 2 अपकारः, अहितं.

Unlace, *v. t.* *See* Free.

Unlawful *a.* Illegal, q. v.

Unlearn, *v. t.* स्मृतेः अपास् 4 U, वि-स्मृ 1 P. —ed, *a.* अज्ञान, अकृतविद्य.

Unless, *conj.* न-नो-चेत्, यदि न.

Unlicensed, *a.* विशृंखल, निरर्गल.

Unload, *v. t.* भारं अप-नी 1 P or अव-तॄ c. or अवरुह् c.; *Sec* Disburden.

Unlock, *v. t.* उद्-घट्ट् c., उन्मुद्रयति (D.).
Unloose, *See* **Loose,-en.**
Unman, *v. t.* पौरुषं नश् c. or हृ 1 P. -ly, *a.* क्लीब, पौरुषहीन, पुरुषानर्ह.
Unmask, *v. t.* छद्मवेशं अपहृ 1 P, (fig.) निजरूपं प्रकटीकृ 8 U; 'he was u. ed' तस्य वास्तविकं स्वरूपमाविष्कृतं.
Unmeaning, *a.* अनर्थक, असंगत, अपार्थ.
Unmoor, *v. t.* उन्मुच् 6 P or c.
Unmoved, *a.* स्थिर, आविचलित, निर्विकार.
Unnatural, *a.* निसर्ग or सृष्टिक्रम-विरुद्ध or बाह्य.
Unnecessary, *a.* निष्प्रयोजन, वृथा in comp.
Unnerve, *v. t.* **Enfeeble**, q. v.
Unpack, *v.t.* उद्-घट् c.,कोशात् निष्कृष् 1 P.
Unparalleled, *a.* निरुपम, अतुल.
Unprecedented, *a.* अपूर्व.
Unpretending, *a.* विनयशील.
Unprincipled, दुर्वृत्त, विचारहीन, सदसद्विवेकहीन.
Unravel, *v. t.* उद्-ग्रंथ् 9 P, व्याकृ 1 U, व्या-ख्या 2 P.
Unreal, *a.* असार, मायात्मक, अतथ्य.
Unrelenting, *a.* *See* **Cruel.**
Unremitting, *a.* दृढ, अशिथिल.
Unreserved, *a.* अशेष, निःशेष, सं-,पूर्ण.
Unrest, *s.* चिंता, वैक्लव्यं, क्षोभः, अनिर्वृतिः *f.*
Unrestrained, *a.* निरवग्रह, उच्छृंखल, उद्दाम, निर्यंत्रण, अनर्गल, निरंकुश.
Unrivalled, *a.* अप्रतिम. अद्वितीय, अतुल, अप्रतिरूप; अनुपम.
Unroll, *v. t.* *See* **Open.**
Unruly. *a.* **Ungovernable**, q. v.
Unsaddle, *v.t.* पर्याणं अपनी 1 P.
Unscrupulous, *a.* निःशंक, शंकाहीन.
Unseal, *v. t.* मुद्रां अपनी 1 P, उद्-घट्ट् c., उन्मुद्रयति (D.).
Unsettle, *v. t.* आकुलीकृ 8 U, क्षुभ् c., आकुलयति (D.); *See* **Agitate.** -ed, *a.* अस्थिर, आकुल, क्षुब्ध.
Unshackle, *v. t.* *See* **Free.**
Unsheathe, *v. t.* कोशात् उद्-हृ 1 P or निष्कृष् 1 P. -ed, *a.* विकोश, उल्लसित.
Unsightly, *a.* अप्रिय-विरूप-दर्शन, कुरूप; *See* **Ugly.**
Unsophisticated, *a.* निर्व्याज, निर्व्यलीक, सरल, ऋजु.
Unsound, *a.* असार, अयुक्तिसिद्ध.
Unspeakable, *a.* अवर्णनीय. 2 अवाच्य.
Unspotted, *a.* निष्कलंक, विमल.
Unstable, *a.* अस्थिर, चंचल.
Unsteady, *a.* *See* **Fickle.**
Unstring, *v. t.* (A bow) ज्यां अपनी 1 P or शिथिलयति (D.); 'a bow unstrung' शिथिलज्याबंधं धनुः (S. 2).
Unsuitable, *a.* अन्-उपपन्न-उचित.
Unswerving, *a.* स्थिर, दृढ, अचल.
Untenable, *a.* अरक्षणीय, अप्रतिपादनीय.
Untie, *v. t.* उत्-मुच् c., मोक्ष् 10, उद्-ग्रंथ् 9 P, शिथिलयति (D.).
Until, *prep.* *See* **Till.**
Untimely, *a.* अकाल in comp.; oft. अप pr.
Unto, *prep.* *See* **To.**
Untoward, *a.* प्रतिकूल, प्रतीप, अभद्र, कटु.
Untwist, Untwine, Unveil Unwrap, *See v. t.* **Open.**
Unusual, *a.* अपूर्व, असामान्य, अलौकिक (की *f.*).
Unvarnished, *a.* यथार्थ, यथातथ, अनलंकृत.
Unwholesome, *a.* अपथ्य, अहितावह.
Unwieldy, *a.* स्थूल, अतिमहत्, अनुत्थानयोग्य.
Unwittingly, *adv.* अज्ञात्वा, अज्ञानात्.
Unworthy, *a.* अनर्ह, अयोग्य, निर्गुण; oft. by अ; 'u. object' अपात्रं; अकार्य, &c.
Unyoke, *v. t.* मुच् c.,मोक्ष् 10. 2 वियुज् 10.
Up, *prep.*, *adv.* उत् prefixed; ऊर्ध्वं, उपरि, उच्चैः; 'up to' *See* Till; आप्रदानात् 'up to being given away' आफलोदयकर्मणां &c.; 'be up and doing' कार्यव्यग्रो भव; 'ups and downs' पातोत्पाताः; *See* **Down.** -per, *a.* उपरितन (नी *f.*), उपरिस्थ, ऊर्ध्व, उत्तर; 'to get the u. hand' अभि-भू 1 P, अतिरिच् pass; *See* **Excel.**
Upbraid, *v. t.* निर्भर्त्स् 10 A; *See* **Reproach.**
Uphold, *v. t.* समर्थ् 10, दृढयति (D.) उत्तंभ् 9 P, सं-धृ 10, आ-अव-लंब् 1 A; *See* **Support.**
Upholsterer, *s.* गृहोपस्करविक्रयिन् *m.*
Upkeep, *s.* रक्षा, रक्षणं.
Upland, *s.* उपरिभूमि *f.*, अधित्यका.
Uplift, *v. t.* उद्यम् 1 A, उत्था c., (उत्थापयति), उच्छ्रि 1 U; *See* **Raise.**
Upon, *prep.* *See* **On.**
Upraise, *See* **Uplift.**
Upright, *a.* उन्नत, उच्छ्रित, दंडवत् *ind.*, *See* ऋजु. 2 सरल, सत्यात्मन्, ऋजु; *See* **Honest.**-ly, *adv.* दंडवत्; ऋजु, सारल्येन.
Uproar, *s.* कोलाहलः, कलकलः, तुमुलं.
Uproot, *v. t.* उन्मूल् 10, मूलात् छिद् 7 P, उत्पट् 10, उद्धृ 1 P; *See* **Eradicate.**
Upset, *v. t.* परिवृत् c., पर्यस् 4 U.–*s.* पर्यासः, परिवर्तनं; *See* **Overturn.**
Upshot, *s.* परिणामः, पर्यवसानं.
Upside, *s.* अधरांशः; 'u.-down' अधरोत्तर, *a.*, अधोमुख -*a.*, 'turn u.-down' अधोमुखीकृ.

Upstart, *s.* नवोदयः, नवोत्थानः, नवर्द्धिः, आगंतुकः.

Upward, **Upwards**, *adv.* ऊर्ध्वं, उपरि. 2 अधिक in comp.; अधिकत्रिंशा नराः 'u. of 30'; परं, परः in comp. (परःसहस्राः शरदः U. 1).

Urban, *a.* पौर (री *f.*). नागरिक (की *f.*). 2 सुजन, सुशील, दक्षिण. **-ity**, *s.* दाक्षिण्यं, नागरिकवृत्ति *f.*, सौजन्यं.

Urchin, *s.* (दुष्ट-) बटुः, माणवकः.

Urethra, *s.* मूत्रमार्गः-द्वारं.

Urge, *v. t.* प्रोत्सह् c., प्रचुद् 10, उत्तिज् c., प्रणुद् 6 P or c., प्रवृत् c.; *See* **Prompt.** 2 निर्बंधेन प्रच्छ् 6 P, अनुनिर्बंध् 9 P; *See* **Importune.** **-ency**, *s.* गौरवं, गुरुता, भारः. 2 निर्बंधः, आग्रहः. **-ent**, *a.* गुरु, आवश्यक (की *f.*), अपरिहार्य, अविलंब्य. **-ently**, *adv.* निर्बंधेन. 2 आशु, अपरिहार्यतया.

Urine, *s.* मूत्रं, प्रस्रावः, मेहः. **-*v. i.*** मूत्र् 10. **-al**, *s.* मूत्रपात्रं-भाजनं. **-ary**, *s.* मूत्रस्थानं. **-*a.*** मूत्र in comp.

Urn, *s.* (जल-) कुंभः, कलसः-शः, भाजनं.

Ursa-major, *s.* सप्तर्षयः.

Usage, *s.* प्रयोगः. 2 व्यवहारः, आचारः, आचरणं, वृत्ति *f.*; 'conventional u.' रूढि *f.*

Use, *v. t.* प्र-उप्-युज् 7 A, 10, व्यव-हृ c., व्याहृ c., उप-,भुज् 7 U, सेव् 1 A; धृ 10 (clothes &c.). 2 प्र-युज्; 'is used in the sense of *Light*' तेजसि प्रयुज्यते; 'for it is found to be so used' इति प्रयोगदर्शनात्; 'to be used (conventionally or by popular acceptance)' ex. by रूढ, प्रसिद्ध; ज्योतिःशब्दो ज्वलन एव रूढः (S. B. 104); दाक्षिण्यरूढेन नाम्ना (R. I. 31). 3 आचर् 1 P, व्यव-हृ 1 P, वृत् 1 A (with loc.); *See* **Act.** 4 अभ्यस्त-परिचित-*a.* कृ 8 U. 5 (With inf.) By present tense simply; पातुं न प्रथमं व्यवस्यति, नादत्ते &c. (S. 4) or by पूर्वं, पुरा; 'I used to sing' पुरा गायकवृत्तिरासं; 'it used to be so' एवं पूर्वं आचार आसीत्; 'to be used to' अभिज्ञ, परिचित, अभ्यस्त, अनुभूत, उपभुक्त; अनभ्यस्तरथचर्याः (U. 5) 'not used to sit in chariots'; 'Used to pain' दुःखाभिज्ञ, अनुभूतदुःख; 'not used to ornaments' अनुपभुक्तभूषणः (S. 4).—*s.* उपयोगः, प्रयोजनं, अर्थः, फलं, कार्यं; किं with instr.; किं तेन जातेन, कोऽर्थस्तेन जातेन &c.; *See* **Want.** 2 प्रयोगः, व्यवहारः, व्यापारः, उपभोगः, सेवनं; 'to apply to one's own u.' स्वयं उपयुज्; 'in general u.' रूढ, प्रसिद्ध, सर्वप्रयुक्त. **-ful**, *a.* उपयुक्त, हित, सोपकार, उपयोगिन्, उपकारिन्, हितकर (री *f.*). **-fully**, *adv.* अवृथा, सफलं, सोपयोगं, अमुधा. **-fulness**, *s.* उपयोगः-गिता, हितकारित्वं. **-less**, *a.* निष्प्रयोजन, निरर्थक, विफल, निष्फल, निर्गुण, निरुपयोग, व्यर्थ, अनुपयोगिन्, वृथा-मुधा in comp. **-lessly**, *adv.* वृथा, व्यर्थं, मुधा, निष्फलं. **-lessness**, *s.* अनुपयोगः, वैयर्थ्यं.

Usher, प्रति(ती)हारः.

Usual, *a.* साधारण (णी *f.*), सामान्य, व्य-(व्या)वहारिक-प्रायिक-लौकिक-सांप्रदायिक-(की *f.*) प्रसिद्ध; oft. by 'u.-ly.' **-ly**, *adv.* प्रायः, प्रायेण, प्रायशः, साधारण्येन, सामान्यतः, बहुशः.

Usufruct, *s.* फल-फलभोग-आधिकारः.

Usurp, *v. t.* बलात् ग्रह् 9 U or आत्मसात्कृ 8 U, अनधिकारेण आक्रम् 1 U, 4 P. **-ation**, *s.* बलाद् आक्रमणं-ग्रहणं, बलापहारः. **-er**, *s.* बलाद् ग्राहिन्; 'u. to the throne' राज्यापहारिन् *m.*

Usury, *s.* कुसीदं, कौसीद्यं, अर्थप्रयोगः, वृद्धिजीविका. **-er**, *s* कुसीदकः, वृद्ध्याजीवः, वार्धुषिकः, वार्धुषिः. **-ous**, *a.* कौसीद (दी *f.*), सवृद्धिक.

Utensil, *s.* भांडं, पात्रं, उपकरणं, भाजनं.

Uterus, *s.* गर्भकोशः, गर्भाशयः, योनि *f.* **-Uterine**, *a.* सहोदर, सोदर, समानोदर, सनाभि.

Utility, *s.* उपयोगः; *See* **Use.**

Utmost, *a.* परम, पर; 'to the u. of one's power' यावच्छक्यं, यावच्छक्तितः; 'do or try one's u.' यावच्छक्यं प्रयत् 1 A; 'u. limit' परा काष्ठा, परा कोटिः; 'this is the u. that I can do' एष मे परमो विभवः (Ka. 159).

Utopian, *a.* काल्पनिक (की *f.*), मनःसृष्ट; 'u. scheme' कल्पना-मनः-सृष्टिः.

Utter, *a.* संपूर्ण; *See* **Complete.** 2 केवल, मात्र in comp.; (मौर्ख्यमात्रमिदं). **-*v. t.*** उदीर् c., व्या-हृ 1 P, उदाहृ, उद्-गॄ 6 P, उच्चर् c.; *See* **Say** also. **-ance**, *s.* उच्चारः-रणं, उद्गारः, व्याहारः, उदीरणं; 'easy of u.' सुखोच्चार्य, सुखोद्य. **-ly**, *adv.* सर्वथा, अशेषेण, साकल्येन, संपूर्णं.

Uvula, *s.* आलि-प्रति- जिह्वा.

Uxorious, *a.* स्त्रीवश्य, भार्यासक्त, स्त्रीविधेय, दारनिरत, कामवश. **-ness**, *s.* भार्यासक्ति *f.*, भार्याधीनता.

V.

Vacant, *a.* शून्य, (fig also), रिक्त; 'with v. looks' शून्येक्षण *a.*; 'v.-minded' शून्यहृदय. 2 अस्वामिक; 'a v. throne' अराजक. **-Vacancy,** *s.* शून्यं, रिक्तं. 2 शून्यं; अस्वामिकं अधिकारपदं. **-Vacate,** *v. t.* उत्सृज् 6 P, रिच् 7 P, परि-, त्यज् 1 P. **-ion,** *s.* अनध्ययनं, अध्ययनविश्रामः-निवृत्ति *f.*, विश्रामकालः.

Vaccine, *a.* गव्य.

Vaccinate, *v. t.* गोबीजं निविश् c.

Vacillate, *See* **Waver.** **-ion,** *s.* अस्थिरता, अनिश्चयः, चांचल्यं.

Vacuity, Vacuum, *s.* शून्यं, खं, रिक्तं, आकाशं.

Vagabond, *a.*, *s.* स्वेच्छाचारिन्, परिभ्रमिन्; यथेच्छविहारिन्. 2 अज्ञातनिवास,गूढचारिन्.

Vagary, *s.* वि-,भ्रमः, छंदः-दस् *n.*, मनोलौल्यं; बुद्धिचापल्यं.

Vagrant, *See* **Vagabond.**

Vague, *a.* अनिश्चित, संदिग्ध, अनियत, अनिर्णीत, अपरिच्छिन्न. **-ness,** *s.* अनिश्चयः अपरिच्छेदः, अनिर्णयः, संदेहः, संशयः.

Vain, *a.* व्यर्थ, निष्फल, विफल, निरर्थक, मोघ, मुधा-वृथा in comp.; 'v. thoughts' वृथामनोरथाः. 2 असार, निःसार, शून्य. 3 (Vainglorious) वृथाभिमानिन्, अहंकारिन्, वृथावलेप, गर्वित; *See* **Proud.** **-ly,** 'in v.' *adv.* वृथा, मुधा, निरर्थकं, व्यर्थं, निष्फलं. **-Vanity,** *s.* वृथाभिमानः, मिथ्यागर्वः, अहंकारः; *See* **Pride.** 2 असारत्वं, निःसारता, अवलेपः, वैयर्थ्यं, मोघता. 3 असारद्रव्यं.

Valediction, *s.* आमंत्रणं, आपृच्छा, आमच्छनं; स्वस्तिवादः. **-Valedictory,** *a.* स्वस्तिवाचनिक (की *f.*).

Valet, *s.* चेटः, दासः, पार्श्वचरः.

Valetudinarian, *a.*, *s.* रोगिन्,दुर्बल, व्याधिपीडित, सदारोगिन्.

Valiant, *a.* विक्रांत, पराक्रमवत्, उरुविक्रम, शूर, वीर; *See* **Brave.** **-ly,** *adv.* सविक्रमं, सपराक्रमं, शूर-वीर-वत्, साहसपूर्वकं.

Valid, *a.* सबल, प्रबल, सप्रमाण; सयुक्तिक (की *f.*), अलंघ्य, न्याय्य, धर्म्य. **-ity,** *s.* प्राबल्यं, सिद्धि *f.*

Valise, *s.* चर्म-मंजुषा-पेटकः.

Valley, Vale, *s.* दरी, उपत्यका, अद्रिद्रोणी.

Vallum, *s.* प्राकारः, वप्रः.

Valor, *s.* वि-परा-क्रमः, शौर्यं, वीर्यं. **-ous,** *a.* शूर, वीर, विक्रांत; *See* **Brave.**

Value, *v. t.* मूल्यं-अर्घं-निरूप् 10 or स्था c. (स्थापयति) or सं-ख्या c. 2 मन् 4 A, वि-गण् 10, आ-कल् 10; 'v. highly,' बहु मन्-संमन् c. **-s.** मूल्यं, अर्घः; *See* **Price.** 2 माहात्म्य, गरिमन् *m.*, ससारता. 3 महार्घः, बहु-महा-मूल्यं. 4 अर्घप्रमाणं; 'fixing the v.' अर्घसंख्यापनं. **-able,** *a.* महार्घ-र्घ्य, महा-बहु-मूल्य, मूल्यवत्, गुणवत्. **-s.** बहुमूल्यद्रव्यं. **-ation,** *s.* मूल्यनिरूपणं-संख्यापनं-निर्णयः.

Valve, *s.* कपा(वा)टः-टा-टं; पिधानं.

Vampire, *s.* भूतः, प्रेतः, पिशाचः

Van, *s.* (सेना-) मुखं, अग्रभागः, अग्रं, मूर्धन् *m.*, नासीरं, शिरस् *n.*; 'in the v.' अग्रे, पुरस्तात्, अग्रतः. 2 यानं; *See* **Cart**; 'v.-guard' अग्रानीकं, सेनामुखं, नासीरचराः (pl.).

Vane, *s.* वायुगतिदर्शि यंत्रं.

Vanish, *v. i.* तिरोभू 1 P, तिरोधा-अंतर्धा-pass.; *See* **Disappear.** 2 वि-नश् 4 P. प्र-वि-ली 4 A.

Vanquish, *v. t.* पराजि 1 A, पराभू 1 P, वशं नी 1 P; *See* **Humble, Subdue.** **-or,** *s.* जेतृ *m.*

Vantage,-ground, *s.* अग्रभूमि *f.* 2 उत्कर्षः, श्रेष्ठपदं.

Vapid, *a.* विरस, नीरस, रसहीन.

Vapour, *s.* बाष्पः, धूमः; 'v. of the sky' खबाष्पः, अभ्रं; 'v.-bath' उष्णस्वेदः. **-*v. i.*** वि-,कत्थ् 1 A; *See* **Boast.** **-ous, -y,** *a.* बाष्पमय (यी *f.*), बाष्परूप. 2 असार, निःसार.

Variegate, *v. t.* चित्र् 10, चित्रीकृ 8 U, कर्बुरीकृ, शबलीकृ; कल्माषयति (D.). **-ed,** *a.* चित्र, कर्बुर, कर्बुरित, कि(क)र्मीर, किर्मीरित, शबल, कल्माष, कल्माषित, पृत,शार; 'v. colour' कर्बुरः, किर्मीरः, शबलः.

Variola, *s.* मसूरी-रिका.

Varlet, *s.* भृत्यः, किंकरः. 2 नरापसदः, जाल्मः.

Varnish, *s.* कुङ्कुभः. **-*v. t.*** कुङ्कुभेन लिप् 6 P, स्निग्धीकृ; (fig.) बाह्यशोभां धा 3 U.

Vary, *v. t.* परिवृत् c., विपर्यस् 4 U or c., अन्यथाकृ 8 U, नानाविध-विविध-*a.* कृ; विपर्यासं नी 1 P; *See* **Change.** **-*v. i.*** भिद् pass, परिवृत् 1 A; विवद् pass.; oft. ex. by भिन्न, भिन्नरूप; प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु (K. III. 1) 'v. -es with the object in view': &c. **-iable,** *a.* अस्थिर, चंचल, परिवृत्तिशील, अनित्य, अनवस्थित. **-iance,** *s.* भेदः, विरोधः, विप्रतिपत्ति *f.*; विवादः, कलहः, वैरं, द्वंद्वं; 'to be at v.' विप्रति-पद् 4 A; (अत्र स्मृतयः विप्रतिपद्यंते); 'at v.' विमत, विप्रतिपन्न, परस्परविरुद्ध. **-iation,** *s.* परिवृत्ति *f.*, विकारः, भेदः. **-iety,** *s.* विचित्रता, भेदः. 2 विशेषः in comp.; शमी वृक्षविशेषः-भेदः.

शबलता, चित्रता, (of colours); 'v. of' Various, q. v. -Varied, Various, *a.* विविध, नानाविध-रूप-प्रकार-जातीय, अनेक-नाना in comp.; बहुविध; 'v. talks' उच्चावचाः प्रलापाः; 'in v. ways' अनेकधा, बहुविधं, नाना. -ly, *adv.* बहुधा, विविधं, नाना, नानाप्रकारं, अनेकविधं.

Vascular, *a.* नाडीविशिष्ट-संबंधिन्.

Vase, *s.* कुंभः, कलशः-सः, पात्रं, भाजनं; 'a golden v.' भृंगारः, कनकालुका.

Vassal, *s.* प्रजा, वशवर्तिन् *m.*, आयत्तः, परसंगः; *See* **Dependent.**

Vast, *a.* विशाल, विस्तीर्ण, विपुल, अपरिमित, सुमहत्, अतिबृहत्.

Vat, *s.* कुंडं, (बृहत्) भांडं.

Vaticinate, *v. t. See* **Prophesy.**

Vault, *s.* गुप्ति *f.*, विवरं, भूमिगृहं. 2 खोडकशीर्षं; 'v. of heaven' नभोमंडलं. 3 वल्गितं. -*v. i.* वल्ग् 1 P, प्लु 1 A.

Vaunt,-er, *See* **Boast**; 'v. ing of his might' अतिदर्पितबलः (Mr. 5), स्वबलावलिप्तः.

Veal, *s.* गोवत्समांसं.

Veer, *v.* परिवृत् 1 A, भिन्नादिशं या 2 P or गम् 1 P.

Vegetate, *v. i.* उद्भिद् pass., स्फुट् 6 P, प्ररुह् 1 P. -ion, *s.* उद्भिद्,उद्भेदः, तृणादि *n.*, तृणजाति *f.* -Vegetable, *a.* उद्भिद्-द, उद्भिज्ज, औद्भिद (दी *f.*). -*s.* (Eatable) शाकः-कं; हरितकं, शिग्रुः. -*s.* उद्भिद्-ज्जं, ओषधि *f.*, तृणादि.

Vehement, *a.* प्रचंड, तीव्र, तीक्ष्ण, बलवत्, उग्र, सरभस, सवेग; परुष, रूक्ष (of tone, speech &c.). -ly, *adv.* बलवत् चंडं, तीव्रं. -Vehemence. *s.* चंडता, तीक्ष्णता, रभसः, वेगः, तरस् *n.*, संरंभः.

Vehicle, *s.* यानं, प्रवहणं, वाहनं, रथः, वाहः, पत्रं. 2 द्वारं.

Veil, *v. t.* छद् 10, आ-प्र-सं-°, अवगुंठ् 10, सं-वृ 5 U, व्यव-धा 3 U; *See* **Cover.** -*s.* अवगुंठनं, आवरकं, आवरकः, तिरस्करिणी. 2 आवरणं, व्यवधानं, आच्छादनं, संवरणं; 'throw the v. off' स्वरूपं प्रकटीकृ 8 U, or आविष्कृ, वि-वृ 5 U, विवृतीकृ.

Vein, *s.* शि(सि)रा, धमनी, नाडि-डी *f.*; (of stones) रे(ले)खा. 2 वृत्ति *f.*, भावः, मनोवृत्तिः; 'angry v.' कोपवृत्तिः. -y, *a.* शिराल.

Vellum, *s.* चर्म-पटः-पत्रं.

Velocity, *s.* जवः, वेगः. रंहस् *n.*, रभसः; तरस् *n.*

Venal, *a.* धनभेद्य, उत्कोचप्रदानवश्य. 2 पण्य in comp; 'a v. woman' प ण्य

Vend, *v. t.* वि-क्री 9 A, पण् 1 A. -er, *s.* विक्रयिन् *m.* -ible, *a.* पण्य, विक्रेय.

Venerate, Venerable, *See* **Revere,-ed.**

Venery, *s.* मैथुनं, रति *f.*, संभोगः. 2 मृगया. -Venereal, *a.* (*s.*) in comp.; 'v. disease' उपदंशः. 2 वाजीकर (री *f.*).

Venesection, *s.* शिराच्छेदः.

Vengeance, *s.* प्रतिहिंसा, प्रत्यपकारः, वैरनिर्यातन-शुद्धि *f.*; *See* **Revenge.**

Venial, *a.* मर्षणीय, क्षंतव्य,लघु, उपेक्ष्य, अल्प; oft. by उप pr.

Venison, *s.* मृग-हरिण-मांसं.

Venom, *s.* विषं, गरलं, गरं, क्ष्वेडः. -ous, *a.* सविष, विषाक्त, दंदशूक, विष in comp.

Vent, *v. t.* उद्-वि-सृज् 6 P, उत्क्षिप् 6 P. निः-सृ c., उद्वम् 1 P, उद्-गॄ 6 P; *See* **Emit.** -*s.* छिद्रं, रंध्रं, द्वारं; 'give v. to' उदीर् c., प्रकटयति (D.), आविष्कृ 8 U.

Ventilate, *v. t.* वीज् 10; *See* **Fan.** 2 प्रचर् c., प्र-सृ c. -ed, *a.* प्रवात, वायुव्याप्त; 'a bed in a v. place' प्रवातशयनं (M. 4). -or, *s.* वीजनं, व्यजनं.

Ventral, *a.* उदर in comp.

Ventricle, *s.* कोशः-षः, द्वारं.

Ventriloquist, *s.* गारुडवादिन् *m.* -Ventriloquism, *s.* गारुडवादः.

Venture, *s.* साहसं, साहसक्रिया. 2 संकट, संशयः; *See* **Danger.** -*v. i.* संशये निक्षिप् 6 P. 2 उत्सह् 1 A, साहसं कृ 8 U, धृष् 5 P; 'we cannot v. to state this' इति कथनरूपं साहसं कर्तुं न शक्नुमः, इति कथयितुं नोत्सहामहे; 'nothing v., nothing gain' साहसे श्रीः प्रतिवसति. -ous,-some, *a.* साहसिक (की *f.*), साहसबुद्धि.

Venus, *s.* शुक्रः, भार्गवः, कविः, उशनस् *m.*, काव्यः, दैत्यगुरुः.

Veracious, *a.* सत्यवाच्, सत्यगिर्, सत्यवादिन्, सत्यशील. -Veracity, *s.* सत्यवादित्वं, सत्यशीलता.

Veranda, *s. See* **Porch.**

Verb, *s* क्रिया,-पदं. -al, *a.* शाब्दिक (की *f.*), शाब्द (ब्दी *f.*), शब्दरूप. 2 (Oral) वाचिक-वाचनिक (की *f.*), (वाचिकमिदानीं श्रोतुमिच्छामि Mu. 5). -ally, *adv.* वाचा. 2 शब्दतः, यथाशब्दं -atim, *adv.* यथाव्याहृतं, पदानुपदं, शब्दशः, यथाशब्दं. -ose, *a.* वाग्बहुल, अतिविस्तीर्ण; *See* **Prolix.** -osity,-iage, *s.* वाग्विस्तरः, वाक्प्रपंचः, वागुपचयः.

Verdant, *a.* हरित, शाद्वल.

Verdure, *s.* हरितत्वं, हारित्यं; शादः, शाद्वलता; 'clothed in fresh v. of sprouts' नवहरितसस्यांकुरवती.

Verdict, *s.* निर्णयः; विचारः; दंडनिर्णयः.

Verdigris, *s.* ताम्रकिट्टं-मलं, कलंकः.

Verge, *s.* प्रांतः, पर्यंतः, धारा; 'on the v. of' उन्मुख (खी *f.*), आसन्न in comp.; 'on the v. of ruin' विनाशोन्मुख, आसन्नलय. 2 दंडः, यष्टि *f.* -*v. i.* अव-, लंब् 1 A; by (*s.*); 'is v. ing on ruin' आसन्ननाशो वर्तते; 'when it was v. ing towards sunset' परिणतप्राये अहनि 'v. ing on 18' अष्टादशवर्षदेशीय; *See* **Border.** **-er,** *s.* दंडिन् *m.*, दंड-वेत्र-धरः.

Verify, *v. t* प्रमाणीकृ 8 U, प्रमाणयति (D.), समर्थ् 10, सत्याकृ, सत्यापयति (D.), निर्णी 1 P. **-ication,** *s.* सत्यापनं, सत्याकारः.

Verily, *adv.* सत्यं, नूनं, नियतं, नाम, खलु.

Verisimilitude, *s* संभवः. 2 सादृश्यं.

Veritable, Verity, *See* **True, Truth.**

Vermes, *s.* (pl.) कृमयः, कीटकाः. **Vermicide, -Vermifuge,** *a.* कृमि-हर-घ्न (घ्नी *f.*); **-Vermicular,** *a.* कृमिसदृश (शी *f.*), **-Vermiform,** *a.* कीटकाकृति.

Vermilion, *s.* सिंदूरं. -*a.* शोण. [illegible]. -*v. t.*, 'cover with v.' सैंदूरीकृ, सिंदूरेण रंज् c.

Vermin, *s.* कृमयः (pl.), कृमिगणः.

Vernacular, *a.* जन्म in comp.;'v.dialects' भाषा, प्राकृतभाषा. -*s.* जन्मभाषा, मातृभाषा.

Vernal, *a.* वासंत (ती *f.*), वासंतिक (की *f.*), वसंत in comp.

Versatile, *a.* चपल, लोल, लोल-मति-बुद्धि, चंचल; *See* **Fickle.** **-ity,** *s.* (बुद्धि-)चापल्यं, लौल्यं.

Verse, *s.* कविता, पद्यं, काव्यं; 'syllabic v.' वृत्तं; 'blank v.' मुक्तमासः. 2 श्लोकः. 3 (Portion of v.) चरणः, पादः, पदं. **-Versify,** *v. t.* पद्यानि रच् 10 or निबंध् 9 P, कवयति (D.). **-ier,** *s.* कविः, कविदेश्यः. **-ication.** *s.* श्लोक-पद्य-रचना, छंदोबंधः.

Versed, *a.* अभिज्ञ, कुशल, निपुण, प्रवीण, सुप्रतिष्ठित, अभ्यंतर, विशारद; *See* **Skilful.**

Version, *s.* **Translation,** q. v. 2 पाठांतरं, पाठभेदः.

Vertebra, *s.* पृष्ठवंशास्थि *n.* **-te,-ted,** *a.* पृष्ठवंशयुत-विशिष्ट.

Vertex, *s.* शीर्षं, अग्रं, शिखरं; *See* **Top** also.

Vertical, *a.* ऊर्ध्व-उपरि-तन (नी *f.*), लंबरूप. **-ly,** *adv.* अधोमुखं, ऊर्ध्वाधरं.

Vertigo, *s.* भ्रमरं; *See* **Giddiness.**

Verve, *s.* उत्साहः, आवेशः.

Very, *adv.* अति-सु pr., सातिशयं, अतीव, भूरि, नि-सु-तरां, अत्यंतं; *See* **Exceedingly;** 'v. deceitful' भूरिमाय. -*a.* ex. by demonstrative pron. with एव; 'the v. hills' त एव गिरयः; 'this v. day' अद्यैव. 2 सत्य, तथ्य. 3 मात्र in comp., केवल.

Vesicle, *s.* त्वक्-चर्म-स्फोटः.

Vesper, *s* संध्या, संध्योपासनं.

Vessel, *s.* पात्रं, भाजनं, भांडं, आधारः. 2 पोतः, समुद्रयानं, जलयानं, वहित्रं, नौः. 3 नाडी; *See* **Vein.**

Vest, *s.* वस्त्रं वेशः-षः, वसनं. -*v. t.* वेष् c., परि-धा c.; *See* **Dress.** **-ed,** *a.* (in) व्यवस्थित; 'are warlike qualities v. (in any one)' किं व्यवस्थितविषयाः क्षात्रधर्मा इति (U. 5). 2 अधीन, आयत्त. **-Vestment, Vesture,** *s.* वासस् *n.*, वस्त्रं; **Dress.**

Vestal, *a.* शुद्ध, पवित्र; *See* **Chaste.**

Vestibule, *s.* देहलि-ली *f.*; *See* **Porch.**

Vestige, *s.* चिह्नं, अंकः, लक्षणं, पदांकः, पदपंक्ति *f.*, पदवी.

Veteran, *a.*, *s.* जातानुभव, ज्ञानवृद्ध, अभ्यासवृद्ध.

Veterinary, *s.* पशुचिकित्सकः, पशुवैद्यः; (art) पशुचिकित्सा.

Veto, *v. t.* प्रति-नि-षिध् 1 P, प्रत्या-ख्या 2 P; *See* **Contradict.** -*s.* प्रति-नि-षेधः, प्रत्यादेशः.

Vex, *v. t.* बाध् 1 A, पीड् 10, क्लिश् 9 P, संतप् c., उद्विज् c., अर्द् 1 P or c. 2 प्रकुप् c., क्रोधं उद्दीप् c. **-ation,** *s.* क्लेशः, दुःखं, पीडा, कष्टं, बाधा, आयासः, संतापः. 2 प्रकोपनं, क्रोधोद्दीपनं. **-atious,** *a.* कष्टद, क्लेशकर-पीडाकर-(री *f.*), उद्वेगकर, संतापक. **-ed,** *a.* दुःखित, संतापित, अर्दित, &c. **-edly,** *adv.* सक्रोधं, सोद्वेगं.

Viand, (V. s.) *s.* अन्नं, भक्ष्यं, सिद्धान्नं.

Viaticum, *s.* पाथेयं, पथि भोज्यं.

Vibrate, *v. i.* दोलायते (D.), कंप् 1 A, स्फुर् 6 P, भ्रम् 1, 4 P. -*v. t.* भ्रम् c., इतस्ततः चल् c., वि-धू 5, 9 U. **-ion,** *s.* आंदोलनं, दोलायितं, स्फुरणं, कंपः, भ्रमणं.

Vicar, *s.* प्रतिनिधिः. **-ious,** *a* प्रतिनिधिरूप.

Vice, *s.* अधर्मः, पापं, पापाचरणं, असदाचारः, व्यभिचारः. 2 दोषः, दुर्गुणः, व्यसनं. 3 (Instead of) Ex. by स्थाने or प्रतिनिधिः oft by उप pr.; 'viceroy' 'vicegerent,' राजप्रतिनिधिः; राजस्थाने स्थितः; 'v.-president' उपाध्यक्षः. **-Vicious,** *a.* दुष्ट, दुराचार, अपथप्रवृत्त; व्यसनिन्, दुरात्मन्, पापवृत्त; दुर्वृत्त, दुश्चरित, खंडितवृत्ति. **-ly,** *adv.* दुष्टतया, दुर्वृत्ततया, दुष्टभावेन.

Vicinage, Vicinity, *s.* संनिधिः, संनिधानं, संनिकर्षः.

Vicissitude, *s.* आ-परि-वृत्ति *f.*, विपर्ययः, परिवर्तः, अनुक्रमः; 'Oh! how rarely seen (by mortal prescience) the strange v. s of human life' अहो अलक्षितोपनिपाताः पुरुषाणां समविषमदशाविभागपरिणतया भवंति (Mu. 6).

Victim, *s.* बलिः, उपहारः, वध्यः, यज्ञपशुः; (fig.) *See* **Prey**. -**ize**, *v. t.* उपहारीकृ 8 U; *See* **Sacrifice**.

Victor, Victorious, *s.*, *a.* वि-,जयिन्, जैत्र (त्री *f.*), जित्वर (री *f.*), जिष्णु, प्राप्तजय. 2 जयप्रद, जयावह. -**iously**, *adv.* सविजयं, जयपूर्वं. -**y.** *s.* वि-,जयः; 'gain v' विजयं-लभ् 1 A, or प्राप् 5 P, वि-जि 1 A; 'v. to your Majesty' जयतु जयतु देवः.

Victual, *v. t.* खाद्यसामग्रीं उपक्लृप् c -*s.* (V. s) खाद्य-भक्ष्य-सामग्री, भक्ष्यसंभारः. -**ler**, *s.* भक्ष्यविक्रयिन् *m.* -**ling**, *s.* अन्नविक्रयः, भक्ष्यव्यवहारः.

Vie, (with) *v. i.* स्पर्ध् 1 A, जि desid. (जिगीषति); *See* **Rival**; अहमहमिकया प्रणामलालसाः (Ka. 81) 'v.-ing with each other for saluting'.

View, *v. t.* सं-,ईक्ष् 1 A, निर्वर्ण् 10, आ-अव-लोक् 1 A. 10, निरीक्ष्; *See* **See**. -*s.* आलोकनं, समीक्षणं, दर्शनं, दृष्टि *f.*; 'point of v.' दृष्टिः, पक्षः; 'from a worldly (practical) point of v.' लोकव्यवहार-दृष्ट्या; शास्त्रदृष्ट्या &c.; इत्येतल्लोकदृष्ट्या निदर्शितं शास्त्रदृष्ट्या न पराणुद्यते (S. B. 508); 'from this point of v.' अस्मिन् पक्षे. 2 मतं, बुद्धि *f.*, मति *f.*, दृष्टिः. 3 हेतुः, आशयः, अभिप्रायः, उद्देशः; 'with what v.' किमुद्दिश्य, केन हेतुना, किमभिप्रेत्य; 'with this v.' अस्माद्धेतोः, एतदर्थं; 'of narrow v.s' कृपणबुद्धि-दृष्टि; 'of liberal v. s' उदारधीः. 4 दृक्पातः-विषयः, नयनगोचरः प्रदेशः; 'having in v.' दृग्गोचरवर्तिन्. -**less**, *a.* अदृश्य.

Vigil, *s.* जागरणं, प्र-,जागरः, रात्रिजागरः. -**ance**, *s.* अवधानं, अवहितता, दक्षता, जागरूकता. -**ant**, *a.* जागरूक, अवहित, दक्ष, सावधान, अप्रमत्त. -**antly**, *adv.* अप्रमादेन, सावधानं.

Vigour, *s.* वीर्यं, बलं, शक्ति *f.*, ओजस् *n.*, सत्त्वं, तेजस् *n.*, प्रभावः, पौरुषं; *See* **Strength**. -**ous**, *a.* प्रबल, ओजस्विन्, महासत्त्व, ऊर्जस्वल, वीर्यवत्; *See* **Strong**; सोत्साह, सप्रयत्न. -**ously**, *adv.* चंडं, बलवत्, तरसा, ओजस्वितया; सवीर्यं. महाप्रयत्नेन, सोद्यमं, सोत्साहं.

Vile, *a.* अधम, नीच, जघन्य, नि-अप-कृष्ट. -**ness**, *s.* नीचता &c.; *See* **Mean**, &c. -**Vilify**, *v. t.* परि-वद् 1 A, कुत्स् 10, आ-क्षर् c.; *See* **Traduce, Libel**. -**er**, -**ication**: *See* **Calumny**.

Villa, *s.* ग्राम्यं गृहं, विनोदस्थानं.

Village, *s.* ग्रामः; निवसथः; 'head of a v.' ग्रामणीः, ग्रामेशः, ग्रामाध्यक्षः. -*a.* ग्राम्य, ग्रामीय ग्रामीण, ग्राम in comp. -**er**, ग्रामिन् *m.*, ग्रामिकः, ग्रामवासिन् *m.*, ग्रामीणः, ग्रामस्थः, ग्राम्यजनः.

Villain, *s.* दुर्वृत्तः, अपसदः affixed, (नरापसदः), चांडालः, खलः, अधमः, दुरात्मन् *m.*; *See* **Rascal** also. -**ous**, *a.* दुर्वृत्त, दुष्टतम, अधम &c.

Villein, *s.* दासः. प्रजा.

Vim, *s.* शक्ति *f.*, सत्त्वं, बलं.

Vindicate, *v. t.* रक्ष् 1 P, प्रमाणीकृ 8 U, समर्थ् 10, प्रति-पद् c., स्था c. (स्थापयति); (from blame) शुध् c., निर्दोषीकृ. 2 निर्वह् 1 P or c.; निर्व्यूढस्तेपत्यस्नेहः (U. 3) 'thy parental affection has been v. ed'. -**ion**, *s.* रक्षणं, प्रतिपादनं; स्थापनं; निर्वाहः; दोषमुक्ति *f.*, परिशोधनं. -**or**, *s.* रक्षकः, समर्थयितृ *m.*

Vindictive, *a.* प्रतिकारपरायण-शील, वैरसाधनपर, वैरनिर्यातनोत्सुक; क्रोधन, क्रोधिल; अक्षमिन्, असहिष्णु.

Vine, *s.* द्राक्षा,-लता. -**ous**, *a.* सुरामय (यी *f.*). -**Vinegar**, *s.* शुक्तं, शौक्तिकं. -**Vineyard**, *s.* द्राक्षाक्षेत्रं-वाटिका. -**Vintage**, *s.* द्राक्षाः, द्राक्षाफलं; 'v.-time' द्राक्षावचयकालः. -**Vintner**, *s.* शौंडिकः, सुराजीविन् *m.*

Violate, *v. t.* धृष् c. (a woman). 2 अतिक्रम् 1 U, 4 P, उल्लंघ् 1 A, 70, अतिचर् 1 P, व्याहन् 2 U, लुप् c., भंज् 7 P, 'for fear of v.-ing your word' प्रतिज्ञाभंगभीरुणा (त्वया). 3 भंज्, पराजि 1 A. -**ion**, *s.* अतिक्रमः, भंगः, उल्लंघनं, लोपः,-पनं. 2 आ-,धर्षणं-णा. -**or**, *s.* धर्षकः. 2 उल्लंघकः.

Violent, *a.* प्रचंड, प्रबल, तीव्र, गुरु, महावेग, उग्र. 2 साहसिन्, साहसिक (की *f.*), तीक्ष्णकर्मन्; 'a v. death' अपमृत्युः. -**ly**, *adv.* प्रसह्य, प्रसभं, तरसा, वेगेन, बलात्कारेण, बलवत्, उच्चंडं, तीव्रं, गाढं, अति-सु pr.; 'v. in love' गाढानुराग. -**Violence**, *s.* बलं, तरस् *n.*, जवः, वेगः. 2 बलात्कारः; साहसं, प्रमाथः, प्रसभं.

Violet, *s.* पाटलं. 2 (Colour) नीललोहितः.

Violin, *s.* सा(शा)रंगी, पिनाकी.

Viper, *s.* दंदशूकः, अहिः; *See* **Snake**.

Virago, *s.* स्त्रीयोधी, पुरुषवृत्तिः, ऋषभी.

Virgin, *s.* कुमारी, कन्या, तरुणी, अक्षता, अक्षत-अविद्ध-योनिः, पुरुषास्पृष्टा. -*a.* कौमार (री *f.*), (*s.*) in comp. 2 वि-,शुद्ध, अक्षत. -**ity**, *s.* कौमारं, कुमारीत्वं; पुरुषास्पर्शः. 2 विशुद्धता.

Virgo, *s.* कन्या,-राशिः.

Viridity, *s.* *See* **Verdure**.

Virile, *a.* पौरुष (षी *f.*), पौरुषेय (यी *f.*). पुरुष in comp. -**ity**, *s.* पुंस्त्वं, पुरुषत्वं, पौरुषं.

Virtue, *s.* धर्मः, पुण्यं, सुकृतं, सदाचारः, साधुता, धर्माचरणं, नीति *f.* 2 गुणः, सद्-

गुणः. 3 शक्तिः *f.*, बलं, प्रभावः, सामर्थ्यं; 'by v. of ' वशात्, बलेन, प्रभावेण. -**Virtual**, *a.* वास्तविक (की *f.*), better by 'v.-ly'. -**ly**, *adv.* वस्तुतः, यथार्थतः, अर्थतः. -**Virtuous**, *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मपर-परायण, साधु, पुण्यात्मन्, सुकृतिन्, पुण्यभाज्, न्यायाचार, साधुवृत्त, सदाचार, सच्चरित; oft. by सत्; सती, सज्जनः &c. 2 (Of acts) धर्म्य, पुण्य, साधु. -**ly**, *adv.* धर्मतः, धर्मेण, सदाचारतः.

Virulent, *a.* उग्र, कटु, तीक्ष्ण, चंड; *See* **Malignant, Sharp.**

Virus, *s.* विषं.

Visage, *s.* आस्यं, आननं, वदनाकृति *f.*, वदनच्छाया; 'with sad v.' विषण्णवदन

Viscera, *s.* अंत्राणि (pl.).

Viscid, Viscous, *a.* सांद्र, श्यान, शीन; चिक्कण, स्निग्ध; 'v. fluid' दानजलं, दानं (of an elephant).

Visible, *a.* दृश्य, दृग्गोचर, प्रत्यक्ष, दृष्टिविषय, नयनपथवर्तिन्, नेत्रविषयगत, व्यक्त, सुप्रकाश, चक्षुर्ग्राह्य, and sim comp. -**Visibly**, *adv.* प्रत्यक्ष, प्रत्यक्षतः, साक्षात्.

Vision, *s.* दृष्टि *f.*, चक्षुरिंद्रियं. 2 छाया, आभासः, माया, मनःसृष्टि *f.*, कल्पना. 3 स्वप्नः, स्वप्नदर्शनं. -**ary**, *a.* अवास्तव (वी *f.*), मानासिक-काल्पनिक -(की *f.*), मनःसृष्ट-कल्पित.

Visit, *s.* दर्शनं, अभ्यागमः. 2 साक्षात्कारः; 'pay a v. to' द्रष्टुं अभ्यागम् 1 P. -*v. t.* दृश्, अभि-इ 2 P, अभ्युपगम्, द्रष्टुं गम् or या 2 P. 2 साक्षात्कृ 8 U. 3 (With punishment) दंड् 10; 'v. a lover' अभि-सृ 1 P (कामुकं). -**ant,-or**, *s.* अभ्यागतः, गृहागतः. -**ation**, *s.* अभ्यागमनं. 2 दुर्विपाकः.

Vista, *s.* वीथि-थी *f.*, तरुपंक्ति-श्रेणी *f.*,

Visual, *a.* चाक्षुष (षी *f.*), दृष्टिगत, चक्षुस् नेत्र in comp.; 'v. organ' चक्षुरिंद्रियं.

Vital, *a.* आवश्यक (की *f.*). 2 प्राणभूत, जीव-प्राण in comp.; 'v. air' प्राणवायुः; 'v. principle' जीवात्मा; 'v. part' मर्मन् *n.*; 'v. -s' मर्माणि; 'touching (rending, piercing.) the v. s.' अरुंतुद, मर्मस्पृश्, मर्माणि कृंतत्. -**ity**, *s.* जीवनं, चेतनत्वं, सजीवत्वं, चेतना; प्राणः, जीवः, जीव-प्राण-शक्ति *f.*

Vitiate, *v. t.* **Corrupt**, q v. -**ion**, *s.* दूषणं, भ्रंशनं.

Vitrious, *a.* काचज, काचाभ, काचमय (यी *f.*). -**Vitrify**, *v. t.* काचसात्कृ 8 U.

Vitriol, *s.* (Blue) तुत्थांजनं, शिखिग्रीवं, वितुन्नकं, मयूरकं, कर्परी; (green) कासीसं.

Vituperate,-ion, *See* **Censure.**

Vivacious, *a.* प्रफुल्ल, सोत्साह, सतेजस्. -**ness**, -**Vivacity**, *s.* उत्साहः; तेजस्विता, प्रफुल्लता, उल्लासः.

Viva-voce, *See* **Orally.**

Vivid, *a.* सुस्पष्ट, विशद, परिस्फुट.

Vivify, *v. t.* जीव् c., सजीवीकृ 8 U.

Viviparous, *a.* जरायुज, जीवज. 2 सचेतनभज.

Vixen, *s.* कलहप्रिया, कर्कशा, चंडी.

Vocable, *s.* शब्दः, वाक्यं, वचनं.

Vocabulary, *s.* अभिधानं, कोशः, शब्दार्णवः, शब्दसंग्रहः-कोशः.

Vocal, *a.* वाचिक (की *f.*), वाङ्मय (यी *f.*), वाग्जात. 2 वाणीयुक्त, वाग्विशिष्ट. 3 सुस्वर, मधुर; 'v. music' कंठगीतं.

Vocation, *s.* वृत्ति *f.*, व्यवसायः, नियोगः, व्यापारः.

Vocative, *s.* संबोधनं, संबुद्धि *f.*

Vociferate, *v. i.* उच्चैः आक्रंद् 1 P, उत्क्रुश 1 P, उद्-घुष् 10. -**ion**, *s.* आक्रोशः, उद्घोषः. -**Vociferous**, *a.* महाशब्द, सकोलाहल, उद्घोषण. -**ly**, *adv.* महाशब्देन, उद्घोषेण.

Vogue, *s.* व्यवहारः, प्रवृत्ति *f.*, प्रचारः, रीति *f.*, क्षुण्णा पद्धतिः; 'it is not in v. here' अत्र नेदृशो व्यवहारः; 'being long in v.' चिरप्रवृत्त.

Voice, *s.* स्वरः, स्वनः, नादः, शब्दः, वाणी, वचनं, वाच् *f.*, कंठध्वनिः-रवः. 2 मतं, अभिप्रायः; 'with one v.' एकचित्तीभूय, ऐकमत्येन; 'cracked v.' भग्नस्वरः; 'active v.' कर्तृवाच्यं; 'passive v.' कर्मवाच्यं; 'neuter v.' भाववाच्यं.

Void, *a.* शून्य, रिक्त. 2 असिद्ध, अप्रमाण, अकिंचित्कर (री *f.*), निरर्थक. 3 **Destitute. Devoid, of** q. v. -*s.* शून्यं, शून्यस्थानं. -*v. t.* रिच् 7 P or c., शून्यीकृ. 8 U. 2 निष्फलीकृ. 3 (Excrement) उच्चर् c., निउत्-सृज्, उद्-गॄ 6 P. -**able**, *a.* विवर्जनीय, परित्यक्तव्य.

Volatile, *a.* वायुपरिणामशील. 2 चंचल, लोल; *See* **Fickle.** -**ity**, *s.* चापल्यं, चांचल्यं.

Volcano, *s.* ज्वालामुखः, आग्नेयगिरिः.

Volition, *s.* संकल्पः, इच्छा; *See* **Will.**

Volley, *s.* वर्षः, (शिलावर्षः, शरवर्षः &c.), वृष्टि *f.*,-पातः.

Voluble, *a.* चंचल, चपल. 2 (Of tongue) वाचाल, चपलजिह्व. -**Volubility**, *s.* वाक्चापल्यं.

Volume, *s.* खंडः-डं, भागः, पुस्तकं (when the sense is clear). 2 अंतर्गतं घनफलं. 3 आवलि-ली *f.*, पटलं, राशिः, संहति *f.* -**Voluminous**, *a.* विस्तीर्ण, बहुपुस्तक.

Voluntary, *a.* ऐच्छिक-यादृच्छिक *f.*), इच्छा-मति-पूर्व; better ex. by 'v.-ily.' **-ily,** *adv.* यदृच्छया, इच्छापूर्वकं, स्वेच्छातः, प्र-नि-कामं, आत्मसंतोषेण. **-Volunteer,** *v. t.* अयाचितं उपानी 1 P or ऋ c. (अर्पयति) or दा 3 U or कृ 8 U. *-s.* यादृच्छिकः युयुत्सुः, स्वेच्छासैनिकः.

Voluptuary, Voluptuous, *s., a.* विषयासक्त, भोगनिरत, इंद्रियसुखासक्त, विषयिन्; *See* **Sensual.**

Vomit, *v.* उद्-,वम् 1 P, उद्-गॄ 6 P, छर्द् 10, उत्क्षिप् 6 P. *-s.* वांतं. 2 वमनं (emetic). **-ing,** *s.* वमनं, वमः-मि *f.*, वमथुः, प्रच्छर्दिका. **-ive,** *a.* वमन (नी *f.*), वांतिकर (री *f.*), वांतिकृत्.

Voracious, *a.* घस्मर, गृध्नु, अतिलोलुप, औदरिक (की *f.*); *See* **Gluttonous.**

Vortex ,*s.* भ्रमि *f.*, आवर्तः.

Votary, *s.* भक्तः, उपासकः, पूजकः; आश्रितः.

vote, *s.* संमति *f.*, संमतं. *-v. t.* संमतिं-अनुमोदनं-दा 3 U, मतं प्रकाश् c.; संमतिपूर्वं वृ 5 U or नियुज् 7 A, 10 or दा.

Votive, *a.* संकल्प-संबंधिन्-वृत्त.

Vouch, *v. t.* साक्षीकृ 8 U, प्रमाणीकृ, प्रमाणं दा 3 U. 2 दृढीकृ, द्रढयति (D.). **-er,** *s.* प्रमाणपत्रं-लेखः, साधनपत्रं-लेखः, आगमः.

Vouchsafe, *v. t.* वि-सृ 1 P, कृपया दा 3 U; (with inf.) प्र-सद् 1 P; *See* **Condescend, Please;** भगवान् मारीचस्ते दर्शनं वितरति (S. 7:) 'v.s thee an audience' 2 अनु-ज्ञा 9 U.

Vow, *s.* व्रतं, संकल्पः, प्रतिज्ञा, शपथः, नियमः; 'under a v.' व्रतबद्ध, धृतव्रत, संकल्पबद्ध. *-v.* प्रति-ज्ञा 9 A. प्रतिज्ञां कृ 8 U or आरुह् 1 P, सशपथं-सप्रतिज्ञं वद् 1 P or अभि-धा 3 U, (**Say,** q. v.); 'he has v. ed to destroy us' अस्मद्विनाशे कृतसंकल्पोसौ.

Vowel, *s.* स्वरः, अच् *m.*, अज्वर्णः.

Voyage, *s.* जलयात्रा यानं, समुद्रयानं, संयात्रा. *-v.* Ex. by कृ with (*s.*) पोतेन गम् 1 P, जलवर्त्मना गम्. **-er,** *s.* सांयात्रिकः, जलयात्रिकः.

Vulgar, *a.* ग्राम्य, असभ्य, अश्लील, अशिष्ट; प्राकृत, लौकिक (की *f.*). **-ism,** *s.* ग्राम्या रीतिः. 2 ग्राम्यशब्दप्रयोगः. **-ity,** *s.* असभ्यता, अश्लीलता. **-ly,** *adv.* साधारणतः, लौकिकरीत्या. 2 असभ्यरीत्या, ग्राम्यतया. **-ize,** *v. t.* ग्राम्यीकृ.

Vulnerable, *a.* भेद्य, धृष्य; वेध्य; 'v. point' रंध्रं, छिद्रं, मर्मन् *n.*; आवृणोदात्मनो रंध्रं रंध्रेषु प्रहरन् रिपून् (R. xviii. 61) 'guarded against his own v. points' &c.

Vulpine. *a.* धूर्त; शृगालवत्.

Vulture, *s.* गृध्रः, दाक्षाय्यः.

W

Wad, *s.* चूर्णरोधनी.

Waddle, *v. i.* हंसवत् गम् 1 P or चर् 1 P.

Wade, *v. i.* गाह् 1 P, कष्टेन गम् 1 P, कृच्छ्रेण पारं गम्.

Waft, *v. t.* वह् 1 P or c., उत्कॄ 6 P; कणवाही मालिनीतरंगाणां (S. 3); पुष्परेण्वुत्किरैर्वातैः (R. i. 38); (boat &c.) वह् c., प्रणुद् c., प्रचुद् 10, प्रेर् c.; *See* **Drive.** *-v. i.* प्लु 1 A, वायुना वह्-नी-pass.

Wag, *v. t.* सं-,चल् c., वि-,धू 5, 9 U, विक्षिप् 6 P. 'w. ging the tail' लांगूलचालनं-विक्षेपः-विधूति *f.* *-v. i.* चल् 1 P, धू pass. *-s.* परिहासवादिन् *m.* **-gish,** *a.* *See* **Witty, -Wag-tail,** *s.* खंजनः.

Wage, *v. t.* (War) विग्रह् 9 P. युद्धं आरभ् 1 A.

Wager, *s.* ग्लहः, पणः. *-v.* ग्लह्-पण् 1 A, (with gen. of thing staked).

Wages, *s.* वेतनं, भृति *f.*, मूल्यं, निर्वेशः, पणः; *See* **Hire.**

Wagon, *s.* प्रवहणं, यानं, शकटः-टं, चातुरं. **-er,** *s.* शाकटिकः, शकटवाहः, चातुरिकः.

Waif, *s.* अज्ञातस्वामिकं द्रव्यं.

Wail,-ing, *See* **Lament,-ation.**

Wain, *s.* गोवहनं, शकटः-टं.

Wainscot, *s.* भित्तिपटलं.

Waist, *s.* मध्यः-ध्यं, मध्यमः-मं, कटि-टी *f.*, कटि-देशः; 'w.-coat' कटिवस्त्रं.

Wait, *v. i.* स्था 1 P; (for) प्रति-ईक्ष् 1 A, अनु-प्रति-पा c. (पालयति) (of time and persons); 'w. for some time' कालः कश्चित्प्रतीक्ष्यतां (K. ii. 54); मां प्रतिपालय &c.; सह् 1 A, स्था,(of time only) (द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25); स्फुलिंगावस्थया वह्निरेधापेक्ष इव स्थितः(S.7) 'here is fire in the state of a spark (only) w. ing for fuel (to blaze up)'; (on or upon) उप-स्था 1 A, उप-अनु-आस् 2 A, उप-सेव् 1 A, उप-चर् 1 P; 'w. at table' परिविष् c. **-er,** *s.* सेवकः, परिवेषकः, परिवेष्टृ *m.*, (at table).

Waive, *v. t.* परि-,त्यज् 1 P; *See* **Abandon.**

Wake, *v. t.* प्र-बुध् c., जागृ c. *-v. i.* प्र-वि-बुध् 4 A, जागृ 2 P. *-s.* जागरणं; जागरः, प्रबोधः-धनं. 2 पदवी; 'follow in the w. of' पदवीं प्रतिपद् 4 A; *See* **Tread.** **-ful,** *a.* (lit.) रात्रिजागर, निद्राविमुख, विनिद्र, उन्निद्र; जागरूक, दक्ष, अवहित. सावधान. **-fulness,** *s.* जागरः-रणं, अस्वापः, अस्वप्नः, अनिद्रा, प्रबोधः, जाग्रदवस्था. 2 दक्षता, अवधानं, &c.

Walk, *v. i.* (पद्भ्यां) चर्-चल्-गम् 1 P, परि-,क्रम् 1 U, 4 P, पादाभ्यां या 2 P &c.; ' w. about ', ' w. to and fro ' परिक्रम्, इतस्ततः भ्रम् 1, 4 P; (for pleasure) वि-हृ 1 P; 'w. away,-off' अपसृ 1 P, अप-या-क्रम्-गम् &c. **-s. -ing,** *s.* पादचारः-गमनं; ' w. about ' परिक्रमः-मणं; ' taking a w. ' विहारः, विहरणं, (वायुसेवनार्थं) परिक्रमणं. 2 गमनागमनस्थानं; अध्वगमार्गः. **-er,** *s.* पादचारिन्, पा(प)दगः.

Wall, *s.* भित्ति *f.*, कुड्यं; ' enclosing w. ' प्राकारः, वरणः, सालः, प्राचीरं; ' take the w. of ' अग्रस्थानं आ-सद् c.; ' go to the w. ' अव-सद् 1 P, अवसन्न-उच्छिन्न-*a.* भू 1 P; 'drive to the w.' अव-सद् c., उच्छिद् 7 P. **-v. t.** प्राकारेण आ-वृ 5 U.

Wallet, *s.* भस्त्रा; क्षुद्रकोषः.

Wallow, *v. i.* लुठ् 6 P, लुट् 4 P; क्रीड् 1 P.

Walnut, *s.* अक्षोटः, अक्षोटं (fruit).

Wan, *a.* *See* **Pale.**

Wand, *s.* दंडः, यष्टि *f.*

Wander, *v. i.* परि-,भ्रम् 1, 4 P, अट् 1 P, वि-चर् 1 P, परि-,क्रम् 1 U, 4 P; ' w. from ' भ्रंश् 1 A, 4 P, च्यु 1 A. **-s., -ing,** *s.* परि-,भ्रमणं-अटनं. **-er,** *s.* परि-भ्रमकः, भ्रमिन् *m.*

Wane, *v. i.* परि-,क्षि 1 P or pass., ह्रस् 1 P; *See* **Decay Decline.** **-s.** क्षयः, ह्रासः. **-ed,** *a.* परि-क्षीण, क्षीणकल, प्रास[illegible]य, निष्कल, कलाशेष (चंद्रः). **-ing,** *a.* क्षयिन्, क्षय in comp.; ' w. period ' क्षयकालः, कृष्णपक्षः, बहुलः, तामिस्रपक्षः.

Want, *v.* अपेक्ष् 1 A, आ-,कांक्ष् 1 P, इष् 6 P; gen. ex. by, कार्यं, प्रयोजनं, अर्थः, किं, (with gen. of that which wants and instr. of thing wanted) ; ' I do not w. this house' ममानेन गृहेण न कार्यं, न प्रयोजनं &c.; ' why do you w. to see her ' किं तया दृष्टया (S. 2). 2 **Wish,** q. v. 3 परि-,हा pass.; हीन, रहित, निर् in comp.; आर्यस्य सुविहितप्रयोगतया न किमपि परिहास्यते (S. 1) ' nothing will be w. ing ' &c.; ' w. ing in courage ' शौर्यहीन, निर्वीर्य, &c.; ' he w.-s. wisdom स निर्बुद्धिः, ज्ञानरहितः. **-s.** अपेक्षा, प्रयोजनं, कार्यं, आकांक्षा. 2 अभावः, विरहः, अप्राप्ति *f.*, राहित्यं, हीनता. 3 न्यूनता, ऊनत्वं, अपचयः. 4 दारिद्र्यं, धनाभावः, दुर्गति *f.*, कृच्छ्रं; ' come to or reduced to w. ' दारिद्र्योपहत, भाग्यक्षयपीडितां दशां प्रपन्न (Mr. 1). **-ing,** *a.* ऊन, न्यून, विकल; *See* **Deficient.**

Wanton, *a.* विलासवत्, विलासिन्; ' w. sport ' विलसितं *See* **Playful.** 2 अनियंत्रित, निर्मर्याद, स्वेच्छाप्रवृत्त, लोल, (स्वभावलोल); स्वैरिन्, स्वेच्छाचारिन्; काम in comp.; ' a w. woman ' पुंश्चली, स्वैरिणी, बंधकी. 3 ज्ञानतः-कामतः-कृत, बोधपूर्वं कृत. 4 प्रचुर, विपुल. **-v. i.** विलस् 1 P, क्रीड् 1 P, वि-भ्रम् 1, 4 P **-ly,** *adv.* सविलासं; निर्यंत्रणं, स्वैरं, स्वेच्छया, यथाकामं; कामतः. **-ness,** *s.* विलासः, कामचारः; न कामचारो मयि शंकनीयः 'do not suspect me of w.'

War, Warfare, *s.* विग्रहः, संप्रहारः, वैरारंभः, वैरं, संग्रामः, युद्धं, रणं, (a particular battle); ' w.-cry ' सिंहनादः, क्ष्वेडा; ' w.-horse ' वारकीरः. **-v. i.** विग्रह् 9 P, युध् 4 A, कृ with (*s.*). **-like,** *a.* रणप्रिय, युयुत्सु, युद्धदुर्दम; रणोत्सुक, रणवीर-शूर; ' w. qualities ' क्षात्रधर्माः; ' w. tribe ' क्षत्रियजातिः. 2 सांग्रामिक-सामरिक -(की *f.*),

Warble, *v.* कूज् 1 P, वि-रु 2 P.

Ward, *s.* रक्षा. 2 रक्षितः पुरुषः, आश्रितः; रक्षकाधीनः, रक्ष्यः. 3 विभागः. **-v. t.** वार् 10 or वृ c., नि-प्रति-°, निरुध् 7 U, निरस् 4 U, नि-प्रति-षिध् 1 P, प्रति-हन् 2 P, व्यप-ऊह् 1 U. **-en,** *s.* रक्षकः, रक्षापुरुषः. **-er,** *s.* रक्षकः, दौवारिकः, द्वाःस्थः.

Wardrobe, *s.* वासांसि (pl.); वस्त्रसमूहः. 2 वस्त्राधानं-आधारः.

Ware, Wares, *s.* पण्यं, पण्यद्रव्यं; ' w.-house ' पण्यागारं, पण्याधानं, पण्यशाला.

Warm, *a.* तप्त, उष्ण, चंड, घर्म in comp.; fig.) तीक्ष्ण, चंड, सोत्साह. 2 घर्मार्त, आतपाक्रांत; ' grown w. ' **Angry,** q. v. **-v. t.** तप् c., ईषत् तप्; 'w. oneself' (in the sun) सूर्यातपं सेव् 1 A, (सेवयेत्पृष्ठतो ह्यर्कं H. 2); ' w. oneself at the fire ' अग्न्यातपं सेव्. **-ly,** *adv.* सोत्साहं, सस्नेहं, उष्णं &c. **-ness,-th,** *s.* तापः, उत्तापः, उष्मन् *m.*: ' w. of wealth ' वित्तोष्मा. 2 चंडता, तीक्ष्णता. 3 उत्साहः; ' w. of affection ' स्नेहातिशयः.

Warn, *v. t.* (पूर्वं) प्र-अनु-बुध् c., उप-दिश् 6 P, अनु-शास् 2 P. 2 सूच् 10, निविद्, वि-ज्ञा c. (ज्ञापयति); ' I w. ed him of the impending danger ' प्रत्यासन्नापदं तं प्राबोधयं; oft. by **Beware,** q. v.; अवहितो भव यदापत्प्रत्यासन्ना. **-ing,** *s.* प्रबोधनं, उपदेशः.

Warp, *v. t.* आ-वृत् c., संकुच् 1 P; (fig.) कलुषीकृ, दुष् c. (दूषयति). **-v. i.** आवृत् 1 A, संकुच् pass.

Warrant, *s.* प्रमाणं, अधिकारः; (written) अनुज्ञा-अधिकार-पत्रं. **-v. t.** प्रमाणं दा 3 U, प्रमाणीकृ 8 U, अधिकृ c.; *See* **Sanction.** **-ed,** *a.* सप्रमाण, साधार. **-y,** *s.* प्रमाणपत्रं.

Warren, *s.* शशकनिलयः.

Warrior, *s.* भटः, योधः, योद्धृ *m.*, वीरः, रथिन् *m.*, विक्रांतः; *See* **Hero, Soldier;** 'w. s on the enemy's side' प्रतिभटाः.

Wart, *s.* किणः, चर्मकीलः-लं, अधिमांसं.

Wary, *a.* सावधान, अप्रमत्त, दक्ष; *See* **Careful.**

Wash, *v. t.* प्र-,क्षल् 10, प्र-मृज् 2 P or c., निज् 3 U, अव-निर्-°, धाव् 1 U, 10; 'w. the mouth (after meals)' उपस्पृश् 6 P. **-s., -ing,** *s.* धावनं, प्र-,क्षालनं, मार्जनं, अवसेकः, निर्णेकः. 2 आलेपः; वि-प्र-लेपः-पनं. **-ed,** *a.* प्रक्षालित, निर्णिक्त, धौत, धावित, मार्जित &c. **-y,** *a.* जलधर्मक. **-Washerman,** *s.* रजकः, धावकः, निर्णेजकः, (रजकी, रजकवधू *f.*).

Wasp, *s.* वरटा, गंधोली. **-ish,** *a.* कर्कशस्वभाव, वरटाशील.

Waste, *v. t.* क्षि 1, 5 P or c., अव-सद् c., नश् c., क्षै c. (क्षपयति), ह्रासं-क्षयं-नी 1 P, अप-चि 5 U, व्यय् 10 (व्ययपति). 2 (Away) मुधा-व्यर्थं-हृ 1 P or गम् c., वि-क्षिप् 6 P. *-v. i.* परि-,क्षि-परिहा-अपचि-pass., क्षयं-नाशं-लयं या 2 P or गम् 1 P, विनश् 4 P, अवसद् 1 P, ह्रस् 1 P; क्षै 1 P; (in strength) अंगैः परिहा pass.; *See* **Lean.** *-s.* क्षयः, नाशः, अपचयः, व्ययः, ह्रासः, अवसादः. 2 अपव्ययः, वि-,क्षेपः, हरणं; 'w. of time' कालक्षेपः-नाशः-हरणं-यापनं; 'w. of breath' वाग्व्ययः-क्षेपः. 3 (Land) खिलं,-भूमि *f.*, मरुभूः. *-a.* उच्छिष्ट, निःसार, निर्गुण. 2 निर्जन, शून्य, खिल, अप्रहत, जंगल; 'lay w.' उप-प्लु 1 A, उप-द्रु 1 P, बाध् 1 A, पीड् 10. **-ed,** *a.* परि-,क्षीण, क्षाम, अपचित, &c. **-ful,** *a.* अपव्ययिन्, वृथाव्ययिन्, व्ययशील. **-ing,** *a.* क्षीयमाण, क्षयिन्. **-Wastepipe,** *s.* उच्छिष्टजलनाली, परि(री)वाहः.

Watch, *v.* रक्ष् 1 P, प्रति-,पा c. (पालयति); *See* **Protect.** 2 निरूप् 10, निरीक्ष् 1 A, अवेक्ष्. 3 उपास् 2 A, उप-स्था 1 A; 'w. over' अधि-ष्ठा 1 P. *-v. i.* जागृ 2 P, (fig. also), रक्षार्थं जागृ. 2 अव-धा 3 U. अवहित-सावधान-*a.* भू, 'w. for' अपेक्ष्, प्रतीक्ष्. *-s.* रक्षा, निरूपणं. 2 रक्षिन् *m.*, रक्षापुरुषः, रक्षितृ *m.* 3 जागरणं, जागरूकत्वं, दक्षता. 4 प्रहरः, यामः; 'w.-house' उद्घाटः; 'w.-man' रक्षिन् *m.*; रक्षकः; प्रहरिन् *m.*, वैबोधिकः, वैतालिकः; 'w.-word' प्रत्ययवाच् *f.* **-ful,** *a.* जागरूक, दक्ष, सावधान, अप्रमत्त. 2 प्रजागर in comp., उन्निद्र.

Water, *s.* जलं, अंबु-अंभस् *n.*, उदकं, वारि, पयस् *n.*, तोयं, सलिलं, नीरं. पानीयं, वार् *f.*, अप् *f.* (pl.) पाथस् *n.*; 'land and w.' स्थलजले; 'place where w. is distributed' प्रपा, पानीयशालिका; 'by w.' जलेन, जलवर्त्मना; 'of first w.' अनर्घ्य; 'it can hold w.' प्रमाणकोटिं प्रवहमर्हति. 2 मूत्रं, प्रस्रावः; 'make w.' मूत्रोत्सर्गं कृ; 'w.-carrier' जलवाहः, उदवाहः, दृतिहारः; 'w.-closet' शौचकूपः; 'w.-course' जलमार्गः, परि(री)वाहः; 'w.-fall' जलप्रपातः, निर्झरः; 'w.-ing place' प्रपा; 'w.-man' नाविकः, उदवाहः; 'w.-melon' गोडुंबं, सेडु *n.*, तर्बुजं, कालिंगं; 'w.-mill' जलचाल्यचक्रं, जलयंत्रं; 'w.-pot' घटः, कुंभः, कलसः-शः; *See* **Jar;** 'w.-proof' जलाभेद्य; 'w.-snake' जलसर्पः; राजिलः; 'w.-spout' जलचक्रः; 'w.-wheel' घटीयंत्रं, उदंचनयंत्रं. *-v. t.* (जलेन) सिच् 6 P, प्लु c., उक्ष् 1 P. 2 जलं पा c. or दा 3 U. *-v. i* जलं मुच् 6 P or स्रु c. or पत् c.; 'my eyes are w. ing' जललवस्यंदिनी नेत्रे. 2 लालायते (D.). **-ed,** *a.* जलभूयिष्ठ, अनूप; जलसिक्त; 'w. by rivers' नदीमातृक; 'w. by rain' देवमातृक. **-y,** *a.* जलमय (यी *f.*), जलात्मक, जलरूप; 'w. shafts' वर्षशराः, धाराशरसंपाताः. 2 जलाढ्य, बहूदक, जलभूयिष्ठ, अनूप, जलप्राय.

Wattle, *s.* काष्ठावरणं. 2 प्रशाखा.

Wave, *s.* तरंगः, ऊर्मि *f.*, वीचि-ची *f.* कल्लोलः, भंगः, भंगि-गी *f.* *-v. t.* धू 5, 9 U or c. (धूनयति), वि-आ-°, चल् c., सं-ईर् c. 2 उत्सृज् 6 P, परित्यज् 1 P. *-v. i.* इतस्ततः प्र-वि-चल् 1 P, धू pass. **-y,** *a.* तरंगित, ऊर्मिमत्, कल्लोलमय (यी *f.*), भंगिमत्, भंगुर, उन्नतानत.

Waver, *v. i.* दोलायते (D.), द्विधीभू 1 P, सं-शी 2 A, विकल्प् 1 A; 'his mind w. ed being at a loss which course to follow' इत्येकपक्षाश्रयविक्लवत्वादासीत्स दोलाचलचित्तवृत्तिः (R. xiv. 34); oft. by अनवस्थित, अकृतनिश्चय also. **-ing,** *a.* अनिश्चित, दोलायमान, संदिग्ध, अनवस्थित.

Wax, *s.* लाक्षा (for sealing). 2 सि(शि)क्थं, सिक्थकं, मधूच्छिष्टं, मधुजं. 3 कर्णमलं, तोक्मं. *-v. i.* वृध् 1 A: 'w. ing and waning,' वृद्धिक्षयौ; 'the moon w. -ed' कलावृद्धो बभूव; 'w. ing hot' क्रोधेद्धो भूत्वा. 2 सिक्थकेन लिप् 6 P or अंज् 7 P. **-en,-y,** *a.* सिक्थमय (यी *f.*), शिक्थाक्त.

Way, *s.* मार्गः, पथिन् *m.*, अध्वन् *m.*, वर्त्मन् *n.*, पदवि-वी *f.*, अयनं, सरणि-णी *f.*, पद्धति-ती *f.*, पथा; 'step in a wrong w.' अपथे पदमर्पयंति (R. ix. 74). 2 अंतरं, मार्गपर्यंतः; 'a little w.' ईषद्दूरं, स्तोकांतरं. 3 उपायः, युक्ति *f.* 4 प्रकारः, विधिः, रीति *f.*, क्रमः, मार्गः; 'a good way' अतिमंथाः,

सुपंथाः, सत्पथः, सुपथः; ' a bad or wrong w. ' अपंथाः; अपथः, व्यध्वः, दुरध्वः, विमार्गः, विपथः, कदध्वन् *m.*, का (कु) पथः; ' a place where four w. s meet ' शृंगाटकः, चतुष्पथं; ' a dreary w. ' प्रांतरं, दूरशून्योऽध्वा ' difficult w. ' कांतारः-रं, दुर्गमं वर्त्म, दुर्गसंचरः, संक्रमः. 5 (With numerals) Ex. by धा; 'in two w. s' द्विधा; शतधा &c.; 'a long w. off ' सुदूरं, ' on the w. ' अंतरा, अंतरे; 'stand or come in the (one's) w.' परिपंथिभू, अंतरायः &c. (' Obstacle', q. v.) भू; (lit.) नयनपथं-विषयं-या 2 P; ' in this, that-w. ' इत्थं-एवं, तथा; ' by w. of example ' निदर्शनद्वारा-रूपेण; ' lead the w. ' मार्गं आदिश् 6 P or दृश् c.; ' this w. ' 'this w.' इत इतः; 'by w. of' द्वारेण, रूपेण; 'make w.' अपसर, अपेहि अंतरं दीयतां; 'in every way ' सर्वथा; 'in another w.' अन्यथा; 'w.-farer' पथिकः; *See* **Traveller**; ' w.-lay ' पथि निभृतं प्रतीक्ष् 1 A (लुंठनार्थं, वधार्थं). पथि अवस्कंद् 1 P; ' w.-ward ' प्रतीप, स्वैरिन्, दुर्ललित; *See* **Obstinate**; ' w.-worn ' अध्वश्रांत, अध्वसंजातखेद.

Weak, *a.* दुर्बल, अशक्त, अबल, क्षीणबल, बल-शक्ति-हीन, निःसत्त्व, निस्तेजस्, निर्वीर्य, अल्प-बल-शक्ति. 2 (In mind) मंद, अल्पधी, विकलचित्त; ' w. point or side ' छिद्रं, रंध्रं, दोषः, मर्मस्थानं. **-en,** *v. t.* दुर्बलीकृ 8 U, शक्ति-बलं हृ 1 P, शक्तिं अव-सद् c. or अपचि 5 U; ' to be w.-ed ' अपचि pass.; *See* **Waste, Lean. -ed,** *a.* हृतबल, क्षीणशक्ति, ह्रस्व (form). **-ness,** *s.* दौर्बल्यं, बल or शक्ति-क्षयः or नाशः, असामर्थ्यं, बल-सत्त्व-हानि *f.* 2 दोषः, (यौवनदोषाः); छिद्रं.

Weal, *s.* हितं, कल्याणं, क्षेमं, श्रेयस् *n.*, भद्रं, कुशलं; ' w. and woe ' शुभाशुभं.

Wealth, *s.* धनं, द्रव्यं, वसुः, *n.* अर्थः, वित्तं, द्रविणं, संपद् *f.*, हिरण्यं, विभवः, वैभवं, संपत्ति *f.*, ऐश्वर्यं, रै *f.*, रि(ऋ)क्थं, द्युम्नं, स्वापतेयं; ' w. in cattle ' गोधनं. **-y,** *a.* धनिन्, धनिक, धन-वित्त-वत् &c., सधन, वित्तसंपन्न, सश्रीक, वसुमत्, अर्थयुक्त, विभवशालिन् and sim. comp.

Wean, *v. t.* स्तन्यं त्यज् c. or हा c. (हापयति) or विसृज् c. 2 विरक्ती-विमुखी-कृ 8 U; *See* **Separate. -ing,** *s.* स्तन्यत्यागः. 2 विरक्ति *f.*, वैराग्यं, संगत्यागः.

Weapon, *s.* शस्त्रं, अस्त्रं, आयुधं, प्रहरणं, हेति *f.*

Wear, *v. t.* परि-धा 3 U, धृ 1 P, 10, भृ 3 U, वस् 2 A. 2 (Away) क्षि 5 P, नश् c., विलुप् c., प्रमृज् 2 P or c.; घर्षणेन नश् c. 3 जीर्णीकृ 8 U. 4 अव-,सद् c. खिद् c., क्लम् c.; ग्लै c.; *See* **Fatigue. -***v. i.* (Away) क्षि pass., अवसद् 1 P, अपचि pass. 2 (By use) जॄ 4 P, जर्जरीभू 1 P; ' when the night had almost worn away ' क्षीणभूयिष्ठायां क्षपायां; ' w. off ' अपगम् 1 P, नश् 4 P, क्षि pass.; ' w. out' जीर्णी-जर्जरी-कृ, अपचि; (*v. i.*) जॄ, ज्या 9 P, जर्जरीभू. **-***s.* परि-,क्षयः, अपचयः, उपयोगः. 2 घर्षणं. 3 सेतुः, आलि *f.* **-er,** *s.* धारिन्, भृत् in comp. **-ing,** *a.* धारिन्, भृत्, धर in comp. 2 परिधानयोग्य.

